संस्कृतमहाकाव्येषु दार्शनिकीदृष्टिः

डॉ. राजेन्द्रप्रताप त्रिपाठी

संस्कृतमहाकाव्येषु दार्शनिकीदृष्टिः

लेखकः
डॉ. राजेन्द्रप्रताप त्रिपाठी
(डी.लिट्.)
साहित्याचार्यः, विद्यावारिधिः (पी.एच.डी.)
प्रभारी विस्तार भवन
सम्पूर्णानन्द-संस्कृत-विश्वविद्यालय
वाराणसी

२००१

प्रकाशक:

डॉ. राजेन्द्रप्रताप त्रिपाठी

सरस्वतीभवनम्

वाराणसी-२२१००२

❐

प्राप्तिस्थानम्

वाराणसेय संस्कृत संस्थानम्

जगतगंज, वाराणसी-२२१००२

❐

प्रथम संस्करणम् २००१

मूल्यम् २००.०० रूप्यकाणि

© डॉ. राजेन्द्रप्रताप त्रिपाठी

❐

मुद्रक:

अमर प्रिन्टिग प्रेस

जगतगंज, वाराणसी-२२१००२

Philosophical Views in the Sanskrit Mahākāvyas

(संस्कृतमहाकाव्येषु दार्शनिकीदृष्टिः)

उपहार प्रति
रा॰प्र॰त्रिपाठी
१४।४।०८

BY

Dr. Rajendra Pratap Tripathi

Sarasvati Bhavan

Sampurnanand Sanskrit University

Varanasi

2001

Published by—

Dr. Rajendra Pratap Tripathi
Sarasvati Bhavan
Sampurnanand Sanskrit University
Varanasi-221 002.

❐

Distributed by—

Varanaseya Sanskrit Sansthan
Jagathanja, Varanasi-221 002.

❐

First Edition 2001
Price : Rs. 200.00
© **Dr. Rajendra Pratap Tripathi**

❐

Printed by—

Amar Printing Press
Jagataganja, Varanasi 221002

श्रीगुरुगणेशः

राष्ट्रपतिसम्मानित-

प्रो० बटुकनाथ शास्त्री खिस्ते

- भूतपूर्व आचार्य एवं अध्यक्ष–
  साहित्यविभाग–सं.सं.वि.वि., वाराणसी
- भूतपूर्व यू.जी. सी. प्रोफेसर तथा
  शास्त्रचूडामणि प्रोफेसर
- अध्यक्ष–काशीपण्डितसभा, वाराणसी

दूरभाष : ३२१३३८ पी. पी.

'श्रीनिकेतनम्'

एन्० १६/४३, पत्रकार नगर

विनायका, वाराणसी–२२१०१०

श्रीमता डॉ० राजेन्द्रप्रताप त्रिपाठिना 'संस्कृत महाकाव्येषु दार्शनिकी दृष्टिः' इति विषयमधिकृत्य विद्यावाचस्पत्युपधिकृते प्रौढः शास्त्रसन्दर्भगर्भितः प्रबन्धः समुपस्थाप्यते। सोऽयमस्य मौलिकी कृतिरिति प्रमाणीक्रियते।

"खिस्ते" इत्युपाह्वेन बटुकनाथ शास्त्रिणा

२३–९–९१

मङ्गलाचरणम्

सिन्दूरपूरारुणचारुणवर्णं
मिलिन्दमालाकुललम्बकर्णम्।
आनन्दनं शैलपते: सुताया:
प्रणौमि हस्तीन्द्रमुखं शुभाय ।।१।।

श्रीविश्वनाथं गिरिजासनाथं
वेदादिसंवर्णितकीर्तिगाथम् ।
आराध्यमूर्ध्नाप्रचलत्तरङ्गां
स्मरामि गङ्गां कृतदुःखभङ्गाम् ।।२।।

सुचरितसुयशोधवलौ स्नेहामृतवर्षिणौ स्वपुत्रेषु ।
जननीजनकौ कलये शर्वाणि-शङ्करप्रतिमौ ।।३।।

यो मालवीयकुलजः स्मित शोभितास्यो
विद्वद्वरो विदितरामकुवेरनामा ।
तस्मादवाप्य कविता सलिलावगाहं
तत्पादपद्मयुगलं मनसाऽर्चयामि ।।४।।

साहित्यसागरसमुत्तरणैकसेतून्
सत्काव्यकल्पलतिकाप्रमदैकहेतून् ।
आराधयामि वचसा वचसामधीशान्
खिस्ते गुरून् बटुकनाथपदाभिधेयान् ।।५।।

डॉ. राजेन्द्र प्रताप त्रिपाठीन्

भूमिका

अथेदानीम् "संस्कृत महाकाव्येषु दार्शनिकी दृष्टिः" इति निबन्धः अवतार्यते। तत्र निम्नोल्लिखितमहाकाव्येषु तथा रघुवंशे, कुमारसंभवे, किरातार्जुनीये, शिशुपालवधे, रत्नाकरे, नैषधे चापि तत्तत्स्थलेषुः स्थलविशेषेषु यास्ति काचन दार्शनिकी दृष्टिः सैवाऽत्र प्रदर्श्यते। यथा कुमारसंभवे—

"जगदयोनिरयोनिस्त्वं जगदन्तो निरन्तकः।
जगदादिरनादिस्त्वं जगदीशो निरीश्वरः"॥

कुमार सं० सर्ग २ । श्लो० ९।

अस्मिन् श्लोके श्रीकालिदासः ब्रह्मणः सुगुणरूपम्, निर्गुणरूपञ्चोभयं दर्शितवान्। "जगद्योनि" रित्यनेन ब्रह्मणः सगुणरूपता, अयोनिः जगदयोनि, रित्यनेन च निर्गुण-रूपता ब्रह्मणो दर्शिता भवति। एवम् 'जगदन्त' इत्यनेन ब्रह्मणः सुगुणरूपतां, निरन्तकः = जगतो निरन्तकः, इत्यनेन च निर्गुणरूपता सिद्ध्यति। तथैव "जगदादि" रित्यनेन सगुणताऽपरर्यायभूता सविकारता = सकलता प्रोक्ता भवति। 'अनादि' रित्यनेन निर्गुण-ताऽपरपर्यायभूता = निर्विकारता निष्कलता च प्रदर्शिता भवति। एवमत्रैव श्लोके-ऽवशिष्टभागेनापि तदुभयरूपतैव विज्ञेया। तत्र प्रथमः पक्षः सगुणरूपता पक्षः भेदपक्षः द्वैतपक्षः च सर्वथा चास्ति मायापक्षः = अविद्यापक्षः। इति यथोक्तम्—

"भेददृष्टिरविद्येयं तां सदा परिवर्जयेत्"।

महोपनिषद्–५।११३।

"एकः सन् भिद्यते भाषया न स्वरूपतः"।

अन्नोपनि० ५।७।

अयम्भावः—सगुणस्य ब्रह्मणो व्याख्याने खल्वाराधकस्य कृते सन्ति साधनानि इन्द्रियप्रभृतिवर्गभूतानि, तानि चेन्द्रियाणि पुष्पपत्रस्वरूपाणि भवतः परमेश्वरस्य चरणारविन्दयोः समर्पितानि भवन्ति।

तत्र च खलु ज्ञानचक्षुषेन्द्रियेण स्वरूपदर्शनं जायते सगुणस्य ब्रह्मणः श्रोत्राभ्यां भगवतः कथाश्रवणं जायते, जिह्वया भगवन्नामोच्चारणं विधीयते, हस्तस्वरूपकर्मे-न्द्रियाभ्यां भगवतः पूजादिरूपमनित्यं कृत्यं सम्पाद्यते, पादस्वरूपाभ्यां तीर्थादिभ्रमणं सम्पाद्यते। एवं क्रमेण खलु सकलेन्द्रियाणां प्रभुसेवार्पणसंविधानमेव चास्ति परमं प्रयोजनम्। इयञ्च साकारस्य सगुणस्य ब्रह्मण उपासना कथिता भवतीति।

एवं मूर्तौ चित्तवृत्तेरेकाग्रतासम्पादनाय विराजमानायास्तस्या अदृश्यशक्तेर्यत् समुपासनं = समाराधनं, तत् सर्वं साकारोपासनाशब्देनैव व्यपदिश्यते। इयमेव पुनर्मूर्ति-पूजाशब्देन कथ्यते। इयञ्च मूर्तिपूजा स्वीयमानसिकशक्त्यनुरूपं स्वीयेष्टदेवतानुक्रमेण नानाविधानां देवतानामेव विधीयते विधातुं वा शक्यते, इति स्मार्ताः अस्मन्मार्गानु-यायिनो वदन्ति। परन्तु "भक्तिरव्यभिचारिणी" तिन्यायस्वरूपस्य वाक्यार्थस्याऽनर्थं-

मर्थान्तरं वा विदधानास्ते शैवाः, वीरशैवा वा, वैष्णवाः, वीरवैष्णवा वा केवलमेकस्यामेव मूर्तौ स्वीयमानसिकचित्तवृत्तिस्वरूपां शक्तिं स्थिरीकुर्वन्ति न तु नानाविधायां मूर्तौ। तथा सति "भक्तिरव्यभिचारिणी" इत्यस्य भगवद्वाक्यस्याऽऽनर्थक्यं प्रसज्येत।

एवं 'त्वमेव माता च पिता त्वमेव' इतिन्यायेन मातुः, पितुः, पूज्यजनस्य, साधोः, महात्मनः, ब्राह्मणस्य, रोगिणस्तथा वृद्धप्रभृतिमूर्तिमतां प्राणिनां पूजा, सेवाऽपि तस्यैव साकारस्य सगुणस्य ब्रह्मण एव निगद्यते। इत्थञ्च सर्वत्रैव महाकाव्येषु दार्शनिकदृष्टिकोणो यत्र तत्र समुपलभ्यते इति।

एतावता प्रबन्धेनेदमेवाऽऽयाति यन्महाकविः श्रीकालिदासः स्वयं महाकाव्यवेत्ता महाकविः सन्नपि प्रौढ़दार्शनिकताभूषणभूषितो निर्गुणसगुणयोरभेदं प्रतिपादयति, अभेदव्याप्यश्चाऽद्वैत इति ब्रह्माऽद्वैतसिद्धान्तः सुतरामेव समागच्छति।

सर्वोऽपि भासमानो भेदः—उपाधिकृतो वर्तते, उपाधिगलिते तत्कृतो भेदो भेदव्याप्यो वा द्वैतोऽपि गलितो भवति।

तथाचोक्तम्— "मायाऽविद्ये विहायैव उपाधी परजीवयोः।
अखण्डं सच्चिदानन्दं परं ब्रह्म विलक्ष्यते"॥

अध्यात्मोपनि० १।१२।

इत्थञ्चाऽध्यात्मोपनिषदि प्रतिपाद्यमानं भेदत्रयशून्यमखण्डम्, सच्चिदानन्देति स्वरूपलक्षणलक्षितम्, तदद्वैतं परं ब्रह्म विलक्ष्यते। तथा सति च तस्याऽनुपहितस्य ब्रह्मणो निर्गुणत्वम्, एकत्वम्, निर्विकारत्वम्, निर्विशेषत्वञ्चाऽर्थादेव सिद्ध्यन्तीति।

प्रश्नः—तस्याऽनुपहितब्रह्मणो निर्धर्मकत्वेन कथन्तत्रोपर्युक्ता धर्माः संस्थातुं प्रभविष्यन्तीत्युच्यताम् ?

उत्तरम्—निर्गुणत्वस्य गुणत्वाभावरूपतयाऽभावस्य वेदान्तनयेऽधिकरणात्मकत्वेन ब्रह्मणश्च सर्वाधिष्ठानतयाऽभावस्य ब्रह्मरूपता सिद्ध्यतीत्यन्यत्राऽस्माकं गुरुवरपं० ज्वालाप्रसादगौड़कृतन्यायसिद्धान्तमुक्तावलीटीकायां द्रष्टव्यम्।

एवमेकत्वस्य द्वित्वाभावरूपतयाऽभावस्य च प्रागुक्तदिशाऽधिकरणात्मकत्वं सुस्पष्टमेवेति तदधिकरणञ्च ब्रह्मैवेत्यभावोऽधिकरणात्मको ब्रह्मरूपः। एवमन्यत्राऽप्यनयैव रीत्या विचारो विधोयतामिति न काचिदापत्तिरनुपपत्तिर्वा। एवं महाकविः कालिदासः प्रोक्तवान्—

"आत्मानमात्मना वेत्सि सृजस्यात्मानमात्मना।
आत्मना कृतिना च त्वमात्मन्येव प्रलीयसे"॥

कुमारसं०—२।१०।

अर्थात् हे प्रभो ? लोकानुग्रहार्थं त्वमात्मानं ब्रह्मरूपेण प्रतिपादितं स्वस्वरूपमात्मनैव = स्वयमेव, वेत्सि = जानासि, तत्र नान्यापेक्षा तज्ज्ञानार्थम् कस्यचित् साधनांतरस्य। सर्वाण्यपि खल्वनित्यानि कृत्यानि भवन्ति-अर्थज्ञानपूर्वकाणि। सर्वे व्यवहारा अपि अर्थज्ञानपूर्वकत्वेनैव प्रवर्तमाना भवन्तीत्यनुभवसिद्धमेतत्। अनुभवस्य च कथमपि अपलपितुमशक्यत्वात्। तथैवाऽऽत्मनाऽऽत्मानमेव त्वं स्वयमात्मन्येव सृजसि, यतोऽधिकरणलक्षितमधिष्ठानमपि त्वमेव साक्षादसि। "स्वे महिम्नि प्रतिष्ठितम्" इति श्रुतेः प्रामा-

प्यदर्शनात्। एवमात्मना = स्वेनैव, आत्मन्येव = स्वस्मिन्नेव, प्रलीयसे। एतावता प्रबन्धेन तस्य परब्रह्मपरमेश्वरस्य नास्ति कस्यापि कार्यस्य सम्पादने परापेक्षा। सर्वथा निरपेक्षो परब्रह्मपरमेश्वरः।

तथा चोक्तम्— "तमोनिवृत्तौ सूर्यस्तु यथा नान्यदपेक्षते।
तथाऽज्ञाननिवृत्तौ तु ज्ञानं नान्यदपेक्षते॥

—सूतसंहिता

अपि च— "रसान्तराण्येकरसं यथा दिव्यं पयोऽश्नुते।
देशे देशे गुणेष्वेवमवस्थास्त्वमविक्रियः"॥

—रघु० सर्गः ९ श्लो० १७

अन्यच्चापि— "अप्रमेयो मितलोकस्त्वमनर्थी प्रार्थनावहः।
अजितो जिष्णुरत्यन्तमव्यक्तो व्यक्तकारणम्॥१८॥
सर्वज्ञस्त्वमविज्ञातः सर्वयोनिस्त्वमात्मभूः।
सर्वप्रभुरनीशस्त्वमेकस्त्वं सर्वरूपभाक्॥

—तत्रैव १९

यथैकरसस्वरूपं मधुरैकरसं वर्षाजलं दिव्यम् = दिवि भवमित्यवयवशक्त्या दिव्यम्, पयः = वर्षोदकम्, देशे देशे = सर्वत्र ऊषरादिभूमिस्वरूपेषु प्रदेशेषु, पतनशीलः सन् रसान्तराणि = विजातीयानि विलक्षणानि रसान्तराणि, अश्नुते = समवाप्नोति। एवमविक्रियः = निर्विकारः = विकारशून्यस्त्वं = निर्विशेषः सन् भवांश्चास्ति सर्वदा एकरसः। तथापि सत्त्वरजस्तमस्त्रैगुण्यसम्बन्धमापन्नो भवान् सृष्टिकर्तृत्वेन जगत्प्रभुः भवति। नाना विधानि च रूपरूपान्तराणि धारयति। एतावता प्रबन्धेन महाकविश्रीकालिदासेन स्वीयमहाकाव्येषु सर्वत्र चिन्मयस्याऽद्वितीयस्य शुद्ध-बुद्ध-मुक्तस्वभावस्य निष्कलस्याऽशरीरिणः = शरीरानवच्छिन्नस्य सर्वथाऽविच्छिन्नस्य तस्य भगवतः परब्रह्मपरमेश्वरस्य निर्विशेषस्य त्रैरूप्यकथनं सर्वथोपाधिकृतत्वेनोपाधिमेवास्तीति विज्ञेयम्। इत्थञ्च ब्रह्माऽद्वैतवादसिद्धान्तावलम्बित्वेन साहित्यशास्त्रविशारदोऽपि श्रीकालिदासः श्रीशङ्कराचार्यप्रदर्शितेन पथा चाऽस्ति सर्वथा गमनशीलो व्यवहारपरायणश्च। यतः श्रीकालिदासस्तस्यैव नित्यशुद्ध-बुद्ध-मुक्तस्वभावस्य ब्रह्मणः स्वास्तित्वसम्पन्नस्य निर्गणस्य, सगुणस्य च ब्रह्मणोऽद्वैतवादं समुपस्थापितवान् व्यवस्थापितवांश्चेति बोध्यम्।

"जगद्योनिरयोनिस्त्वम्" कु०सं०स० २, श्लोके ९—एवम्-"सगुणनिर्गुणस्वरूपं ब्रह्मेति, त्रिपाद्विभूतिम० ना० उपनिषदि तथा प्रागुक्तवचनेन श्रीकालिदासो ब्रह्मणो द्विविधं रूपं दर्शितवान्। तत्र सत्, चित्, आनन्देतिस्वरूपलक्षणलक्षिते ब्रह्मणि मिथ्याभूतस्य वास्तविकसत्ताशून्यस्य जगतो या भ्रमात्मिका प्रतीतिर्जायते साऽध्यासजन्येति गीयते! सा च प्रतीतिर्नास्ति विकाररूपा, परिणामरूपा वेति विवर्तरूपा सा वक्तव्या। यतः विकारस्य परिणामस्य वा तात्त्विकत्वम्, अन्यथाभावरूपत्वञ्चाऽभ्युपगन्तव्यम्। यथा मृत्तिकाया विकारः परिणामो वा घटो भवति, नहि घटो मृदो विवर्त इति वक्तुं शक्यते तस्य तात्त्विकत्वात्। एवं दधि भवति दुग्धस्य विकारः परिणामो वा

नहि तस्य विवर्तरूपतां व्याहर्तुं प्रभवति कश्चिद् विपश्चिद्। विवर्तश्चास्ति रज्जौ सर्पः, एवं शुक्तौ रजतमपि विवर्तभूतम्। तयोर्द्वयोरेवाऽतात्त्विकत्वेनाऽन्यथाभावरूपत्वात्।

तथैव चराचरात्मकस्यास्य दर्शनविषयीभूतस्य जगतोऽपि ब्रह्मणो विवर्तभूतत्वं स्वीक्रियते न विकारत्वमिति। अयं सर्पः इत्याकारिकायां सर्पत्वप्रकारिकायाम् इदन्त्वावच्छिन्नविशेष्यिकायां भ्रान्तिरूपायां बुद्धौ सत्यामेव रज्जौ सर्पो भासमानो भवति। नत्वन्यथा, अर्थाद् भ्रमनिवृत्तौ जायमानां केवलं रज्जुमात्रमेवाऽवशिष्यते सन्तिष्ठते च।

एवमेवाऽविद्यानिवृत्तौ जायमानायामपि ब्रह्मस्वरूपाऽधिष्ठानसाक्षात्कारे सति प्रपञ्चात्मकजगन्निवृत्तौ सत्यां केवलं ब्रह्मैव सन्तिष्ठते। इत्थञ्च दृश्यमानं वास्तविक सत्ताविहीनत्वेनाऽसदिदं प्रपञ्चात्मकं जगत् वर्तते खलु ब्रह्मणो विवर्तभूतम् इत्यस्य जगतो ब्रह्मणो विवर्तरूपताऽभ्युपगमेनैव निर्विशेषत्वम्, निर्विकारत्वञ्च सिद्धयतीति जगतोऽर्थादेव मिथ्यात्वमायाति मिथ्याचारविचारिते।

एवञ्च सति मिथ्यात्वमापन्ने जगति चरन्तो विचरन्तो भ्रमन्तश्च मानवा अहर्निशमनिशं नहि कदापि कथमपि कुतोऽपि केनापि विश्रमसुखशय्यामधिष्ठातुं प्रभवन्ति प्रभविष्यन्ति वेति नूनं विभावयन्तु। तादृशविश्रामसुखशय्याधिष्ठानशक्त्यभावस्य कारणं केवलमविद्यैव = मायैव = अज्ञानमेव।

सा च मायाऽपरपर्यायभूताऽविद्या, आहोस्वित् अविद्यापरपर्यायभूता माया न भावभूता नाऽप्यभावभूता किन्तु भावाऽभावविलक्षणा सदसद्भ्यां सर्वथा निर्वक्तुमशक्या। तथा तस्य परब्रह्मणो भिन्नत्वाऽभिन्नत्वेऽपि, निरूपयितुमशक्या चेयं त्रिगुणात्मिका जगतो मूलकारणीभूता प्रभूताऽव्यक्ता[1] माया प्रकृत्यादिशब्दव्यपदेश्या भवतीति भावः।

अनयोरेतावांस्तु विशेषः यत् विशुद्धसत्त्वप्रधाना माया, मलिनसत्त्वप्रधाना चाविद्या। उभयोरेवाऽज्ञानरूपत्वेन मायाऽविद्ययोर्नास्ति परमार्थतो भेदोऽस्मिन् नये। इयमेव जीवेश्वरयोर्भेदं समुत्पादयति, अर्थात् मायोपाध्यवच्छिन्न आत्मा ईश्वर उच्यते, अविद्योपाधिक आत्मा जीव इति च निगद्यते। तथा चोक्तम्—

'मायान्तु प्रकृतिं विद्यान्मायिनन्तु महेश्वरम्'।

श्वेताश्वतरोपनि० ४।१०।

तस्या मायायाश्च स्तो द्वे शक्ती—

(१) आवरणशक्तिरित्येका—

(२) विक्षेपशक्तिश्च द्वितीया—तथाचोक्तम्

'शक्तिद्वयं हि मायाया विक्षेपाऽऽवृतिरूपकम्।
विक्षेपशक्तिर्लिङ्गादि ब्रह्माण्डान्तं जगत्सृजेत्॥
अन्तर्दृग्दृश्ययोर्भेदं बहिश्च ब्रह्मसर्गयोः।
आवृणोत्यपरा शक्तिः सा संसारस्य कारणम्॥

दृग्दृश्यविवेकः, १३।१५।

---

१. अव्यक्ता हि माया तत्त्वान्यत्वनिरूपणाशक्यत्वात्। ब्र० सू० १।४।३।

एवञ्चाऽऽवरणशक्तिसमन्वितो हि लोकः, शुद्धम्, बुद्धम्, मुक्तस्वभावं नित्यमात्मानं खल्वशुद्धम्, अबुद्धम्, इत्यादिरूपेण तद्विपरीतमेवाऽङ्गीकरोति, हार्दिकभावभावितान्तःकरणाश्च ते मन्यन्ते।

एवं विक्षेपशक्तिश्च तत्र लिङ्गादिब्रह्माण्डान्तं प्रपञ्चात्मकं जगत् सृजति, येनाऽखिलोऽयं जागतिकः प्रपञ्चो भवति। अतश्च सिद्धमिदं यदावरणशक्तिसमन्वितेयं माया नामरूपात्मकं चराचरस्वरूपं जगदिदं रचयति, येन तद्भासमानं भवति न तु प्रमीयमाणं तद् भवति, अत एव तन्मिथ्येति गीयते।

इत्थञ्च चलन्तो, विचरन्तो, भ्रमन्तो, जागतिकेन सन्तापेन सन्तपन्तो, ज्ञानविज्ञानवैभवं पश्यन्तो दर्शयन्तो, निद्रावन्तो ह्युपविशन्तो महाकाव्यशास्त्रविनोदेन कालं यापयन्तः सर्वेऽपि पण्डिताऽपण्डिताश्च मानवाः सर्वथा सन्ति मायावन्तो मायिनो मायाजालजवनिकायां प्रोर्णुविताः साक्षान्मायास्वरूपास्ते नहि कथमपि कदापि ते सुखं लभन्ते इति।

पारमार्थिकदृष्टितो विचार्यमाणे महीधराणां गगनस्पर्शिशिखराण्यपि माया, पाताललोकेषु मलिनसत्त्वाऽसत्त्वा अपि माया, स्वीयाऽमृततुल्यपयःपानविधानपरायणा गावोऽपि माया, भयङ्करमदमत्तदन्तप्रहारद्वारा प्रहारकारिणो हस्तिनोऽपि माया, तेषां हस्तिनां गण्डस्थलविदीर्णविधायिनो हिंसकाः सिंहादयोऽपि माया,एवमन्ये पशुपक्ष्यादयोऽपि माया, माताऽपि माया, पिताऽपि माया, भ्रातापि माया, जामातापि माया, दुहितापि माया, कान्तापि माया, कान्तोऽपि माया, भोगविलासोऽपि माया, मथुरानिवासिनश्चौबे 'पदाभिधेयतां गता अपि माया, तेषां क्षीरभोजनमपि माया, तेषां जठरोऽपि माया, शष्कुल्यपि माया, मणिकर्णिकापि माया, वियोगवशसाश्रुनेत्रोऽपि माया, गान्धी अपि माया, गोडसेऽपि माया, राजगुरुरपि माया, कचौड़ीवीथिकाऽपि माया, तत्र च विशालवपुष्मन्तोऽपि माया, विशाल-विपुलजठरवन्तोऽपि माया, एवं तदुपरिहस्तप्रसारवन्तोऽपि माया, किमधिकं वयं ब्रूमहे—"मायावीव विजृम्भयत्यति महायोगीव यः स्वेच्छेया"।

तै० उ०

अपि च—"परमेश्वराश्रया मायामयो महासुषुप्तिः यस्याः स्वरूपप्रतिबोधरहिताः शेरते संसारिणो जीवाः"।

ब्रह्म सू० १।४।३। शां० भा०

"अविद्यात्मिका हि बीजशक्तिरव्यक्तशब्दनिर्देश्या"

तत्रैव पश्यन्तु—

इयञ्चाऽविद्या पञ्चनामभिर्निर्दिष्टा चास्त्यधस्तात्। तथाहि—

(१) "नामरूपम्" (२) "महासुषुप्तिः"
(३) "निद्रा" (४) "अव्यक्तम्"
(५) "प्रकृतिः" (६) "माया"
(७) "अविद्या" (८) "अव्याकृतम्"
(९) "अग्रहणम्" (१०) "तमः"

(११) "शक्ति" (१२) "अक्षरम्"
(१३) "कारणम्" (१४) "आकाशम्"
(१५) "लयः"

इयमेवाऽविद्यापरपर्यायभूता माया खलु अश्वघोष, भारवि, भर्तृहरि, कालिदास-प्रभृतीनां महाकवीनां मायाविनां महाकाव्येषु, तत्त्वाऽन्वेषणनिर्देशविधाने प्रवृत्तिं जनयति।

श्रीअश्वघोषश्चासीदेको महान् ख्यातिप्राप्तो बौद्धविद्वान्। स च बौद्धदार्शनिक कविर्बौद्धदार्शनिकश्च श्रूयते। उभयत्रैव महदेव वैशिष्ट्यं दधानोऽयमश्वघोषोऽप्यश्ववदेव घोषयन् कवित्वशक्तिजन्यविनोदेन दर्शनशास्त्रविनोदेन च स्वीयं कालं यापयन् प्रौढ़िं प्रसिद्धिं लभमानो बभूव।

अयञ्च श्रीअश्वघोषो महाकविः श्रीकालिदासस्य कतिपयशताब्द्याः पूर्वमेवाऽऽसीदिति चापि केवलं श्रूयते एवेति ध्येयम्। तथा चीनीपरम्परागत कथामाश्रित्य कनिष्कस्य राज्ञः समकालीनोऽयमासीदित्यहं सर्वथाऽप्रामाण्यनिश्चयानास्कन्दितया व्याहर्तुं शक्नोमि। तथाऽयं बौद्धविद्वान् स्वीयाऽऽर्थिकपरिस्थितेर्दुर्बलत्वेन तमेव कनिष्कराजानं समाश्रयन् अपि श्रूयते।

अपि चाऽयं महानुभावो बौद्धविद्वान् श्रीअश्वघोषः प्रागवलम्बितहिन्दूसनातनधर्म-ग्रन्थसम्बन्धितशास्त्रीयवैदुष्यधनबलसम्प्राप्त्यनन्तरकालावच्छेदेनैव खलु बौद्धधर्ममाश्रितवानित्यपि चास्त्यस्यमहाशयस्य विषये महतीं ख्यातिं प्राप्ता किम्बदन्तीति।

साकेतग्रामे स्वीयां जनिं लभमानोऽयं श्रीघोषः प्रातः स्मरणीयायाः "श्रींसुवर्णाक्षी" नाम्न्याः स्वीयमातुर्नामधेयं तदीयां कुक्षिञ्च सफलीकुर्वाणो मातुर्यशः शरीरं साभिधानं सर्वथाऽजरममरं सालङ्कृतञ्च कृतवान्।

अपि च सा स्वनामधन्या वदान्या हिन्दूधर्मावलम्बिनी सती सत्यधर्मपरायणा साध्वी 'श्रीसुवर्णाक्षी' आस्तिकशास्त्रविधानोक्तं कर्म मनसा, वाचा, कर्मणा, कर्तुं सर्वथा सावधानाऽहर्निशमनिशं प्रभोर्गुणगणवर्णनपरायणा चासीदिति श्रूयते स्म।

अत एव महाकवेर्दार्शनिकप्रवरकविचक्रवर्तिनः श्रीअश्वघोषस्य 'ब्रह्माद्वैतसिद्धान्त' गर्भितां तां दार्शनिकीं दृष्टिं समुपस्थापयामः—

'रिरंसा यदि ते तस्मादध्यात्मे धीयतां मनः।
प्रशान्ता चानवद्या च नास्त्यध्यात्मसमा रतिः'॥

सौन्दरनन्दे—सर्गः—११, ३४

अनेन पद्यात्मकेन श्लोकेन श्रीअश्वघोषः स्वीयां ब्रह्माऽद्वैतसिद्धान्तपरिपूर्णां दार्शनिकीं दृष्टिमाह। अर्थात् यदि ते रिरंसा = रमणविषयिणीच्छा, वर्तते, तस्मात् = तस्माद्धेतोर्वा अध्यात्मे = आत्मसम्बन्धिनि विषये वैराग्ये, चित्तवृत्तिनिरोधात्मके वा योगे आहोस्वित् अध्यात्मे = आत्मज्ञाने। अवश्यमेव मनः = चित्तम्। धीयताम् = दीयताम्। यतोऽध्यात्मे या चास्ति रिरंसा सा सर्वथा प्रशान्ता = प्रकर्षेण शान्तिपूर्णा = सर्वथा शान्तिप्रदायिनीत्यर्थः। यतः सा अनवद्या = निर्दोषा = सर्वथा दोषरहिता =

सर्वतो भावेन दोषानवच्छिन्नेत्यर्थः । अतः अध्यात्मसमा = आत्मसम्बन्धिविषयनिरूपित-सादृश्यावच्छिन्ना, अथवा आत्मज्ञानसमा रतिः = प्रेमविशेषः नास्ति ।

अमुमेव विषयं सुस्पष्टीकृतवान् सच्चिदानन्दो भगवान् श्रीकृष्णः स्वयमेव । यथा–अध्यात्मनित्याः' इत्यादिः । अर्थात् अध्यात्मम् = आत्मज्ञानम् = सर्वत्र ब्रह्ममात्रदर्शन-लक्षणम्, तत्रैव नित्याः = निरताः, आत्मारामा एते इत्यर्थः । अर्थात् ब्रह्मणो विवर्तभूतं चराचरात्मकप्रपञ्चस्वरूपं सर्वं जगदिदम्, अहञ्चापि ब्रह्मैवेत्येवंरूपेण सर्वत्र स्वस्मिन्नपि च 'सर्वं खल्विदं ब्रह्म' तथा 'अहं ब्रह्मास्मि' इत्याकारिकां ब्रह्मप्रतीतिं द्रढ़ाकर्तुं नैरन्तर्यैण ब्रह्मनिष्ठायामेव परिनिष्ठितास्तेऽध्यात्मनित्या आत्मज्ञाननिरता आत्माभिरामा अविद्या-जन्यान् कामादीन् सांसारिकांश्च सर्वानेव विषयान् परित्यजन्ति । तथा चोक्तम्—

'सर्वं ब्रह्मेति यस्यान्तर्भावना सा हि मुक्तिदा' ।

महोपनि० ५।११३ ।

अपि च—'अहं ब्रह्मास्मि मन्त्रोऽयं देहदोषं विनाशयेत् ।
अहं ब्रह्मास्मि मन्त्रोऽयं मृत्युपाशं विनाशयेत् ॥

तेजोविन्दूपनि०

एवम्—'अहं ब्रह्मास्मि मन्त्रोऽयं द्वैतबुद्धिं विनाशयेत्' ।

तत्रैव

'अहं ब्रह्मास्मि मन्त्रोऽयं भेदबुद्धिं विनाशयेत्' ।—तत्रैव
'अहं ब्रह्मास्मि मन्त्रोऽयं चित्तबन्धं विनाशयेत्' ।
अहं ब्रह्मास्मि मन्त्रोऽयं सर्वशोकं विनाशयेत्' ।
अहं ब्रह्मास्मि मन्त्रोऽयं ज्ञानानन्दं प्रयच्छति' ।
'सर्वान् मन्त्रान् समुत्सृज्य एवं मन्त्रं समभ्यसेत्' ।
'सद्यो मोक्षमवाप्नोति नात्र सन्देहमण्वपि' ।—तत्रैव
'रतिर्बलोदिता याऽसौ ब्रह्माभ्यासः स उच्यते' ।

योग बा० ३।२२।२९ ।

एवमन्यत्रापि–'अहं ब्रह्मास्मि'—वृहदारण्यकोप० १।४।१० ।
'अहं ब्रह्म परं धाम ब्रह्माहं परमं पदम्' ।

श्रीमद्भा० १२।५।११ ।

अपि च—'ब्रह्मैवाऽक्षरं ब्रह्म वासुदेवाख्यमद्वयम्' ।

नारदपरिव्राजकोप०—३।३० ।

'अहमेव गुणातीतः अहमेव परात् परः' ।

तेजोविन्दू प० ६।४४ ।

'अहमेव हरिः साक्षादहमेव सदाशिवः' । तत्रैव ६।४४ ।
'सच्चिदानन्दरूपमिदं सर्वम्' ।

नृसिंहोत्तरतापनीयोप०—७

इत्थञ्चोपर्युक्तदर्शितभावनया भावितान्तःकरणाः ब्रह्मनिष्ठाः परिनिष्ठिता एव खलु विनिवृत्तकामा अर्थात् विशेषरूपेण निवृत्ताः कामाः = बाह्यवासना येषान्ते अर्थात्

नित्यनिरन्तरसमाधिनिष्ठया निर्दग्धाऽहमादिसर्ववासनाग्रन्थयस्ते यतयो वा योगिनो वाऽव्ययं पदं प्राप्नुवन्ति। अर्थात् उपाधिविनिर्मोकेण भेदात्मकाऽऽभासपरिच्छिन्नतया भासमानं सर्वं परित्यज्य पूर्णतां ते प्राप्नुवन्ति। अर्थात् नित्य, शुद्ध, बुद्ध, मुक्तस्वभावं सच्चिदानन्दैकस्वरूपलक्षणलक्षितं तदद्वैतं परं ब्रह्म समवाप्नुवन्तीति तु परमार्थः।

अयमेव खलु भगवता श्रीकृष्णचन्द्रेण मथुराचन्द्रेण निर्दिष्टो ब्रह्माऽद्वैतसिद्धान्तवादः श्रीअश्वघोषेणापि—

'रिरंसा यदि ते तस्मादध्यात्मे धीयतां मनः'।

इत्यादि 'सौन्दरनन्द' ग्रन्थोक्तः सर्वथा स्वीकृतः।

अपि च पुनस्तमेव परमदार्शनिकदृष्टिस्वरूपमद्वयपरमार्थतत्त्वमेकं ब्रह्म विशिष्य प्रतिपाद्यते। यथाहि—

'आकाशसममात्मानं संक्षिप्य त्वपरो बुधः।
तदेवानन्ततः पश्यन् विशेषमधिगच्छति'॥

बुद्धचरिते—स० १२, श्लो० ६२।६२

अपि च—'अध्यात्मकुशलेष्वन्यो निर्वर्त्यात्मानमात्मना।
किञ्चिन्नास्तीति संपश्यन्नाकिञ्चिन्य इति स्मृतः॥

—सौन्दरनन्दः

अपि च पुनस्तत्रैव—

"एतत्तत्परमं ब्रह्म निर्लिङ्गं ध्रुवमक्षरम्।
यन्मोक्ष इति तत्त्वज्ञानं कथयन्ति मनीषिणः"॥ —तत्रैव श्लो० ६५

श्रीअश्वघोषस्येदमस्ति कथनं यन्मोक्षस्तत्त्वज्ञानोत्तरकालावच्छेदेनैव जायते न तु तदव्यवहितोत्तरकालावच्छेदेनापीति। तत्रापि तत्त्वज्ञानोत्तरलम्बायमानकालावच्छेदेनैवेति विज्ञेयम्। तच्च तत्त्वज्ञानं स्वोत्पत्तौ भेददृष्टिं नापेक्षते। तथा भेददृष्टिव्याप्यं द्वैतमपि नाश्रयते इत्यतः पारिशेष्यात् ब्रह्माऽद्वैतसिद्धान्तवादः समागच्छति। स एव च सिद्धान्तः श्रीअश्वघोषेणाऽप्यङ्गीकृतः।

तत्रैव पुनर्नैयायिकप्रभृतयो दार्शनिकाः समाक्षिपन्ति, तर्केण द्वैतं भेदञ्च साधयन्ति। तदुपरि श्रीघोषो ब्रूते—

खिन्नस्य सुप्तस्य च निर्वतकस्य—
बाधं यथा संजनयन्ति शब्दाः।
अध्यात्ममैकाग्र्यमुपागतस्य—
भवन्ति बाधाय तथा वितर्काः॥

—सौ० नं० १७।४६

अर्थात् यथा खेदावस्थां गतस्य तथा सुप्तस्य च पुरुषस्य यथा शब्दा बाधां जनयन्ति। एवमेवैकाग्र्यमध्यात्ममुपागतस्यापि यतेर्योगिनो वाऽध्यात्मनिष्ठैकाग्र्य वितर्का बाधाय बाधोत्पादनद्वारा विघ्नकारका भवन्ति। यथा स्वयमेवोक्तवान् श्रीहर्षः—

"नैषा मतिस्तर्केणापनेया" इति।

खण्डन खं० प्रत्यक्ष बा०

चतुर्थोऽध्यायः

सर्वेषामेव भावानां सुखदुःखोभयजनकत्वं ब्रूते श्रीघोषः—

कामेष्वनैकान्तिकता च यस्मा—
दतोऽपि मे तेषु न भोगसंज्ञा ।
य एव भावा हि सुखं दिशन्ति—
ते एव दुःखं पुनरावहन्ति ॥

बुद्ध च० सर्गः ११, श्लो० ४१

अर्थात् कामानां तृष्णापरपर्यायभूतानां नानुभूयते क्वाप्यन्तः अतस्तेषां सर्वथाऽनैकान्तिकत्वेन तेषु नास्ति भोगसंज्ञा इति तेषां खल्वानन्त्यमेवास्ति भोगसंज्ञात्वाभावे हेतुः ।

अपि च तेषामिच्छापरपर्यायभूतानाम् आहोस्वित् तृष्णापरपर्यायभूतानां कामानां भोगसंज्ञात्वाभावे हेत्वन्तरमिदमपि निर्धार्यतां यत्ते कामाः पुनर्दुःखमावहन्ति । सकलानान्तेषां भावभूतानां कामनां विषयिस्वरूपाणां त्रिगुणात्मकत्वेन य एव सन्ति भावप्रभाविताः कामादिलक्षणलक्षिताः प्रागुक्ताः पदार्थास्ते सुखमपि दिशन्ति, ते एव खलु कालान्तरे दुःखमपि पुनरावहन्ति रजोगुणाधिक्येन प्राबल्येन वाऽतस्ते कामा नहि भोगसंज्ञात्वेन निर्दिष्टाः सन्ति ।

अपि च विषयमिममेव पुनर्द्रढयति—

गुरूणि वासांस्यगुरूणि चैव-
सुखाय शीते ह्यसुखाय घर्मे ।
चद्रांशवश्चन्दनमेव चोष्णे-
सुखाय दुःखाय भवन्ति शीते ॥

तत्रैव सर्गः ११, श्लो० ४२,

अयमाशयः—गुरूणि = औष्ण्यदायकानि, जनकानि वा कम्बलप्रभृतीनि वासांसि = वस्त्राणि । शीतकाले सुखं प्रयच्छन्ति, तान्येव च पुनः घर्मे दुःखम् । एवमेव चन्द्रांशवश्चन्दनमेव वोष्णकाले सुखाय भवन्ति, शीतकाले च दुःखाय भवन्तीति स्वयमेव विज्ञेयम् । इत्यतस्ते कथमपि न सुखं नापि च शान्तिमेवानुभवन्ति । यदपि सुखमनुभवगोचरीभूतं भवति तत् केवलं सुखाभासरूपमेव ।

अयञ्चास्ति द्वैतपक्षीयो भेदपक्षीयश्च विषविषयः । स चास्ति सर्वथा हेयत्वेनाऽनादरणीयतां गत इति । अत एव श्रीअश्वघोषस्तद्विरुद्धपक्षीयं ब्रह्माऽद्वैतसिद्धान्तमङ्गीकृतवान् ।

अयमपि महाकविः श्रीकालिदासः, श्रीशङ्कराचार्यसंमतं ब्रह्माऽद्वैतसिद्धान्तमेव स्वीकरोति समर्थयति च । श्रीशङ्कराचार्यः ज्ञानस्यैव = आत्मज्ञानस्यैव, भवबन्धनिवर्तकत्वं कथयति । तत्र भारवेर्मतपुष्टिसम्पादकं श्रुतिप्रमाणमप्याह—

'अज्ञानादेव हि संसारो ज्ञानादेव विनश्यति' ।

योगतत्त्वोप० १।१६ ।

एवम्—'परमाद्वैतविज्ञानात् संसारः प्रविणश्यति' । सू० सं०

तदेव शङ्करसम्मतब्रह्मविषये स्वीयं मतं दर्शितवान् महाकविः श्रीकालिदासः। तथाहि—

'वीतराजन्मजरसं परं शुचि-
ब्रह्मणः पदमुपैतुमिच्छताम् ।
आगमादिव तमोपहादितः-
सम्भवन्ति मतयो भवच्छिदः ॥

किरातार्जु० सर्गः ५, श्लो० २२

अर्थात् वीते = निवृत्ते, जन्मजरसी = जन्मवृद्धत्वे, यस्य तदित्यर्थः । इमे च जन्मवृद्धत्वेऽपि स्तः खल्वज्ञानविजृम्भिते । ब्रह्मणः = सच्चिदानन्देतिस्वरूपलक्षण-लक्षितस्य तस्य परब्रह्मपरमेश्वरस्य परमात्मनस्तादात्म्यापन्नं यत् परम् = सर्वोत्कृष्टं निरतिशायि शुचि = सर्वथा निष्कलङ्कम् । पदम् = हिमालयनामकं स्थानम्, ज्ञानलक्षण-लक्षितरसस्वरूपब्रह्मतादात्म्यापन्नमित्यर्थः । मोक्षपदाभिधेयमिति तु परमार्थः । उपेतुम् = प्राप्तुम् । इच्छताम् = इच्छावताम्, मोक्षविषयिणीच्छावतां मुमुक्षूणामित्यर्थः । अज्ञान-स्वरूपं तमोन्धकारम्, सर्वथा निराकरोति इति यावत् । अर्थात् आगम = दर्शनशास्त्र-विधानोक्तसत्कर्मानुष्ठानेनाऽज्ञानापरपर्यायभूताऽविद्याजन्यकुमार्गगामित्वरूपाऽन्धकारस्व - रूपस्य जगतो निवृत्तिर्जायते इति ।

'सम्भवन्ति मतयो भवच्छिदः' इति पद्यघटकीभूतं 'मतयः' इति पदं तत्त्वज्ञान-रूपार्थसूचकमिति । 'मतयः' तत्त्वज्ञानानि = आत्मज्ञानानि । भवच्छिदो भवन्ति ।

एतावता कथनात्मकेन प्रबन्धेनेदमेव विज्ञायते यत् न केवलमयं नगाधिराजो हिमालयोऽस्ति कश्चित् स्थानविशेष एव क्षेत्रविशेष एव अर्थात् नास्ति केवलं भोगभूमि-रेव किन्तु मोक्षक्षेत्रमपि = मोक्षधामापीत्यर्थः ।

अतश्च पारिशेष्यात् ज्ञानस्यैव = आत्मज्ञानस्यैव । भवबन्धनिवर्तकत्वं सिद्धयति । तथा चोक्तम्—

'ज्ञानयज्ञोडुडयेनैव ब्राह्मणो वाऽन्त्यजोऽपि वा ।
संसारसागरं तीर्त्वा मुक्तिपारं हि गच्छति ॥

—सू० सं०

अपि च—सच्चिदानन्दोऽपि भगवान् श्रीकृष्णचन्द्रः स्वयं ज्ञानस्य महत्त्वं वर्णित-वान् । तथाहि—

इदं ज्ञानमुपाश्रित्य मम साधर्म्यमागताः ।
सर्गेऽपि नोपजायन्ते प्रलये न व्यथन्ति च ॥

श्रीमद्भगवद्गीता—१४।२ ।

ब्रह्मवेत्तारोऽपि शुकदेवप्रभृतयोऽपि मुनयः, एवं तदन्येऽपि तादृशधर्मावच्छिन्ना मुनयः पुनरावृत्तिराहित्यकारणीभूतं नित्यनिरतिशयानन्दरूपमिदं ज्ञानमुपाश्रित्यैव सर्वाभ्यः सिद्धिभ्योऽप्युत्तमां विदेहमुक्तिलक्षणां विदेहस्वरूपां सिद्धिं गताः सन्तः पूर्णत्वं समवाप्नुवन्ति । तेन च सर्गेऽपि नोपजायन्ते प्रलयेऽपि न व्यथन्ति च । उक्तञ्च—

'भूयस्ते न निवर्तन्ते परावरविदो जनाः'।

कुण्डिकोप० २२।

अपि च—'ब्रह्म सम्पद्यते योगी न भूयः संसृतिं व्रजेत्'। तत्रैव—

श्रीकालिदासीयकुमारसंभवप्रभृतिमहाकाव्यतः श्री टी० वी० रामचन्द्रदीक्षित-लिखितकालिदासदर्शनतश्चाऽन्यदीयमहाकाव्याऽपेक्षया च किमपि वैजात्यमेव प्रतीयमानं भवति। तच्च वैजात्यं यथा कुमारसंभवस्येन २।१०। पद्यात्मकेन श्लोकेन तत्र महाकविः श्रीकालिदासः खलु जीवस्य प्रागभावप्रतियोगित्वरूपजन्मनः स गुणांश्चापेक्ष्य = कृतिस्वरूपगुणांश्चापेक्ष्य परब्रह्मपरमेश्वरे ध्वंसप्रतियोगित्वरूपलयस्य च वर्णनं कृतवान्। एतेनापि श्रीकालिदासस्य ब्रह्माऽद्वैतसिद्धान्तो नैव भज्यते। वैशद्यञ्च तत्रैव विलोक्यताम्।

श्रीकालिदास, श्रीभारवि, श्रीदण्डिप्रभृतयो ये सन्ति महाकवयस्तेषां कृतीरपेक्ष्य गुणांश्चापेक्ष्य, कृतिस्वरूपगुणांश्चापेक्ष्य श्रीमाघस्य महाकवेः कृतिनिष्ठं महत्त्वं किमप्यपूर्वमेव प्रतिभाति। यथोक्तवान् चतुर्णामेव विदुषां वैदुष्यवेत्ता—

उपमा कालिदासस्य भारवेरर्थगौरवम्।
दण्डिनः पदलालित्यं माघे सन्ति त्रयो गुणाः॥

अत एव प्रागुक्तकृतिस्वरूपगुणगणविशिष्टस्य तस्य माघस्यापि स्वयं माघविनिर्मित 'शिशुपालबध' नामकमहाकाव्यनिष्ठवैशिष्ट्यप्रकाशकत्वेन प्रागुक्तकृतिस्वरूपगुणगणविशिष्टत्वेन च काव्येष्वस्यैव महत्त्वं विशेषतो ब्रूते—

'काव्येषु माघः कविकालिदासः' इति।

—श्रुतमात्रम्

अपि च—'तावद्भाभारतेर्भाति यावन्माघस्य नोदयः'

—इत्यपि श्रुतमात्रमेव

श्रीमाघकविना विरचिते 'शिशुपालबध' नामके महाकाव्ये

'सोऽहं स च त्वं स च सर्वमेतत्
आत्मस्वरूपं त्यज भेदमोहम्"।

विष्णुपुराणे—२।१६।२३।

एवम्—'तस्मादद्वैतमेवाहुः मुनयः परमार्थतः।

—अद्भुतरामायणम्

इत्यादिरूपेण कालिदासाऽश्वघोषभारवीणां त्रयाणां महाकवीनां महाकाव्येषु यथाऽऽत्मन ऐक्याऽनुभवेन ब्रह्माऽद्वैतसिद्धान्तवादः समनुभूयते, आत्मनो विभुत्वम्, सच्चिदानन्दरूपत्वम्, सर्वात्मकत्वञ्चाऽनुभवगोचरीक्रियते न तथाऽत्र श्रीमाघो ब्रह्माऽद्वैतसिद्धान्तं स्वीकरोति।

अत्र तु माघीये महाकाव्ये "शिशुपालवध" नामके केवलं श्रौतस्मार्तप्रभृतियज्ञयागादिकर्मणां विशेषतोऽनुष्ठानविधानपरम्परायाः एव खलु श्रवणात् द्वैतवादो भेदवादश्चाङ्गीक्रियते माघेनेति सुस्पष्टमेव। तथाहि—

सप्ततन्तुमधिगन्तुमिच्छतः—
कुर्वनुग्रहमनुज्ञया मम ।
मूलतामुपगते प्रभो त्वयि—
प्रापि धर्ममयवृक्षता मया ॥
—शिशुपालवधः, सर्गः १४ श्लो० ६

अपि च पुनस्तत्रैव—
सम्भृतोपकरणेन निर्मलां—
कर्तुमिष्टिमभिवाञ्छता मया ।
त्वं समीरण इव प्रतीक्षितः—
कर्षकेण बलजान् प्रपूषता ॥
—तत्रैव श्लो० ७

अर्थात् सप्ततन्तुम् = क्रतुम् = यज्ञमित्यर्थः । अधिगन्तुम् = प्राप्तुम् । इच्छतः । मम = युधिष्ठिरस्य । (उपरि) अनुज्ञया = अनुदानेन । अनुग्रहम् = कृपाम् । कुरु = साहाय्यप्रदानं विधीयतां । यतः हे प्रभो ! त्वयि = जगन्नियन्तरि भगवति कृष्णे । मूलताम् = प्रधानकारणताम् । उपगते = प्राप्ते सति । मया = युधिष्ठिरेण यागादिरेव धर्मं इति न्यायेन धर्ममयवृक्षता = धर्मात्मकवृक्षता । प्रापि = प्राप्ता । इतः पूर्वकालावच्छेदेनापि भवत्कृपात एव धर्ममर्जयन्नहं धर्मराजः संवृत्तोऽस्मीति भावः । अतो मन्निष्ठस्य च धर्मराजत्वस्य = धर्मवृक्षत्वस्य साक्षाद् भवत एव मूलकारणत्वेन प्रतिपादनीयत्वान्नात्र कश्चिद् विचिकित्सावसरः । अर्थात् धर्मराजोऽहमस्मीत्यत्र सर्वमपि श्रेयः श्रेयस्करत्वं वा भवन्निष्ठमेवेति नात्र काचन विप्रतिपत्तिरपि ।

अपि च "नियतं कुरु कर्म त्वम्" इति भगवद्वचनप्रामाण्यानुरोधेन नित्यं वा नैमित्तिकं वा शास्त्रविधानोक्तं वा कर्म विज्ञाय "ममेदं शास्त्रीयं कर्म कर्तव्यम्" इत्यनेन च रूपेण शास्त्रविधिदृष्टमेवेदं कर्मेति जानानः स्वीयं कर्म विधातुं शक्तिमान् भवति मानवो नान्यथा साफल्यमश्नुते कर्मभूमौ कर्माधिकारो अन्यथा कर्मवैगुण्यापत्ते रिति स्वस्ववर्णाश्रमोचितमेव कर्म सर्वथा सर्वदा च विधोयतामित्यादिशति देवकीनन्दनश्चक्रपाणिः ।

यदि च "कर्मणा बध्यते जन्तुर्विद्यया च विमुच्यते" इति न्यायेन कर्मणां बन्धकत्वश्रवणात् बन्धकत्वधर्मावच्छिन्नं कर्म नोचितं कर्तुम् प्रतिभातीत्युच्यते चेत्तन्न समीचीनम् । यतः प्रागुक्तस्य न्यायस्य काम्यस्यैव कर्मणो बन्धकत्वविधानात्, ईश्वरार्पणबुद्ध्या-क्रियमाणस्य तस्य शास्त्रविधानोक्तकर्मणो नास्ति कदापि बन्धकत्वम्, अपितु विधीयमानत्वमेव चास्ति तस्येति स्वयं ब्रवोति चक्रविदारी नन्दनन्दनः । यथा—

"यज्ञार्थात् कर्मणोऽन्यत्र लोकोऽयं कर्मबन्धनः ।
तदर्थं कर्म कौन्तेय मुक्तसङ्गः समाचार" ॥
श्रीमद्भवद्गीता—३।९।

इत्यनेन स्वीयेन वचसा महाकविश्रीमाघोक्तं कर्ममार्गं समर्थयति सच्चिदानन्दो भगवान् श्रीकृष्णचन्द्रः—

अर्थात् जगत्पालनपोषणकर्तुः जगन्नियन्तुः परमपितुः परमेश्वरस्य श्रीविष्णोः "यज्ञो वै विष्णुः" इति श्रवणाद् यज्ञलक्षणलक्षितस्य तस्य तुष्टिपूर्वकप्रसन्नतार्थं यद् वैदिकं कर्म क्रियते तद् यज्ञार्थमित्युच्यते। अतः परमेश्वरप्रीतिकारणीभूतस्य प्रभूतस्य तस्य कर्मणोऽन्यत्रैव कामनाविषयीभूतकाम्यप्रभृतिकर्मस्वेवाऽयं लोकश्चास्ति जन्ममरणादि रूपकर्मनिबन्धनबन्धनरूपः।

शास्त्रविहितकर्मणोऽकरणेन, कामनाविषयीभूतेन वा, निषेधं गतेन वा कर्मणा मानवो बन्धनतां गच्छति, परन्तु प्रभोः प्रसन्नतायै कृतेन यागादिकर्मणा प्रभोः प्रसाद-भाजनतां गतो भवति न तु बन्धनवान् भवति। यथोक्तम्—

तुष्टैर्मोचयतः सर्वानतुष्टैर्बध्नतः पुनः।
कारागारमिदं विश्वं यस्य तस्मै नमो नमः॥

महाकविः श्रीमाघोऽपि ब्रूते—

तत्सुराज्ञि भवति स्थिते पुनः—
कः क्रतुं यजतु राजलक्षणम्।

शिशुपालवधः, सर्गः १४-१४

यजुर्वेदोऽपि मावेनाऽङ्गीकृतस्य यागादिसत्कर्मणो विधानस्य महत्त्वं ब्रवीति। यथा—

"यज्ञेन यज्ञमयजन्त देवास्तानि धर्माणि प्रथमान्यासन्।
ते ह नाकं महिमानः सचन्त यत्र पूर्वे साध्याः सन्ति देवाः"॥

यजुर्वेदः–३१।१६।

अर्थात् ज्ञानात्मकेन प्रकाशेन प्रकाशमानाः ये देवा यज्ञेनः अग्निहोत्रादिस्वरूपेण सत्कर्मणा यज्ञम् = "यज्ञो वै विष्णुः" इत्युक्त्यनुसारं परमात्मनः, अयजन्त = पूजनम् अनुष्ठानं वा प्रकुर्वन्ति, तानि = यज्ञात्मकानि अग्निहोत्रस्वरूपाणि, धर्माणि = धर्मस्व-रूपाणि सत्कर्माणि, प्रथमानि = उत्कृष्टानि, आसन् = सन्ति। ते = विद्वांसो देवाः, महि-मानः = यागादिस्वरूप सत्कर्मानुष्ठानेन महत्त्वं समवाप्य। नाकम् = दुःखराहित्यावच्छिन्नं सुखस्वरूपं स्वःपदास्पदम्, सचन्तः = प्राप्नुवन्ति। यत्र = मोक्षधामभूते प्रभूते स्वर्गे, पूर्वे = प्राचीनाः, साध्याः = साधनसम्पत्तिस्वरूपेण ज्ञानेन आहोस्वित् कर्मणा यागादिना साध्यवस्तुस्वरूपं स्वर्गम् प्राप्तुकामाः, देवाः = ज्ञानिनः पुरुषाः, सन्ति = निवसन्ति।

अपिचोपनिषदोऽपि 'यजतु राजलक्षणम्' इमां शिशुपालबधग्रन्थोक्तिं समर्थयन्ति गायन्ति च। तथाहि—

'पदाचः कामाननुयन्ति वालास्ते मृत्योर्यन्ति विततस्य पाशम्।
अथ धीरा अमृतत्वं विदित्वा ध्रुवमध्रुवेष्विह न प्रार्थयन्ते'॥

कठोपनि० २।१।२।

अर्थात् बालबुद्धयो मूढपुरुषास्ते वालाः सांसारिककामनास्वरूपान् कामान् अनु-यन्ति ते विततस्य मृत्योः पाशं प्राप्नुवन्ति। अर्थात् पौनः पुन्येन ते 'पुनरपि जननं पुन-रपि मरणं पुनरपि जननी जठरे शयनम्' इत्यादिकञ्च समनुभवन्ति। परन्तु परमेश्वर-

प्रीतये तुष्टये च सत्कर्मात्मकयागानुष्ठानपरायणो विवेकवान् वेदविद्वान् याज्ञिको धीरः अमृतत्वम=ब्रह्मज्ञानम्, प्राप्नोति। तस्य च ब्रह्मज्ञानस्य ध्रुवत्वम् = अचलत्वम् = सर्वथा पूर्णत्वम् = अविनाशित्वञ्च विज्ञायाऽध्रुवम् = नश्वरम्, सांसारिकं समस्तमपि वस्तुत्वेन भासमानं विषयजातमध्रुवत्वेन मन्यमानो नैव प्रार्थयते, नापि कामयते चेष्टते वा विवेकसम्पन्नो मानवः। यतः विवेकसम्पन्नो हि मानवः सर्वमेव वस्तुत्वेन भासमानं विषयजातं नश्वरं भङ्गुरञ्च विज्ञाय तद् बन्धनस्वरूपं बन्धनकारणीभूतं वेति विचार्य तज् जहाति जिहासति वा।

अत एव महाकविः श्रीमाघः 'क्रतुं यजतु राजलक्षणम्' इत्युक्तवान्। तदपि क्रतु-स्वरूपं सत्कर्म परब्रह्मपरमेश्वरार्पणबुद्धया विधेयम्, येन तत् बन्धाय न भवेत्। यथोक्तम्—

'तत् कर्म यन्न बन्धाय' गरुड़पुराण, २।४९।९४।

अपि च—'कर्मणा बध्यते जन्तुः'।—संन्यासोपनि० २।९८।

अर्थात् तदेव कर्म विधेयं यद् बन्धाय न भवेत्। एतादृशस्य यागादिस्वरूपस्यैव सत्कर्मणो विधानयोग्यतावत्त्वं निर्वहति परमेश्वरार्पणबुद्धया कृतस्येति विज्ञेयम्। तच्च विष्णुस्वरूपं यागादि कर्म। यथोक्तम्—

'यज्ञो वै विष्णुः'—तैत्तिरीयसंहिता, १।७।४।

इदमेव विष्णुस्वरूपं यागादिकं कर्म अमृतत्वलक्षणलक्षितं ब्रह्मज्ञानम् आत्मज्ञानं प्रयच्छति। अत एवोक्तमु—

"यान्यनवद्यानि कर्माणि तानि सेवितव्यानि" तैत्तिरीयोप० १।११।२।

अर्थादयमात्मा "पुनरपि जननं पुनरपि मरणं पुनरपि जननीजठरेशयनम्" इति प्राचीनाचार्यचरणोक्त्या जननमरणजननीजठरेशयनरूपे प्रवाहे पतनशीलः सन् पौनः पुन्येन निमज्जन्नु-मज्जन्निरन्तरं दुःखसन्तानसङ्कुलसरित्तरङ्गेषु क्लिश्नाति। तत्र क्लेशं समनुभवन्तोऽपिलोका आत्मनः संरक्षणमकृत्वा अनात्मन शरीरेन्द्रियादिरूपशत्रोरेव परिरक्षितुं कामयन्ते यतन्ते चापीति बोध्यम्। तस्य च कर्मणो बन्धहेतुत्वेन बन्धकत्व-मवगम्यते।

अत एव तैत्तिरीयोपनिषदि खलु अनवद्यानामेव कर्मणामनुष्ठानस्य श्रेयस्करत्वं प्रत्यपादि। एवम्—

"कुर्वन्नेवेह कर्माणि जिजीविषेत्"— ईशोप० २ मं०

इत्यत्रापि तेषामेव बन्धस्याऽकारणीभूतानामीश्वरार्पणबुद्धया कृतानां यागादि-रूपसत्कर्मणाममृतत्वरूपब्रह्मज्ञान = आत्मज्ञानसम्पादकानां विधानस्यैव सन्मार्गप्रदर्शक-त्वेन श्रेष्ठत्वं प्रतिपादितं भवति।

अतएव शास्त्रीयं विधानं पुरुस्कृत्य श्रद्धासहितं कर्माऽनुष्ठानं सम्पादयन् पुरुषो यथाशक्तिसिद्धिं, सुखं, पराञ्च गतिं समवाप्नोति। तथा चोक्तम्—

"तद्धि कुर्वन् यथाशक्ति प्राप्नोति परमां गतिम्"।

मनुस्मृतिः—४।१४।

यदि च वेदशास्त्रविधिमुत्सृज्य परमेश्वरं तदुक्तिं वाऽप्यनादृत्य, अग्निषोमीयं पशुमालभेत" तथा "न कलञ्ज भक्षयेत्" इत्येवंविधकर्तव्याऽकर्तव्यार्थबोधकं चोदनाविधिं निषेधञ्चोत्सृज्य अर्थात् शास्त्रीयं विधानं समुपेक्ष्य स्वेच्छानुरूपं श्रद्धावैधुर्यसमन्तिमवैदिकं कर्म समाचरति, येन तस्य पतनं भवति। यथोक्तम्—

"अकृत्वा वैदिकं कर्म द्विजः पतनमृच्छति"।

—स्मृतिः

अन्यच्चापि—"अकृत्वा वैदिकं नित्यं प्रत्यवायी भवेन्नरः"।

—श्रुतिः

इदञ्चास्ति वैदिकं यागादिकं कर्म पञ्चविधम्। तथाहि—

१. वेदानामध्ययनमध्यापनञ्च "ब्रह्मयज्ञ" पदजन्यबोधविषयतावद् भवतीत्येकं यागादिकं कर्म।

२. एवं "पितृयज्ञः" पदाभिधेयतया 'तर्पणमपि' तथाविधमस्ति।

३. तथैव "देवयज्ञ" शब्देन 'होमः' कथ्यतेऽतः होमोऽपि यज्ञकर्मान्तर्भूतः।

४. वलिरप्यस्त्येकं कर्म यागरूपं तच्च "भूतयज्ञा"न्तर्गतम्।

५. अथ च पञ्चमं "नृयज्ञ" रूपं यागात्मकं कर्म तच्चास्ति खलु अतिथिपूजनरूपम्, यस्य तिथिरेव नास्तीत्यर्थः। यथोक्तम्—

"अध्यापनं ब्रह्मयज्ञः पितृयज्ञस्तु तर्पणम्।
होमो देवो बलिर्भौतो नृयज्ञोऽतिथिपूजनम्"॥

मनुस्मृतिः—३।७०।

"पञ्चैतान् यो महायज्ञान्न हापयति शक्तितः।
स गृहेऽपि वसेन्नित्यं सूना दोषैर्न लिप्यते"॥

तत्रैव—३।७१।

एभिः पञ्चमहायज्ञैर्ब्रह्मज्ञानरूपम् = आत्मज्ञानरूपम् अमृतान्नं प्राप्यते येन यज्ञानुष्ठानकर्तृर्गृहस्थस्य श्लोकोल्लिखिताः पञ्च हिंसाः सर्वथा विनश्यन्ति। तथाहि—

"कुण्डनी तेषणोश्चल्ली चोदकुम्भी च मार्जनी।
पञ्च सूना गृहस्थस्य पञ्चयज्ञात् प्रणश्यति"॥

— स्मृतिः

अर्थात् एतेषां पञ्चानां महायज्ञानामिदमेवास्ति महत्त्वं; यदेतेषां पञ्चमहायज्ञानामनुष्ठानपरम्परातः—

१. कण्डनी = ओखली,ति हिन्दी,

२. पेषणः = चक्की, त्यपि हिन्दी,

३. चुल्ली = चूल्हा ,, ,,

४. चोदकुम्भी = जलकुम्भी, त्यपि हिन्दी,

५. मार्जनी = झाड़ू = बुहारीत्यपि हिन्दी त्येतज्जन्याः पञ्चहिंसा गृहस्थस्य सर्वथा विनश्यन्तीत्यर्थः।

अयमभिप्रायः—उपर्युक्तपञ्चयज्ञान् सम्पादयितुर्गृहस्थस्योपर्युक्ता हिंसात्मकाः पापात्मका दोषाः सर्वथा विनश्यन्ति। ततश्चाऽन्तःकरणशुद्धिद्वारा परब्रह्मरूपं तत् परमात्मतत्त्वं समवाप्य कृतकृत्यो भवति मानवः।

परन्तु यश्च खलूदरपरायणोऽन्नम्भट्टः पञ्चयज्ञान् अकृत्वा केवलं स्वयमेव "पक्वान्नेनाऽपक्वान्नेन वा स्वोदरपूर्णं विधत्ते एवंविधाः पातकिनः पापान्नमेव भुञ्जते। यथोक्तवान् वेदोऽपि—

"केवलाघो भवति केवलादी"।

ऋग्वेद संहिता—१०।११७।६।

"मोघमन्नं विन्दते अप्रचेताः"।

तत्रैव—१०।११७।६।

अपिचाऽथर्ववेदेऽपि पुनः—

"यज्ञो वभूव स आ बभूव—
स प्र जज्ञे स उवावृधे पुनः।
स देवानामधिपतिर्बभूव
सो अस्मासु द्रविणमादधातु॥

अथर्ववेदः—७।५।२।

यज्ञः बभूव = सृष्ट्यादौ यज्ञः प्रादुर्बभूव। स आ बभूव = तदानीं स यज्ञः सर्वत्र व्याप्तो जातः। सः प्र जज्ञे = स च यज्ञो विशेषरूपेण समस्तप्रजायै ज्ञानसाधनमभूत्। सः उ = स एव यज्ञः। देवानाम् = विदुषाम् = ज्ञानसम्पन्नपुरुषाणाम्। अधिपतिः = अभीष्टफलप्रदायकः। बभूव = जातः। सः = स एव यज्ञः। अस्मासु = यागकर्तृसु सर्वेषु। द्रविणम् = ज्ञानरूपं धनम्। आदधातु = अस्मभ्यं प्रयच्छतु। तदेवोक्तं पूर्वम्—

"अथ धीरा अमृतत्वं विदित्वा"।

अत्र मन्त्रघटकीभूतम् "अमृतत्वम्" इति पदं ब्रह्मज्ञानपरम् = आत्मज्ञानपरमित्यर्थः।

एतावता प्रबन्धेन महाकविश्रीमाघेनोक्तं 'कः ऋतु यजतु राजलक्षणम्" इत्यादिकं यागादिरूपसत्कर्मानुष्ठानं परम्परया चित्तशुद्धिद्वाराऽमृतत्वरूपब्रह्मज्ञानसम्पादकं भवति तदेव प्रमाणान्तरैः सुस्पष्टीकृतम् इति।

एवमेव महाकाव्यस्य 'हरविजय' नामकस्य निर्माता महाकविः श्रीरत्नाकरोऽपि कालिदास, अश्वघोष, प्रभृतिमहाकविवत् ब्रह्माऽद्वैतसिद्धान्तवादी आसीदिति श्रूयते, तदीयकृतिनाऽपि स्फुटं प्रतीयते। तथाहि—

"प्रज्ञाघनं स्थिरचतुश्चरणत्वमाप्त—
मद्वैततासमरसं परिमृष्टकूटम्।
ज्योतिः परं यदमृतं हृदि चाकशीति—
नेदिष्ठमप्यविगलत्तमसां दविष्ठम्॥

हरविजये, सर्गः ४७, ७८

इत्यनेन महाकविश्रीरत्नाकरीयकृतिस्वरूपश्लोकघटकीभूतेना "ऽद्वैततासमरसम्" पदेन सुस्पष्टतया श्रीशङ्कराचार्याऽभिमताऽद्वैतवादः = ब्रह्माऽद्वैतसिद्धान्तवादो वा दर्शितवान् = स्वीकृतवांश्च श्रीरत्नाकरः। अत एव प्रज्ञानघनेतिस्वरूपलक्षणलक्षितं ज्योतिः स्वरूपमद्वैतं परं ब्रह्मश्रीरत्नाकरस्याप्यभिमतमस्ति ।

तच्चाऽद्वैतं ब्रह्म सत्, चित्, आनन्दरूपम्। तथा नित्यम्, कूटस्थरूपम्, सर्वथाऽसङ्गम्, सर्वदा च परिपूर्णम् ।

अपि च आरोपितस्य जगतो मिथ्यात्वं सत्ताविहीनत्वञ्चाऽभ्युपगम्यते। अपवादपूर्वकत्वेनाऽविद्याकार्यत्वं संततजराजन्ममृत्युदुःखप्रवाहरूपत्वञ्च प्रमीयते ।

सर्वस्य ब्रह्ममात्रत्वप्रतिपादनात् "एकमेवाऽद्वितीयं ब्रह्म" एक एव हि भूतात्मा" "एक एव हि रुद्रो न द्वितीयाय तस्थुः" इत्यादिश्रुतिभिर्ब्रह्मणो नित्यस्य परिपूर्णस्यै=कत्वनिश्चयेन सजातीय, विजातीय, स्वगतभेदरहितं, नित्य, शुद्ध, मुक्तस्वभावम्, अपूर्वम्, अनपरम्, अनन्तरम्, अवाह्यम्, अखण्डम्, निराकारम्, निर्विकारम्, चिदेकरसम्, अद्वैतम्, ब्रह्म प्रतिपादितं भवति ।

इदमेव च ब्रह्म "हरविजय" नामके महाकाव्ये महाकविः श्रीरत्नाकरः प्रतिपादितवान्। तथाहि—

"ज्योतिः परं यदमृतं हृदि चाकशीति"

हरविजये—स० ४७, ७८,

अन्यत्रापि = "एतदमृतमभयमेतद् ब्रह्म" इति श्रवणादमृतं ब्रह्म विद्वान् = यतिर्योगी वा प्राप्नोति। "ब्रह्म विदाप्नोति परम्" इति श्रुतेरपि तदेव ब्रह्म प्रपिपाद्यते यच्चाभिमतमस्ति महाकविश्रीरत्नाकरस्य ।

तस्यैव भासाऽविरोधरूपेण सर्वं चराचरात्मकं जगदिदं प्रकाशमानं भवतीति तदेव ब्रह्म सर्वमेव प्रकाशयति। तथा चोक्तम्—"तस्य भासा सर्वमिदं विभाति"—कठोपनि० २।२।१५" सर्वस्य द्रष्टा "नृसिंहो० २। "ज्योतिषां ज्योतिः"—त्रिपाद्विभूति महानारायणोप० ४।१। इदमेव सच्चिदानन्दस्वरूपम्, भेदत्रयशून्यम् एकमेव परमार्थतत्त्वं ब्रह्म चास्ति जगतोऽधिष्ठानभूतम्। इदमेव च पुनः "आत्मैवाधस्तादात्मोपरिष्टादात्मा पश्चादात्मा पुरस्तादात्मा दक्षिणत आत्मोत्तरत आत्मैवेदं सर्वमिति"।

छान्दोग्योपनि० ७।२५।२।

अपि च—"आत्मैवेदं सर्वम्"—तत्रैव, ७।२५।२।

"ब्रह्मैवेदं सर्वम्"—वृहदारण्यको० २।५।१।

"सच्चिदानन्दरूपमिदम्"—नृसिंहोत्तरता० ७।

' अहमेव जगत् सर्वम्"—तेजोविन्दूप० ६।४३।

इत्यादिश्रुत्या सार्वात्म्योपवर्णनमुखेन, तथा "नेह नानास्ति किञ्चन" इति श्रुत्याऽऽत्मरूपे ब्रह्मणि प्रपञ्चात्मकजगन्निषेधमुखेन महाकविश्रीरत्नाकराभितं ब्रह्मैव प्रतिपादितं भवति। तदेव च ब्रह्म समस्तविशेषरहितत्वेन भगवान् शङ्करोऽपि ब्रूते। यथा—

"अतश्चान्यतरलिङ्गपरिग्रहेऽपि समस्तविशेषरहितं निर्विकल्पकमेव ब्रह्म प्रति-

पत्तव्यं न तद्विपरीतम् । सर्वत्र हि ब्रह्म स्वरूपप्रतिपादनपरेषु वाक्येषु "अशब्दमस्पर्शमरूपमव्यम्" इत्येवमादिषु अपास्तसमस्तविशेषमेव ब्रह्म उपदिश्यते ।

ब्रह्मसू० शां० भा० २।३।११ ।

इत्येव खल्वेतावता प्रबन्धेन श्रीशङ्कराचार्योऽपि प्रागुक्तोपनिषद्दर्शितं समर्थितं स्वयमङ्गीकृतञ्च श्रीरत्नाकराभिमतं ब्रह्माऽद्वैतसिद्धान्तमेव पुष्टीकृतवान् समर्थितवांश्च। महाकविः श्रीरत्नाकरोऽपि स्वीये 'हरविजय' नामके महाकाव्ये ४७ सर्गे, ७८ श्लोके प्रस्फोरितवान् ।

अपि च गीतायां सच्चिदानन्दोऽपि भगवान् श्रीकृष्णचन्द्रो वेदानुमोदितमेव ब्रह्माऽद्वैतसिद्धान्तं दर्शितवान् अर्जुनं प्रति श्रावितवांश्च । तथाहि--

"यदक्षरं वेदविदो वदन्ति—
विशन्ति यद्यतयो वीतरागाः ।
यदिच्छन्तो ब्रह्मचर्यं चरन्ति—
तत्ते पदं संग्रहेण प्रवक्ष्ये ॥

श्रीमद्भगवद्गीता, अ० ८, श्लो० ११

अर्थात् सर्वथाऽऽध्यात्मिकताया निरूपकाः सर्वेऽपि वेदाः स्वस्वोपनिषन्मुखेन तदेव निरस्ताशेषविशेषं निर्विशेषं परं ब्रह्मैव प्रतिपादयन्ति । तथाहि--

"अद्वैतसिद्धान्तमेव हि सत्यं शिवं सुन्दरं सिद्धान्तमस्ति"—माण्डूक्योप० ७
"शान्तं शिवमद्वैतं चतुर्थं मन्यन्ते स आत्मा" तत्रैव—
"सदेव सौम्येदमग्र आसीदेकमेवाऽद्वितीयम्" ।

छान्दोग्योपनि० ६।२।१ ।

"आत्मा वा इदमेक एवाग्रे आसीत्" ।

ऐतरेयोप० १।१ ।

"यो वै भूमा तदमृतम्"—छन्दोग्योप० ७।२४।१ ।
सर्वं तत्प्रज्ञानेत्रं प्रज्ञानं ब्रह्म"—

ऋग्वेद सं० ऐतरोप० ५।३ ।

"अहं ब्रह्मास्मि"—वृहदारण्यकोप० १।४।१० ।
"अयमात्मा ब्रह्म"—वृहदारण्यकोप० ४।५।१९

अपि च—"सच्चिदानन्दरूपमिदं सर्वम्" ।

नृसिंहोत्तरतापनोयो०—७ ।

इत्येताः सर्वा अप्युपनिषदः स्वस्वमुखेन तदेव निर्विशेषं ब्रह्म प्रतिपादयन्ति । तादृशनिर्विशेषब्रह्माऽद्वैतसिद्धान्त एव चास्त्यभिमतः श्रीरत्नाकरस्य । यथोक्तम् ।

"स्थित्यर्थमस्य जगतः कथमप्युपाधि--
भेदादभिन्नमपि यत् प्रतिपन्नभेदम् ।
यच्चापि सत्यमनिशं हृदयप्रतिष्ठ--
मानन्दरूपममृतं मुनयो गृणन्ति ॥७९॥

हरविजये, सर्ग=४७ पृष्ठ ६५३ ।

अनेत खलु श्लोकात्मकेन पद्येन महाकविः श्रीरत्नाकरः स्वामिमतब्रह्माऽद्वैत-सिद्धान्तानुसारं तस्य ब्रह्माऽद्वैतस्य सत्यरूपताम्, आनन्दरूपताम्, अमृतात्मकताम्, तथा हृदयप्रतिष्ठरूपताञ्च दर्शितवान्। गीतायामपि--

"हृद्देशेऽर्जुन ? तिष्ठति"--अ० १८। श्लो० ६१।

"हरविजय" नामक महाकाव्यग्रन्थावलोकनेन सुस्पष्टं प्रतीयते यत् महाकविः श्रीरत्नाकारो न केवलं साहित्यकलयाऽऽकलित एवाऽऽसीत् अपि तु स महाकवित्वशक्ति-सम्पन्नत्वेऽपि महानेव तथाविधो दार्शनिकोऽपि श्रूयतेऽनुभूयते चापि "हरविजय" महाकाव्यावलोकनतः। तादृशमहाकाव्यावलोकनत एव—

आनन्दरूपममृतं निरुपाख्यमूर्मि--
पङ्कातिगं स्तिमितवारिधिवारिकल्पम्।
यन्नेति नेत्युपनिषत्स्वभिधीयते च--
विज्ञप्तिमात्रमनुपाधिनिरीहमन्यैः ॥१२६॥

तत्रैव--सर्गः ४७--

एतेन पद्यात्मकेन श्लोकेन श्रीरत्नाकरः खलु तस्याऽपास्तसमस्तविशेषस्य ब्रह्मणो विज्ञप्तिमात्रत्वम् = ज्ञानरूपत्वं प्रतिपादितवान्। अयमेव चास्ति ब्रह्माऽद्वैतसिद्धान्तः।

महाकविश्रीविल्हणविरचितं "विक्रमाङ्कदेवचरित" नामकं महाकाव्यं लम्बाय-मानपूर्वकालावच्छेदेन श्रावं श्रावं वर्तमानप्रयोजनाऽवसरकालावच्छेदेन च दर्शं दर्शं मामकीनं स्वान्तं नितान्तं मोमुदीति।

सकलसाहित्यशास्त्रपारावारपारीणो महाकविः 'श्रीविल्हण' नामजन्यबोध-विषयतां गतो दार्शनिको विद्वान् स्वविरचितेन "विक्रमाङ्कदेवचरित" नामकेन महा-काव्येन ज्ञानमार्गाऽपरपर्यायभूतं विवेकदीपपन्थानं समुपदिष्टवान् दर्शितवांश्च। "पन्थानं प्रत्यपद्यत' इत्यादिना।

एतदनन्तरकालावच्छिन्नं तमेव विवेकदीपात्मकं मार्गमाश्रित्य तं मार्गं विवेकाऽ-विवेकसाधारणजनानां पुरस्तात् स्फुटं कर्तुं "विक्रमाङ्कदेवचरित' नामकं महाकाव्यं विनिर्मितवान् श्रीविल्हणो महाकविः। तेनैव च मार्गेण स्वयमपि स्वीयं यावज्जीवनं यापयितुं संकल्पितवान् विचारितवांश्चेति ध्येयम्।

इदञ्च महाकवि श्रीविल्हणविरचितं महाकाव्यञ्चास्ति सर्वथा प्रसन्नमधुरया ज्ञान-स्वरूपविवेकदीपफलप्लावितया शब्दावल्या गुम्फितमिति महाकाव्यजन्यविनोदप्रमोद-ग्रहणपटूनां ज्ञानमार्गदर्शकमित्यस्ति निश्चप्रचम्। अस्य महाकाव्यस्य रसमहोदधौ पौनः पुन्येन निमज्जतां कवीनां महाकवीनां तदतिरिक्तानाञ्च सचेतसां चेतसि केषान्न विदुषां परां मुदं नानुभावयिष्यतीति स्वयमेव विदाङ्कुर्वन्तु भवन्तस्तदनुभवशालिनः।

अयञ्च महाकविः श्रीविल्हण एकेनैवाऽनेन महाकाव्येन "विक्रमाङ्कदेवचरित" नामकेन स्वयं विरचितेन स्वनिष्ठमहाकवित्वधर्मावच्छिन्नो बभूव। तच्च "विक्रमाङ्कदेव-चरित" नामकं महाकाव्यं महाकाव्यत्वधर्मावच्छिन्नं समभूत् इत्येवास्ति तस्य महद् वैशिष्टयम्।

साम्प्रतिकेऽपि समये चेदं महाकाव्यं प्राचीनान् महाकवित्वधर्मावच्छेद्यान् कालिदास, अश्वघोष, भारवि, प्रभृतिमहोदयान् साहित्यशास्त्रविशारदान् स्मृतिपथं नयमानमिव प्रतिभातीत्यत्र नास्ति कोऽपि विचारावसरः।

अपि च महाकाव्यमिदं स्वान्तर्घटकत्वेन निरूपितेन विवेकदीपात्मकेन तेजःपुञ्जेन ज्ञानस्वरूपेण साहित्यशास्त्रवैदुष्यप्रभावितचेतसां सचेतसां खल्वान्तरं भ्रमान्धकाररूपं तमो विनाशयितुं जाज्वलीति। अत एवाऽयं महाकाव्यग्रन्थः स्वस्मिन् प्रतिपादितेन विवेकदीपेन प्रकाशस्वरूपेण भवबन्धनतो निवृत्तिरूपं ज्ञानमार्गं दर्शयति। तथापि—

"साक्रन्दमिति चान्यच्च स विचिन्त्य पुनः पुनः।
शनैर्विवेकदीपेन पन्थानं प्रत्यपद्यत" ॥ ८७ ॥

विक्रमाङ्कदेवचरितम्, स० ४।८७।

अनेन भवबन्धनतो निवृत्तिरूपो मार्गो दर्शितः। येन शनैः शनैर्ज्ञानप्रदीपस्वरूपेण विवेकदीपेन भवबन्धनतो निवृत्ति रूपं ज्ञानमार्गं प्राप्नोति मानवः।

सर्वेऽपि दर्शनशास्त्रविदो जनाः सर्वदा शान्ति पूर्णं सुखमयं विवेकदीपजन्यं ज्ञानमार्गं समन्वेष्टुं प्रभवन्ति ततश्च समन्वेषयन्तीत्यहं राजेन्द्रप्रतापत्रिपाठी मन्ये।

ये तु संसारदोषदृष्टिमापन्नाः सन्ति विपरीतमार्गगामिनस्ते मोक्षविषयिणीच्छाशून्याः सन्तो नैव कदापि कथमपि केनापि वा सांसारिकेषु विषयेषु तीव्रवैराग्यं वा समाधिं वा सदसद्विचारपरम्परां वाऽऽकलयन्ति तेषां विचारशक्तिशून्यानामयुक्तानां दुर्भावनाभावितान्तःकरणानां कथं विवेकदीपस्य तादृशमार्गस्य वा समवाप्तिः स्यात्।

तादृशविवेकदीपमन्तरा कुतः शान्तिः स्यात्। शान्तिमन्तरा चाऽशान्तस्य कुतः सुखमिति, पुत्र, पौत्र, मित्र, कलत्र, प्रभृतिवर्गजन्यमहामोहावर्तशताकुले कामक्रोधलोभमोहमदेर्ष्याऽभिमानप्रभृत्यन्तःकरणविकारलक्षणलक्षितमहाग्राहसमन्वितेऽज्ञानपर्यवसितविषविज्ञानपरिपूर्णेऽपारे खलु चराचरात्मकेऽस्मिन् प्रपञ्चरूपे जगति सर्वत्र हा कष्टं, हा कष्टतरम् इति सञ्चिन्त्य रोदनविधानपरायणा एव मानुषा मानुष्यश्च सदा दृष्टिगोचरतां गताः समनुभूयन्ते निश्चप्रचमिदम्।

इत्थञ्च विवेकदीपात्मकज्ञानरसविषयिणीमनुभूतिमलभमानास्ते "विपरीतानान्तु विपरीताः" इति न्यायेन विपरीतदर्शिनस्ते विपरीताः कथं खलु विवेकदीपरूपां ज्ञानात्मिकां सिद्धिं समवाप्स्यन्ति। केवलमसत्सङ्गवशात् अनार्यसहवाससेवनाच्चाऽहर्निशमनिशं स्वात्मानमवसादयन्ति। नहि ते विश्रमसुखशय्यां लभन्ते। यथोक्तम्—

"नाऽनार्येण सहावसेत्" महोपनि० ४।२२।

अर्थात् कामसङ्कल्पैर्विविधदुर्भावनाभाविताऽन्तः करणेन कामपरायणेन तथाऽनेकचित्तविभ्रान्तेनाऽनार्येण सहाऽऽवासो न विधेयः। यतः सर्पवत् सामान्यसंस्कारशून्याः पुरुषाः सन्ति सर्वथा हेयतावच्छेदककुक्षिनिक्षिप्ताः। यथोक्तम्—

"अहिरिव जनयोगं सर्वदा वर्जयेत्"। वराहोपनि० २।३७।

अपि च—"असत्सङ्गो विषाऽधिकः"। ब्रह्मवैवर्तपुराणे—

देहेन्द्रियादिषु जडपदार्थेषु खल्वात्मत्वप्रकारकबुद्धिमतो जागतिकविषयेषु लोलयवतो मर्यादारहितस्याऽत एवाऽऽसुरीं वृत्तिं गतस्याऽसत्पुरुषस्य सङ्गो जिह्वालोल्यदोषवेग-

गतरोगिवत् विवेकदीपं विनाशयति, महादुःखपङ्कमहोदधौ च पातयति। अत एवोक्तम्—
"दुःसङ्गः सर्वथैव त्याज्यः"।

नारदभक्तिसूत्रम्—

एतेषां खल्वसत्सङ्गापर्यायभूतानां दुःसङ्गप्रभृतिदोषाणां 'विवेकदीप'प्राप्त्यर्थं सर्वथा त्याग एव श्रेयस्करः, तेनैव श्रीविल्हणो महाकविर्विजयिष्यते। नो चेत्—

"अनेकचित्तविभ्रान्ता मोहजाल समावृताः।
प्रसक्ताः कामभोगेषु पतन्ति नरकेऽशुचौ॥

श्रीमद्भगवद्गीता—अ० १६।१६।

इति महाकविश्रीविल्हणेनोक्तस्य—
"शनैर्विवेकदीपेन पन्थानं प्रत्यपद्यत"।

इत्यस्य दर्शनसर्वस्वभूतस्य प्रभूतस्य वाक्यस्य विपरीतगामिनां मोहजालसमावृतानामनेकविधविषयेषु विभ्रान्तिमापन्नान्तः करणानां कामनाविषयीभूतानां सांसारिक विषयाणां समुपभोगेषु प्रसक्ति = आसक्ति, परायणानां भवति कीदृशी गतिरित्यत्र नन्दनन्दनः श्रीकृष्ण चन्द्रोऽप्यपर्युक्तेनाऽर्जुनं प्रति स्वयं समुपदिष्टेन श्लोकेन समुपवर्णितवान्। अर्थात् एवंभूता हीना दीना जनाः "पतन्ति नरकेऽशुचौ" रौरवादिस्वरूपे परमाशुद्धनरके अर्थात् नीचान्नीचतमयोनौ पतन्ति = अधोगांत प्राप्नुवन्तीत्यर्थः। अपि च ऋग्वेदेऽपि व्यतिरेकमुखेन प्रामाण्यमाह—

इमे ये नार्वाङ् न परश्चरन्ति—
न ब्राह्मणासो न सुतेकरासः।
त एते वाचमभिपद्य पापया—
सिरीस्तन्त्रं तन्वते अप्रजज्ञयः॥

ऋग्वेदः, १०।७१।९।

अर्थात् इमे ये = विवेकदीपदर्शितं मार्गं विहाय ये सन्ति असुरकर्मविधानपरायणा मानवाः। ब्राह्मणासः न चरन्ति = ब्रह्मज्ञानवृत्तिविरहिताः सन्तः = परमात्मनो विमुखीभूय, संसारे सञ्चरन्ति। न सुतेकरासः = सोमयागप्रभृति सत्कर्म नानुतिष्ठन्ति। अप्रजज्ञयः = नानाविधचिन्तासन्तानपरायणाश्च ये सदसद्विवेकात्मकविचारविहीनाः सन्ति मानवाः। वाचम् अभिपद्य = अपभ्रंशभाषायाः साहाय्यं समवाप्य। पापया = पापमय्या वाण्या समन्वितः सन्। सिरीः = "सुखमस्तोतिवक्तव्यम्" इत्यनुसारम् स्वातन्त्र्यपुरः सरम्। तन्त्रं तन्वते = कर्म कुर्वन्ति, अर्थात् शास्त्रविधिमुत्सृज्य = कर्तव्याऽकर्तव्यार्थप्रकाशकं शास्त्रविधिं, चोदनाविधिं, निषेधञ्चाऽविचार्य = शास्त्रीयं संविधानं समुपेक्ष्येत्यर्थः श्रद्धाविरहितं स्वेच्छानुसारं कर्माऽनुतिष्ठन्ति। ते एते = त इमे कामायत्तप्रवृतिशीलाः पुरुषाः। न अर्वाक् चरन्ति = नाऽस्मिन् जगति सुखमवाप्नुवन्ति। न परः चरन्ति = नापि च परलोके सुखं, परां गतिं वा लभन्ते इति। एतत् सर्वं मनसि नियाय महाकविः श्रीविल्हणः "विवेकदोपप्रकाशितमार्गम्" प्रदर्शितवन्तस्तस्य चाऽऽवश्यकतामपि विचारितवन्तः। श्रीविल्हणस्येयमासीत् विचारधारा यद् येन सन्मार्गावलम्बिना श्रोत्रियब्रह्म-

निष्ठगुरोः सान्निध्यं लभमानेन विवेकदीपाङ्गभूतेन श्रवण, मननादिना समुद्भूतविवेकदीपेन ज्ञानमार्गं—आहोस्वित् ज्ञानसिद्धि समनुप्राप्तं, क्रमशः ईश्वरोपासनादिसत्कर्मानुष्ठानेन रागद्वेषमोहादिदोषपुञ्जं निस्सार्य अभिभूय वा समत्वयोगेन सद्विषयेषु चेन्द्रियप्रवृत्तिः कार्या। ततश्च पुनर्वैराग्येण, शान्त्या च मनसोऽन्तर्मुखी वृत्तिः विधेया। अत एव पुनरग्रे श्रीविल्हणस्तमेव विवेकदीपात्मकं मार्गं पुष्टीकृतवान्। तथाहि—

"ज्येष्ठं गुणैर्गरिष्ठोऽपि पितुस्तुल्यममंस्त सः।
महात्मनाममार्गेण न भवन्ति प्रवृत्तयः॥९५॥

पश्यन्तु-विक्रमदेव च० श्लो० ५९

अनेन श्लोकेन श्रीविल्हणो महात्मनाम्, यतीनाम्, योगिनां वा गमनम् अमार्गेण = विवेकदीपाऽतिरिक्तेन भ्रमान्धकारसमन्वितेन अमार्गस्वरूपेण मार्गेण कदापि कथमपि नहि जायते केवलमित्येव सूचितवान्।

कालिदास, भारवि, अश्वघोषप्रभृतिमहाकविवत् महाकविर्दार्शनिकप्रवरः श्री हर्षोऽपि ब्रह्माऽद्वैतसिद्धान्तवादी आसीत्। स च ब्रह्माऽद्वैतसिद्धान्तोऽप्यस्ति एका दार्शनिकी दृष्टिः।

तत्र भगवान् व्यासो भागवते परमात्मनः साकारम्, सविकारम्, सगुणरूपमेव वर्णितवान्। यथोक्तम्—

"वदन्ति तत्तत्त्वविदस्तत्त्वं यज्ज्ञानमद्वयम्।
ब्रह्मेति परमात्मेति भगवानिति शब्द्यते॥

भागवते—१।२।११

तात्त्विकदृष्ट्या विचार्यमाणे सर्वेऽपि सर्वतः प्रधानभूता वेदाः स्वस्वोपनिषन्मुखेन तदेवाऽद्वैतं ब्रह्म प्रतिपादयन्ति, घोषयन्ति च। यथा—"आत्मा वा इदमग्रे एक एवाऽसीत्"। छान्दोग्योप०।

एवंविधां परिस्थितिं पूर्णतया विज्ञाय अधीत्य च महाकविः श्रीहर्षोऽपि खल्वद्वैतलक्षणलक्षितं तदद्वैतं ब्रह्म नैषधनामके महाकाव्ये स्वविरचितेऽन्वयसहचारमुखेन स्वयं वर्णितवान्। तथाहि—

"साप्तं प्रयच्छति न पक्षचतुष्टये तां—
तल्लाभशंसिनि न पञ्चमकोटिमात्रे।
श्रद्धां दधे निषधराड्विमतौ मतानां—
मद्वैततत्त्व इव सत्यतरेऽपि लोकः॥

नैषधे स० १३। श्लो० ३६।

अर्थात् सा भैमी दमयन्ती निषधराजो नलस्य विषये विमतौ सत्याम् अर्थात् नलविषये संशये जायमाने सति पुनः सत्यतरेऽपि नले श्रद्धाम्; आस्तिक्यं न दधे। अर्थात् सत्यनलेऽपि नलोऽयमेवेति तस्या बुद्धिर्नोद्भूत। मायाकल्पितनलेषु बहुरूपातिशयदर्शनान्नलविषयकंनिश्चयं विधातुं नहि कथमपि शक्तिसम्पन्नाऽभूत्।

तत्र दृष्टान्तमाह—यथा नानात्मवादिनो न्यावैशेषिकप्रभृतयो दार्शनिका नैकत्वधर्मावच्छिन्नेऽद्वैते ब्रह्मणि श्रद्धां विश्वासं वा प्रकुर्वते। तत्र सांख्याः प्रतिशरीरं पुरुष

बहुत्वं स्वीकुर्वन्ति । न्यायवैशेषिकाश्च आत्मा प्रतिशरीरं भिन्नो विभुर्नित्यश्चेति कथयन्ति । एवम् "नानात्मानो व्यवस्थिताः" इत्यभियुक्तोक्त्यनुसारतः आत्मनां बहुत्वमनेकविधत्वं मन्यन्ते । जैनदार्शनिका अप्यात्मनो देहपरिणामरूपत्वं स्वीकुर्वन्ति—इत्यनेनाप्यात्मनो नानात्वं सिद्ध्यति ।

बौद्धाश्चापि स्वसिद्धान्तसिद्धोक्तियुक्त्यनुसारमात्मनो नानात्ववादिनः सन्ति । यथा योगाचारबौद्धाः ज्ञानत्वस्य प्रमेयत्वव्यापकतया सर्वस्यापि विज्ञानरूपत्वम् । तच्च आत्मस्वरूपं विज्ञानं क्षणिकम् । अतः क्षणिकविज्ञानरूप एवाऽऽत्मेति सिद्धम् । क्षणिकत्वेन च तस्य विज्ञानरूपस्याऽऽत्मनो नानात्वं सिद्ध्यति ।

इत्थञ्च यथा इमे नानात्मवादिनो दार्शनिका खलु अविद्यावन्तो लोका युक्ताऽयुक्तविचारशून्याः दृष्टान्तररूपेण समुपस्थापिते वेदैः स्वस्वोपनिषन्मुखेन समर्थितेऽद्वैते एकत्वधर्मावच्छिन्ने ब्रह्मणि श्रद्धां विश्वासं नैव प्रकुर्वन्ति ।

तत्र ब्रह्मणोऽद्वैतबोधिका श्रुतयो यथा—

"एकमेवाऽद्वितीयं ब्रह्म" ।

त्रिपाद्विभूतिमहानारायणो प० ३।१ ।

"एकमेवाऽद्वयं ब्रह्मनेह नानास्ति किञ्चन" ।

अध्यात्मोप०—६३ ।

"न तु तद् द्वितीयमस्ति" । बृहदारण्यकोप० ४।३।२३ ।

"नेह नानास्ति किञ्चन" । बृहदारण्य० ४।४।१९ ।

"तस्मादद्वैतमेवाहुर्मुनयः परमार्थतः" । अद्भुतरामा०

"मृत्योः स मृत्युमाप्नोति य इह नानेव पश्यति" ।

बृहदारण्यकोप० ४।४।१९ ।

"एकः सन् भिद्यते भ्रान्त्या मायया न स्वरूपतः" ।

अन्नोपनि०—५।७ ।

तथैव भैमी दमयन्ती अपि विचिन्तयति यदस्मत्प्राप्त्यभिलाषेणातिसुन्दररूपधारणात् कृत्रिमरत्नादिष्विव मायानलेषु बहुरूपातिशयाऽनुभवात् सत्यनलेऽपि श्रद्धा विश्वासः कथं जायतामद्वैतत्त्वे लोक इव ।

अधिकांशतो हि लोकः खल्वनादिभूतेनाऽज्ञानेनाऽनात्मन्येव शरीरेन्द्रियादौ आत्मत्वप्रकारकभ्रमेण मोहात्मकेऽन्धकारे पतितः सन् इदमेव विचारयति यदत्र भद्रकभूते प्रभूते जगति कीदृशाः सन्ति सौन्दर्यसमन्विता रुचिकराः पदार्थाः, एवं पुत्रमित्रकलत्रप्रभृतश्चापि सन्ति विषयास्तान्नोज्झितुं कामयते । नापि चाऽसारसंसारसागरं समुत्तर्तुं चेष्टते । नापि च तत्तरणोपायभूतं किमपि साधनं साधनान्तरं वाऽन्वेष्टुं सम्प्रवर्तते इति तत्रैव जगति, जागतिकेषु वा विषयेषु समासक्तिपुरःसरं रममाणोऽयं लोकस्तावद् द्वैतं भेदं तदात्मकं वा जगत् = समनुभवन् = कथमद्वैततत्त्वे निर्गुणे, निष्कले, निरञ्जने, चिदात्मके ब्रह्मणि श्रद्दध्यात्, कथं वा तत्र विश्वसेत् = इति ।

परन्तु श्रीहर्षेमहादार्शनिको दर्शनशास्त्राऽध्ययनकर्तृत्वेन दार्शनिकविचारधारया समन्वितत्वेन तथाऽऽकाशादिसर्वपदार्थखण्डनपरत्वेन विशेषतः खलु—

"अद्वैतागमनासीरे साधु सा धुन्वती परान् ।
सेवामेवार्जयत्यर्थापत्तिपत्तिपरम्परा" ॥

—शारदायुते खण्डन खं० प्रत्यक्ष बाधो० पृ० ११२

इति स्वविनिर्मितखण्डनखण्डखाद्योक्तकारिकानुसारं चिदात्मकाऽद्वैततत्त्वव्यवस्थापकत्वेन ब्रह्माऽद्वैतसिद्धान्तवादं संस्थापितवान् । तदेवोक्तवान् श्रीहर्षः—

"अद्वैततत्त्व इव सत्यतरेऽपि लोकः" । इति ।

नैषधे, सर्गः १३, श्लो० ३६ ।

इत्थञ्च नैषधनामकेन महाकाव्येन तथा खण्डनखण्डखाद्यनामकेन दार्शनिकेन प्रधानभूतेन ग्रन्थद्वयेन महादार्शनिकः श्रीहर्षो ब्रह्माद्वैतसिद्धान्तवादं सर्वथा सुस्थिरीकृतवान् । महादार्शनिकस्य तथा महाकविवरस्य श्रीहर्षस्य पूर्वोक्तद्वयातिरिक्ताः सन्ति खल्वन्येऽपि ग्रन्थाः । तथाहि—यथा—

(१) "ईश्वराभिसन्धि" नामको ग्रन्थः ।
(२) "शिवशक्तिसिद्धि" ,, ,, ।
(३) "साहसाङ्कचम्पूः" ,, ,, ।
(४) "विजयप्रशस्तिः" ,, ,, ।
(५) "छन्दः प्रशस्तिः" ,, ,, ।
(६) "गोड़ोर्वीशकुलप्रशस्तिः" नामको ग्रन्थः ।
(७) "स्थैर्यविचारण प्रकरणम् नामको ग्रन्थः ।
(८) "अर्णववर्णन प्रकरणम् नामको ग्रन्थः ।

एतेषु प्रागुक्तग्रन्थद्वयातिरिक्तेषु अष्टसंख्याकेषु नहि क्वापि श्रीहर्षाभिमतो ब्रह्माऽद्वैतसिद्धान्तः समुपलभ्यते । स च केवलं 'नैषध' नामके महाकाव्ये तथा खण्डन-खण्डखाद्य' नामके च दार्शनिके ग्रन्थे चोभयत्रैवाऽनुभवगोचरीभूतो भवति । परन्तु तत्राऽनुपलब्धिदर्शनेन श्रीहर्षस्य ब्रह्माऽद्वैतसिद्धान्तभङ्गो भविष्यतीति नैव विभाव्यताम् तु । यतः खण्डनखण्डखाद्य, नैषधोभयनिष्ठं यदुभयत्वं तादृशोभयत्वपर्याप्त्यधिकरणतावता तादृशग्रन्थद्वयेनैव श्रीहर्षस्य ब्रह्माद्वैतसिद्धान्तव्यवस्थापनात् । "उभयत्वं उभयत्रैव पर्याप्तं नत्वेकत्र' इति सिद्धान्तादरात् । वेदस्याप्यत्र प्रामाण्यमाह—

"अद्वैतसिद्धान्तमेव हि सत्यं शिवं सुन्दरं सिद्धान्तमस्ति"

माण्डूक्योपनि० —७ ।

"शान्तं शिवमद्वैतं चतुर्थं मन्यन्ते स आत्मा" । तत्रैव—

'सच्चिदानन्दरूपमिदं सर्वम्" ।—नृसिंहोत्तरताप०—७

सर्वास्वेवोपनिषत्सु खल्वद्वैतब्रह्मणो विवेचनं प्रकारद्वयेन कृतं मिलति । यथा—
(१) विधिरूपेणैकम् (२) निषेधरूपेण च द्वितीयम् । तत्र प्रथमः—

"यतो वा इमानि भूतानि जायन्ते यत् ।
प्रयन्त्यभिसंविशन्ति तद् ब्रह्म" ॥

तैत्तिरीयोप० ३।१ ।

"सच्चिदानन्दरूपमिदं सर्वम्" ।—नृसिंहोत्तरतापः ७ ।

इत्यादिश्रुतिभिर्ब्रह्मणः क्रमेण सर्वतः प्राक् तटस्थलक्षणम्, पुनश्च तदनन्तरं स्वरूपलक्षणं प्रतिपादितं भवतीत्येव सर्वथा समुचितः पन्था ।

एवं स्थिते सृष्टिविधानकाले येन ब्रह्मणा चराचरात्मकं जगदिदं समुत्पन्नं भवति, समुत्पद्य च यस्मिन् पुनः स्वस्थितिसम्पन्नं भवति, ततश्च प्रलयकाले तत्रैव लीनं भवति तदेव ब्रह्म ।

एतेन जगदुत्पत्तिस्थितिलयकर्तृत्वं ब्रह्मणि सिद्ध्यति । इदमेव चास्ति ब्रह्मणस्तटस्थलक्षणम् । ब्रह्म स्वतः सत्यस्वरूपम्, ज्ञानस्वरूपम्, आनन्दस्वरूपम् च वर्तते । अत एव सत्स्वरूप, चित्स्वरूप, आनन्दस्वरूपेति चास्ति ब्रह्मणः स्वरूपलक्षणम् । इयमेव चोपनिषत्प्रमाणभूतस्य वेदान्तस्य विधिरूपा प्रवृत्तिर्निगद्यते इति ।

एवम् "अस्थूलमनणुअह्रस्वमदीर्घम्" इत्यादि, "यत्तदद्रेश्यमग्राह्यमगोत्रमवर्णमचक्षुःश्रोत्रं तदपाणिपादम्" । "अदृश्यमव्यवहार्यम्" इत्यादि श्रुतिभिरितरस्य निषेधं विधाय ब्रह्म प्रतिपाद्यते, इयमेव चास्ति खलूपनिषत्प्रमाणभूतस्य वेदान्तस्य निषेधमुखेन जायमाना प्रवृत्तिः ।

अतएव तात्त्विकदृष्ट्या सैद्धान्तिकदृष्टिकोणतो विचार्यमाणे-उपासनामार्गे सत्यतरमद्वैततत्त्वमेव सम्यक्त्वेन आयाति सुस्थिरीभवति च । तदेव च अद्वैतं ब्रह्म निधेधमुखेनापि खलूपनिषदो गायन्ति । यथा—

"अस्थूलमनण्वह्रस्वमदीर्घम्" इति ।

बृहदारण्यकोप०—३।८।८।

अर्थात् स्थूलभिन्नस्य, अणुभिन्नस्य, ह्रस्वभिन्नस्य, दीर्घभिन्नस्य, अक्षरस्य, अव्यक्तस्य, इन्द्रियातीतस्य, निर्गुणस्य निर्विशेषस्य, सच्चिदानन्दघनस्वरूपस्य तस्याऽद्वैतस्य परब्रह्मण एवोपासना सर्वथा श्रेयस्करीत्यनेन ब्रह्माऽद्वैतसिद्धान्तवादः सर्वदा सुस्थिरीकृतोऽभूद् वेदेषु ।

श्रीश्रीहर्षोऽपि सर्वथा पारमार्थिकसत्तावतस्तस्याऽद्वैततत्त्वस्य परब्रह्मणो विवेचनं कृतवान् "नैषध" महाकाव्यस्य पञ्चमसर्गस्यैकोनचत्वारिंशत्तमे श्लोकेऽपि । तथाहि—

नैषधे, सर्ग ५ श्लो० ३९

"विश्वरूपकलनात्" इत्यस्य विश्वेषाम् = सर्वेषाम्, रूपस्य = स्वरूपस्य, आकलनात् = स्वीकारात् । सर्वात्मकत्वादित्यर्थः । एतेन तस्याऽद्वैततत्त्वस्य परब्रह्मणो विश्वरूपता दर्शिता भवति । तत्र तस्याऽद्वैतब्रह्मणो विश्वरूपतायां प्रमाणान्तरमप्याह—

"ब्रह्ममात्रमिदं सर्वं ब्रह्मणोऽन्यन्न किञ्चन" ।

तेजोबिन्दूप० ३।३२।

अपि च— "उपादानं प्रपञ्चस्य ब्रह्मणोऽन्यन्न विद्यते ।
तस्मात् सर्वप्रपञ्चोऽयं ब्रह्मवास्ति नचेतरत्" ॥

योगशिखोपनि० ४।३।

अपि च—"विश्वरूपकलनात्" इत्यस्याः श्रीश्रीहर्षोक्तेः—विश्वात्मकत्वात् = सर्वात्मकत्वाङ्गीकारादित्यर्थः । "येन यद् व्याप्तं तत्तन्मात्रमेव" इत्यनेनापि ब्रह्मणः सर्वात्मकत्वं सिद्ध्यति । गीतायामपि भगवानेतदेव ब्रूते—

"वायुर्यमोऽग्निर्वरुणः शशाङ्कः—
प्रजापतिस्त्वं प्रपितामहश्च ।

श्रीमद्भगवद्गीता—अ० ११, श्लो० ३९

अर्थात्—वायुः, यमः, अग्निः, वरुणः, शशाङ्कः = चन्द्रदेवः, प्रजापतिः = सर्वलोकपितामहः = चतुर्मुखो ब्रह्मा, प्रपितामहः = तत्पिता विष्णुरपि । त्वमेव = अद्वैतस्वरूपं ब्रह्मैवेत्यर्थः । एतेनाऽद्वैतब्रह्मण सार्वात्म्यं सूचितं भवति—

अथर्ववेदस्याप्यत्र साक्षात् प्रामाण्यमाह—

तथाहि—"त्वमिन्द्रस्त्वं महेन्द्रस्त्वं लोकस्त्वं प्रजापतिः ।

"तुभ्यं यज्ञो वितायते तुभ्यं जुह्वति—
जुह्वतस्तवेद्विष्णो बहुधा वीर्याणि ।
त्वं नः पृणीहि पशुभिर्विश्वरूपैः—
सुधायां मा धेहि परमे व्योमन् ॥

अथर्ववेदः—१७।१।८।

इत्यादिनापि तस्याऽद्वैतब्रह्मणो बहुरूपताप्रतिपादनात् विश्वरूपता सिद्धयति । अन्यच्चापि कैवल्योपनिषन्मुखेन महादार्शनिक श्रीश्रीहर्षोक्तायामद्वैतब्रह्मनिष्ठायां विश्वरूपतायां वेदस्यापि प्रामाण्यमाह—

"स ब्रह्मा स शिवः सेन्द्रः सोऽक्षरः स्वराट् ।
स एव विष्णुः स प्राणः स कालोऽग्निः सः चन्द्रमाः ॥
स एव सर्वं यद्भूतं यच्च भव्यं सनातनम्" ।

कैवल्योप०—१।८-९।

एतेनापि विश्वरूपतापरपर्यायभूतं सर्वात्मकत्वं प्रस्फोरितं भवत्यद्वैतस्य ब्रह्मण इति ।

अपि चाऽपरां दार्शनिकीं दृष्टिमाह—अस्मिन्नेव भ्रान्तिसाधनीभूतमिथ्याप्रतिपत्तिलक्षणदोषात्मकमोहस्वरूपाऽज्ञानाऽन्धकारे शयानानां पाञ्चभौतिकशरीरावच्छिन्नजीवात्मनां विषये दार्शनिकमूर्धन्यो महाकविवरः श्रीश्रीहर्षोऽपि स्वयमेवाऽब्रवीत् । यथा—

"पथ्यां तथ्यामगृण्हन्तमन्धं बन्धुप्रबोधनाम् ।
शून्यमाश्लिष्य नोज्झन्तं मोहमैक्षन्त हन्त ते ॥

नैषधे, सर्गः १७। श्लो० २९।

अर्थात् पथ्याम् = पथ्यकरीम् = हिताम्, तथ्याम् = सत्याम्, बन्धुप्रबोधनाम् = मातृपितृहितेच्छुवर्गेण कृताम्-बोधनाम् = सदुपदेशरूपाम् । सत्कर्मविधानेऽसत्कर्मनिषेधे तात्पर्यवतीं प्रबोधनामित्यर्थः । अगृण्हन्तम् = असत्कर्मनिषेधेऽभिप्रायवतीम् प्रबोधनाम् अनङ्गीकुर्वाणम् । अन्धम् = अज्ञानम् । तथा शून्यम् = अप्रामाणिकम्, अर्थात् जडात्मकाऽनात्मभूतेषु शरीरेन्द्रियादिषु मायापरपर्याया अविद्याया विलासमात्रेणाऽऽत्मत्वप्रकारिकाम् । आश्लिष्य = निश्चित्य । नानाप्रकारेण शतशो बोध्यमानमपि मूर्खतावशात् नोज्झन्तम् = नहि परित्यजन्तम् ! प्राङ्निर्दिष्टं मोहम्, ते देवाः । जनसमुदाये । ऐक्षन्त = अपश्यन् । हन्त = खेदः । 'वर्तते' इति शेषः ।

अस्याः खलु दार्शनिकप्रवरः श्रीश्रीहर्षोक्तेः समर्थनं पुष्टीकरणञ्च भगवान् व्यासोऽपि कृतवान् श्रीमद्भागवते—

"क्रोधो लोभोऽनृतञ्च हिंसा याञ्चा दम्भः क्लमः कलिः।
शोकमोहौ विषादार्त्ती निद्रा आशा भीरनुद्यमः ॥
श्रीमद्महाभागवते,—११।२५।४।

अर्थात्—क्रोधः, लोभः, अनृतम् = असत्यम्, हिंसा, याञ्चा = मांगना, दम्भः = व्यर्थाभिमानम् = पाषण्ड इति हिन्दी। क्लमः = परिश्रमः। कलिः = कलहः = झगड़ा इति हिन्दी। शोकमोहौ = स्पष्टमेतत्। विषादार्त्ती = विषादः = मानसिको दुःखविशेषः। आर्तिः = दैन्यम्। निद्रा। आशा, भीः = भयम्। अनुद्यमः = पुरुषार्थहीनता, इत्यादयः सर्वेऽपि तमोगुणस्य सन्ति व्यापाराः।

अपि पुनस्तत्रैव— "तमो मूढं लयं जडम्" तत्रैव, ११।२५।१५

अन्यत्रापि पुनः श्रीश्रीहर्षोक्ति समर्थयति—

"तमोगुणाज्जीवहिंसा कोपोऽहङ्कार एव च"
ब्रह्मवैवर्तं पु०—

जीवहिंसा, कोपः = क्रोधः। अहङ्कारश्च तमोगुणात् जायन्ते। इमाश्च तमोगुणस्य सन्ति वृत्तय इति।

अपि च तत्रैव पुनः 'अन्ध' शब्देनोक्तं श्रीश्रीहर्षोक्ति समर्थयति—

"सीदच्चित्तं विलीयेत चेतसो ग्रहणेऽक्षमम्।
मनो नष्टं तमो ग्लानिस्तमस्तदुपधारय" ॥
श्रीमद्भागवते—११।२५।१८।

यदा चित्तमिन्द्रियग्राह्यविषयान् ग्रहीतुमशक्तो भवति भवेद्वा, सीदच्च तद् विलीयेत, मनश्च खलु विनाशं गतमिव भवेत्, मनोग्लानिश्च वृद्धि गता जायेत तदा तमोगुणस्य वृद्धिर्जातेत्युपधारय।

अपि च—"तमोलयास्तु निरयं यान्ति"।

अर्थात् तमोलया मानवा नरकं व्रजन्तीति व्यासोऽपि ब्रूते। एवम्— 'प्रमादमोहौ तमसो भवतोऽज्ञानमेव च"। भगवद्गीता—अ० १४।१७।

इदमत्रावधेयमस्ति श्रीश्रीहर्षोक्तौ "अन्धं बन्धुप्रबोधनाम्" इत्याकारिकायां जायमानायां घटकीभूतस्य तमोऽपरपर्यायस्य "अन्धम्" इति पदस्य "अन्धत्वेन" उल्लेखः। अत्र तु तमस्त्वेनैतावांस्तु विशेषः। द्वयोरेव समानार्थकत्वेनैक्यम्।

इदानीं पुनस्तमस्त्वेनैवोल्लिख्यमानस्य भगवद्वाक्यस्य दार्शनिक्या दृष्ट्या समुद्घाटितस्य प्रामाण्यमाह—

"तमस्त्वज्ञानजं विद्धि मोहनं सर्वदेहिनाम्।
प्रमादालस्यनिद्राभिस्तन्निबध्नाति भारत ॥
भगवद्गीता—अ० १४। श्लो० ८।

यद्यपि "गुणाः प्रकृतिसंभवाः" इति प्राचीनाचार्यचरणोक्तिदिशा प्रकृतिजन्यत्वं त्रिषु गुणेषु समानमेवेति वैषम्यं कुतः, कार्येऽपि वैजात्यम् = वैलक्षण्यं कथमिति चोच्यताम् ।

तथापि तमसोऽज्ञानस्वभावाऽव्यभिचारित्वेन "अज्ञानजं तमः" इति तमोलक्षणेऽज्ञानजत्वविशेषणस्य तदन्तःपातित्वेन तेनैव विशेषणेन सर्वेषामेव ब्रह्मादिस्तबान्तानां प्राणिनां जीवानां स्वसम्बद्धानां समानमेव मोहनम्, अर्थात् मोहयति = स्वाविभूत्या स्वास्तित्वसम्पन्नमेव सदसद्विवेकज्ञानं तिरोभावयती,ति मोहनम् । अन्धापरपर्यायभूतं तमः अज्ञानेन जायमानत्वेन मोहकम्, स्वरूपतः = स्वत एव नानाऽऽवरकं चेति विज्ञेयम् । ज्ञानाऽज्ञानयोः परस्परं विरोधित्वात् अज्ञानं तमो ज्ञानमावृणोतीति ज्ञानावरकं बोध्यम् । किन्तस्य कार्यमित्याह—

प्रमादालस्यनिद्राभिरिति । स्वीये कर्तव्ये सम्पादनीये यद् विस्मरणं भवति तदेव प्रमादः, कर्तव्ये सम्पादनीये च श्रद्धावैरूप्येण योऽस्ति उत्साहाऽभाव आलस्यम्, बुद्धिगतजाड्याधिक्येन स्वीयं कर्तव्यदिशा कार्यं समुज्झित्य स्वापः = शयनम् एव निद्रा ।

तम एभिरनर्थभूतैः प्रमादादिरूपैरर्थैः शरीरावच्छिन्नमात्मानं तथाऽऽत्मज्ञमपि बध्नाति । अर्थात्तमोविचारशक्तिनाशकत्व, बुद्धिमान्द्यप्रभृतिधर्मैर्मोहयित्वा ब्रह्मवेत्तारमात्मज्ञमपि स्वस्मिन् या चास्ति निष्ठा, सद्भावना च तद्भाविताऽन्तःकरणशून्यं विधत्ते, अर्थात् स्वनिष्ठाविमुखं प्रकुरुते ।

यथा जन्माऽनेकशतैः सत्त्वगुणप्रधानयागदानप्रभृतिसत्कर्मानुष्ठानपरिपक्वतातो जायमानं सात्त्विकं ज्ञानं विज्ञानं वा मोक्षजनकीभूतं भवति, तदानीन्तनकालावच्छेदेन परिपूर्णानन्दाऽमृतरसपायितान्ते भजन्ते ।

अपि च वेदाः "नित्यं विज्ञानमानन्दं ब्रह्म "इत्याद्युपनिषन्मुखेनाऽऽत्मन आनन्दरूपताम्, परिपूर्णरूपताञ्च प्रतिपादयन्तीत्युच्यते चेत्तदा सदा सर्वथा सकलानामेव साधकानां समुपासकानां यतीनां योगिनाञ्च स्वयमेवाऽऽनन्दानुभूतिः स्यादेव पुनः किमर्थं तदर्थं प्रयासो विधीयते इति चेदुच्यते, तन्न समीचीनम्—मनसस्तद्वृत्तेश्चापि सर्वथा विशुद्धिसापेक्षत्वादात्मस्वरूपसाक्षात्कारस्य ।

इत्थञ्चाऽऽत्मबुद्धिप्रसादजं नित्यं निरन्तरं त्रिविधपरिच्छेदशून्यस्य सच्चिदानन्दैकरसस्य परब्रह्मणः सान्निध्यजं भगवतः परमेश्वरस्य प्रसादैकप्रयोजनकं निरतिशयं सात्त्विकं सुखं समवाप्नोतीति सात्त्विकं ज्ञानं मोक्षायैव भवतीतिः भावः ।

तथा यस्मिन् कर्मणि क्रियमाणे धर्मरूपो वा बलक्षयो वा आयुः क्षयो वाऽन्यस्य वा कस्यचित् सात्त्विकस्य कार्यस्म क्षयो वा भवेत् तत्तामसमित्युच्यते । तामसकर्मविषयकं तामसं ज्ञानं केवलं जनन, मरण, जननीजठरेशयनरूपमहादुःखविषयकमनुभवं जनयतीति तज्जन्य मरणरूपमहादुःखप्रवाहायैव भवति, न तु स्वर्गाय नापि मोक्षायेति विदाङ्कुर्वन्तु भवन्तः । एवञ्च "पथ्यां तथ्यामगृह्णन्तमन्धं बन्धुप्रबोधनाम्" इत्यनया श्रीहर्षोक्त्या=उपर्युक्ता दार्शनिकी दृष्टिरेव ध्वनिता भवति । इति दशमोऽध्यायः ।

विषयानुक्रमणिका

क्रमांङ्कः	पृष्ठाङ्कः
१. तत्र सर्वतः प्राक् संस्कृतविचारः	१
२. संक्षेपतः संस्कृतपदार्थविचारः	१
३. किं काव्यम्	३
४. रसस्वरूपविवेचनम्	३
५. इदानीं महाकाव्यलक्षणं ब्रूते,	५
६. संस्कृत महाकाव्यानामत्रैतिहासिको दृष्टिर्विचार्यते,	६
७. काव्यसम्पत्सामग्रीविवेचनम्,	९
८. रघुवंशमहाकाव्येऽपि दार्शनिकीं दृष्टिमाह	१०
९. जगत्पदार्थमाह	११
१०. प्रवृत्तेर्द्वैविध्यमाह	१३
११. जगत्पदार्थविषये विशेषविचारमाह	१३
१२. काव्यप्रयोजनम्	१६
१३. काव्यप्रयोजनविचारः	१८
१४. कालिदासस्य ब्रह्माद्वैतसिद्धान्तपूर्णा दार्शनिकी दृष्टि	
१५. रचना प्रमाणान्तरैः पुष्टीकृता	२१
१६. आस्तिकदृष्टिकोणमाह	२३
१७. किं काव्यमित्यपक्रम्यते	२५
१८. काव्यस्य काव्यसम्पत्सामग्र्याश्च स्वरूपविवेचनम्	२५
१९. कोऽस्ति काव्यपदार्थः	२६
२०. काव्यस्य किमपि वैशिष्ट्यम्	२६
२१. संस्कृतमहाकाव्यस्योद्भवविषये किञ्चित्	३०
२२. संस्कृतमहाकाव्यानां विकासक्रमः	३१
२३. श्रीभारवेः ब्रह्माऽद्वैतसिद्धान्तः	३२
२४. एतन्मते सत्तात्रयविचारः	३२
२५. प्रातिभासिकी सत्ता	३२
२६. व्यावहारिकी सत्ता	३३
२७. पारमार्थिकी सत्ता	३३
२८. सन्दर्भविचारः	३४
२९. दार्शनिकतत्त्वानां निर्देशः	३५
३०. मन्तरेणापि तत्त्वानि प्रदर्श्यन्ते	३६
३१. तत्रैव	३७

क्रमाङ्कः	पृष्ठाङ्कः
३२. तत्रैव दृश्यताम्	३७
३३. ब्रह्माऽद्वैतमहत्त्वम्	४०
३४. भगवान् स्वयं प्रोवाच	४१
३५. शक्तेराश्रयं किमिति निरूप्यते	४३
३६. कालिदासस्याऽद्वैतसिद्धान्तः	४४
३७. आस्तिकदृष्टिकोणमाह	४७
३८. वेदान्तमतेन तुलनात्मकं व्याख्यान्तरमेकवाक्यत्वञ्च	४९
३९. मायाविषये किञ्चित्	५१
४०. अन्योऽपि दार्शनिकदृष्टिकोणः समुद्भाव्यते	५०
४१. मायाविषयेऽन्यदपि किञ्चित्	५५
४२. तस्या महाकाव्यनिष्ठाया दार्शनिकदृष्टेर्विशेषतो विचारः	५६
४३. पदविचारः	५७
४४. पदशक्तिविवेचनम्	५८
४५. यौगिकादिचतुर्णां पदानां लक्षणान्याह	५८
४६. पदार्थविवेचनम्	६०
४७. पदाभिधेयतावान् पदार्थः	६१
४८. पदार्थविभागः	६४
४९. संस्कृतमहाकाव्येषु दार्शनिकी दृष्टिः	६८
५०. काव्यशब्दार्थः	६८
५१. दृष्टिशब्दार्थः	६९
५२. दर्शनशब्दार्थः	६९
५३. महाकाव्येभ्यो दर्शनस्य सम्बन्धः	७०
५४. वागर्थयोः सम्बन्धः	७०
५५. वन्दनपदार्थः	७१
५६. जगत्पदार्थे दार्शनिकी दृष्टिः	७२
५७. पितृत्वविवेचनम्	७३
५८. दार्शनिकदृष्टिरूपवन्दनशब्दार्थविचारः	७४
५९. वन्दनशब्दार्थविचारः	७५
६०. वेदान्तमतेन दार्शनिकदृष्टौ तुलनात्मकं व्याख्यान्तरम्	७७
६१. कालिदासस्याऽद्वैतदृष्टिः	८०
६२. अद्वैतदृष्टेः प्रतिबन्धकविचारः	८२
६३. अंशतो दार्शनिक (तत्त्व) मायाविचारः	८३
६४. किमधिकं वयं ब्रूमः	८४
६५. निर्गुणब्रह्माऽद्वैतविचारः	८५
६६. कुमारसंभवे	८७

क्रमाङ्कः	पृष्ठाङ्कः
६७. नहि ते प्रपञ्चस्यैव ज्ञानोत्पत्तिलयेषु मायापेक्षा इत्याह	८८
६८. जगत्पदार्थो विचार्यते	९२
६९. ब्रह्माऽद्वैतसिद्धान्तेन दार्शनिकदृष्ट्यन्तर्गतजगद्विचारः	९३
७०. वेदान्तमतेन दार्शनिकदृष्टौ तुलनात्मकं व्याख्यान्तरम्	१०३
७१. कालिदासः	१०८
७२. कालिदासीयरचनास्वरूपरघुवंशघटकीभूतसंबंधत्वसम्पादकीभूतपदार्थ-विचारमाह	१०९
७३. पदार्थोविचार्यते	१०९
७४. वागर्थयोः सम्बन्धघटकीभूतं पदं निरूप्यते	११०
७५. वागर्थयोः सम्बन्धविवेचनावसरे सम्बन्धसामान्यविचारः	१११
७६. तत्र समवायविचारः	१११
७७. संयोगविचारः	११२

द्वितीयोऽध्यायः

७८. अश्वघोषः	११७
७९. अश्वघोषस्य मातुर्नाम्	११८
८०. मनसः शान्तिफलविचारः	११९
८१. श्रीमद्भागवते	११९
८२. भगवद्बुद्धाभिमतोऽश्वघोषविचारः	११९
८३. यागीयहिंसायाः पापजनकत्वविचारः	१२३
८४. अन्यच्चापि श्री अश्वघोषस्य ज्ञानमाहात्म्यम्	१२५
८५. ज्ञानमाहात्म्यम्	१२६
८६. विवर्तवादश्च	१२६
८७. विशुद्धज्ञानमाहात्म्यम्	१२७
८८. अन्यत्रापि ब्रह्मणो विवर्तवादपक्षप्रामाण्यमस्ति	१२८
८९. ज्ञानप्लवमहत्त्वविचारः	१२९
९०. अश्वघोषस्य मिश्रितज्ञानचर्चा	१३७
९१. ज्ञानप्लवविपरीतमार्गोल्लेखः	१३९
९२. श्रीअश्वघोषो भगवतो बुद्धस्योक्तिमनुवदति	१४२
९३. यागक्रियाणां विकारहेतुत्वम्	१४३

अश्वघोषविचारः

९४. ज्ञानप्लवेन जप, दान, पवित्रतीर्थानां तिरस्कृतिविचारः	१४४
९५. शास्त्रप्रामाण्यविवेचनम्	१४८
९६. दार्शनिककृतयः	१४८
९७. मोक्षविचारः	१५६

क्रमाङ्कः	पृष्ठाङ्कः
९८. क्षणिकत्वविचारः	१५६
९९. अस्य कृतयः	१५९
१००. सुषुप्तेर्ज्ञानशून्यत्वे प्रमाणमाह	१६३
१०१. दार्शनिकदृष्टान्तरसमुद्‌भावनम्	१६५
१०२. अध्यात्मस्वरूपविचारः	१६७

तृतीयोऽध्यायः

महाकविश्रीभारविः

१०३. भवो विचार्यते	१७३
१०४ विशेषतो भवविचारः	१७५
१०५. ज्ञानयज्ञविचारः	१७७
१०६ महाकवेः श्रीभारवेः किरातार्जनीयेऽन्या दार्शनिकी दृष्टिः	१८२
१०७. महाकविः श्रीमाघः, (ई० ६६०-६७५)	१८६
१०८. गीतायान्तु भगवान् कृष्णः स्वयमेव यज्ञस्य महत्त्वं ब्रूते	१८८
१०९. यज्ञस्याऽनुष्ठेयतारूपां दार्शनिकीं दृष्टि दर्शयति श्रीकृष्णः	१८९
११०. अन्यामपि पुनदार्शनिकीं दृष्टिमाह,	१९२
१११. इदानीं शिशुपालबधनामके महाकाब्ये सांख्यसिद्धान्तमनुसृत्यापि दार्शनिकीं दृष्टि दर्शयति	१९३
११२. त्याग, संन्यास, शब्दार्थयोः सादृश्यं वदन्ति	१९६
११३. कर्मणां नैष्कर्म्यकथनम्	१९८
११४. यागादीनां द्वादशविधत्व बहुत्वप्रकारको विचारः	२०२
११५. भगवान् श्रीकृष्णोऽर्जुनं प्रति ब्रूते	२०२
११६. तमः पदार्थमादाय दार्शनिकदृष्टेर्विवेचनम्	२०५
११७. इदानीमन्वयव्यतिरेकमुखेन कर्मविधानाऽविधानमाह	२०१
११८. इदानीं तमसः सस्वरूपं कार्यं दर्शयति	२०८
११९. तमसि विप्रतिपत्तिः	२११
१२०. तमसो भावत्वखण्डनम्	२१२
१२१. वेदान्तमतेन तमसो द्रव्यान्तरत्वम्	२२६
१२२. तमसोऽतिरिक्तद्रव्यत्वानङ्गीकारः	२१६
१२३. दार्शनिकदृष्टिविषयीभूतं सादृश्यम्	२१७

महाकविः श्रीरत्नाकरः

१२४. रत्नाकररचनासु दार्शनिकतत्त्वानां तत् सन्दर्भाणाञ्च सोपपत्तिकं विवेचनम्	२२०
१२५. निर्विशेषाद्वैतवादिमतमाह	२२१
१२६. सगुणब्रह्मविचारः	२२१
१२७. तदेवोक्तवान् महाकविः श्रीरत्नाकरः	२२३

क्रमाङ्कः	पृष्ठाङ्कः
१२८. निर्गुणब्रह्मविवेचनम्	२२३
१२९. निर्गुणसगुणब्रह्मणोश्चास्ति औपाधिको भेदः	२२३
१३०. श्रीरत्नाकरकृतौ दार्शनिकतत्त्वानामन्वेषणम्	२२६
१३१. भगवतः परमेशितुः कालरूपत्वम्	२२७
१३२. कालाख्यायाः शक्तेर्विचारः	२२७

चतुर्थोऽध्यायः

१३३. महाकवि श्रीविल्हणकृतौ दार्शनिकतत्त्वानामन्वेषणम्	२३९
१३४. श्रीहर्षस्य ब्रह्माद्वैतसिद्धान्तविचारः	२४२
१३५. पुनस्तस्यैवाऽज्ञानस्वरूपमोहान्धकारस्य दूषितत्वमाह	२४८
१३६. भगवन्निरूपितवात्सल्यमापन्नोऽर्जुनो यदा पृच्छति	२४९
१३७. विशिष्टज्ञानात्मकविज्ञानस्वरूपमाह	२५३
१३८. इदानीमवधूतोपनिषदि वर्णितां ब्रह्मणः सर्वस्वरूपतामाह	२५९
१३९. परमेश्वरस्य जगत्कारणत्वतद्वशित्वविचारः	२६०
४४०. भेदस्य द्वैतस्य च व्यावहारिकमात्रत्वम्	२६२
१४१. ज्ञानालोकप्रकाशः	२६८
१४२. मोहकलिलस्य व्याख्यान्तरम्	२७१
१४३. ज्ञानस्य सर्वश्रेष्ठत्वविचारः	२७५

संस्कृत महाकाव्येषु दार्शनिकी दृष्टिः

तत्र सर्वतः प्राक् संस्कृतविचारः

इह किल प्रचञ्चूर्यमाणे वैरिञ्चे प्रपञ्चात्मके दृश्यादृश्योभयत्वावच्छिन्नलक्षण-लक्षिते विलक्षणेऽस्मिन् जगति समुपलब्धिं गतासु सर्वासु भाषासु देवभाषात्वेन व्याह्रियमाणा वाचा व्यवह्रियमाणा चास्तीदं संस्कृतभाषा देवभाषा, देववाणी साक्षात् सरस्वती-त्यपरनाधेयतां गताऽतीव प्राचीनतमैव नहि किन्तु सर्वतः दीर्घ, दीर्घतर, दीर्घतमकाला-वच्छिन्नत्वे सति लम्बायमानप्राचीनतमकालावच्छिन्ना सती सुपरिष्कृता सती च सुसंहतापि वर्तमानेत्यस्ति मे 'रजोला' इत्युपाह्वस्य 'राजेन्द्रप्रतापस्याऽद्यतनकालावच्छिन्नः प्रमात्मकोऽनुभव इत्यत्र नास्ति लेशतोऽपि सन्देहानध्यवसायाऽवसर इति च स्वयमेव विदाङ्कुर्वन्तु भवन्तोऽपि।

तात्त्विकदृष्ट्या विचार्यमाणे सतीयमस्ति भाषा देवानां तथा देवोपमानां ब्राह्मणानाञ्च। ब्राह्मणानामपि 'भूसुर'पदाभिधेयतया अर्थात् भुवः=पृथिव्याः, सन्ति ये=सुराः=देवा अर्थात् ब्राह्मणास्तेषामपि 'भूसुर' पदजन्यबोधविषयतात्वावच्छिन्नप्रकारतानिरूपित-विशेष्यतावत्त्वेन देवत्वं वाऽक्षुण्णमेवेत्यत्र नास्ति कश्चन विवादाऽवसरो यद्यस्ति शास्त्राणां प्रामाण्यम्।

संक्षेपतः संस्कृतपदार्थविचारः

संस्कृतमहाकाव्यघटकीभूतस्य संस्कृतपदस्य 'सम्' पूर्वक 'क्त' प्रत्ययान्तेन 'कृ' धातुना सम्पन्नत्वेन तत्रैकः खलु विलक्षण एव देवमुखादुच्चारणरूपः, 'ब्राह्मणोऽस्य मुख-मासीत्' इति न्यायेन ब्राह्मणमुखादुच्चारणरूपो वा संस्कारस्तत्र समागच्छति समुत्पद्यते वा येनाऽस्याः संस्कृतेतिनामकरणमर्थानुकूलमेव जातम्। अत एव संस्कृतसम्पत्तिमत्तयाऽस्या भाषाया एतद्भाषानिष्ठत्वेन सुपरिष्कृतत्व, सुसंहतत्वेर्तिविशेषणद्वयदानमपि साधु संगच्छते येनेयं भाषा सुपरिष्कृता सुसंहृता चेति मीयते। एतदनुरूपं दृष्टान्तमाह—यथा—यागस्थलोक्त 'व्रीहीन् प्रोक्षती'त्येतद्वाक्यघटकीभूतस्य व्रीह्यादेर्यज्ञाङ्गतासम्पादनाय वेददर्शित-दिशा प्रोक्षणादिजन्यः संस्कारविशेषस्तत्र व्रीह्यादौ कल्प्यते। यतः साक्षाद् यागाङ्गभूत-पुरोडाशनिर्माणार्थम् 'प्रोक्षिता एव व्रीहयोऽवघाताय कल्प्यन्ते नाऽप्रोक्षिता' इति तु भट्टा-वदन्ति, इष्टश्चास्ति सर्वेषाम्, अयमेव चास्ति सिद्धान्तपक्षः।

कर्मकाण्डिनस्तु ब्राह्मण, क्षत्रियादीनां वेदोक्ता वैवाहिककर्मयोग्यताऽऽधायका गर्भा-धानादिक्रियाकलापजन्या दशविधाः संस्काराः सन्तीति वदन्ति। ते च संस्कारा विषय-भेदादन्योन्यं भेदवन्तः सन्तो भवन्ति दशत्वसंख्यावन्त इति। तथाहि—

(१) 'गर्भाधानम्' इति चास्ति प्राथमिकः संस्कारः।
(२) 'पुंसवनम्' इति च द्वितीयः।
(३) 'सीमन्तोन्नयनम्' इत्यस्ति तृतीयः।

(४) 'जातकर्म' इति च चतुर्थः संस्कारः ।

(५) 'नामकरणम्' इत्यस्ति पञ्चमः ।

(६) 'निष्क्रमणम्' अयमप्यस्ति षष्ठः संकारः ।

(७) 'अन्नप्राशनम्' इति चास्ति सप्तमः ।

(८) 'चूडाकर्म' इति चाष्टमः ।

(९) 'उपनयनम्' इति च नवमः संस्कारः ।

(१०) 'विवाह'श्चास्ति दशमः संस्कारः ।

(११) 'और्ध्वदेहिको'ऽप्यस्ति एक एकादशः संस्कारः । अयञ्च संस्कारो मरणानन्तरं जायमानोऽस्तीति दशविधसंस्कारातिरिक्तत्वेन गणनावच्छेदककुक्षौ निक्षिप्तः कैश्चिद्धर्मशास्त्रज्ञैः ।

एवमितोऽतिरिक्ता अपि षोडशसंस्कारा वर्ण्यन्ते कैश्चिद् विद्वद्भिः । अपरैश्च धर्मकोविदैरन्योन्यं भेदमापन्नास्ते संस्काराश्चाष्टाचत्वारिंशत्संख्यावन्तो भवन्तीति निरूप्यते । तल्लक्षणञ्च—'सामान्यगुण, आत्मविशेषगुणवृत्तिगुणत्वव्याप्यजातिमान् संस्कारः' इति । सा च गुणत्वव्याप्या जातिः संस्कारमात्रनिष्ठा संस्कारत्वरूपा विज्ञेया ।

यथा = क्वचित् पृथिव्यादिप्रदेशेषु सहस्रसंख्याकेषु लक्ष्यसंख्याके वा घटेषु सत्सु तेषां सर्वेषामेकरूपेण बोधं विधातुकामा नैयायिकास्तत्रैकां घटत्वस्वरूपां जातिं कल्पयन्ति । अपरेच बौद्धास्तत्र तद्भिन्नभिन्नत्वरूपम् अतद्व्यावृत्तत्वलक्षणक्षितम् अपोहं कल्पयन्ति । तथैव दार्ष्टान्तेऽपि संस्कारत्वजातिः सर्वेष्वेव संस्कारेषु समनुगता सती सन्तिष्ठामाना समनुभूयते इति भावः ।

इत्थञ्च नैषध, रघुवंश, कुमारसंभव, शिशुपालवध, प्रभृतीनां महाकाव्यानां सर्वेषामेव संस्कृतभाषायां समनुविद्धत्वेन देववाण्यां देवभाषायाममरभारतीत्वेन व्यवह्तित्वेन च तेऽपि महाकाव्यभूताः प्रभूता ग्रन्था संस्कृतमहाकाव्येति संज्ञया संज्ञिता भवन्ति ।

इयं संस्कृतभाषा देववाणी, देवभाषेतिनाम्नापि प्रसिद्धिं गता वर्तते इत्युक्तं प्राक् । महाकविश्रीदण्डिनापि स्वयं स्वेन विनिर्मिते 'काव्यादर्शं' नामके ग्रन्थेऽस्यैव समर्थनं व्यधायि । यथा—'संस्कृतं नाम दैवी वागन्वाख्याता महर्षिभिः' इति च व्यलेखि । एवमन्यत्रापि—'देवीं वाचमजनयन्त देवास्तां विश्वरूपाः पशवो वदन्ति'—ऋग्वेदः—मं० ८।१००।११।

इत्यनेन वैदिकेन वाक्येनाऽस्या वाचो देवनिष्ठजनकतानिरूपितजन्यतावत्त्वस्तीति सर्वेऽपि विदाङ्कुर्वन्ति वेत्तारः, अत एतस्या संस्कृतभाषायाः समुद्भवकालनिधारणं विधातुं नहि शक्यते कैश्चिद्विपश्चिद्भिः । अस्याः संस्कृतभाषायाः सर्वतः प्रागुच्चारणकर्तृत्वेन संस्कृतभाषात्वं वाल्मीकिरामायणान्तर्गतबुद्धिमद्वरिष्ठश्रीहनुमद्वाचो भङ्ग्या संलक्ष्यते । तथाहि—

'अहं ह्यतितनुश्चैव वानरश्च विशेषतः ।
वाचं चोदाहरिष्यामि मानुषीमिह संस्कृताम् ॥

यदि वाचं प्रदास्यामि द्विजातिरिव संस्कृताम् ।
रावणं मन्यमाना मां सीता भीता भविष्यति ॥

वा० रा० सुन्दरकां, अध्या० पञ्चमः—

किं काव्यम् ?

महाकाव्यघटकीभूतकाव्यस्य, तन्निष्ठस्य च काव्यत्वस्य लक्षणमाह—'वाक्यं रसात्मकं काव्यम्' अर्थात् रसात्मकं वाक्यं काव्यमिति तु फलितोऽर्थः। एवं रसात्मकत्वे सति वाक्यत्वं काव्यत्वमिति चास्ति काव्यनिष्ठस्य काव्यत्वस्य लक्षणम् । इत्थञ्च व्यञ्जकतासम्बन्धेन रसादिविशिष्टवाक्यत्वं काव्यत्वम् इति तु निष्कर्षः ।

एवम् अलङ्कारशेखरे श्रीकेशवमिश्रः 'काव्यं रसादिमद्वाक्यं श्रुतं सुखविशेषकृत्' इति च काव्यलक्षणं विधत्ते ।

तथैव सरस्वतीकण्ठाभरणे भोजेनापि तत्र 'निर्दोषं गुणवत् काव्यमलङ्कारैरलङ्कृतम्' इत्यनेन पद्यात्मकेनार्धश्लोकेन काव्यलक्षणं सूचितं भवतीति विज्ञेयम् ।

एवं 'चन्द्रालोक'नामके ग्रन्थे श्रीजयदेवः पद्यबद्धं काव्यलक्षणं ब्रूते—

'निर्दोषा लक्षणवती सरीतिर्गुणगुम्फिता ।
सालङ्काररसानेकवृत्तिर्वाक् काव्यनामभाक् ॥'

इदञ्चास्ति काव्यलक्षणं शब्दात्मकम्—वाचः शब्दरूपत्वात्, वाक्यस्यापि तथात्वात् ।

पण्डितराजः श्री जगन्नाथोऽपि—'रमणीयार्थप्रतिपादकः शब्दः काव्यम्' इत्येव काव्यलक्षणं विहितवान् । अस्यापि काव्यलक्षणस्य शब्दरूपत्वं विज्ञेयम् ।

रसस्वरूपविवेचनम्

सर्वत्र काव्यलक्षणानां रसघटितत्वेन 'घटितबुद्धित्वावच्छिन्नं प्रति घटकज्ञानस्य कारणत्वम्' इति न्यायेन, आहोस्वित्' विशिष्टबुद्धित्वावच्छिन्नं प्रति प्रकृते 'रसविशिष्ट बुद्धित्वावच्छिन्नं प्रति' 'विशेषणज्ञानस्य' प्रकृते 'रसात्मकविशेषणज्ञानस्य' कारणत्वमनुभवानुरोधात् सिद्ध्यति । सा च सिद्धिः—रसात्मकविशेषणावगतिं विना नैव भवितुमर्हतीति काव्यलक्षणनिष्पत्तये रसस्वरूपावगतिर्नितान्तमावश्यकीति रसस्वरूपं निरूपयामि–रस्यते = आस्वाद्यते, यः स एव रसः, अर्थात् 'रस'–आस्वादन = स्नेहनयोः' इत्यस्माद् 'घञ्' प्रत्ययान्तात्, 'अच्' प्रत्ययान्ताद्वा धातोरवयवार्थकयौगिकव्युत्पत्तिबलेन 'रस' शब्दो निष्पन्नो भवति । आस्वादश्च काव्यार्थसम्भेदादात्मानन्दसमुद्भवरूपः ।

रसलक्षणन्तु—रसवृत्तिगुणत्वव्याप्यजातिमान् रसः, सा च गुणत्वव्याप्या जाति—रसत्वरूपा जातिः सर्वेषु रसेषु वर्तते । घटत्व, पटत्वादिजातिवत् ।

तत्र साहित्यशास्त्रविशारदा विभावानुभावसञ्चारिभावव्यङ्ग्यो रत्यादिस्थायिभावकः शृङ्गारादिर्नवविधो रस इति वदन्ति । तत्र तल्लक्षणञ्च—

'विभावेनानुभावेन व्यक्तः संचारिणा तथा ।
रसतामेति रत्यादिः स्थायी भावः सचेतसाम् ॥'

सा. द. परिच्छेदः–तृतीयः, श्लो० ३२

रसस्य प्रागुक्तनवविधत्वमाह—

'शृङ्गार, हास्य, करुण, रौद्र, वीर, भयानकाः ।
वीभत्सोद्भुत इत्यष्टौ रसाः शान्तस्तथा मतः ।.'

तत्रैव श्लो० २०९

तत्रैव साहित्यदर्पणे दशमस्यापि रसस्य वर्णनं मिलति । तथाहि—

'वत्सलाख्यं दशममपि रसं मुनीन्द्रादयोऽङ्गीचक्रुः' ।

तत्रैव—श्लो० २४१

इत्यनेन 'वत्सलाख्यो'ऽतिरिक्तो दशमो रसोऽपि व्याख्यातः ।

वेदान्तिनस्तु—'रसो वै सः' तैत्तिरीयोप०—२।७।

'ब्रह्मामृतरसासक्तः' तेजोबिन्दूप०—४।५७।

'ब्रह्माऽमृतरसे मग्नः' ,, ,, ,, ,,

ब्रह्मण आनन्दः, ज्ञानं वा रसः । यथा = 'रसो वै सः' 'रसं ह्येवायं लब्ध्वाऽऽनन्दीभवति'—तैत्तिरीयोपानि०—२।७।

अपि च— 'अखण्डैकरसं भोज्यमखण्डैकरसं हविः ।
अखण्डैकरसो होमः अखण्डैकरसो जपः ।।'

तेजोविन्दूपनि० २।२९

एतेन अखण्डैकरसत्वकथनेन रसस्य ब्रह्मरूपता दर्शिता भवति ।

अपि च— 'सत्त्वोद्रेकादखण्डस्वप्रकाशानन्दचिन्मयः ।
वेद्यान्तरस्पर्शशून्यो ब्रह्मास्वादसहोदरः ॥

साहित्य द० परि० ३। श्लो० ३३ ।

नैतावन्मात्रकथनमेव रसविषये पर्याप्तमस्तीति आनन्दकन्दः सच्चिदानन्दः श्रीकृष्णचन्द्रः स्वयं ब्रूते यत् रस, प्रभा-प्रणवादिरूपेण जलादेः कारणात्मना तिष्ठतः स्वस्मात् पृथक्–जलादीनां सत्तैव नास्ति । यथा मृत्तिकाकार्यस्य घटादेर्मृत्तिकारूपेण सन्तिष्ठमानत्वं प्रत्यक्षसिद्धम् । यथा वा चन्द्रसूर्ययोस्तत्कारणीभूतप्रभारूपेणाऽहमेवास्मि सन्तिष्ठमानः । अतस्तत्कारणीभूते तत्स्वरूपभूते च मयि तौ द्वावेव प्रोतौ स्तः । मत्सत्तातिरिक्ता तयोर्नास्ति कापि सत्ता । एवमेव सकलेष्वपि वेदेषु यजुर्वेदादिषु खल्वहमेवास्मि प्रणवरूपः । अर्थात् ॐ काररूपेणाऽहमस्मि सन्तिष्ठमानः । अतः प्रणवस्वरूपे मयि स्वकारणे सर्वे वेदाः सन्ति प्रोतास्तथैव प्रकृतेऽपि प्राङ्निरूपितो विषयो रसात्मकोऽपि विज्ञेयः । यथोक्तम्—

'रसोऽहमप्सु कौन्तेय ? प्रभास्मि शशिसूर्ययोः ।
प्रणवः सर्ववेदेषु शब्दः खे पौरुषं नृषु ॥

गीता, अ० ७ । श्लो० ८ ।

एवमन्यच्चापि बोध्यम्—

'यदादित्यगतं तेजो जगद् भासयतेऽखिलम् ।
यच्चन्द्रमसि यच्चाग्नौ तत्तेजो विद्धि मामकम् ॥

गीता १५।१२ ।

एवमन्यत्र वेदेष्वपि—

'आदित् पश्याम्युत वा शृणोम्या-
मा घोषो गच्छति वाङ्मासाम् ।
मन्ये भेजानो अमृतस्य तर्हि-
हिरण्यवर्णा अतृपं यदा वः ॥
अथर्ववेदः—३।१३।६ ।

अर्थात्—आत् इत् = अस्मिन् स्वस्वरूपाभ्यन्तरे । पश्यामि = यदपि दृष्टिगोचरीभूतं भवति तदेव प्रभाभूतं प्रभूतं तेजो भगवति भास्करे चन्द्रे चास्ति वर्तमानम् । उत वा = अथवा । घोषः = शब्दः । मा = माम् । आगच्छति = प्राप्नोति । शृणोमि यं शब्दं शृणोमि शब्दत्वावच्छिन्नं तमेव स्वविभूतिरूपेणाऽनुभवामि । (तथा) वाक् = वागिन्द्रियस्य तस्य च गुणः । आसाम् = रसाधिष्ठानभूतानामेतेषां जलानां गुणः । मा = माम् । आगच्छति = प्राप्नोति स्वविभूतिरूपेण । यदा = यस्मिन् समये । अमृतस्य = अमृतस्वरूप ओंकारस्य । भेजानः = भजनं प्रकुर्वाणो जीवात्मा मयि अवस्थितो भवति तदाऽहम् । मन्ये = तं जीवात्मानमपि स्वस्वरूपं मन्ये । हिरण्यवर्णाः = हे विशुद्धस्वरूपमापन्ना जीवात्मानः ? तर्हि । वः = ओंकारस्वरूपं भजमानानां जीवात्मनां पौरुषतः । अतृपम् = तृप्तो भवामि ।

एतेनापि वेदवाक्येन 'रसो वै सः' इत्यादिश्रुतिदर्शितदिशा ब्रह्मणः रसस्वरूपता, रसस्य वा ब्रह्मरूपता सिद्ध्यति ।

इदानीं महाकाव्यलक्षणं ब्रूते

'सर्गबन्धो महाकाव्यं तत्रैको नायकः सुरः' ॥ ३१५ ॥—सा० द० परि० ६

तत्र = महाकाव्ये, सर्गबन्धः = सर्गैरवान्तरार्थवर्णनैरुपलक्षितो बन्धः = रसवत्पद्यकदम्बविन्यासः खलु महाकाव्यमित्युच्यते । तत्रैकः = एकमात्रम्, नायकः । भवतीति शेषः । सोऽपि सुरः = देवताप्रकृतिकः, धीरोदात्तगुणान्वितः । आहोस्वित् धीरोदात्तगुणान्वितः, सद्वंशः = सत्कुलीनः । क्षत्रियः एको नायको भवितुमर्हति । क्षत्रियो वापि इतिवाक्यघटकीभूतेन 'अपि' शब्देन क्षत्रियत्वावच्छिन्नप्रतियोगिकभेदवान् जातिमानपि तादृशो नायको भवितुं प्रभवति । यथा नैषधे ग्रन्थे महाकाव्ये एकः क्षत्रियो नायको नलस्तथाविधोऽनुभूयते । अपि च—

'सद्वंशः क्षत्रियो वापि धीरोदात्तगुणान्वितः ।
एकवंशभवा भूपाः कुलजा बहवोऽपि वा ॥ ३१६ ॥
तत्रैव-श्लो० ३१६

अथवा—एकवंशभवाः = एककुलोत्पन्नाः, कुलजाः = सत्कुलीनाः, बहवः = अनेका अपि, धीरोदात्तगुणान्विताः । भूपाः = क्षत्रिया राजानो नायकाः । भवितुं प्रभवन्ति । यथा रघुवंशनामके महाकविकालिदासबिरचिते महाकाव्ये दिलीप, रघु, अज, प्रभृतयस्तत्र बहवो नायकाः सन्ति । शिशुपालवधनामके महाकाव्ये केवल एक एवास्ति नायकः श्रीकृष्णः । कुमारसंभवेऽपि महाकाव्ये चास्ति एक एव नायकः कार्तिकेयः । अपि च तत्र महाकाव्ये खल्वङ्गाङ्गित्वादिनोल्लेखमाह—

श्रृङ्गारवीरशान्तानामेकोऽङ्गी रस इष्यते ।
अङ्गानि सर्वेऽपि रसाः सर्वे नाटकसन्धयः ॥ ३१७ ॥
इतिहासोद्भवं वृत्तमन्यद्वा सज्जनाश्रयम् ।
चत्वारस्तस्य वर्गाः स्युस्तेष्वेकञ्च फलं भवेत् ॥ ३१८ ॥
आदौ नमस्क्रियाशीर्वा वस्तुनिर्देश एव वा ।
क्वचिन्निन्दा खलादीनां सताञ्च गुणकीर्तनम् ॥

साहित्य द०—६ परि०

अर्थात्—श्रृङ्गार-वीर-शान्तानां रसानां मध्ये एकः = एकतमः । अङ्गी = मुख्यः । तत्र नैषधनामके महाकाव्ये श्रृङ्गारो रसः, शिशुपालबधे च वीरः । महाभारते च शान्तो रसः । एवम् 'शान्तानाम्' इत्यत्र षष्ठी बहुवचनस्योपलक्षणत्वेन करुणस्यापि रसस्य संग्रहो विधेयस्तेन रामायणस्यापि महाकाव्यत्वं कथनं साधु सङ्गच्छते । तथा इतिहासोद्भवमित्यनेन महाभारतस्यापि महाकाव्यत्वं संसूचितं भवति ।

संस्कृतमहाकाव्यानामत्रैतिहासिकी दृष्टिर्विचार्यते

संस्कृतमहाकाव्यानामैतिहासिकस्वरूपविमर्शसम्बद्धग्रन्थानां दर्शनेनेदमेव प्रतीयते यत्तत्रैतिहासिकतथ्यापेक्षया भाषासौष्ठवम्, एवं वर्णवैशिष्ट्यम्, वर्णविन्यासश्चेत्यादि-विषयाणामेव विशेषतः सन्निवेशः प्रामुख्यं प्राधान्यञ्चानुभूयते । यदा चात्रैतद्विपरीत-लेखनमेव नितान्तमावश्यकमासीत् ।

संस्कृतमहाकाव्यग्रन्थानामितिहासलेखनेनेदं सुस्पष्टं प्रतीयमानं भवति यद् इतिहासलेखनकलाकुशलिन उच्चतमश्रेणीस्था अपि अधिकांशतो ग्रन्थकारा विद्वांसो राज्याश्रयाश्रिता राज्याश्रयमापन्ना एवाऽऽसन् । तेषु च प्रमुखरूपेण कवित्वभावनापि प्रधानतस्तेषामेव राज्ञां सन्तुष्टिविधानार्थं तथा भारतीयसांस्कृतिकस्वर्णसूत्रग्रथितया कवि-वरनिकटमहाकविश्रीकालिदास, माघ, प्रभृतिकान्तमणिरत्नपिनद्धयाऽलङ्कारादिगुणगणा-लङ्कृतया स्वीयकवित्वशक्त्यापि तेषामेवाऽऽश्रयभूतानां प्रभूतानां राज्ञां हृदि महीयान् हर्षप्रकर्षोल्लासो जायताम् इत्येव प्रबलतमा भावना तदीयप्रसन्नताविधानजनकीभूता च धारणाऽऽसीत् ।

तथापि चेदं सर्वथा सुनिश्चितमस्ति यद् भारतीयसंस्कृतमहाकाव्येतिहासस्य महत्त्वं प्रभुत्वं भारतीयं भास्वरं सांस्कृतिकञ्ज्योतिः सर्वतः सर्वमपि च समुद्भासमानं सत् समागच्छतीति प्राचीनकालत एवेदमङ्गीकृतमस्तीति सर्वेऽपि संस्कृतमहाकाव्यको-विदाः विदाङ्कुर्वन्ति तथा तद्विशेषज्ञा अपि । ऐतिहासिकोऽयं विषय इत्येवंरूपेण पौनः पुन्येन समुद्गिरन्तः संस्मरन्ति च । कथयन्ति च यावन्तोऽपि विषयाः सन्ति महा-काव्येतिहासेऽस्मिन् गर्भीभूतास्ते सर्वेऽपि तेषामाश्रयप्रदानकर्तृणामेव राज्ञां भवन्ति मनोविनोदायेति नूनं प्रमीयतां याथार्थ्येन निश्चीयताम् । संस्कृतमहाकाव्यानां संस्कृत-वाङ्मयस्वरूपप्रतिपत्तिस्तु तत्र नानुभूयते केवलं गुणगणगणनापरत्वमात्रेणैव संस्कृत-भाषासपर्यापर्युत्सुकत्वं प्रदर्श्यते । तेन संस्कृताऽध्यायिनामन्तेवासिनां तदध्यापयताञ्चाऽ-ध्यापकानां नहि सन्तुष्टिः सौकर्यञ्चोपलभ्यते ।

तथापि महता प्रयासेन सावधानतया बह्वन्वेषणानन्तरमेतावन्मात्रन्त्ववश्यमेव निश्चितरूपेण वक्तुं शक्यते यद् भारतीयसंस्कृतसाहित्येऽन्यत्रापि च भारतीयसाहित्ये इतिहासस्तावद् विषयमहत्तां प्राचीनकालत एव स्वीकरोति समर्थयति च।

यास्कः (७०० ई० पूर्वकालीने) निरुक्ते ऋचां सुस्पष्टीकरणार्थं ब्राह्मणग्रन्थानां तथा प्राचीनाऽऽचार्याणां 'कथाः' 'इतिहासमाचक्षते' इत्युक्त्वा समुल्लिखितवान्। 'निरुक्तेने'दमपि विदितं भवति यद् वेदार्थनिरूपणकर्तृषु प्राचीनतमवेदव्याख्याकारेष्वेकः सम्प्रदाय इतिहासकृतामप्यासीत् यं सम्प्रदायम् 'इति ऐतिहासिका' एवं निरुच्य पौनः पुन्येन स्मृतवान्।

अपि च संस्कृतमहाकाव्यस्यैतिहासिकी कारणकूटात्मिका सामग्री अनुपदमेव विवेचयिष्यमाणे रूपचतुष्टये समुपलब्धा भवति।

(१) कतिपयग्रन्थकाराः स्वपूर्ववर्तिनामैतिहासिकग्रन्थानां समुल्लेखं विहितवन्तः, परन्तु तत्र साम्प्रतकालावच्छेदेन कतिपयग्रन्था नोपलभ्यन्ते।

(२) द्वितीयरूपावच्छिन्नेतिहाससामग्री दानपात्रेषु, प्रशस्तिपात्रेषु, अन्तर्लेख, प्रभृतिषु च समवाप्यते।

(३) तृतीयरूपावच्छिन्ना अव्याप्यवृत्तित्वधर्मानवच्छिन्ना तादृशी सामग्री रामायण, महाभारतप्रभृतिषु संस्कृतमहाकाव्यग्रन्थेषु समुपलब्धा भवतीन्यत्र विस्तरः।

(४) चतुर्थप्रकारावच्छिन्ना चतुर्थरूपावच्छिन्ना बलवदनिष्टाननुबन्धित्वविशिष्टेष्टसाधनत्ववती यावती सामग्री महाकाव्यपरकेष्वितिहासग्रन्थेषु चास्ति सम्यक्त्वेन संकलिता।

ऐतिहासिकमहाकाव्येषु, सर्वप्रथमं नाम पालिवंशग्रन्थानां समागच्छति। पालिसाहित्ये वंशग्रन्थस्य चास्ति सैव स्थितिर्या संस्कृतसाहित्येऽष्टादशमहापुराणानां तथा महाभारतस्य, राजतरंगिणी, प्रभृतिपौराणिकैतिहासिकग्रन्थानां वर्तते।

परन्तु संस्कृतमहाकाव्यानामपेक्षया पालिवंशग्रन्थेषु या सामग्री चास्ति संगृहीता तेषु—अधिका सङ्गतिः, अधिकं सुस्पष्टीकरणम्, अधिका च सत्यता तत्रानुभूयते। इमे वंशग्रन्थाश्च द्वादशसंख्याकाः सन्ति। किन्तु तत्र 'दीपवंशः' 'ग्रन्थवंशः' 'शासनवंशः' 'महावंश' श्चेतिवंशावलिः सर्वोत्कृष्टश्चास्तीतिहासः।

एतेषां वंशानां मध्ये महावंशो 'दीपवंश' स्यैवांशमादाय रचनां प्राप्तः प्रवृत्तिशीलो भवति। तत्र च महावंशेऽपेक्षाकृताः काव्यत्वगुणा अर्थात् काव्यत्व, महाकाव्यत्वप्रयोजकीभूता गुणाः सन्ति आधिक्येन वर्तमानाः, अत एव तस्य विशुद्धातिशयरूपेणैतिहासिक महाकाव्यानां तथा परवर्त्तिकाव्य–महाकाव्यानाञ्चापि हेतुत्वाभिधाने नास्त्यतिशयोक्तिः। अन्यतत्तद्वंशपरम्पराऽन्येषां पालिसाहित्येतिहाससमन्वितमहाकाव्यानाम् एवं बौद्धसाहित्येतिहाससमन्वितमहाकाव्यानां तथा—'यशोधराचरित' सम्बद्धैतिहासिककाव्यानां धार्मिक दृष्टिकोणपरा सती समनुभूयते।

ऐतिहासिकमहाकाव्यानां क्षेत्रपरम्परायां सर्वाधिकमहत्त्वपूर्णः प्रौढकृतिमांश्चास्ति श्रीकल्हणकृतो महाग्रन्थः 'राजतरङ्गिणीनामकः। अस्य महाग्रन्थस्य विशुद्धमहा-

काव्यस्य निर्माणं स्वपूर्वकालवर्ति—११ एकादशेतिहासग्रन्थानां परिशीलन, पर्यालोचन-फलस्वरूपेण कृतवान् श्रीकल्हणः। शीतप्रधानस्य काश्मीरदेशस्य शासको राजा श्रीजयसिंहः (१११७–११४९) ईशवीये स्वीयराज्यकाले 'राजतरङ्गिणी' नामकस्य महाग्रन्थस्य निर्माणं कारितवान् आसीत् श्रीमहाकविकल्हणतः।

अयञ्च 'राजतरङ्गिणी' नामको वर्तते एको महाकाव्यग्रन्थः। अयञ्च नानाविधैतिहासिकदृष्टिपूर्णतां गतो महाग्रन्थः। अस्मिन् महाकाव्यग्रन्थे श्रीकल्हणः स्वयं स्वाविर्भूतनूतनशैल्या कतिपयानामितिहासकाराणां तथा इतिहासग्रंन्थानां परिचयपूर्वकं समुल्लेखं कृतवान्।

श्रीकल्हणमहाकवेरिदमप्यस्ति कथनं यत् 'सुव्रत' नायकः कश्चित् कविः पूर्वकालावच्छेदेन स्वीयां जनिं लभमानोऽत्यन्तमहदाकाराकारितेऽतीवविस्तृते–इतिहासग्रन्थे कानिचिद् वृत्तानि यथार्थस्वरूपसमन्वितानि लिखितवान्।

अधिकांशतोऽयं कविः मौखिकरूपेणैव स्वीयं पाण्डित्यपूर्णमितिहासात्मकं भाषणं प्रदानपरो ह्यासीत्। परन्तु भाषणस्य पाण्डित्यपूर्णत्वेऽपि तदीया शुष्का वाणी सर्वथा रसानवच्छिन्नत्वेन नीरसाऽऽसीदिति भाषणजनकीभूतायास्तदीयाया वाण्या नहि कोऽपि प्रभावः श्रोतृवर्गे पततिस्म। अत एवाऽस्य कवेः कृतयः प्रायोऽधिकांशतो विलुप्तप्राया एव श्रूयन्ते।

एवं वाणभट्टः (७ सप्तमायां शताब्द्यां) 'हर्षचरितनामकं ग्रन्थं लिखितवान्। यत्रैकस्मिन्नंशे वाणहर्षयोश्चास्ति जीवनसम्बन्धिघटनाया विवेचनम्, अपरत्र च तत्कालीन धार्मिकसम्प्रदायानां राज्यसंसर्गे संसर्गिव्यवस्थानाञ्चैतिहासिकरूपेण चित्रणचित्रितमिति वृत्तं मिलति।

एवमेव (सप्तदशतमायां शताब्द्यां) संस्कृतमहाकाव्यानां निर्माणं यज् जातम्, तन्निर्माणस्य साऽन्तिमा शताब्दी चासीत्। अस्यां शताब्द्यां पूर्वकालावच्छिन्नकृत्यपेक्षयाऽधिकानां कृतीनां लेखनं जातम्।

'तंजोर'देशनरेशस्य श्रीअच्युतस्य (१५७७–१६४० ईशवीये तदुत्तराधिकार सम्पन्नस्य राज्ञो रघुनाथस्य प्रधानमन्त्रिणः श्रीगोविन्ददीक्षितस्य पुत्रेण श्रीयज्ञनारायणदीक्षितेन स्वाश्रयप्रदानकर्तुः श्रीरघुनाथस्य राज्ञो महतीं प्रशंसां तदीयषोडशसर्गेषु कृतवान् 'रघुनाथभूपविजय' नामकमहाकाव्यस्य स्वयं स्वेनैव विलिखितस्य। अस्यैव महाकाव्यस्याऽपरं नाम 'साहित्यरत्नाकरः' अपि वर्तते। अपि चाऽन्योऽप्यस्त्येक ऐतिहासिकोऽयं विषयः अत्र सर्वतः प्राक् नायिकानां विषये भेदत्रयं विहितवान् रुद्रटः—यथा—

(१) स्वीया,

(२) परकीया,

(३) वेश्या,

पुनर्नायिकायाः—अभिसारिका, खण्डिताभेदभिन्नायास्तस्या विभागो जातः।

स्वीयाया अपि पुनर्भेदद्वयं संवृत्तम्—(१) स्वाधीनपतिका, (२) प्रोषितपतिका चेत्यादिना। 'मुरारेस्तृतीयः पन्था' इति न्यायेन शृङ्गारतिलके एकत्र नायिकाया अष्टौ भेदा प्रकीर्तिताः सन्ति मिलन्ति च। पश्यन्तु—शृङ्गारतिलकम्—१।७२—७३—

अपि च—रुद्रटः—वेश्यानां कृते नैकस्यापि साधुशब्दस्य प्रयोगं विहितवानासीत्, यदा शृङ्गारतिलकेन वेश्यानां वहु समर्थनं कृतम्। तुलना—

सर्वाङ्गना तु वेश्या सम्यगसौ लिप्सते धनं कामात्।
निर्गुणगुणिनोस्तस्या न द्वेष्यो न प्रियः कश्चित्॥
काव्यालङ्कारे—१२।३९।

सामान्यवनिता वेश्या सा वित्तं परमिच्छति।
निर्गुणेऽपि न विद्वेषो न रागोऽस्या गुणिन्यपि॥
तत्स्वरूपमिदं प्रोक्तं कैश्चिद् ब्रूमो वयं पुनः॥
शृङ्गारतिलके—१।६२-६३

अपि न पुनः—

साक्षाच्चित्रे तथा स्वप्ने तस्य स्याद् दर्शनं त्रिधा।
देशे काले च भंग्या च श्रवणं चास्य तद् यथा॥
तत्रैव द्रष्टव्यम्—१।५१।

इत्यलं पल्लवितेन—

'यदुद्दिश्य पुरुषाः प्रवर्तन्ते तत् प्रयोजनम्'।
तार्किकरक्षा—५६

तच्च प्रयोजनं सुखं वा दुःखहानिर्वा, उभयं वेति।

'येन प्रयुक्तः प्रवर्तते तत् प्रयोजनम्।' यमर्थम भीप्सन् जिहासन् वा कर्मारभते तेनाऽनेन सर्वे प्राणिनः सर्वाणि कर्माणि सर्वाश्च विद्या व्याप्ताः। तदाश्रयश्च न्यायः प्रवर्तते।

वात्स्या० भा० १।१।१

एवम्—'यमर्थमधिकृत्य प्रवर्तते तत् प्रयोजनम्'।

गौ० सू० १।१।२४।

अस्यैवात्र भाष्यमप्याह—

'यमर्थमाप्तव्यं हातव्यं वाऽध्यवसाय तदाप्तिहानोपायमनुतिष्ठति तत् प्रयोजनं वेदितव्यम्, प्रवृत्तिहेतुत्वात्। इममर्थमाप्स्यामि हास्यामि वेति व्यवसायोऽर्थस्याधिकारः। एवं व्यवसीयमानोऽर्थोऽधिक्रियते इति।—वात्स्या० भा० १।१।२४।

तच्च प्रयोजनं द्विविधम् मुख्यम्—गौणञ्च। तत्र च प्रथमं सुखं, दुःखाभावो वा। अस्य प्रयोजनस्य सर्वजनानुभवविषयत्वेन सार्वजनीनत्वम्। द्वितीयं गौणं प्रयोजनम् उदरपोषणम्, परिवारपालनम्, यागादिकञ्च। ये च विवाहदीक्षानन्तरं पुत्रादिजन्म प्रदानानन्तरं वैराग्यसम्पत्तिशालिनो भवन्ति तेषां नास्ति परिवारपालनादिकं प्रयोजनम्। एवं नास्तिकानां नास्ति यागादिकम्। ६९

काव्यसम्पत्सामग्रीविवेचनम्

इदानीं प्रसङ्गसङ्गतिवशात्, उपोद्घातसङ्गतिवशाच्च काव्ये काव्यत्वं समर्थयितुं द्रढयितुं वा तदीया सम्पदात्मिका सामग्री समपेक्षिता भवतीति तदर्थमेव काव्यसम्पत् सामग्री विविच्यते। तथाहि—

शब्दार्थौ मूर्तिराख्यातौ जीवितं व्यङ्ग्यवैभवम् ।
हारादिवदलङ्कारास्तत्र स्युरुपमादयः ॥
श्लेषादयो गुणास्तत्र शौर्यादय इव स्थिताः ।
आत्मोत्कर्षवहास्तत्र स्वभावा इव रीतयः ॥
शोभामाधुर्यकं प्राप्ता वृत्तयो वृत्तयो यथा ।
पदानुगुण्यविश्रान्तिः शय्या शय्येव संमता ॥
रसास्वादप्रभेदाः स्युः पाकाः पाका इव स्थिताः ।
प्रख्याता लोकवदियं सामग्री काव्यसम्पदः ॥

प्रतापरु० पृ०१२

प्रश्नः—तत्र प्रसङ्गसङ्गतेः उपोद्घातसङ्गतेश्च स्वरूपं किमिति विवेचनं विधीयताम् ?

उत्तरम्—उपोद्घातादिभिन्नः[1] स्मरणप्रयोजकसम्बन्ध एवास्ति प्रसङ्गः, स च सङ्गतिः। तत्त्वञ्च उपोद्घातादिभिन्नत्वे सति स्मरणप्रयोजकसम्बन्धत्वम् । अथवा उपोद्घातादिपञ्चकभिन्नत्वे सति सङ्गतित्वमेव प्रसङ्गसङ्गतित्वम् । 'स्मृतिकालावच्छे[2] देन या उपेक्षानर्हता तदवच्छेदकधर्मवत्त्वमेव वा प्रसङ्गसङ्गतित्वम् । आहोस्वित्-- स्मृतिकालावच्छेदेनोपेक्षानर्हत्वमेव[3] तत् ।

उपोद्घातत्वं[4] प्रकृतोपपादकत्वम् । साधकत्वरूपमेव प्रकृते उपपादकत्वम् । यथा-परामर्शजन्यं ज्ञानमनुमितिरिति अनुमिति लक्षणे तादृशपरामर्शस्यानुमितिकारणत्वं केवल-मुपोद्घातसङ्गत्या सिद्ध्यति, व्यवस्थापितं वा भवति ।

अथवा 'चिन्तां[5] प्रकृतसिद्ध्यर्थामुपोद्घातं विदुबुधा, । शाब्दिकास्तु—
प्रकृ[6]तसिद्ध्यनुकूलचिन्ताकालावच्छिन्नप्रकृतानुकूलत्वम्'

रघुवंशमहाकाव्येऽपि दार्शनिकींदृष्टिमाह

रघुवंशनामके महाकाव्ये प्रथमे एव श्लोके कालिदासो महाकविर्ब्रूते—
जगतः पितरौ वन्दे पार्वतीपरमेश्वरौ ।

रघुवंशः, १, सर्गः: श्लोक ।

अयञ्चास्ति रघुवंशमहाकाव्यग्रन्थस्य खलु आदिमो मङ्गलाचरणश्लोकः । अस्मिन् कालिदासेन पार्वतीपरमेश्वरौ नमस्कृतौ ।

कीदृशौ तौ पार्वतीपरमेश्वरौ ? इत्याकाङ्क्षायां स्वयमेव कालिदासो ब्रूते—'जगतः पितरौ' इति । अर्थाद् वन्दनीयौ तौ पार्वतीपरमेश्वरौ 'जगतः पितरौ' स्तः ।

---

१. रामरुद्री टीका—
२. वै० सा० द०—
३. भवानन्दी टीका (दीधिति व्याख्या) ।
४. दिनकरीटीका २
५. सर्व द० सं० पृ० २३७ ।
६. वैयाकरण भूषण सारदर्पण ।

अर्थाद् माता च पिता चेतिपितरौ इति यौगिकव्युत्पत्त्या मातृत्वं, पितृत्वञ्चोभयविधो-धर्मो मातृनिष्ठः पितृनिष्ठश्चेत्यादिना धर्मो गृह्यते। तत्र मातृत्वरूपो धर्मश्चराचरात्मकस्य सर्वस्यापि जगतः पूजनीया या माता पार्वती तन्निष्ठः, पितृत्वरूपश्च धर्मश्चराचरात्मकस्य जगतो वन्दनीयोऽस्ति यो जगन्नाथोऽनाथनाथो बाबाविश्वनाथस्तन्निष्ठो वर्तते।

अत्रेदं जिज्ञास्यते यत् मातृत्वधर्माऽपरपर्यायभूतं मातृत्वम्, एवं पितृत्वधर्मापर-पर्यायभूतञ्च पितृत्वं किमिति जिज्ञासायां सत्यामयं प्रश्नः समुदेति—किं पितृत्वं श्राद्धो-द्देश्यत्वम्? आहोस्वित् सपिण्डीकरणोत्तरश्राद्धजन्यफलभागित्वम् इति? यथा श्राद्धादौ पितृपितामहप्रतितामहा भारद्वाजगोत्रा वसुरुद्रादित्यान्तर्गतप्रद्युम्नसंकर्षणवासुदेवा इत्यादौ।

तथा चोक्तं याज्ञवल्क्येन—

'वसुरुद्रादितिसुताः पितरः श्राद्धदेवताः।
प्रीणयन्ति मनुष्याणां पितॄन् श्राद्धेन तर्पिताः॥'

याज्ञवल्क्यस्मृतिः, अ० १, श्लोक २६८

प्रकृते चैवंविधं जगन्निरूपितं पितृत्वं नैव संगच्छते परमेश्वरेऽतोऽन्यादृशमेव ततो विलक्षणं किमपि जगन्निरूपितं परमेश्वरनिष्ठं पितृत्वं वाच्यम्।

अत्रत्यमेवंविधं शास्त्रीयं धर्मसङ्कटं विलोक्यैव खलु लौगाक्षिभास्करेण दार्शनिक-सार्वभौमभूतेन 'जनकपुंस्त्वं पितृत्वम्' इत्येव प्रत्यपादि। तथा चैतादृशंजनकपुंस्त्वरूपं जगन्निरूपितं पितृत्वमेव जगत्पितरि परमेश्वरे वरीवर्त्तीति सर्वं सुसमञ्जसमिति न कोऽपि दोष एतादृशपितृत्वनिर्वचने समागच्छति।

एवमेव जगन्निरूपितं मातृत्वमपि 'जनकस्त्रीत्वम्' जगन्मातृपार्वतीनिष्ठत्वेन निर्वचनीयम्। अत्राप्येतादृश'मातृत्व' निर्वचने नहि कश्चिद् दोषः समायातीत्यत्रत्य प्रागुक्तमङ्लश्लोकघटकीभूतेन 'पितरौ' इति पदेन यौगिकव्युत्पत्त्या समुपलब्धः खलु मातृत्वशब्दार्थोऽपि 'पितृत्व'शब्दार्थवत् रघुवंशनामके काव्ये महाकाव्ये वा दार्शनिकीं दृष्टिं प्रस्फोरयति भूषयति प्रकाशयति च पदार्थजातम् इत्यत्र नास्ति लेशतोऽपि विप्रतिपत्तिः।

जगत्पदार्थमाह

इदानीं रघुवंशनामककाव्यमहाकाव्यग्रन्थघटकीभूतस्य खलु—

'जगतः पितरौ वन्दे पार्वतीपरमेश्वरौ'

द्रष्टव्यं तत्रैव—

इत्यादिमङ्गलश्लोकस्यघटकीभूतस्य 'जगत्' पदस्यार्थनिर्वचनेन दार्शनिकदृष्टि-माश्रित्य तादृशकाव्ये महाकाव्ये वा दार्शनिकतत्त्वानां निरूपणस्य प्रयोजनं, तस्यौचित्य-विषयको विचारश्च दर्शयितुमुपक्रम्यते।

स्थावरजङ्गमात्मकसकलपदार्थसमूहभूतं यदस्ति जगत् तदेव दर्शयति—यथा चोक्तम्—

यच्च किञ्चिज्जगत् सर्वं दृश्यते श्रूयतेऽपि वा।
अन्तर्बहिश्च तत् सर्वं व्याप्य नारायणः स्थितः॥

नारायणोपनिषत्—

अपि चोक्तम्—

यदा स देवो जागर्ति तदेदं चेष्टते जगत् ।

मनुस्मृतिः, अ० १, श्लो० ५८ ।

जगद् योनिरयोनिस्त्वं जगदन्तो निरन्तकः ।
जगदादिरनादिस्त्वं जगदीशो निरीश्वरः ।।

कुमार संभवः, स० २, श्लो० ९ ।

इत्यादिमतानुसारं सर्वमपि सत्यभूतं चराचरात्मकं दृश्यमानम् अदृश्यमानं वा विश्वं 'जगत्' पदेनोच्यते ।

एतन्मते जगतो लक्षणं 'प्रमेयत्वम्' (प्रमाविषयत्वम्), अभिधेयत्वम् (अभिधाविषयत्वं) वा वाच्यम् । शुक्तिरूप्यादीनां प्रातिभासिकपदार्थानामपि जगदन्तर्गततया लक्ष्यत्वात्तत्र लक्षणागमनप्रयुक्तो भवत्यव्याप्तिरूपो दोषस्तद्वारणार्थं लक्षणान्तरं क्रियते 'अभिधेयत्वम्' इति । तदपि ईश्वरीयाऽभिधाविषयत्वं वाच्यम् । तथैव प्रमेयत्वमपि ईश्वरीयप्रमाविषयत्वं वाच्यम् । तेन जीवानामल्पज्ञत्वेनाऽसर्वज्ञत्वात् ऐहिकाऽऽमुष्मिक सकलपदार्थानां प्रमाविषयत्वाभावेनाऽप्रमेयत्वेऽपि नाव्याप्तिदोषः प्रकृते प्रसरति ।

पौराणिकाः खलु वायोरेव जगत्पदार्थतां प्रतिपादयन्ति, विवदन्ते चात्र वहवः ।

'लोको' जगदिति काव्यज्ञा वदन्ति । वाच०—

अन्ये च दार्शनिकाः खलु जगद्विषये इत्थं समुद्गिरन्ति यत् सर्वमेव जगद् दुःखसङ्कुलत्वात् हेयम्, अतएवऽनुपादेयं तत् इत्यस्ति सिद्धान्तः ।

हेयतावच्छेदककुक्षिनिक्षिप्तानां समुद्धारयोग्यानां खलु तत्त्वानामुद्धारेच्छा मुनीनां परमकारुणिकानां महर्षीणाञ्चाऽऽत्मनि जायते । तदनन्तरं प्रवर्तन्ते लोकोद्धारजिज्ञासवो महर्षिकल्पाः ।

प्रवृत्तिश्चेष्टसाधनत्वप्रकारकज्ञानात्, कृतिसाध्यध्यत्वप्रकारकज्ञानात्, चिकीर्षातश्च जायते । तथा हि—

चिकीर्षा कृतिसाध्येष्टसाधनत्वमतिस्तथा ।
उपादानस्य चाध्यक्षं प्रवृत्तौ जनकं भवेत् ॥

भाषापरि०, का०

तथा च कृतिसाध्यत्वप्रकारिका या इच्छा तादृशेच्छारूपा चिकीर्षा प्रवृत्तिं प्रति कारणम् । समवायसम्बन्धेन प्रवृत्तिं प्रति समवायेन चिकीर्षा कारणम् । जन्यतावच्छेदकसम्बन्धश्च समवाय-कालिकैतदुभयरूपः । तेन प्रवृत्तित्वस्येश्वरप्रवृत्तिवृत्तित्वेऽपि न क्षतिः ।

प्रवृत्तोऽस्मीतिप्रतीतिसिद्धप्रवृत्तित्वजातिमत्त्वं, प्रवृत्तिसामान्यलक्षणम् । अस्यामेव प्रवृत्तित्वजात्यवच्छिन्नायां प्रवृत्तौ कृतिसाध्यताज्ञानम्, इष्टसाधनत्वप्रकारकञ्च ज्ञानमपि कारणम् ।

केषाञ्चिदिदमपि कथनं वर्तते यत् प्रवृत्तौ यथा कृतिसाध्यताप्रकारकं ज्ञानं कारणं वर्तते तथैव बलवदनिष्टाऽननुबन्धित्वज्ञानमपि स्वतन्त्रोऽन्वयव्यतिरेकाभ्यां कारणं वर्तते ।

प्रवृत्तेर्द्वैविध्यमाह—

प्रवृत्तिः सदसद्भेदेन द्विविधा। एका धर्मजनिका अर्थात् पुण्यजनिका। अपरा चाऽधर्मजनिका अर्थात् पापजनिका, सा प्रवृत्तिर्द्वितीया।

शास्त्रविहिते कर्मणि यागादौ ईश्वरवन्दनादौ भक्त्यादौ च या प्रवृत्तिः सा सत्प्रवृत्तिः धर्मजनिका प्रवृत्तिः कथ्यते, इयं प्रवृत्तिः धर्मं प्रसूते।

एवं शास्त्रतो निषिद्धे कर्मणि हिंसादौ या प्रवृत्तिः सा असत्प्रवृत्तिः पापजनिका भवतीतीयं प्रवृत्तिः द्वेषनिबन्धना सती खल्वधर्मं प्रसूते। तावेतौ द्वावेव रागद्वेषौ धर्माऽधर्मौ वा संसारं सम्पादयतः।

अत्र महर्षिगौतमस्य सम्मतिमाह—

'प्रवृत्तिर्वाग्बुद्धिशरीरारम्भः'

गौतमसूत्रम्, अ० १, सू० १७

वाग्बुद्धिशरीराणामारम्भः = चेष्टा = क्रिया = प्रवृत्तिरित्युच्यते। प्रवृत्तिश्च सा धर्माधर्मौ। तथाहि—

सूत्रघटकीभूतस्याऽऽरम्भशब्दस्य वागादित्रिभिरेवाऽन्वयः। इत्थञ्च वागारम्भो=वाचिकी प्रवृत्तिः, सा च सत्यं, प्रियं, हितम् इति पुण्यतमा मता। बुध्यते = ज्ञायनेऽनेनेति बुद्धिर्मनः, अनेन मानसिकी प्रवृत्तिः सूचिता, सा च प्राणिनामुपरि दयाभावविधानात्मिका।

शारीरिकी प्रवृत्तिः खलु शरीरेण दानं, परिचरणं स्वाध्यायश्चेत्याद्यात्मिका दशविधा पुण्यात्मिका अर्थाद् धर्मात्मिका कथिता। दशविधा चैतद्विपरीता पापत्मिकाऽधर्मात्मिकेति। तदेतत् कृतभाष्यं द्वितीयसूत्रे प्रथमाध्यायस्य प्रथमान्हिके, तत्रैव वैशद्यं द्रष्टव्यम्।

ताभ्यां धर्माऽधर्माभ्यां संयोगो 'जन्म' पदार्थः, अपूर्वाभिः शरीरेन्द्रियवेदनाभिः सम्बन्धः संयोग इह कथितो भवति।

विभागस्तु शरीरमनोविभागो मरणलक्षणः खलु कथ्यते। तथा चायं जन्ममरणप्रबन्धः संसारः प्रेत्यभावापरपर्यायभूतो धर्माऽधर्माभ्यां जायते। अस्यैव च प्रेत्यभावस्याऽजरञ्जरीभाव इत्यस्ति वेदोक्ता खलु वैदिकी संज्ञा। तथा चात्र सूत्रम्—

'इच्छाद्वेषपूर्विका धर्माधर्मप्रवृत्तिः'

वैशेषिकं सूत्रम्, ६।२।१४।

'तत्संयोगो विभागः'

तत्रैव सू० १५

जगत्पदार्थविषये विशेषविचारः

'जगतः पितरौ' इति कालिदासोक्तमहाकाव्यघटकीभूतप्रथमश्लोकान्तर्गतप्रागुक्तपद्यघटकीभूतजगत्पदार्थनिर्वचनं, संसाराऽभेदसाहित्यावाच्छिन्नञ्च यौगिकीं व्युत्पत्तिमाश्रित्यापि क्रियते।

जगत्, संसारयोरस्ति केवलं शब्दावलिमात्रतो भेदो नत्वर्थानुपूर्व्याः। उभयत्र गतिशीलरूपस्याऽर्थस्य गतित्वेन समानत्वान्नैव कमपि भेदमनुभवामः, यथा 'नीलो घटः', नीलं वस्त्रम्' इत्यादिस्थले घटरूपार्थस्य, वस्त्ररूपार्थस्यं चाऽन्योन्यं भिन्नत्वेऽपि प्रथमा-विभक्त्यर्थभूतस्याऽभेदस्योभयत्रैवं समानत्वं निश्चीयते इत्यतस्तस्य सर्वथा समानत्वात् भेदाननुभवाच्चाऽभेदः सिद्धयति तद्वत्।

अपि च गच्छतीति जगत्, सम्यक् सरतीति संसार इति यौगिकव्युत्पत्त्या क्रियमाणे जगत् संसारयोरर्थतो नैव कमपि भेदं पश्याम अतो हेतोरपि तयोरभेद एव सर्वथा सिद्धयति।

अन्यच्च सर्वेऽपि दार्शनिका एवं वैयाकरणसाहित्यिकप्रभृतयो विद्वांसो जगत् संसारयोर्भेदमपश्यन्त एव खलु अर्थैक्यं साधयन्ति ब्रुवन्ति च।

दुःखादीनां कार्यकारणभावप्रवाहरूपः संसारो जगदिति कथ्यते। स च जगदात्मकः संसारः प्रवाहरूपेणाऽनादिः, पूर्वापरकालानियमात्।

मिथ्याज्ञानपर्यवसाना हि दुःखादयोऽविच्छेदेन वर्तमानाः प्रवर्तमाना वा संसारः।

न्याय वा० १, पृ० २६

मिथ्याज्ञादयो दुःखान्ताः सन्तोऽविच्छेदेन प्रवर्तमानाः खलु संसारशब्दार्थो जगदिति निरूप्यते।

सर्व द० सं०, पृ० २४६, अक्षपाद०,

अयमभिप्रायः—'धाता यथा पूर्वमकल्पयत्' इति वेदे खण्डात्मकप्रलयस्य प्रतिपादितत्वेन संसारस्य प्रवाहरूपेणाऽनादित्वं तावत् सिद्धयति कल्प्यते वा।

तर्क प्रकाशः श्रीकण्ठविरचितः, ४, पृ० १८

श्रीशङ्करमिश्रपादा वैशेषिकोपस्कारग्रंथे जन्ममरणप्रबन्धस्वरूपः प्रेत्यभावापरपर्यायभूत एव जगदात्मकः संसार इति वदन्ति।

वैशे० उ० ६।२।१६।

अयमेव संसारशब्दार्थो भागवतेऽपि स्फुटीकृतः—

संसारसागरनिमग्नमनन्तदीन
मुद्धर्तुमर्हसि हरे! पुरुषोत्तमोऽसि।

भागवते

तच्च संसारशब्दार्थभूतम् ईश्वरीयकारागारस्वरूपं जगदिदं सर्वथा बन्धनरूपत्वाद् दुःखस्वरूपमस्तीति वर्णितं सर्वैरेव दार्शनिकैर्दर्शनशास्त्रैर्वा। अत एवोक्तम्—

तुष्टेर्मोचयतः सर्वानतुष्टेर्वध्नतः पुनः।
कारागारमिदं विश्वं यस्य तस्मै नमोनमः॥

मङ्गलश्लोकमिदम्—

अत एव न्यायलीलावतीकारेणाप्युक्तम्—

'सांसारित्वं (जागतिकत्वं वा) क्रमेण दुःखोत्पादः'

न्यायली० गु० मोक्षनिः पृ० ४२

यथा शरीराभिमानिनो जीवस्य संसारित्वम् । सांसारिकं खलु सुखन्तु धर्मारब्ध-देहावच्छिन्नं सुखं परिगण्यते, अतः सुखाभासस्वरूपन्तत् । एतदर्थं द्रष्टव्या—

'शेषालन्त'विरचिता, पदार्थचन्द्रिका (सप्तपदार्थी टीका)

इदञ्च पुत्रपौत्रकलत्रधनादिसमुद्भवं सांसारिकं सुखं सर्वमपि सुखवदाभासमानत्वेन दुःखपर्यवसायीति नहि वास्तविकं तत् सुखमस्तीति भावः ।

अत्र वल्लभीया मायावादिनो वेदान्तिनश्च मिथ्याज्ञानजन्यसंस्काररूपवासना, देहारम्भकाऽदृष्टविशेषो वा, स्वादृष्टोपनिबद्धदेहपरिग्रहो वा संसार इति वदन्ति, स एव च पुंसां बन्धलक्षणः ।

मध्वाचार्यास्तु 'भूतबन्ध एव संसारः'

इति वदन्ति । तथाचोक्तं वाराहपुराणे—

भूतबन्धस्तु संसारो मुक्तिस्तेभ्यो विवेचनम् ।

मध्वभाः० ३।१।१

सांख्यास्तु सूक्ष्मशरीरम् अर्थात् लिङ्गशरीरं पूर्वपूर्वस्थूलशरीरपरित्यागपूर्वक-मभिनवस्थूलशरीरं यदुपादत्ते स एव खलु जगदपरपर्यायभूतः संसार इति वदन्ति । उक्तञ्च—

पूर्वोत्पन्नमसक्तं नियतं महदादि सूक्ष्मपर्यन्तम् ।
संसरति निरुपभोगं भावैरधिवासितं लिङ्गम् ॥

सांख्यका० ४०

अर्थात् सृष्टिकालमारभ्य प्रलयकालपर्यन्तं सन्तिष्ठमानं खल्विदं सूक्ष्मशरीरं पूर्वपूर्व-स्थूलशरीरपरित्यागेन अदृष्टनिबन्धनाऽपराऽपरस्थूलशरीरविशेषधारणं करोति, स्वादृष्टो-पनिबद्धशरीरः संसारः ।

आत्मानं देहेनैकीकृत्य स्वर्गनरकमार्गयोः सरति येन पुरुषः स एव खलु जगद्रूपो विलक्षणः संसारः ।

सर्वदर्शन सं०, पृ० ४०२ शाङ्क०

संसारो नाम अज्ञानम् इत्यपि केचिद् वदन्ति । 'विश्वमेव संसार' इत्यपि अन्ये समुद्गिरन्ति । सङ्गतिरेव संसारः इत्यप्यस्ति केषाञ्चित् कथनम् ।

वाचस्पत्यं कोशः

एतावता प्रबन्धेनाऽस्य प्रवाहावच्छिन्नस्य सर्वथाऽविच्छिन्नस्य जगतः सर्वथा दुःख-पङ्कनिमग्नतां निरीक्ष्य तदुद्दिधीषुः परमकारुणिको मुनिः इमामभ्यर्हिततमामान्वीक्षिकीं प्रणिनाय । उक्तञ्च—

'अथ जगदेव दुःखपङ्कनिमग्नमुद्दिधीर्षुरष्टादशविद्यास्थानेष्वभ्यर्हिततमामान्वीक्षिकीं परमकारुणिको मुनिः प्रणिनाय' ।

प्रामाण्यवादचिन्तामणिः, प्रारम्भे

तत्र गौतममुनेरभिप्रायमित्थं दर्शितवान् गदाधरभट्टाचार्यः—यत् जगत्पदस्य वस्तु-मात्रार्थकत्वे घटादीनामचेतनानां मोक्षरूपोद्धारस्य बाधेन तदीयत्वेनोद्धारेच्छा मुनेर्गौत-मस्य सर्वथा न सम्भवतीत्याशयं मन्वान एव दीधितिकारः श्रीरघुनाथशिरोमणिर्जगत्पदस्य

संसार्यात्मजातपरतां प्रदर्शितवान् । तत्रापि भगवतः परमेश्वरस्याऽनाथनाथस्य बाबाविश्वनाथस्य मुक्तात्मनाञ्च शुकदेव, वामदेवप्रभृतिजीवानां नोद्दिधीर्षाविषयत्वसंभव इत्यत एव तत्रोपात्तं खलु संसारित्वविशेषणमपि सार्थकं भवति ।

'जगत् संसार्यात्मजातम्'

द्रष्टव्यं तत्रैव

जगदर्थकश्च संसारो मिथ्याधीप्रभवा या वासना तद्रूपः । तद्वतामेव च जीवात्मनां समुद्धारेच्छयैव गौतमो मुनिर्न्यायशास्त्रमिदं प्रणिनाय ।

इत्थञ्च 'जगतः पितरौ वन्दे' इत्येतादृशवाक्यघटकीभूतस्य जगत्पदस्यार्थः खलु दर्शनद्वारैव सुस्पष्टीकृतो भवतीतीयमेवास्ति दार्शनिकी दृष्टिर्महाकाव्येषु ।

काव्यप्रयोजनम्

काव्यमस्त्येकं कलात्मकं शास्त्रम् । अस्य प्रत्यक्षप्रयोजनमुद्देश्यञ्चास्ति केवलं हर्षप्रकर्षप्रदानपुरःसरम् आनन्ददानञ्चेति । अमुमेव विषयमधिकृत्याऽहं स्वयमेकं स्वानुभवं वर्णयामि । एकदा पी० एच० डी० विधानकाले कतिपयछात्रसमष्ट्या सह एकस्य वृक्षस्याऽधस्तात् सन्तिष्ठमानं मां प्रति एकः साहित्यछात्रो ब्रूते यत् भवतः कोऽस्ति शोधप्रबन्धः । मया कथितं यद् 'अद्वैतं ब्रह्म' इति । तेन कथितं यदयन्तु विषयो महता सारल्येनाऽहं भवन्तं बोधयामि, श्रृण्वन्तु भवन्तः 'अहं ब्रह्मास्मि' 'ब्रह्म सत्यं जगन्मिथ्या' इत्यत्रैव समस्तस्यापि वेदान्तस्य रहस्यं निहितमस्ति । अर्थात् तुम सब बेवकूफ हो, जो कुछ हूँ एक मात्र मैं ही हूँ' । इत्येवंरूपेण तस्य साहित्यरसिकस्य शब्दावलिं श्रुत्वा सर्वेऽपि सन्तिष्ठमानास्तत्रान्तेवसन्तः खलु महान्तं हर्षप्रकर्षं समनुभवन्त आनन्दमहोदधौ निमग्नास्ते जाताः ।

इदञ्चानन्दप्रदानरूपं प्रयोजनं संस्कृतज्ञा विद्वांसः, संस्कृतसाहित्यकोविदाश्चाऽङ्गीकुर्वन्ति यत आनन्दस्य सर्वथाऽनुकूलवेदनीयत्वेन सर्वेषामभिप्रेतत्वात् । अत एव केचन दार्शनिकाः—

'नित्यसुखाभिव्यक्तिर्मुक्तिः' इत्येय पक्षं स्वीकुर्वन्ति ।

भरतेनापि नाट्यकलाप्रचारः सर्वेषामेव मानवानामानन्दवर्धनप्रदानविधान साधनरूपेण नाट्यशास्त्रानुसारतो व्यधायीति निर्विचिकित्सितमेतत् । तथा चोक्तम्— 'क्रीडनीयकमिच्छामो दृश्यं भव्यञ्च यद् भवेत्' तथा 'वेदविद्येतिहासानामाख्यानं परिकल्पनम् । विनोदजननं लोके नाट्यमेतद् भविष्यति'—

नाट्य० १।११ ।

तथापि 'प्रीतिरेव धनम्' 'प्राधान्येनानन्द एवोक्तः' ।

लोचन पृ० १४

तथा 'प्रीत्यात्मकश्च रसस्तदेव नाट्यं नाट्य एव च वेद इत्युपाध्यायः' । (लोचन पृ० १४)—'सकलप्रयोजनमौलिभूतं समनन्तरमेव रसास्वादनसमुद्भूतं विगलितवेद्यान्तरमानन्दम्' ।

काव्यशास्त्रग्रन्थेषु एतदतिरिक्तानामपि नानाविधप्रयोजनानां निरूपणं कृतवान् शास्त्रवेत्ता। एतेषु प्रयोजनेषु कतिपयप्रयोजनानां सम्बन्धो वर्तते साक्षात् कविना, कतिपयानाञ्चास्ति सम्बन्धः पाठकेन पाठकैर्वा। (१) तत्र पाठकसम्बद्ध प्रयोजनमाह—आनन्दः, शान्तिः, दुःखाभावो वा, पर्याप्तिसम्बन्धावाच्छिन्नत्रित्वनिष्ठाऽऽधेयतानिरूपिताऽधिकरणतावन्तो वा। पूर्वेषां त्रयाणां विवेचनं निरूपणं वा प्रातिस्विकरूपेण तृणारणिमणि न्यायेन वेदितव्यम्।

२. धर्मः, नीतिः, अध्यात्मशास्त्रीयज्ञानप्राप्तिश्चेत्यप्यस्ति पाठकसम्बद्धप्रयोजनम्।

३. कलाविषयके ज्ञाने, व्यवहारविषयके च ज्ञाने तदुभयत्रैव कौशलम्। अपि च—'काव्यं कवये धनं यशश्चोभयमपि प्रयच्छति'।

राजाश्रयप्राप्तिमत्त्वेन काव्यस्य धनप्रदानकर्तृत्वमस्तीति कथनं साध्र संगच्छते।

नाट्यशास्त्रानुसारञ्च दुःखिनां चिन्तासन्तानवितानग्रस्तानां दुःखसङ्कुलसंसार सरित्तरङ्गेषुरिङ्गताम् इतश्चेतश्च धावतां प्राणिनां मनसि नाट्यं विश्रामं शान्तिञ्च प्रयच्छति। तथाचोक्तम्—

'दुःखार्त्तानां श्रमार्त्तानां शोकार्त्तानां तपस्विनाम्।
विश्रामजननं लोके नाट्यमेतद् भविष्यति'॥

पश्यन्तु—नाट्यशास्त्रम्—१।१११।१२।

भामहकवेरनुसारम्—

'धर्मार्थकाममोक्षेषु वैचक्षण्यं कलासु च।
प्रीतिं करोति कीर्तिञ्च साधुकाव्यनिबन्धनम्'॥

तत्रैव—१।२।

अपि च—

'निर्दोषं गुणवत् काव्यमलङ्कारैरलङ्कृतम्।
रसान्वितं कविः कुर्वन् कीर्तिं प्रीतिञ्च विन्दति॥

तत्रैव—

वामनानुसारम्—'काव्यं सद्दृष्टादृष्टार्थं प्रीतिकीर्तिहेतुत्वात्'।

तत्रैव१।१।५।

अपि च पुनस्तत्रैव—

'काव्यं यशसेऽर्थकृते व्यवहारविदे शिवेतरक्षतये।
सद्यः परनिर्वृतये कान्तासंमिततयोपदेशयुजे'॥

काव्यप्रकाश—१

अन्यच्चापि काव्यप्रयोजनं प्रकृतश्लोके वर्णितं मिलति। तथाहि—

यशसः, धनस्य, व्यवहारज्ञानस्य, पापनाशस्य च प्राप्तिस्तथा कान्ताप्राप्तिः, मधुर उपदेशः—इमानि षट् प्रयोजनानि काव्यस्य वर्णितानि काव्यप्रकाशकारेण। अर्थात्—काव्यप्रकाशकारः खलु काव्यस्य षट् प्रयोजनानि वर्णितवान्—

(१) 'यशसः' समवाप्तिः, इत्येकं प्रयोजनम्,

(२) 'धनस्य' प्राप्तिः, द्वितीयम्,

(३) 'व्यवहारज्ञानस्य' प्राप्तिस्तृतीयम्,
(४) 'पापनाशस्य' प्राप्तिश्चतुर्थं प्रयोजनम्,
(५) 'कान्ता' प्राप्तिश्च पञ्चमम् प्रयोजनम्,
(६) 'मधुरोपदेशः' इत्यप्यस्ति प्रयोजनं काव्यस्य,

'रामादिवत् वर्तितव्यम्' इत्यादिवचनैर्मम्मटेन काव्यजीवनोपरि स्वयं स्वीयः प्रभावः सूचितः।

हेमचन्द्रोऽप्यन्यतमः प्रागुक्तप्रयोजनेषु त्रीण्येव प्रयोजनानि ग्राह्यत्वेन वर्णितवान्। यथा—'काव्यमानन्दाय यशसे कान्तातुल्यतयोपदेशाय च'। अन्यप्रयोजनानां समुपलब्धिस्तु साधनान्तरैरेव भविष्यतीति तत्र का चिन्ता इत्यलं पल्लवितेन।

काव्यप्रयोजनविचारः

'यमर्थमधिकृत्य पुरुषः सम्प्रवर्तते तत् प्रयोजनम्'

गौ० सू०

अर्थात् 'प्रयोजनमनुद्दिश्य मन्दोऽपि न प्रवर्तते' इति न्यायात् सर्वेषामन्येषां शास्त्राणामिवास्माकं काव्यस्याप्यस्यि प्रयोजनम्। काव्यं काव्यशास्त्रेषु सुकुमारमतीनां राजकुमारादीनां ज्ञानार्थमुन्मुखीकरणाय जटिलकठिनवेदादिषु सत्स्वपि साधनत्वेन पर्यवतिष्ठत इति भूयो भूयः काव्यस्य मर्मज्ञाचार्यैः प्रोद्टङ्कितमस्ति। प्रयोजनमस्य काव्यस्य प्रायशः सर्वैरालङ्कारकैराचार्यैः प्रविचारितमस्ति। तेषां वाग्देवतावतारभूतेनाऽऽचार्यप्रवरेण मम्मटेन स्वकीये काव्यप्रकाशनाम्नि ग्रन्थे यल्लिखितं काव्यप्रयोजनं तत्तु सर्वाङ्गीणं प्रतिभाति। तथाचोक्तम्—

'काव्यं यशसेऽर्थकृते व्यवहारविदे शिवेतरक्षतये।
सद्यः परनिर्वृत्तये कान्तासम्मिततयोपदेशयुजे'॥

काव्यप्रकाश,

अत्र विचारयामः—काव्यस्य षट् प्रयोजनानि प्रतिपादितानि आचार्येण। तथाहि—

१. यशः प्राप्तिः	२. अर्थप्राप्तिः
३. व्यवहार ज्ञानम्	४. अमंगल विनाशः
५. मोक्षप्राप्तिः	६. कान्तासम्मितोपदेशप्राप्तिश्च।

एषु प्रयोजनषट्केषु काव्यकर्तुः कवेः काव्यपाठकस्य सामाधिकस्य भावुकस्य द्वयोरेव संग्रहो व्यधायि, प्रथमत आरम्य चतुर्थसंख्यापर्यन्तानि प्रयोजनानि कवेः सन्ति। शेषप्रयोजनद्वयं च पाठकानाम्। अत्र विचारणीयन्तावत्—अस्माकं मते सर्वाण्येव प्रयोजनानि उभयोः कृते सन्तीति। यतो यथा कवयः यशोभागिनो भवन्ति, काव्यविरचनात्तथैव काव्यमर्मज्ञाः समालोचका अपि चिरकालपर्यन्तं काव्यं विमृशन्तो विबुधसमक्षे कमनीयकीर्तिमाप्नुवन्ति, तथैव अर्थप्राप्त्यादिप्रयोजनानामपि सम्बन्धो दरीदृश्यते। अर्थप्राप्तिर्नतयाऽभूत् श्रीमद्गोस्वामिनस्तुलसीदासस्य यथा इदानीं तस्य महाभागस्य कृतिमुररीकृत्य व्यासेत्युपाधिधारिणां मानसमर्मज्ञानाम् जायते।

काव्यस्यास्य सर्वाधिकं वैशिष्ट्यसमन्वितं प्रभुत्वं चास्ति प्रयोजनम्—कान्तासम्मितोपदेशः। यत्र सर्वाणीतराणि शास्त्राणि आदेशम् अनुज्ञां च प्रयच्छन्ति। तत्र साहित्यं

काव्यं वा केवलं रामरावणयोश्चरित्रचित्रणं विधाय व्यङ्गेन आपादयति सामाजिकानां सहृदयानां पुरस्तात् रामदिवत् वर्तितव्यम् न रावणादिवदिति। नास्ति कोऽपि श्रवणकुमारो यो नाटकं दृष्ट्वा करुणार्द्रः सन् दशरथं भर्त्सयन् हृदयतः पितृभक्ति नाङ्गीकुर्यात् काव्यं पठित्वा एते शास्त्रानभिज्ञाः विमलमतयः साधुपथं समाचरन्तु, शीलाचारादिभिर्भूषिता भवन्तु, इत्येव कवेः काव्यकर्मणः परमुद्देश्यम् । यस्य प्राप्तिः काव्यस्य चरमावस्थायां रसपरिपाकं विधाय क्रियते कविना ।

पुरुषार्थचतुष्टयस्यापि सिद्धिः काव्यस्य प्रयोजनमस्तीत्यपि विदाङ्कुर्वन्तु वेत्तारः—

चतुवर्गफलप्राप्तिः सुखादल्पधियामपि ।
काव्यादेव................................ ॥ साहित्यदर्पणे

अर्थात् साध्यसाधनयोरुभयोरेव पुरुषार्थत्वमङ्गीक्रियते पुरुषस्यार्थः=प्रयोजनमिति व्युत्पत्तिबलेन । इत्यञ्च वलवद्द्वेषविषयरूपलक्षणलक्षितानां धर्म, अर्थ, काम, मोक्ष, रूपचतुर्विधपुरुषार्थानां सिद्धिस्वरूपं साहित्यकार, दर्पणकारविदुषा सम्मतं प्रयोजनं काव्यस्यापीत्यनेनापि काव्यस्य महाकाव्यस्य वा परमं महत्त्वं प्रादर्शीति मे मतिः ।

अत एव पूर्वव्युत्पत्तिमाश्रित्यैव सुखदुःखाभावयोरपि पुरुषार्थत्वमङ्गीकृतं श्रीविश्वनाथपञ्चाननेन । तथाहि—'फलन्तु सुखं दुःखाभावश्च । तत्र फलेच्छां प्रति फलज्ञानस्य कारणत्वम् । अत एव पुरुषार्थः संभवति । यज्ज्ञातं सत्स्ववृत्तितयेष्यते स एव पुरुषार्थ इति तल्लक्षणात् । इतरेच्छानधीनेच्छाविषयत्वम् एव पुरुषार्थत्वम् इति तु फलितोऽर्थः । तदेवोक्तम्—

'चतुर्वर्गफलप्राप्तिः' इत्यादिना ।

ययोःप्रयोजनप्रयोजनवद्भावस्तयोः प्रयोजनप्रयोजनवतोरुभयोरेव शाश्वतिकः सम्बन्धो निर्णीयते काव्यशास्त्रविशारदैः दर्शनशास्त्रविशारदैश्च । कार्यकारणयोर्नित्यसम्बन्धः, तत्र नित्यत्वं प्रलयकालपर्यन्तस्थायित्वम् । कारणं विना यथाऽस्मिन् प्रचंचूर्यमाणे जगदात्मके वैरिञ्चे प्रपञ्चे नास्ति कोऽपि पदार्थो विषयो वा यः सर्वदाकालावच्छेदेन स्थिति सम्पन्नो भवेत् । तथैवास्मिन्नपि काव्यात्मके जगति एकस्यैव प्रजापतेः कवेः काव्यं विना काव्यनिर्माणहेतुर्नाविर्भावयितुं शक्यते । यथा—च 'कारणविनाशे कार्यविनाशः' इति न्यायात् कपालनाशे घटविनाशः, तन्तुविनाशे पटनाशो दृश्यते, तथैव काव्यमपि स्वनिर्माण हेतुं विहाय कथं स्थातुमर्हतीत्यतः संस्कृतसाहित्यालोचनशास्त्रेषु सविस्तरं काव्यशास्त्रनिर्माणहेतुविचारो हि सप्रयोजनं विचारितः काव्यशास्त्रज्ञैः । उक्तं चात्र आकरग्रन्थेषु—

शक्तिर्निपुणतालोककाव्यशास्त्राद्यवेक्षणात् ।
काव्यज्ञशिक्षयाऽभ्यास इति हेतुस्तदुद्भवे ॥
काव्यप्र० १ उ०

अपि च

'नैसर्गिकी प्रतिभा श्रुतं च बहुनिर्मलम्' तत्रैव—

अर्थात् अयमर्थः फलितो जातो यत्—
१. काव्यशक्तिः २. लोकशास्त्रादिज्ञानम् ३. शिक्षाऽभ्यासः,

इति त्रयाणामेव समुदितानां काव्योत्पत्तौ काव्यनिर्माणे वा हेतुत्वं बोध्यम् । अस्या ऽयमर्थो बोध्यो यत्-शक्तिः = कवित्वबीजभूतः संस्कारविशेषः = प्रतिभाऽपरपर्यायः । लोक-काव्यशास्त्राद्यवेक्षणप्रयुक्तनिपुणता = व्युत्पत्तिविशेषः । काव्यज्ञशिक्षाप्रयुक्तोऽभ्यासः = काव्यकरणे योजने च पुनः पुनः प्रवृत्तिः । तथा च शक्ति-निपुणता-अभ्यासानां त्रयाणां कवित्वोद्भवे हेतुत्वं प्रतिपादितम् । तत्रैव च त्रयाणां प्रयोजनमपि विज्ञेयम् ।

त्रयः समुदिता हेतुः इति च सपरिष्कृतं बोध्यम् ।

व्युत्पत्तिवादे प्रथमकारकं, १६ पृष्ठे
पं० ज्वालाप्रसाद गौड़ विरचितायां-टीकायां

तत्र प्रतिभाऽपरपर्यायिभूता शक्तिः काव्यस्फुरणस्य बीजत्वेनोल्लिखिता वर्तते । तथा चोक्तमाचार्यैः—

'तेन बिना काव्यं न प्रसरेत् प्रसृतं चोपहसनीयं स्यात्'

तादृशशक्त्या विना प्रयोजनेन विना केत्यर्थः । काव्यप्र० पू० उ०

प्रतिभा चेयम्—

'प्रज्ञा नवनवोन्मेषशालिनी प्रतिभा मता'

न्या० सि० मु० विलासिनी टीका मंगलवादे
पं ज्वालाप्रसाद गौड़ कृता

एतस्मादेव परमविदुषा श्रीमता राजशेखरेण कवीनां प्राथमिकाऽभ्यासिकादयो-विभागाः कृताः ।

अत्र लोकशास्त्रनैपुण्यम् अभ्यासश्च अप्रधानीभूतौ हेतू स्तः । प्रधानं कारणन्तु प्रतिभैवास्ति । यथा—

'कारणं प्रतिभा काव्ये सा चार्थप्रतिभासनम् ।
प्रज्ञाकादम्बिनीगर्भे विद्युदुद्द्योतसोदरम् ॥ १२ ॥

काव्यालङ्कारकारि० ९ पृष्ठे—

अभ्यासराहित्यावच्छिन्ना व्युत्पत्तिशून्यत्वावच्छिन्नाश्च सन्ति वहवो ग्रामीणाः प्रतिभासम्पन्नाः कवयः ग्रामादिषु येषां काव्यं चेतश्चमत्करोति । अभ्यासस्तज्जन्या च व्युत्पत्तिः केवलं सहयोगार्थमपेक्ष्यते प्रतिभायाः । यथा—कस्यचिदपि शक्तिमतः शरीरे नैसर्गिकी महाप्राणता शारीरिकपुष्टिकारकपदार्थानां सेवनात् केवलं पोषिता सुरक्षिता च भवति, न तु सा नूतनशक्तिजन्मदात्री, अन्यथा दुर्बलोऽपि पौष्टिकपदार्थानां सेवनं विधाय विश्वविजयिनम् अधरीकर्तुं प्रभवेत्, परन्तु नत्वेवं भवति, अतः काव्यहेतुभूता केवलं प्रतिभा प्राचीनाचार्यचरणैः स्वीकृता ।

अत्र च कांचिद विचिकित्सां कृत्वा प्रोक्तं केनचित् कविना—

ननु प्रतिभा चेत् काव्यस्य कारणं समवाय्यसमवायिनिमित्तेषु त्रिविधकारणेषु कीदृशकारणत्वमस्याः

उपादानं निमित्तं च काव्याय प्रतिभेव सा ।
द्वितीयं गर्भमात्रे यत् तस्यास्तिष्ठति तत् सदा ॥

काव्यालङ्कारकारिकायां २२ पृष्ठे

पुनश्चात्रैव विषये प्रोक्तं तेनैव कविना—

ये हि प्रतिभामात्रगर्भगतस्य काव्यस्य सत्वे शङ्किनः कथमिवैतेनाशङ्किनः सन्ति क्षित्यङ्कुरादिव्यवस्थितसृष्टिकर्तुः परमेश्वरस्यापि सत्वे च वैचित्र्यमूलानामदृष्टानां परलोकानां पुनर्भवानां च तन्मूलानाम् इत्यत्राप्यस्ति तदीयप्रयोजन-विचार इति चिन्तनीयम्।

कालिदासस्य ब्रह्माद्वैतसिद्धान्तपूर्णा दार्शनिकी रचना प्रमाणान्तरैः पुष्टीकृता—

जगद्योनिरयोनिस्त्वं जगदन्तो निरन्तकः।
जगदादिरनादिस्त्वं जगदीशो निरीश्वरः॥

कुमार, सर्ग२—श्लो० ९

अनेन कविकुलभूषणश्रीकालिदासविरचितमहाकाव्यकुमारसंभवघटकीभूतेन एकेनैव श्लोकेन सर्वमपि दर्शनरहस्यं स्फुटीकृतं भवति।

अत्र नास्तिकाऽऽस्तिकभेदभावभूषितयोर्द्वयोरेव दर्शनयोर्वयं समन्वयं पश्यामः। इतः पूर्वमस्माभिर्नास्तिकाऽऽस्तिकव्यावर्तितावच्छेदकं रूपं अविद्याजन्यं प्रादर्शि, यत् नास्तिकाऽऽस्तिकभेदभावभूषितानि द्वैविध्यसम्पन्नानि खलु दर्शनानि भवन्ति। तत्रापि परमार्थतो व्यावहारिकदृष्ट्या विचार्यमाणे भेद-द्वैतघटितत्वेन द्वादशसंख्याकानि इमानि दर्शनानि जायन्ते इति नाविदितमस्ति केषामपि विदुषाम्। तथाविधा एव च दार्शनिका भवन्ति, तेषां दृष्टिरपि तथाविधैव विलोक्यते। परन्तु अस्या दृष्टेरविद्याजन्यत्वाद् हेयत्वमुपपादितं प्राचीनाचार्यचरणैः श्रीमच्छङ्कराचार्यपादैः। तथाहि—

'भेददृष्टिरविद्येयम् तां सदा परिवर्जयेत्' महोपनिषत् ५।११३।

'द्वितीयाद्वै भयं भवति'। वृहदारण्यकोप० १।४।२।

मृत्योः स मृत्युमाप्नोति य इह नानेव पश्यति। तत्रैव ४।४।१९।

'अन्यौऽसावन्योऽहमस्मि न स वेद यथा पशुरेव'। तत्रैव १।४।१०।

भेददृष्ट्या द्वैतदृष्ट्या वा किं नश्छिन्नमित्याशङ्कायां जायमानायां स्वयं तन्निरासायाऽऽह—

भेददर्शनमासाद्य मुक्तिं वाञ्छन्ति ये नराः।
ते महाघोरनरके पतन्त्येव न संशयः॥

सूतसंहिता

अपि चोक्तं तत्रैव—

द्वैतविज्ञानमासाद्य मुक्तिं वाञ्छन्ति ये नराः।
ते महाघोरसंसारसर्पदंष्ट्रा न संशयः॥

तत्रैव सूतसंहिता

एवमन्यदप्युक्तम्—

निर्विकारे निराकारे निर्विशेषे भिदा कुतः।

अध्यात्मोपनि० २२।

एतन्मन्त्रानुसारं श्रुत्यनुसारं वा सूक्ष्मातिसूक्ष्मस्य निर्विकारस्य निर्विशेषस्य-ब्रह्मणो व्यतिरिक्तं सर्वमेव मिथ्येति सूचितं भवति। यतो ब्रह्मणोऽतिरिक्तस्य सर्वस्यापि

प्रपंचस्य तदन्तर्गतपदार्थमात्रस्यैवाऽविद्याकल्पितत्वात्; स्वाप्निकपदार्थवत् । लोकेऽनुभवगम्यत्वेऽपि व्यवहारक्षमत्वेऽपिचोत्तरक्षणबाधितत्वेन भ्रान्तिरूपतया तस्याऽसद्रूपत्वं मिथ्यात्वं च सिद्धयतीत्यत्र नास्ति लेशतोऽपि संशयावकाशो विवादावसरो वेति पारमार्थिकभावनाभावितान्तः करणाः प्राचीनाचार्यचरणाः समुद्गिरन्ति, प्रमाणयन्ति च—

अनुभूतोऽप्ययं लोको व्यवहारक्षमोऽपि सद् ।
असद्रूपो यथा स्वप्न उत्तरक्षणबाधितः ॥
स्वप्ने जागरितं नास्ति जागरे स्वप्नता न हि ।
द्वयमेव लये नास्ति लयोऽपि ह्यनयोर्न च ॥
त्रयमेव भवेन्मिथ्या गुणत्रयविनिर्मितम् ।
अस्य द्रष्टा गुणातीतो नित्यो ह्येष चिदात्मकः ॥

योगशिखोपनि० ४।१०-१२

अपि च—

मयि जीवत्वमीशत्वं कल्पितं वस्तुतो न हि ।

सरस्वतीरहस्योप० ३३ ।

मय्यखण्डसुखाम्भोधौ बहुधा विश्ववीचयः ।
उत्पद्यन्ते विलीयन्ते मायामारुतविभ्रमात् ॥

कुण्डिकोपनि० १४

'जगदयोनिरयोनिस्त्वम्' इति महाकविकालिदासोक्त्याऽस्मिन्नेव महाकाव्ये मायायाः प्रभावोऽपि सुस्पष्टं प्रतीयते । तत्र नास्तिकाः खलु बौद्धचार्वाकप्रभृतयो दार्शनिका ईश्वरो नास्तीति वदन्ति । एवम् उदयनाचार्य, शङ्कराचार्यप्रभृतयो दार्शनिका ईश्वरस्याऽस्तित्वं सर्वथाऽक्षुण्णमिति स्वीकुर्वन्ति, अत एवैतेषां नये निरीश्वरवाद एव प्रसिद्धि प्राप्तो वर्तते । एतेषां नास्तिकानां नये वेदस्य प्रामाण्यं नाऽभ्युपगम्यते, अत एव वेदप्रामाण्यानभ्युपगन्तृत्वं नास्तिकत्वमिति नास्तिकपरिभाषांलक्षणं, पारिभाषिकलक्षणं वा ब्रुवन्तो नास्तिका एव निरीश्वरवादिनः कथ्यन्ते । तदेवोक्तम्—

नेश्वरो जन्मिनां हेतुरुत्पत्तिविकलत्वतः ।
गगनाम्भोजवत् सर्वमन्यथा युगपद्भवेत् ॥

न्या० सि० मु० विलासिनीटीका,
पं० ज्वालाप्रसादगौड़ कृत भूमिका पृ० २७

एतेन नास्तिकानां निरीश्वरवाद एव पुष्टीकृतः ।

परन्तु आचार्यपादैरीश्वरसाधकानि नवाऽनुमानानि दर्शितानि ।

अनुमाननवकं च पुनः द्रष्टव्यं श्रीगौड़कृतविलासिनी टीकायां मुक्तावल्या इति ।

कार्यायोजनधृत्यादेः पदात् प्रत्ययतः श्रुतेः ।
वाक्यात् संख्याविशेषाच्च साध्यो विश्वविदव्ययः ॥

न्यायकु० स्त० ५, कारिका १

तथाचाऽस्मिन् प्रकृते 'जगद्योनिरयोनिस्तत्वम्' इत्यादिश्लोके योनिस्त्वम् निरन्तकस्त्वम्, आदिस्त्वम्, निरीश्वरस्त्वम् इति तुरीयपद्यांशकथनं नास्तिकानां नयम-

लभ्व्यैव शोभते। यतस्ते नास्तिका ईश्वरानङ्गीकारेण ईश्वरस्य जगत्कारणत्वं खण्डयन्ति, ब्रुवन्ति चाऽकस्मादेव भवतीदं सर्वमपि चराऽचरात्मकं जगत्। तथा चोक्तम्—

'अनिमित्ततो भावोत्पत्तिः कण्टकतैक्ष्यादिदर्शनात्

वात्स्यायनभाष्यम्

अर्थाद् यथा कण्टकेषु तैक्ष्ण्यं स्वाभाविकं दृश्यते, एवं पाषाणादिषु काठिन्यं स्वभावतो जायमानं विलोक्यते, तथा च अर्थत एवेश्वरस्य जगद्योनिस्त्वम् = जगतोऽकारणत्वं, सिद्धयति। अत एव तेषामियमुक्तिरपि साध्वी सती सङ्गच्छते यत्—

'नेश्वरो -जन्मिनां हेतुः', इत्यादिः।

जगतोऽकस्मादेव जायमानत्वात् अर्थात् स्वभावतएव समुत्पद्यमानत्वान्नास्ति कस्यापि ईश्वरपदाभिधेयतां गतस्याऽऽवश्यकता, यश्चेश्वरः सन् जगतो निर्माणं विधत्ते।

नास्तिकस्यैतादृशतात्पर्याभिप्रायेणैव महाकविकालिदासः 'जगदयोनिस्त्वम्' निरन्तकस्त्वम्' 'अनादिस्त्वम्' 'निरीश्वरस्त्वम्' इति तुरीयं पद्यांशमुल्लिखति।

यश्चोत्पादको भवति स एव खलु तद्विपरीतक्रमेण विनाशकारणमपि भवतीति नियमात् ईश्वरपदवाच्यतां गते जगन्नियन्तरि भगवति भवे यदा जगदादित्वरूपं जगदुत्पादकत्वं नास्ति तदीयाऽस्तित्वाभावात्, तदा जगद्विनाशकारणत्वमपि न तत्र स्थास्यति प्रागुक्तनियमादेव।

अपि च कारणत्वं कार्याऽव्यवहितप्राक्क्षणावच्छेदेन वर्तमानत्वम्, तथा चेश्वरस्याऽस्तित्वाभावे जगदन्तकर्तृत्वमपि तत्रेश्वरे कथं सेत्स्यति, यतस्तावज्जगद्विनाशात्मककार्याऽव्यवहितप्राक्क्षणावच्छेदेन तस्याऽवर्तमानत्वात्, कार्यनियतपूर्ववृतिकारणमिति अन्नम्भट्टोक्तेस्तल्लक्षणाच्च।

अत एव तत्रेश्वरे जगदुत्पादनकर्तृत्वरूपं जगदादित्वमपि नास्तीत्यतोऽर्थत एव सुतरां तत्राऽनादित्वंसिद्धयति। यथा यस्मिन् भूतले घटो न वर्तते तत्राऽर्थादेव घटाभावः सिद्धयति तद्वदेव हि प्रकृतेऽपि बोध्यम्।

ईश्वरस्याऽस्तित्वाभावप्रयुक्तैव तत्र निरीश्वरता वर्तते, यतः—अन्तर्बहिश्च सर्वमपि पदार्थजातं व्याप्यनारायणस्तदैव स्थितिमापन्नो भवितुं प्रभवति यदा तस्य किमपि सत्वम् अस्तित्वं भवेत्, ईश्वरास्तित्वाभावे कुतो वा कथं वा व्याप्यव्यापकभावोऽपि स्यादित्यतो नास्तिकनयेन स्वामित्वाभावरूपो निरीश्वरत्वं तत्राऽक्षतमेवाऽस्ति।

आस्तिकदृष्टिकोणमाह

जगद्योनिरयोनिस्त्वम् इत्यादिश्लोके आस्तिकानामयमस्ति दृष्टिकोणः यद् ईश्वर एव सर्वकार्यजातं प्राणिनामदृष्टानुसारं सम्पादयति। अदृष्टानुसारमेव च तेषां प्राणिनां कर्मानुसारं फलं प्रयच्छति। कर्मवादपक्षमाश्रित्यैव जगतोऽस्तित्वं निर्धार्यते, ज्ञानपक्षे च तदस्तित्वं समाप्यते। अयमेव च कर्मवादपक्षो, मायापक्षोऽविद्यापक्षो वेति निगद्यते, अस्य विचारोऽग्रे करिष्यते।

अस्य च कर्ममूलकस्य जगतः कर्मजन्याऽदृष्टाऽधिष्ठातृतया स एव योनिः = कारणम् स एव च आदिः = उत्पादयिता चास्ति जगतः, अर्थात् ईश्वरः एव परमाण्वादिसंयोग-

क्रमेण जगदुत्पादयतीति स जगद्योनिशब्देन व्यपदिश्यते। स एव च जगदन्तको जगदीशोऽपि च। अर्थात् अयमेव जगन्नियन्ता परमेश्वरः प्राणिनां कर्मानुसारं जगतोऽन्तं विधत्ते। अयमेव च खंडप्रलयं वा कुरुते। यथा इदानीमेव आन्ध्रप्रदेशे खण्डप्रलयो जातस्तस्य कारणं केवलमीश्वरः, तदतिरिक्तो नहि कोऽपि कारणीभूतो भवितुमर्हतीति मया शपथमालम्ब्य प्रोच्यते। मया कर्णाकर्णिकया विश्वस्तसूत्रद्वारैव श्रुतं यत्तत्रत्यप्रदेशवासिभिरानन्दकन्दस्य कौशल्यानन्दवर्धनस्य दशरथनन्दनस्य अयोध्याचन्द्रस्य भगवतो रामचन्द्रस्य मर्यादापुरुषोत्तमस्य राघवेन्द्रस्येश्वरत्वमनङ्गीकृत्य रावणस्य तदङ्गीकृतम्। अर्थात् राघवेन्द्रनिष्ठमीश्वरत्वं चास्ति सर्वथाऽनृतमिति रावणनिष्ठमेव तत् सत्यमिति रावणनिष्ठतया व्याहृतं व्यवहृतञ्च भवति। अर्थात् रावण एवास्तीश्वरो न तु राम इति।

नैतावन्मात्रमेव कथनं श्रवणं वा पर्याप्तमस्ति, भगवतो रामचन्द्रस्य प्रतिमां निर्माय पादत्राणमालया सा तिरस्कृताऽपमानिता च। एवं स्थिते कस्यापि पूज्यतावच्छेदककुक्षिनिक्षिप्तस्य पूज्यस्यापमानसंविधाने स पूज्यः किमप्रसन्नो न भविष्यति ? असन्नतारूपकारणवशात् सोऽपि हानिं विधत्तेऽपमानकारकस्य। किं पुनः जगदीश्वरस्य जगन्नियन्तुः परमेश्वरस्य विषये वयं ब्रूमः। स तु सर्वशक्तिमान् सर्वेश्वरः सर्वं विधातुं शक्नोति, खण्डप्रलयस्तु तस्य कृते नास्ति किमपि दुष्करं कार्यम्। स तु महापलयमपि विधातुं सर्वथा समर्थः। महाप्रलयन्तु स तस्मिन्नेव काले विधत्ते यस्मिन् काले सर्वे एव मानवाः एवंभूताऽऽन्ध्रप्रदेशीयनास्तिकतासन्तापसन्तापिता भवन्ति। तस्मिन्काले अयमेव परब्रह्मपरमेश्वरः कालरूपतां धत्ते।

यथोक्तम्—

'कालोऽस्मि लोकक्षयकृत्प्रवृद्धो–
लोकान् समाहर्तुमिह प्रवृत्तः। गीताः ११।३२॥

अपि च—

यदा संहरते चाऽयम्–
कूर्मोऽङ्गानीव सर्वशः।

गीता २।५८

भूमित्वावच्छिन्नाया यावत्या भूमेर्भारभूतानां प्राणिनां सर्वेषां क्षयं कर्तुमहं कालोऽस्मि, अर्थाद् एवंविधानां सकलानां प्राणिनां संहारहेतुरहम्। अत इहाऽत्र समवेतान् लोकान् सर्वानेव संहर्तुमहं प्रवृत्तोऽस्मि। यद्यपि प्रतिपक्षसेनास्ववस्थिताः सज्जीभूय वर्तमानास्तव दुर्जयाः सर्वथा इमे भीष्मद्रोणकर्णप्रभृतयः सर्वेऽपि महारथिनो युद्धेऽस्मिन् तव प्रवृत्त्यभावेऽपि मम पुरस्तान्नैव स्थातुं प्रभविष्यन्ति, यतो मयि महामृत्युस्वरूपे समुपस्थिते इमे के नु जीविष्यन्ति ? नहि कदापि जीविष्यन्ति, त्वन्तु केवलं निमित्तमात्रं भूत्वैवात्र सन्तिष्ठताम्।

एवमन्यान्यविषयाणां शब्दस्वरूपाणां सर्वेषां काव्य-महाकाव्यान्तर्गतानां शक्तेर्विनिर्णयोऽपिदार्शनिकदृष्टिकोणमाश्रित्यैव भवति। यथा—

'धेनुमृर्षेर्मुमोच' रघुवंशमहाका०, २ स०

इत्यत्र धेनुशब्दस्यापि विचारो दर्शनेष्वेव सम्यक्तया व्यधायि। तत्र च यथा
सामान्यधर्मावच्छिन्नवाचकानां शब्दानां विशेषधर्मावच्छिन्ने लक्षणेव स्वीक्रियते तथैव
विशेषधर्मावच्छिन्नवाचकानामपि शब्दानां सामान्यधर्मावच्छिन्ने लक्षणैव। तथा च यत्र
धानकर्मगोत्वादिविशिष्टवाचकं 'धेनु'प्रभृतिपदं गोत्वावच्छिन्नतात्पर्येण प्रयुज्यते तत्र
तत्र लक्षणाश्रयणमन्तरा नास्ति कापि गतिः।

'धीयते = पीयते, वत्सेनेति धेनुः' इति यौगिकव्युत्पत्त्या धेनुपदं धानकर्मगोत्ववि-
शिष्टस्य अर्थात् दुग्धप्रदानकर्तृगोर्वाचकमस्तीति स्वीक्रियते, यत्र च धेनुपदं केवलगोत्वा-
वच्छिन्नतात्पर्येण प्रयुज्यते वा तत्र धेनुपदस्य गोत्वावच्छिन्ने लक्षणैवेति भावः।
एवमन्यान्यशब्दानामपि शक्तेर्विनिर्णयः लक्षणातो वा विनिर्णयः शक्तिवादेऽकारि
गदाधरेण।

एवमेव धेन्वादिशब्दवत् काव्य, महाकाव्यघटकीभूतानां युष्मदस्मच्छब्दानां तत्तदर्थाः क्वचिच्छक्तिमाश्रित्य क्वचिच्च लक्षणावृत्तिमालम्ब्यैव विज्ञेयाः, येन तत्र दार्शनिक्या रचनाया अप्रतिहतगतिकत्वं न व्याहन्येत।

किं काव्यमित्युपक्रम्यते

'काव्ये दार्शनिकतत्त्वानां निरूपणस्य प्रयोजनं तस्य औचित्यविचारश्च' इत्यत्र
सप्तम्यर्थो निष्ठत्वं, तस्य च दार्शनिकतत्त्वैः सहाऽन्वयः। अथवा निष्ठत्वसम्बन्धेन काव्यस्यैव
तत्र विशेषणतया 'काव्यनिष्ठदार्शनिक तत्त्वानां निरूपणं किं प्रयोजनकम्'। आहो-
स्वित् 'निष्ठत्वसम्बन्धावच्छिन्ना या काव्यवृत्तिप्रकारता तादृशप्रकारतानिरूपिता या
दार्शनिकतत्त्ववृत्तिविशेष्यता तादृशविशेष्यतावतां तादृशतत्त्वानां निरूपणं किं प्रयोजन-
कम्' इत्यन्वयबोधरूप; शाब्दबोधोऽत्र जायते।

इत्थञ्चोभयत्रैव काव्यस्य विशेषणत्वेन प्रतिभासमानतया 'विशिष्टबुद्धौ विशेषण-
ज्ञानस्य कारणत्वम्' इतिनियमात् विशेषणीभूतस्य काव्यस्य ज्ञानं नितान्तमावश्यकम्;
यतः काव्यरूपविशेषणज्ञानमन्तरा प्रागुक्तो विशिष्टबुद्धिरूपः, विशिष्टवैशिष्ट्यावगाहिबोध-
रूपो वाऽन्वयबोधरूपः शाब्दबोध एव सर्वथाऽसंभवी।

यथा 'घटवद् भूतलम्; 'पटवद् भूतलम्' इत्यादिस्थलेषु सर्वथैव घट, पटादिरूप-
विशेषणज्ञानमन्तरा शाब्दबोधोपपत्तिर्नानुभूयते इत्यतः शाब्दबोधोपपत्त्यर्थं विशेषणज्ञानं
सर्वथाऽऽवश्यकम्।

तथैव प्रकृतेऽपि काव्यरूपविशेषणस्य ज्ञानार्थं काव्यशब्दार्थो विविच्यते, तदर्थञ्च
काव्यत्वसम्पादिका सामग्र्यपेक्ष्यते, इति सर्वतः प्राक् काव्यस्य, काव्यसम्पत्सामग्र्याश्च
विवेचनं सर्वथाऽऽवश्यकम्।

काव्यस्य काव्यसम्पत्सामग्र्याश्च स्वरूपविवेचनम्

लेखविस्तरभयमालोच्यैवाऽस्माभिः 'काव्य' शब्दार्थः काव्यसम्पत्सामग्रीपदार्थश्च
संक्षेपतो विचार्यते।

'काव्ये दार्शनिकतत्त्वानां निरूपणस्य प्रयोजनं तस्य औचित्यविचारः' इत्यस्मिन्

वाक्ये विचारास्पदीभूताः पदार्थाः (शब्दार्थाः) सन्ति केवलं चत्वार एवेति चतुष्ट्वसंख्यावन्त एव पदार्थाः खल्वत्र विचार्यन्ते ।

ते च पदार्थभूताः शब्दार्था—काव्यशब्दार्थः इत्येकः, दार्शनिकतत्त्वानाम्' इत्येतद्वाक्यघटकीभूतौ दर्शनशब्दार्थ, तत्त्वशब्दार्थौ, प्रयोजनशब्दार्थश्चेत्यादिना चतुष्ट्वसंख्यावन्त एव सन्तीत्येवंरीत्या सा चतुष्ट्वसंख्या पूरिता भवति ।

एतादृशशब्दार्थविचारानन्तरमेव काव्ये महाकाव्ये वा काव्यत्वधर्मावच्छिन्ने तादृशदार्शनिकतत्त्वानां निरूपणं किमर्थं कस्मै प्रयोजनाय व्यधायीति समीचीनं रोचते । पुनस्तदनन्तरमेव तन्निरूपणमुचितमनुचितं वेति विप्रतिपत्तिबलात्तदीयौचित्यविषयको विचारः समागच्छति ।

कोऽस्ति काव्यशब्दार्थः

तत्र काव्यशब्दार्थ एव सर्वतः प्राग् विचार्यते, तत्रापि सन्ति बहूनि मतमतान्तराणीति तान्येव संक्षेपतः प्रदर्श्यन्ते—

१. नायकादिप्रतिपादको वाक्यसन्दर्भो हि काव्यमिति महाकाव्यकारा वदन्ति । यथा वाल्मीकिविरचितं रामायणमपि काव्यशब्दाभिधेयतां तद्वाच्यतां वा प्रयाति ।

२. तत्राऽऽलङ्कारिकाः खलु—'अदोषौ सगुणौ सालङ्कारौ शब्दार्थौ काव्यम्' इति । अर्थाद् दोषरहितम्, अलङ्कारसहितम्, गुणसहितञ्च शब्दविशिष्टार्थः, अर्थविशिष्टः शब्द एतदन्यतरत् काव्यमिति तु निष्कृष्टार्थ इति ध्येयम् । तथाचोक्तम्—

गुणालङ्कारसहितौ शब्दार्थौ दोषवर्जितौ ।
गद्यपद्योभयमयं काव्यं काव्यविदो विदुः ॥

प्रतापरु पृ० १२

अपि च—तददोषौ शब्दार्थौ सगुणावनलङ्कृती पुनः क्वापि ।

काव्य प्र० उल्लास १, श्लो० ४

अच—रसगङ्गाधरकारादयः खल्वित्थं वदन्ति यत् पूर्वोक्तसमस्तविशेषणावच्छिन्नः शब्द एव काव्यं न त्वर्थविशिष्टं काव्यमिति । पूर्वम् अर्थविशिष्टशब्दस्येव शब्दविशिष्टाऽर्थस्यापि काव्यत्वं प्रतिपादितम् । तथा च तत्रोभयावच्छिन्नस्यैव काव्यत्वमिति । अत्र तु केवलमेकस्यैवेतावांस्तु विशेषः ।

काव्यस्य किमपि वैशिष्ट्यम्

काव्यग्रन्थेषु काव्यप्रपञ्चेषु वा सत्यामपि प्राधान्येन स्थितौ कथमिवाऽस्मिन् काव्यशास्त्रे काव्यप्रपञ्चे वा गुणदोषाऽलङ्कारादयोऽखिला विषयाः संगृह्यन्ते इति बलवत्तरशङ्कासमाधानाय तत्कारणान्वेषणं नितान्तमावश्यकम् । एतदेवोद्देश्यम् उद्देश्यतावच्छेदकं वा मनसि निधाय दिव्यज्ञानशक्तिमन्तो महान्तो विद्वांसः शक्तिशालिनश्च लक्ष्यैकचक्षुष्का वाल्मीकिप्रभृतयो महात्मानः खलु विविधांल्लोकोपकारान् मनसिकृत्य तानि तानि रामायणादीनि काव्यानि विरचितवन्तः । किन्तु तत्साधनीभूतकाव्यसम्पत्-

---

१. अयञ्च विषयः अनन्तरामशास्त्रिकृतायामलङ्कारमीमांसायां द्रष्टव्यः ।

सामग्र्याश्च विशेषतो नियमान्न विदाङ्कुर्वन्तो लक्षणैकचक्षुषो मन्दमतयस्तत्र कथं प्रवृत्तिशीला भविष्यन्तीति स्वानुभववेद्यस्यास्य विषयस्य कौटिल्य, जाटिल्यनिराकरणाय तेषां मन्दमतीनाञ्च सदुपदेशाय चेदं लक्षणस्वरूपं नियामकं 'काव्यशास्त्रं' प्रकल्पितवन्तः, तदेव च कित्यकालानन्तरम् 'अलङ्कारशास्त्रम्' इति संकेतं प्राप्तवत्[१]।

तदुत्तरकालावच्छेदेन चाऽनित्यधर्मावच्छिन्नानामप्यलङ्काराणां चमत्कृतिजनकत्वेन तज्जनकतावच्छेदकत्वेन च तत्सम्पादित (अलङ्कारसम्पादित) तद्गतसौन्दर्यस्यैव[२] काव्यव्यवहारप्रयोजकतया तत्र ध्वनितं प्रतीयमानं वाऽर्थं वाच्योपस्कारकतया ऽलंकार पक्षकुक्षिनिक्षिप्तं मन्वानाः खल्वस्माकं प्राचीनाचार्यचरणा 'भामहप्रभृतयः' 'प्राधान्येन[३] व्यपदेशा भवन्ती'ति नयमनुसरन्तः, अलङ्क्रियतेऽनेनेति करणव्युत्पत्त्या काव्येऽलङ्काराणामेवास्ति प्राधान्यमिति सिद्धान्तितवन्तः।

ततश्च कियदुत्तरकालावच्छेदेनैवंविधे बहुशो व्यापारे प्रचलिते सति तत्र रीतिरात्मा काव्यस्य, वक्रोक्तिः काव्यजीवितम्, रस एवास्ति खलु काव्यात्मा, ध्वनिश्चास्ति आत्मा काव्यस्य, इत्येवंविधे विचारे क्रियमाणे सति अयमेव विचारपक्षः, सर्वथोचिततमः प्रतीयते।

वामनप्रभृतीनां साहित्यकोविदानां समये अलङ्कृतिः=अलङ्कार इति भावप्रधानभूतां व्युत्पत्तिमनुसृत्यैव रसादिप्रतिपादनपरेषु काव्यशास्त्रेषु किल अलङ्कारत्वप्रकारको व्यवहारो ऽधिकतया सम्प्रवृत्तोऽभूत्।

अमुमेव काव्यशास्त्रीयं व्यावहारिकं मार्गमवलम्बमानैर्वाग्देवताऽवतारभूतैः श्रीमन्मम्मटभट्टमहोदयैः प्रणीतोऽयं 'काव्यप्रकाश' नामको निबन्धग्रन्थोऽलङ्कारशास्त्रीयो ऽलङ्कारशास्त्रमाकरशास्त्रं वेति प्रसिद्धि गतः सकलालङ्कारशास्त्रीयेषु ग्रन्थेषु मौलितिलकायमानः सन् समुज्जृम्भतेतराम्। तदनन्तरमन्येषामपि लक्षणग्रन्थानां शनैः शनैः प्रादुर्भावो जातः।

वामनस्याऽलङ्कारलक्षणेनापि 'सौन्दर्यमलङ्कारः' इत्येतावन्मात्रकथनेनैव दोषाभावगुणाऽलङ्कारविहितसौन्दर्यपरत्वमलङ्कारशब्दस्य साधुत्वं सङ्गच्छते। अनयैव दृष्ट्या रसालङ्कारादिप्रतिपादकं शास्त्रम् अलङ्कारशास्त्रं कथ्यते, तच्छास्त्रनिर्माणकर्तारश्च ऋषि, महर्षिप्रभृतयो विद्वांसोऽप्यालङ्कारिका व्याह्रियन्ते।

एवंविधमलङ्कारशास्त्रमाश्रित्य उपजीव्य वा भूयांसो ऽर्वाचीना विद्वांसस्तावदाधिक्येन तल्लक्षणलक्षितानि काव्यानि खलु निर्मितवन्तः। तदनन्तरमेत्र तस्मादेव कालाल्लक्ष्यलक्षणरूपविभागद्वयस्य कल्पना जाता, एवमस्मिन् साहित्यमये काव्यमये वा जगति काव्यम्, अलङ्कारश्चेत्युभयविधव्यवहारस्यापि प्रारम्भो जातः। तत एव खलु काव्य-

---

१. अयमपि विषयस्तत्रैव द्रष्टव्यः।

२. अयमपि तत्रैव द्रष्टव्यः।

३. तत्रैवाऽलङ्कारमीमांसायाम्। ४. अयमपि तत्रैव द्रष्टव्यः,

५. तत्रैव, काव्यप्रकाशे चापि। ६. तत्रैवाऽलङ्कारमी०।

शास्त्रमिदं लक्ष्यरूपम् अलङ्कारशास्त्रञ्च तल्लक्षणरूपं प्रोच्यते स्मेति निर्विवादम् । अस्माभिस्तु प्रायः सर्वत्रैवाऽयमेव प्रचलितो मार्गः समवलोक्यते ।

अलङ्कारशास्त्रस्यास्येदमस्ति वैशिष्ट्यं सर्वथा मयाऽनुभूतं यदिदं शास्त्रं काव्यप्रणयनोपयिकान् प्रकारान् प्रदर्शनपुरःसरं खलु बलाच्चित्तभूमौ चतुरचेतसां सचेतसामपि चेतसि किमपि चमत्कारबीजमङ्कुरयति । काव्यस्वरूपञ्च प्रदर्शयति । अनन्तरञ्च तत्सम्बन्धिनां तत्सम्बन्धवतां वा दोषगुणरीतिरसालङ्काराणामवधारणायां शक्तिञ्चोन्मेषयति । एवं स्थिते खलु सरसकाव्यकलाकौशलानि लोकोत्तराणि चमत्कृतिजनकभूतानि[1] तज्जनकतावच्छेदकभूतानि वाऽऽधिक्येनाऽनवरतं समुल्लसन्तीतीदमेवास्ति नूनम् अस्याऽलङ्कारशास्त्रस्य सर्वोत्कृष्टं परमं वैशिष्ट्यम् ।

काव्यप्रणयनौपयिकप्रकारप्रदर्शनसाधनीभूतेऽस्मिन्नलङ्कारशास्त्रे सन्ति नानाविधानि दर्शनानि व्यवस्थीकृतानीति तयोर्वैशिष्ट्यमपि तत्रैवाऽन्तर्निहितमस्ति विचारणीयम् । तद्यथा—अत्र हि विशिष्टौ शब्दार्थाविव[2] काव्यम् अत्र शब्दार्थयोर्वैशिष्ट्यं शक्तिस्वरूपं लक्षणास्वरूपं वा नहि दर्शनशास्त्रमन्तरा केनापि वक्तुं निरूपयितुं वा शक्यते । एतच्च शब्दार्थयोर्वैशिष्ट्यमग्रे शब्दार्थनिरूपणावसरे स्वयं वयं वक्ष्यामः । अनयोश्च वैशिष्ट्यं पञ्चप्रकारेणोपपाद्य पुनश्च पञ्चसंख्यावन्मुखेनैव पक्षाणां पञ्चकमुद्भावितवन्तो[3] ह्यालङ्कारिकाः खलु संख्यावन्तः ।

१. तद् यथा—अलङ्कारलक्षणलक्षितेन मुखेन उद्भटादीनाम् ।

२. गुणात्मकधर्ममुखेन वामनादीनाम् ।

३. भणितिवैलक्षण्यलक्षणव्यापारमुखेन वक्रोक्तिजीवितकारस्य ।

४. भोजकत्वरूपधर्मविशेषमुखेन भट्टनायकस्य ।

५. व्यङ्ग्यात्मकधर्ममुखेन च वैशिष्ट्यमानन्दवर्धनाचार्यस्य । इत्थञ्च तत्र तत्र तत्तन्मते पञ्चविधाऽलङ्कारा दर्शिताः ।

व्यक्तिविवेककारोन्नीताऽनुमानप्रकारपक्षस्तु सिद्धान्तमतप्रदर्शनसमकालमेव दोषदूषितत्वेनाऽनादृतत्वादुपेक्षितः । सचाऽयं पक्षोऽविचारितरमणीयतया मँङ्खुकेन पूर्वपक्षरूपेणापि नाङ्गीकृतः ।

तत्राऽलङ्कारः खलु शब्दार्थभूषणमनुप्रासोपमादिः । स चाऽलङ्कारो बहुविधः । यद्यप्यलङ्कारस्तु सर्वत्राऽलङ्कार एव, सर्वमपि विषयजातं पदार्थजातं वा अलङ्कारवदेव भूषयति न तु दूषयति । तथापि काव्येष्वलङ्कारकल्पना सर्वथा साधीयसी प्रतिभाति । स च भामहोद्भावितः काव्यालङ्कार एव प्रथमाभिधेयताधिगतो दृश्यते इत्यत्र नास्ति कोऽपि विवादः ।

---

१. तत्रैवाऽलङ्कारमीमांसायाम्—

२. समुद्बन्धे, अलङ्कारसर्वस्वटीकायाम्—

३. तत्रैव अलङ्कारमीमांसायाम् ।

४. अलङ्कारमीमांसायाम्, पृ० ३७

कालिदासात् पूर्वस्मिन्नपि कालेऽस्या अलङ्कारकल्पनायाः खलु जागरूकत्वात्तेन तस्याः प्राचीनतमत्वं निश्चीयते । 'भामह' महाभागैरप्यस्या अलङ्कारकल्पनायाः प्राथम्यं निर्धारितमिति तेषां ग्रन्थैरेव निर्णीयते । इदञ्च सर्वमस्माभिः प्रसङ्गसङ्गतिवशात् उपोद्घातसङ्गतिवशाच्च केवलं निरूपितम् । अग्रेऽपीदं प्रसङ्गसङ्गतिवशादेव निरूप्यते ।

प्रसिद्धि गतेषु खलूपमादिष्वलङ्कारेषु वर्तमानं यदलङ्कारत्वं तत् किं स्वरूपम् अर्थात् किं लक्षणकमिति तत् परिष्कारोऽपि नितान्तमावश्यकः, अतस्तत् परिष्क्रियते । तत्परिष्कारो यथा—अलङ्कारत्वं च रसादिभिन्नं यद्व्यङ्ग्यं तद्भिन्नत्वे सति शब्दार्थाऽन्यतरनिष्ठा या विषयतासम्बन्धावच्छिन्ना प्रकारता चमत्कृतिजनकतावच्छेदकतारूपा तदवच्छेदकत्वरूपम् इति ।

अलङ्कारचन्द्रिका[1]—

अत एव सर्वेषामेवाऽलङ्काराणां शोभातिशायित्वं प्रोट्टङ्कितमस्ति सर्वत्राऽनुभूतमस्ति च ।

इत्थञ्चाऽनुप्रासाद्यलङ्कारविशिष्टशब्दज्ञानात्, उपमा[2]द्यलङ्कारविशिष्टाऽर्थज्ञानाच्च खलु चतुरचेतसां सचेतसां चेतसि चमत्कृतिर्जायते । तस्याश्च जायमानतया तादृशचमत्कृतित्वावच्छिन्नजन्यतानिरूपिता जनकता उपमाद्यलङ्कारविशिष्टाऽर्थज्ञाने वर्तते, अनुप्रासाद्यलङ्कारविशिष्टशब्दज्ञाने चास्तीति तादृशजनकतानिरूपिताऽवच्छेदकता (विशेषणता) तादृशज्ञाने विशेषणीभूतयोरवच्छेदकीभूतयोर्वाऽनुप्रासाद्युपमादिविशिष्ट शब्दार्थयोश्चास्तीति तन्निरूपिताऽवच्छेदकताऽनुप्रासाद्यलङ्कारेषूपमाद्यलङ्कारेषु च सर्वत्र सत्त्वेनेति तेषां सर्वेषां खल्वलङ्कारत्वं सूपपन्नं भवतीति भावः । एवञ्च चमत्कृतिजनकतावच्छेदकतावच्छेदकत्वमेवाऽलङ्कारत्वमित्येव सूचितं भवति ।

परन्त्वेतावन्मात्रस्याऽलङ्कारसाधारणाऽलङ्कारत्वलक्षणं ध्वनावतिव्याप्तिदोषदूषितं स्याद्, यतो ध्वनिविशिष्टाऽर्थज्ञानेनापि चमत्कृतेरुदयाद् ध्वनिविशिष्टाऽर्थज्ञाननिष्ठा या चमत्कृतिजनकता तदवच्छेदकताऽवच्छेदकताया उपमाद्यलङ्कारवत् ध्वनावपि सत्त्वेन तस्याप्यलङ्कारत्वं स्यात्, अतस्तत्परिहर्तुकामः खलु व्यङ्ग्यभिन्नत्वे सतीति सत्यन्तं विशेषणं लक्षणेऽवश्यं निवेश्यमिति ब्रूमः । इत्थञ्च व्यङ्ग्यार्थसद्भावसत्त्वान्नोक्तातिव्याप्तिरूपो दोषः समापद्यते । एवमपि रसवत् प्रेय ऊर्जस्वित्समाहितेषु चतुर्षु व्यङ्ग्यार्थस्य विद्यमानत्वेन तत्राऽलङ्कारत्वाऽभावेन भवति अलङ्कारलक्षणाव्याप्तिः । एतादृशाव्याप्तिवारणाय 'रसवदादिभिन्नव्यङ्ग्यभिन्नत्वे सतीति विशेषणविशिष्टसत्यन्तविशेषणमवश्यमलङ्कारलक्षणे देयम्, एवञ्च नाव्याप्तिः । इत्थञ्च रसवदादिविशिष्टार्थज्ञानाच्चमत्कारस्योत्पत्ते रसवदादिषु पूर्वोक्तलक्षणलक्षितत्वादलङ्कारत्वं निराबाधमेवेति बोध्यम् । एवञ्च चमत्कृतिजनकतायाः शब्दार्थज्ञाने सत्त्वेन तन्निरूपितावच्छेदकतायाश्च विषयतासम्बन्धेन शब्दार्थयोर्विद्यमानत्वात्, यतोऽर्थस्य स्वविषयकज्ञाने विशेषणत्वात् ।

स च विषयतारूपः सम्बन्धश्चमत्कृतिजनकतावच्छेदकताऽवच्छेदकः । यो यस्या

---

१. अलङ्कारचन्द्रिकायाम्,

२. समुद्बन्धे ऽलङ्कारसर्वस्वटीकायाम्—

अवच्छेदकः सा तदवच्छिन्नेतिन्यायात् चमत्कृतिजनकतावच्छेदकताया विषयतासम्बन्धावच्छिन्नत्वात्, एवंविधं लक्षणं सम्पद्यते यत्—'रसवदादिभिन्नव्यङ्ग्यभिन्नत्वे सति शब्दार्थाऽन्यतरनिष्ठा या विषयतासम्बन्धावच्छिन्ना चमत्कृतिजनकतावच्छेदकता तदवच्छेदकत्वमेवाऽलङ्कारत्वम् इति ध्येयम् इति भावः।

इत्थञ्च काव्यघटकीभूतं काव्यभूषणभूतञ्चेदं विवेचितं खल्वलङ्कारत्वं, 'विषयता, प्रकारता, अवच्छेदकता, प्रभृतिदार्शनिकतत्त्वानि विना सर्वथाऽशक्यमेवेति तेषां स्वाश्रयालङ्काघटित्वेन काव्ये महाकाव्ये वा ऽलङ्कारसम्पादकत्वेन स्वयमप्यलङ्कारलक्षणघटकत्वेन चाऽलङ्कारस्वरूपत्वादिदमप्यस्ति खल्वेकं 'काव्ये महाकाव्ये वा दार्शनिकतत्त्वानां निरूपणस्य प्रयोजनम्'। एवमेव दार्शनिकतत्त्वानां निरूपणस्यैवंविधं प्रयोजनमन्यत्राप्यूह्यम् इति तु संक्षेपः। एवं रीत्या प्रकारान्तरेण वा ऽन्यान्यपि सन्ति तन्निरूपणप्रयोजनानि, तानि चाऽनुपदमेव विवेचयिष्यन्ते इति।

संस्कृतमहाकाव्यस्योद्भवविषये किञ्चित्

यद्यपि प्रवृत्तिमात्रं प्रति हेतुभूतेन स्वीयेष्टसाधनत्वेन चाऽत्राऽस्माकमस्ति इच्छाजनकीभूतो विषयः संस्कृतमहाकाव्यानामुद्भवविषयकज्ञानविज्ञानविधानमिति। सचाऽस्माकं 'श्रीराजेन्द्रप्रतापे'तिनामधेयानाञ्चास्ति प्राथमिकः प्रागुक्तोऽभीष्टतमो विषयः केवलं संस्कृतमहाकाव्यानामुद्भवविषयकज्ञानविज्ञानविधानमिति। चसाऽस्माकं 'श्रीराजेन्द्रप्रतापे' तिनामधेयानाञ्चास्ति प्राथमिकः प्रागुक्तोऽभीष्टतमोविषयः केवलं संस्कृतमहाकाव्यानां ज्ञानविज्ञानविधानपर्यन्तमेव चास्ति सीमितः इति नाग्रे पुरो धावति।

तथाप्यानुषङ्गिकरूपेणाऽस्माकमत्र संस्कृतमहाकाव्यानामादिपरिस्थितीनामध्ययनं संस्कृतमहाकाव्यानामध्ययनपर्यन्तं नितान्तमावश्यकमस्ति स्वीयेष्टसाधनत्वप्रकारकज्ञानार्थम्, जिज्ञासुतावच्छेदककोटिनिःक्षिप्तान् परांश्चाऽवबोधार्थम्, तथा विशेषतः सांसारिकजीवननिर्वाहजनकीभूतस्य 'डीलिट्' इत्युपाधिसम्प्राप्त्यर्थञ्च।

अत्र संस्कृतमहाकाव्यानां समुद्भवविषयेऽहं केवलमेतावन्मात्रमेव गुरुपरम्परातोऽध्ययनकालावच्छेदेनैव श्रुतवानस्मि यत् सर्वतः प्राक् संस्कृतमहाकाव्यानां समुपलब्धिर्ग्रन्थानामुपर्येव नासीन्निर्भरा इदानीन्तनकालावच्छिन्नाऽध्ययनाऽध्यापनवत्, किन्तु वाचा (मौखिकरूपेण) एव संस्कृतमहाकाव्यानामध्ययनाऽध्यापनपरम्परा प्रचलतिस्म। तदानीन्तनकालावच्छेदेनाऽध्ययनशीलानां छात्राणामध्यापनपरायणपराणाञ्च गुरुवराणां धारणाशक्तिर्महती प्रबलतमाऽऽसीत्। तथा तदानीन्तनकालावच्छिन्नानामन्तेवासिनां गुरुवराणाञ्च पार्श्वे लेखनी, मसी, मसीपात्र, प्रभृतिसामग्रीणां लेखनकार्यसम्पत्तिप्रयोजकीभूतानां महानेवाऽभाव आसीत्। अतो गुरुवराः केवलं वाङ्मात्रेणैवाऽन्तेवासिनोऽध्यापयन्तः सन्तोषयन्ति स्म। इयञ्चाऽध्ययनाऽध्यापनपरम्परा द्वित्रिसहस्रवर्षपर्यन्तं प्रचलिता न केवलं शतद्वय, शतत्रयवर्षपरिमिता वेति विज्ञेयम् इति।

किन्त्वत्र विचारणीयमस्ति यद् रामायण, महाभारतप्रभतयो महाकाव्यग्रन्था अद्यापि सर्वप्राथम्येन महाकाव्यकोटौ परिगणिताः सन्तोऽनुभूयन्ते। किन्तु महाकाव्यानामद्यतनस्वरूपदृष्ट्या किन्ते रामायणप्रभृतयोग्रन्था महाकाव्यपदाभिधेयतां गन्तुं प्रभवन्ति ?

तेषां रामायणप्रभृतिग्रन्थानां निर्मातॄणां नासीदयमुद्देशः स्वप्नेऽपि विचारधारा वा यद् भाविकाले मदीयेयं रामायणप्रभृतिग्रन्थात्मिका कृतिर्महाकाव्यपदजन्यबोधविषयतावती भविष्यति भवितुं वा प्रभविष्यति ।

परन्तु तात्त्विकदृष्टिसंलक्षितविचारधारयेदं निश्चीयते यत् तेषां रामायणप्रभृतिग्रन्थानां विषये महाकाव्यशब्दोल्लेखिनी प्रतीतिर्नाऽन्याय्यं ब्रूते किन्तु तत्र तदनुल्लेख एवाऽन्याय इति मन्तव्यम् ।

अत्राऽवधेयमस्ति यन्महाकाव्यानां रचना आहोस्वित्तदीयं किमपि स्वरूपं भवतु, तत्र युगदिशा नैक्यं कदाचित् केनचित् समनुभूतम् । अत एव चान्तिमरूपेणेदमपि न वयं स्वयं वक्तुं शक्नुमः, यदद्य महाकाव्यानामन्यकाव्यनाटकाद्यङ्गानां वा कृते याः परिभाषा मान्यताश्च स्थिरत्वेन प्रदानपराः सन्ति, आहोस्वित् इतः पूर्वकालावच्छेदेन स्थिरीकृतास्ताः भाविकालेऽपि पूर्ववदेव ता मान्यताः स्थास्यन्त्येवेति नहि वयं वक्तुं प्रभवामः ।

रामायणे तथा महाभारते येषां महाकाव्यानामन्योन्यं भेदमापन्नानामाख्यानानामुपाख्यानानाञ्च वर्णनानि वा विषयाणि मिलन्ति तान्येवाऽऽख्यानानि, उपाख्यानानि च सन्ति महाकाव्यानामुद्भवरूपाणीति सुनिश्चितं विदाङ्कुर्वन्तु भवन्तः । तेषामेव चोद्भवाऽऽविर्भावरूपस्वरूपाणामाख्यानानामुपाख्यानानाञ्च संकलनं, संशोधनं, परिवर्धनञ्च विधाय रामायण, महाभारतयोः शरीरनिर्माणं भवति, ताभ्याञ्च महाकाव्यानामेका प्रौढपरम्पराऽनुवर्तिता भवति ।

रामायण, महाभारतयोः स्वतन्त्रास्तित्वस्य पारस्परिकपरिस्थितेश्च महता रूपेण स्पष्टीकरणानन्तरमेव संस्कृतमहाकाव्यानां सर्वाङ्गीणसमृद्ध्यर्थमाहोस्वित् सर्वाङ्गीणतासम्पत्यर्थमनयोः कियानुपयोगः सहयोगो वा तत्राऽपेक्षितो भवतीति निश्चेतुं शक्यते नान्यथा इत्यतो वयं स्वयमिदन्त्वश्यमेव वक्तुं शक्नुमो यदुत्तरवर्त्ती सर्वोऽपि साहित्यः सर्वोऽपि काव्यो महाकाव्यो वा रामायण, महाभारतयोः साहाय्यसहयोगबलेनैव स्वस्वक्षेत्रे स्वीयं प्रभावं दर्शितवन्तः प्रदर्शयन्ति च समुत्पादयन्तः समुत्पादयन्ति चेति विज्ञेयम् ।

अहन्तु 'श्रीराजेन्द्रप्रतापः' इदमेव मन्ये तत् रामायणतः रूपशिल्पमादाय महाभारतश्च विषयवस्त्वेव केवलमादाय महाकाव्यानां परम्पराऽग्रेसरा जाता । अस्मादेव हेतोः कालिदासस्य, भारवेः, श्रीहर्षस्य, अश्वघोषस्य, च महाकाव्यग्रन्थेषु शिल्पविद्यासम्बन्धवन्ति सन्ति यानि तत्त्वानि तानि सर्वाण्येव यथा—अलङ्कारयोजनायाः, रूपकानाम्, उपमानाञ्चाधिक्यं प्रकृतिचित्रणञ्च यदपि गोचरीभूतं भवति तत् सर्वमेव रामायणस्य देयमस्तीति स. सर्वतो विचार्य पौर्वापर्यक्रमपरीक्षणनिरीक्षणानन्तरमेव ब्रवीमि लिखामि चेत्ययमेव चास्ति संस्कृतमहाकाव्यानां समुद्भव इति कृतं पल्लवितेनेति शम् ।

संस्कृतमहाकाव्यानां विकासक्रमः—

संस्कृतमहाकाव्यानाम् अहं 'श्रीराजेन्द्रप्रतापः' गुरुपरम्परातः स्वयमपि च समनुभूय ब्रवीमि यत्तिसृषु श्रेणीषु संविभागो भवितुं शक्नोतीति नूनं विदाङ्कुर्वन्तु भवन्तः । तत्र सन्ति प्रथमश्रेण्यामन्तर्गता रचनाभूताः प्रभूता 'महाकाव्य' पदाभिधेयतां गताः खलु महा-

कवीनां कृतयः। अर्थात् 'देवभाषा'ऽपरपर्यायभूतायां संकृतभाषायां लिखिताः ये सन्ति महाकाव्यग्रन्थास्ते प्रथमश्रेण्यन्तर्गताः सन्तीति ते प्रदर्श्यन्ते—

१. प्रथमश्रेण्यन्तर्गता महाकाव्यग्रन्थाः संस्कृते = संस्कृतभाषायां लिखिताः सन्ति। यथा—कालिदास, माघ, श्रीहर्ष, अश्वघोष, महाकविप्रभृतीनां ये सन्ति महाकाव्यग्रन्थाः संस्कृते एव लिखितास्ते प्रथमश्रेणीकाः।

२. द्वितीयश्रेणीकाः सन्ति ते महाकाव्यग्रन्था ये 'पालि' भाषायाम्, आहोस्वित् 'प्राकृत' भाषायाम् लिखिताः समुपलभ्यन्ते।

३. तृतीयश्रेण्यां सन्ति ते महाकाव्यग्रन्था ये संकृतस्याऽपभ्रंशभूतायां हिन्दीभाषायां लिखिताः वर्तन्ते। अतएव प्राचीना विद्वांसः प्रायः' नापभ्रंशित वै' इति न्यायेन संकृते एव भाषमाणाः खलु दृष्टिगोचरीभूता भवन्ति स्म।

एवमेवाऽनया रीत्या ऐतिहासिकदृष्ट्या महाकाव्यानां दीर्घ, दीर्घतर, दीर्घतमे,ति-क्रमेण लम्बायमानाः परम्पराः परस्परभेदमापन्नेषु त्रिषु युगेषु संविभागमागताः सत्यः समनुभूयमाना भवन्ति। तथाहि—

१. तत्र प्रथम उद्भवयुगः स च कालिदासकालतः प्राक्कालावच्छिन्नो युगः।

२. द्वितीयोऽभ्युत्थानयुगः, स च कालिदासकालमारभ्य श्रीहर्षपर्यन्तदीर्घकालाव-च्छिन्नो युगः।

३. तृतीयश्चास्ति ह्रासयुगः, स च त्रयोदशशताब्दीतोऽनन्तरकालावच्छिन्नो युगः।

युगविषये पुरुषार्थचिन्तामणिग्रन्थेऽयं विचारो मिलति। प्रभवादिषष्टिसंख्यानां वत्सराणामादितः पञ्चानां युगसंज्ञकानां यथासंख्यं संवत्सर, परिवत्सर, इदावत्सर, अनु-वत्सर, इद्वत्सर इति पञ्च संज्ञा सन्ति।

संवत्सरस्तु प्रथमो द्वितीयः परिवत्सरः।
इदावत्सरस्तृतीयस्तु चतुर्थश्चानुवत्सरः॥
इद्वत्सरः पञ्चमस्तु तत्संघो युगसंज्ञकः॥
पुरुषार्थचिन्तामणिः, ११।

श्रीभारवेः ब्रह्माऽद्वैतसिद्धान्तः

एतन्मते सत्तात्रयविचारः

महाकविश्रीभारविमतेऽपि सत्तात्रयमङ्गीकृतमस्ति। (१) एका प्रातिभासिकी सत्ता, (२) द्वितीया व्यावहारिकी सत्ता, (३) तृतीया च पारमार्थिकी सत्ता।

(१) प्रातिभासिकी सत्ता

(१) यस्मिन् काले मिथ्याभूतस्य वस्तुनः सत्यवस्तुवद् भानं भवेत् स च कालः स्वप्नावस्थात्मकः कालो भवेत्, व्यवहारकालो वा भवेत्, तथोत्तरकाले बाधश्च जायते तस्य बाधितस्य वस्तुनः प्रातिभासिकसत्ता स्वीक्रियते। यथा 'इदं रजतम्' इत्यत्र इदन्त्वा-वच्छिन्नायां शुक्तौ 'रजतम्' इतिज्ञानविषयीभूतस्य मिथ्याभूतस्य रजतस्य प्रातिभासिकी सत्ता स्वीक्रियते। यतः तदधिष्ठानभूतायाः शुक्तेः साक्षात्कारेण रजतस्य बाधो भवतीति सुनिश्चितम्।

एवं रज्जौ जायमानस्य 'सर्पः' इत्याकारकस्य ज्ञानस्य विषयीभूतस्य मिथ्याभूतस्य सर्पस्य यद् भानं भवति तस्य सर्पस्य तत्र प्रातिभासिकी सत्ताऽभ्युपेयते नान्या सत्ता। यतस्तत्रापि अन्धकाररूपदोषवशात् भासमानस्य सर्पस्याऽन्धकारनिवृत्तौ जायमानायां रज्जौ भासमानस्य सर्पस्य बाधोऽनुभूयते इत्यतस्तत्र सर्पस्य प्रातिभासिकी सत्ता स्वीक्रियते।

(२) व्यावहारिकी सत्ता

(२) सर्वेषामेव स्वावच्छिन्नचैतन्येऽध्यस्तानां जागतिकानां पदार्थानां चास्ति व्यावहारिकी सत्ता। एवं ब्रह्मण्यध्यस्तस्य जगतोऽपि चास्ति व्यावहारिकी सत्ता। यतो ब्रह्मसाक्षात्कारपूर्वकालावच्छेदेनैव भासमानानां जागतिकानां पदार्थानां, जगतश्च सत्यत्वेन प्रतीतिर्जायते। एवं लौकिका वैदिकाश्च व्यवहारा अपि सत्यत्वेनाऽनुभूयन्ते। किन्तु ब्रह्मसाक्षात्कारानन्तरं सर्वेषामेव बाधो जायते इति जागतिकानां पदार्थानां जगतश्च मिथ्यात्वं सिद्ध्यति। तथाचोक्तम्—'तस्मात् प्राग् ब्रह्मात्मताप्रतिबोधादुत्पन्नः सर्वोऽपि लौकिको वैदिकश्च व्यवहारः।

ब्र० सू० शां० भा० २।१।१४।

(३) पारमार्थिकी सत्ता

(३) यस्य वस्तुनस्त्रिकालाबाध्यत्वमनुभूयमानमस्ति तस्य वस्तुनः पारमार्थिकं सत्त्वमभ्युपगच्छामः। यथा परब्रह्मपरमेश्वरस्य। अस्यैव परब्रह्मपरमेश्वरस्य त्रिकालाबाध्यत्वेन पारमार्थिकी सत्ता स्वीक्रियते। अयमेव परब्रह्मपरमेश्वर आत्मा ध्वंसाऽप्रतियोगित्वे सति प्रागभावाऽप्रतियोगित्वेनानुभूयते इत्यतोऽयमेव नित्योऽव्ययो ऽक्षरः सर्वगतश्चास्तीति मुमुक्षुभिः सर्वथा ऽयमेवोपासितव्यो मन्तव्यः श्रोतव्यश्चः। अत एव मुमुक्षुभिर्जीवेशवादयोर्नैव मतिर्देया। स च वादो द्वैतरूपो भेदरूपश्चेति निश्चयेन यथार्थेन निश्चलेन च विचारेण तदेव त्रिकालाबाध्यं ब्रह्मतत्वं विचार्यताम्। उक्तञ्च—

'तस्मादात्माक्षरः शुद्धो नित्यः सर्वगतोऽव्ययः।
उपासितव्यो मन्तव्यः श्रोतव्यश्च मुमुक्षुभिः'॥

अद्भुतरामा०

अपि च पुनः—

'मुमुक्षुभिर्नैव मतिर्जीवेशवादयोः कार्या।
किन्तु ब्रह्मतत्त्वं निश्चलेन विचार्यताम्॥

महोपनि० ४।४।७५।

इत्थञ्चास्य परब्रह्मपरमेश्वरस्य भूतकाले, भविष्यत्काले, वर्तमाने च काले बाधाननुभवात् त्रिकालाबाध्यत्वरूपं पारमार्थिकं सत्त्वमक्षुण्णमेव।

एवञ्च प्रातिभासिकस्थले भ्रान्तिकारणीभूतस्य अधिष्ठानसाक्षात्काराभावस्य निवृत्तौ सत्यां प्रातिभासिकसत्तायाः यथा बाधोऽनुभूयते। यथा वा ब्रह्मसाक्षात्कारे जायमाने व्यावहारिकसत्ताया बाधो दृश्यते तथैव पारमार्थिकसत्ताया नहि कदाचित् केषांचित् कथञ्चिद् बाधोऽनुभवगोचरीभूतो भवतीति महाकवेः श्रीभारवेः सिद्धान्तः। अयमेवास्ति खलु ब्रह्माऽद्वैतसिद्धान्तः।

सन्दर्भविचारः

दर्शनम् = ज्ञानम्, अदर्शनम् = अज्ञानम्, तच्चाऽदर्शनमन्धकाररूपम् । अत एव काव्येयु, महाकाव्येषु च सर्वत्रैव पदार्थाऽदर्शनरूपस्याऽन्धकारस्य निवृत्त्यर्थं दार्शनिकीदृष्टिः समपेक्षिता भवति । एवमेव व्याकरणप्रभृतिष्वपि परिष्कृतस्थलेषु विशेषतः, सर्वत्रैव दार्शनिकी दृष्टिः समपेक्षिता सती समनुभूयते ।

दार्शनिकी दृष्टिरित्यस्य ज्ञानमयी दृष्टिरित्यर्थो बोध्यः । पद-पदार्थस्थलेषु सर्वत्र तत्तदर्थोपस्थित्यर्थम्, तादृशोपस्थितिजन्यशाब्दबोधोपपत्त्यर्थं वा सा दृष्टिर्नितान्तमावश्यकीति मन्तव्यम् ।

नैतावन्मात्रमेव पर्याप्तम्-चराचरात्मकस्यास्य सा दृष्टिः समपेक्ष्यते । तथा चोक्तम्—

'कृत्वा ज्ञानमयीं दृष्टिं पश्येद् ब्रह्ममयं जगत्' ।

तेजो विन्दूप० १।१९ ।

अपि च—'दिव्यं ददामि ते चक्षुः पश्य मे योगमैश्वरम्' ।

गीता, अ० ११, श्लो० ८—

दिव्यं चक्षुरित्यस्य तेजोमयं चक्षुरित्यर्थः । प्रकाशमयं चक्षुः=ज्ञानमयं चक्षुः, दार्शनिकी दृष्टिरिति तु पर्यवसितोऽर्थः । अन्यच्चापि—

'सर्वगं सच्चिदानन्दं ज्ञानचक्षुर्निरीक्षते' ।

वराहोपनि० १।१८ ।

अन्यच्च—'क्षीणदोषाः प्रपश्यन्ति नेतरे माययाऽऽवृताः' ।

अध्यात्मोपनि० ४।३६ ।

अतः सर्वत्राऽज्ञानरूपान्धकारनिवृत्त्यर्थं ज्ञानमयीदृष्टिस्वरूपेयं दार्शनिकीदृष्टिः पदार्थाऽज्ञानाऽन्धकारनिवृत्तिकारणत्वेन पद-पदार्थज्ञानसम्पादकत्वेन चाऽग्रे प्रदर्शितविवेचितज्ञानस्वरूपा या दृष्टिः सैव सन्दर्भः । सा च दृष्टिः प्रत्येकस्मिन् महाकाव्येऽनवरतं प्रदर्शितैवेति नाऽत्र किमपि विचारणीयमवशिष्यते । अत एव

'अज्ञानतिमिरान्धस्य ज्ञानाञ्जनशलाकया' इति प्राचीनाचार्यचरणोक्तन्यायकथनमपि साधु संगच्छते । स च सन्दर्भः=कथनरूपः । यथोक्तम्—

'गूढार्थस्य प्रकाशश्च सारोक्तिः श्रेष्ठया गिरा ।
नानार्थवत्वं वेद्यत्वं सन्दर्भः कथ्यते बुधैः ॥

कर्णपरम्परया श्रुतमात्रम्

एवम्-रचनाविशेषो वा सन्दर्भः, पदार्थग्रथनरूपो वा सन्दर्भः, आहोस्वित्—वक्तृतात्पर्यविशेषो वा सन्दर्भः ।

इत्थञ्चाऽत्र सर्वत्रैव शोधग्रन्थीयमहाकाव्येषु उपरि परिगणिताऽन्यतमस्य सर्वथाऽनुस्यूतत्वेन, सकलस्यैव वा सन्दर्भशब्दार्थस्य तत्र प्रवेशं लभमानत्वेन घटकीभूतत्वेन वा "दार्शनिकतत्त्वानां तत्सन्दर्भाणाञ्च सोपपत्तिकं विवेचनम्" इति चास्माकं "खिस्ते" इत्युपाह्व "श्री वटुकनाथशास्त्रिणां" गुरुवराणां निर्देशनं साधु संगच्छते ।

एवं तत्रैव दार्शनिकपदार्थतत्त्वस्वरूपाणां दार्शनिकतत्त्वानां रचनाविशेषस्वरूपस्य सन्दर्भसाहित्यावच्छिन्नस्य तथाऽन्यान्यसन्दर्भाणां प्रागुक्तानां तेषु तेषु महाकाव्येषु

महाकाव्यग्रन्थेषु वर्तमानत्वेन सन्दर्भपूर्विका सोपपत्तिस्तत्र व्याप्यवृत्तित्वेन सुसम्पद्यते इति न किञ्चिदनुपपन्नम् ।

दार्शनिकतत्त्वानां निर्देशः

कालिदासप्रभृतिभिः कविभिर्विरचितमहाकाव्यघटकीभूतदार्शनिकतत्त्वानां स्वरूप-विषयकजिज्ञासाविषये सर्वतः प्राक् 'तत्त्व' शब्दार्थो विचार्यते किं पुनस्तत्त्वम् ? एवं स्थिते दार्शनिकों तत्त्वविषयिणीं दृष्टिमाश्रित्य वात्स्यायनः प्रोवाच—

"सतश्च सद्भावोऽसतश्चाऽसद्भावः ।"

न्यायभाष्यम्—१।१। उपक्रमः

"सत् सदिति गृह्यमाणं यथाभूतमविपरीतं तत्त्वं भवति। असच्च असदिति गृह्यमाणं यथाभूतमविपरीतं तत्त्वं भवति।" तत्रैव द्रष्टव्यम्

अर्थात् सतो विद्यमानस्य घटादेः यः सद्भावः = सत्त्वं = विद्यमानत्वमेव तत्त्वं विज्ञेयम्। एवम् असतः = अविद्यमानस्य घटादेर्नास्तीति प्रतीत्या बोध्यमानमविद्यमान-त्वमेव यथाभूतमविपरीतं तत्त्वं बोध्यम्।

यथा—"प्रमाणप्रमेयसंशयप्रयोजन..........................तत्त्वज्ञानान्निःश्रेयसाधिगमः ।" —गौ० सू० १।१।१। इत्यादौ खलु प्रमेयादिकं तत्त्वं विज्ञेयम्।

अपि च भरद्वाजेनाप्युक्तम्—

"यो यथाऽवस्थितः पदार्थः स तथाभूतप्रत्ययोत्पत्तिनिमित्तं यत्तत् ।"

—न्यायवार्तिक १, पृ० १२

"अनारोपितं तत्त्वम्" प्रमितिविषयीभूतम् इति परमार्थः, इति श्रीपूर्णप्रज्ञाचार्यमतावलम्बिनो वदन्ति। —तत्त्व संख्या, टी०

अपरे पुनर्दार्शनिकाः—"याथातथ्यमेव तत्त्वम्" वदन्ति।

—वात्स्यायनभाष्यम्, १।१।४०

तत्रैव सूत्रस्यापि प्रामाण्यं समुपस्थाप्यते—

"अविज्ञाततत्त्वेऽर्थे कारणोपपत्तितस्तत्त्वज्ञानार्थमूहस्तर्कः ।"

—गौ० सूत्रम् १।१।४०

अर्थाद् यथा = सोऽर्थो भवति तस्य यथाभावस्तत्त्वम् = अविपर्ययः = याथातथ्यम्। तदेव पूर्वं सूत्रद्वारा सुस्पष्टीकृतं न्यायशास्त्रजन्मप्रदानकर्त्रा महर्षिणा गौतमेन।

अर्थाद् अविज्ञाततत्त्वे पदार्थे कारणोपपादनद्वारा तदीयपदार्थस्य यथार्थस्वरूप-ज्ञानार्थं य ऊहः = संभावना स तर्कः। यथा = स्थणुर्वा पुरुषो वेति संशये जायमाने एतादृशदेशकालयोः पुरुषसत्त्वं नोपपद्येत इत्यादिकारणोपपादनेन दृष्टिगोचरतां गतस्य यत् स्थाणुत्वसम्भावनं स एव खलु तर्को विज्ञेयः। तथा यद्यत्र वह्निर्न स्यात्तदा धूमोऽपि न स्यादिति धूमोपपादनेन वह्निसंभावनं तर्कः। स चाऽयं तर्कः संशये सति प्रमाणानां तत्त्वावधारणे सहकारिकारणं भवति।

यथा वा आत्मा उत्पत्तिधर्मकोऽनुत्पत्तिधर्मको वेति संशये जाते तत्राऽनुत्पत्ति-धर्मकत्वस्याऽभ्यनुज्ञाकारणोपपादनेन तदीयाऽनुत्पत्तिधर्मकत्वरूपयथार्थस्वरूपज्ञानं जायते। इदमेव चाऽऽत्मनः स्वरूपस्य याथातथ्यं पुनर्विज्ञेयम्।

अर्थाद् यद्ययमात्माऽनुत्पत्तिधर्मको नित्यः स्यात्तदैवाऽयमात्मा स्वकृतकर्मणः फलमनुभवितुमर्हति नान्यथाऽनित्यः सन्नप्येवं भवितुमर्हति। किं पुनर्बहुना—दुःखजन्म-प्रवृत्तिदोषमिथ्याज्ञानानामुत्तरमुत्तरं पूर्वस्य पूर्वस्य कारणं भवति। ततश्चोत्तरोत्तरापाये तदनन्तरापायादपवर्ग इति स्यातां संसारापवर्गौ। उत्पत्तिधर्मके खल्वात्मनि ज्ञातरि च न स्याताम्।

तथा चेदमेव नित्यस्याऽऽत्मनो विभोर्यथाभावस्तदेव च तस्याऽऽत्मनः स्वरूपं विज्ञेयम्।

इत्थञ्चेदमेव पदार्थानां तत्त्वापरपर्यायभूतं स्वरूपं महाकविश्रीकालीदासरचना-भूतेषु काव्येषु महाकाव्येषु च सर्वत्र साहित्ये सन्निविष्टमस्ति।

नैतावन्मात्रं पर्याप्तमस्ति अपि तु माघ, भारवि, रचनाभूतेष्वपि तथाविधेषु काव्येषु महाकाव्येषु चापि सर्वत्र साहित्येऽन्यत्रापि च सर्वत्रेदमेव स्वरूपं पदार्थानां पर्यालोच्यतेऽनुभूयते चापि।

क्वचिद् रसरूपेण, क्वचिच्चाऽन्यान्यरूपेणापि, क्वचिच्च प्रमाण-प्रमेयादिरूपेण, क्वचिच्च संशय, प्रयोजनादिरूपेण, क्वचिच्च बुद्धितत्त्व, अहङ्कारादितत्त्वरूपेण, क्वचिच्च चिन्मात्रब्रह्मैकतत्त्वरूपेण, अन्यत्र च गुरुतत्त्व, मन्त्रतत्त्वरूपेण, मनस्तत्त्वादि-रूपेणापि बोध्यम्। कुत्रचिच्च ध्यानतत्त्व, देवतातत्त्वादिरूपेण, क्वचिच्च याथातथ्य-रूपेण, अपरत्र च क्वचित् पदार्थानां यथावस्थिताऽऽत्मप्रत्ययोत्पत्तिनिमित्तत्वरूपेण खलु इमानि दार्शनिकतत्त्वानि सन्निविष्टानि प्रविष्टानि वा सन्तीत्यत्र नास्ति विशेषतो विचारावकाशः, लेशतो वा सन्देहानध्यवसायावसरोऽपि च।

मतान्तरेणापि तत्त्वानि प्रदर्श्यन्ते

काव्यशास्त्रवेत्तारः काव्यज्ञाः खलु स्वरूपं = स्वभाव एव तत्त्वमिति वदन्ति। यथा—'निस्तत्त्वानि' इत्यादौ निस्तत्त्वस्य निःस्वभावोऽर्थः। मतभेदेन 'तत्त्वानि प्रदर्श्यन्ते इत्यत्र 'तत्त्व' शब्दस्य स्वभावोऽर्थः। एतच्च सर्वं 'वाचस्पत्यकोशे' द्रष्टव्यम्।

चार्वाकाः खलु केवलं प्रत्यक्षप्रमाणवादिनः पृथिव्यादीनि चत्वारि भूतान्येव तत्त्वपदाभिधेयानि सन्तीति ब्रुवन्ति। तैरेव खलु सर्वोऽपि सृष्टिक्रमः सुसम्पन्नो भवतीत्ये-तान्येव चत्वारि भूतानि सर्वत्र शास्त्रेषु महाकाव्येषु ओतप्रोतानि सन्तीति न तिरोहित-मस्ति केषामपि विदुषाम्।

तत्र शून्यवादिनो माध्यमिका बौद्धाः सत्, असत्, उभयात्मक, अनुभयात्मकैतच्च-तुष्कोणविनिर्मुक्तं 'शून्य' तत्त्वमस्तीति वदन्ति।

सर्वद० सं० पृ० २९ बौद्ध०

"माध्यमिकाः तावदुत्तमप्रज्ञा इत्थमचीकथन्—भिक्षुपादप्रसारणन्यायेन, क्षण-भङ्गाद्यभिधानमुखेन, स्थायित्वानुकूलवेदनीयत्वाऽनुगतत्व, सर्वसत्यत्व, भ्रमव्यावर्तनेन सर्वशून्यतायामेव पर्यवसानम्। अस्तत्त्वं सदसदुभयानुभयात्मकचतुष्कोटिविनिर्मुक्तं तत्त्वं शून्यमेव।

तत्रैव

रामानुजीयास्तु द्रव्याद्रव्यभेदेन द्विविधं तत्त्वं वर्णयन्ति । तथाचोक्तम्—

द्रव्याद्रव्यप्रभेदान्मितमुभयविधं तद्विदस्तत्त्वमाहुः ।
द्रव्यं द्वेधा विभक्तं जडमजडमिति प्राच्यमव्यक्तकालौ ॥

सर्वद० सं० रामानुज द० तत्त्वमीमांसा प्रकरणे

द्वैतवादिनः श्रीपूर्णप्रज्ञाचार्या वेदान्तिनः खल्वित्थं वदन्ति यत् स्वतन्त्रास्वतन्त्र-भेदेन द्विविधमेव तत्त्वमस्ति । तत्त्व सं० टी०

आर्हताः खलु जीवाजीवाख्ये द्वे तत्त्वे स्तः । तत्र च ज्ञानरूपेण जीवः, अज्ञान-रूपेण चाऽजीव इति ।

तत्रापि परमनन्दिमहोदयानां 'चिदचित्' द्वे एव केवलं परमतत्त्वे स्तः, इति कथने तात्पर्यमस्तीति भावः । तत्रोभयपक्षे नास्ति कश्चिद् भेदः, केवलं शब्दानुपूर्व्या अस्ति भेदः, अर्थतश्चाऽभेदात् । अत एव जीवस्वरूपं 'चित्' तत्त्वं, "चित्" स्वरूपं वा जीवतत्त्वमुपादेयत्वेन वर्णितम्, अपरञ्च हेयत्वेनेति विशेषः ।

हेयकुक्षिनिःक्षिप्तस्य तस्य तत्त्वस्य सर्वमपि कार्यमविवेकात्मकं तत्पूर्णं वा । ज्ञानस्योपयोगलक्षणं परं ज्योतिरेवोपादेयत्वेन वर्णितम् । तथा चोक्तम्—

"तत्र बोधात्मको जीवः, अबोधात्मकस्त्वजीवः ।"

—तदुक्तं पद्मनन्दिना

चिदचिद् द्वे परे तत्त्वे विवेकस्तद्विवेचनम् ।
उपादेयमुपादेयं हेयं हेयं च कुर्वतः ॥
हेयं हि कर्तृरागादि तत्कार्यमविवेकिता ।
उपादेयं परं ज्योतिरुपयोगैकलक्षणम् ॥

सर्वद० सं० आर्हतदर्शनम्, तत्त्वप्रकरणे

अपरे पुनर्जैनदार्शनिकाः (आर्हतैकदेशिनः) जीव[१], आकाश[२], धर्म[३], अधर्म[४], पुग्दलाख्यान्[५] पञ्च अस्तिकायान् (पदार्थान्) वर्णयन्ति । तथा चोक्तम्—

अपरे पुनर्जीवाजीवयोरपरं प्रपञ्चमाचक्षते—

"जीवाऽऽकाशधर्माऽधर्मपुग्दलास्तिकायभेदात् ।
एतेषु पञ्चसु तत्त्वेषु कालत्रयसम्बन्धितया अस्तीति स्थितिव्यपदेशः ।"

तत्रैव दृश्यताम्

आर्हतैकदेशिनः खलु जैनदार्शनिकाः सप्त तत्त्वानि वर्णयन्ति । जीवः[१], अजीवः[२], आस्रवः[३], बन्धः[४], संवरः[५], निर्जरा[६], मोक्षश्चेत्येतानि[७] सन्ति सप्त तत्त्वानि । एतेषां विशेषतश्चोल्लेखो विवेचनञ्च स्याद्वादमञ्जरीग्रन्थे दृश्यताम् । उक्तञ्च—

केचन सप्त तत्त्वानि इति वर्णयन्ति । तदाह—

"जीवाजीवास्रवबन्धसम्वरनिर्जरमोक्षास्तत्त्वानि"—त० सू० १।४।

निरीश्वरसांख्याः महामुनिकपिलादयः—

प्रकृतेर्महांस्ततोऽहङ्कारस्तस्माद् गणश्च षोडशकः ।
तस्मादपि षोडशकात् पञ्चभ्यः पञ्च भूतानि ॥

—सांख्यकारिका २२

इति कारिकामनुसृत्य २५ पञ्चविंशतितत्त्वानि वर्णितवन्तः ।

तत्र सेश्वरपदार्थतत्त्ववादिनः खलु पतञ्जलिप्रभृतयो योगदर्शनवेत्तारो दार्शनिका ईश्वरसाहित्यसंवलितानि २६ षड्विंशतितत्त्वानि स्वीकुर्वन्तीति ईश्वराधिकानि तानि सन्ति । उक्तञ्च—

"प्रधानादीनि पञ्चविंशति २५ तत्त्वानि प्राचीनान्येव सम्मतानि । षड्विंशस्तु परमेश्वरः, क्लेशकर्मविपाकाशयैरपरामृष्टः पुरुषः स्वेच्छया निर्माणकायमधिष्ठाय लौकिकवैदिकसंप्रदायप्रवर्तकः संसाराङ्गारे तप्यमानानां प्राणभृतामनुग्राहकश्च ।"

सर्वद० सं० पातञ्जलदर्शनम् पृ० ६५३

अपरे पुनरितोऽतिरिक्ता विद्वांसः स्वस्वानुभूत्यनुसारिणः पृथक् पृथगेव तत्त्वानि वर्णयन्ति । यथा—

नाट्यशास्त्रं विदाङ्कुर्वन्तो विद्वांसो विलम्बितं नृत्यगीतादि एवं नृत्यवाद्यादि तत्त्वं वदन्ति ।

एवं शक्त्युपासकाः खलु शाक्ताः—

मद्यं मांसं तथा मत्स्यो मुद्रा मैथुनमेव च ।
पञ्चतत्त्वमिदं प्रोक्तं देवि ? निर्वाणहेतवे ॥
मकारपञ्चकं देवि ? देवानामपि दुर्लभम् ॥

गुप्तसाधनतन्त्रम् ७ पटले

वैष्णवास्तु—

गुरुतत्त्वं मन्त्रतत्त्वं मनस्तत्त्वं सुरेश्वरि ?
देवतत्त्वं ध्यानतत्त्वं पञ्चतत्त्वं प्रकीर्तितम् ॥

निर्वाणतन्त्रे

इदमत्रावधेयमस्ति यत् "तत्त्वमसि श्वेतकेतो" इत्यस्मिन् प्रमाणभूते वाक्ये घटकीभूतपदार्थभगवत्परमेश्वरप्रबोधकं 'तत्' पदार्थनिष्ठं तत्त्वं किमिति विचार्यमाणे सर्वज्ञत्वरूपं वा, सर्वशक्तिमत्त्वं वा, सर्वान्तर्यामित्वरूपं वेति विप्रतिपत्तौ जायमानायां साकल्येन सर्वमेव 'प्रागुक्तं 'तत्' पदार्थनिष्ठं बोध्यम् । तदेव च दार्शनिकं तत्त्वं गीयते ।

कालिदासीयसंस्कृतमहाकाव्येष्वपि दार्शनिकतत्त्वानां तत्सन्दर्भाणाञ्च सोपपत्तिकं विवेचनम् कालिदासरचनासु दार्शनिकतत्त्वानां तत्सन्दर्भाणाञ्च सोपपत्तिकं विवेचनं विधीयते श्री 'रजोला' इत्युपाह्वेन—

इह खलु परमार्थतोऽद्वितीयसच्चिदानन्दस्वरूपलक्षणलक्षितब्रह्माद्वैतपरमात्मैक स्वरूपपर्यवसितेऽपि ब्रह्मणः सहकारिशक्तिस्वरूपमायापरपर्यायभूतसत्त्वरजस्तमस्त्रि-गुणात्मकप्रकृतिस्फुटीकृतनानाविधवैचित्र्यावच्छिन्ने सर्वथा व्याप्यवृत्तित्वानवच्छिन्ने सचित्रे पवित्रे स्वभावतोऽतिरमणीयेऽस्मिन् वैरिञ्चे प्रपञ्चे चतुष्कोटिविनिर्मुक्तत्वेन सर्वथाऽनिर्वचनीये स्वप्रकाशचिदात्मब्रह्मविवर्तभूते जगति कालिदासरचनासु रचनाभूते

वा महाकाव्येषु दार्शनिकतत्त्वानां तत्संदर्भाणाञ्च साम्राज्यं सर्वतो व्याप्तं व्यापृतञ्चास्तीति के नहि कालिदासीयचर्चाविचारचातुरीकाः कालिदासीयरचनायाः गुणगणवर्णनपरायणाः साहित्यशास्त्रपारङ्गताः सहृदयसमाजा जानन्तीति स्वयमेव विचारयन्तु भवन्तः ।

एवंविधाया महाकाव्यरचनायाः सर्वथा चमत्काराधायकत्वं काव्यकलाकौशल-जनकत्वं पावित्र्यातिशययुक्तत्वं के नहि साहित्यशास्त्रपूतभावनाभावितान्तःकरणाः साहित्यशास्त्रपवित्रीकृतचेतसोऽनुमन्यन्ते ।

एवं कालीदासीयमहाकाव्यरचनासु दार्शनिकतत्त्वानां तत्संदर्भाणाञ्च कालिदासीय-महाकाव्यविचारचातुरीचमत्कृतचेतसः सचेतसो मर्मज्ञा एवोपमालङ्कारसमलङ्कृतया-गिरा गुम्फितं कालिदासीयमहाकाव्यमिदं नवनवकौतूहलावलम्बिनस्तादृशकौतूकत्व मनवरतमुज्जीवयन्तो नहि मनागपि खेदं भजंते । सहैव च ते महान्तमेव हर्षप्रकर्षमानन्द सन्दोहञ्च तदीयमहाकाव्यरसिकाः कविकर्मनैपुण्यमनुभवन्तो भवन्ति ।

अत इदानीमस्माभिः कालिदासीयरचनारचितेषु तादृशरचनालक्षणलक्षितेषु वा महाकाव्यग्रन्थेषु शोधग्रन्थत्वेन निर्धारितेषु कालिदास, भारवि, श्रीहर्ष, अश्वघोषप्रभृति-सम्बन्धितेषु तेषु पूर्वोक्तेषु दार्शनिकतत्त्वसाहित्यावाच्छिन्नसन्दर्भविषयोको विचारः प्रस्तूयते ।

येन महाकाव्यकुक्षिनिक्षिप्ततत्तदलङ्कारीयसुन्दरमहाकाव्यरघुवंश–कुमारसंभव-प्रभृतिभावनाभावितान्तःकरणानां सान्तःकरणानां दार्शनिकतत्त्वप्रभावभूषणभूषितानां कालिदासीयरीतिनीति-सम्बन्धितमहाकाव्यशय्यामारूढानामुपासकत्वेन सुरभारतीकुक्षि-क्षिप्ततावच्छेदककोटिसन्निष्टानां सचेतसामान्तरं तेजःप्रतियोगिकाभावरूपतमोनाशं सर्वथा समूलोन्मूलतया गच्छति ।

तत्र शरीरसुषमासम्पादकत्वेन यथा कटक-कुण्डलादीनां धारणं भवति तथैव महाकविकालिदासमहाभागा अपि स्वीयमहाकाव्यग्रन्थेषु शोभावाहकत्वेनाऽऽधायकत्वेन वा दार्शनिकतत्त्वानां सन्निवेशं विधाय चमत्कृतिजनकतावच्छेदकतया तद्विषयीकृत्य तानि तत्त्वानि सन्निवेशयामासुः ।

अत्र शोभावाहकत्वेन शोभाधायकत्वेन वा सन्निविष्टमस्त्येकमपीदं तत्त्वम्—

हृदयस्थमनासन्नमकामं त्वां तपस्विनम् ।
दयालुमनघस्पृष्टं पुराणमजरं विदुः ॥

रघु० सर्गः ९ । श्लो० १९

अर्थात् देव ? हृदयस्थम् = हृदये सन्तिष्ठमानं, हृद्देशेऽर्जुन ? तिष्ठति' इत्यादि-भगवदुक्तेः । सर्वान्तर्यामित्वेन नित्यं हृदये विराजमानमस्ति । तथापि मूलेऽनासन्नम् = अगम्यरूपत्वात् विप्रकृष्टं तद् विज्ञेयम् । एवं सोऽपि निर्गुणस्वरूप आत्मा 'अकामः = नास्ति कामोऽभिलाषोऽस्येति कथनेन तस्य निस्पृहत्वं पूरिपूर्णत्वञ्च सूचितं भवती-त्यपि विज्ञेयम् । तथापि 'तपस्विनां' इति तु तस्य प्रशंसा कृता । नो चेद् योऽस्ति चेतन-तत्त्वभूत आत्मा स कथं दुःस्तरं तपो विधास्यते । ये दुःखिनो भवन्ति त एव खलु तादृशं कठिनतमं तपस्तपन्तीति कालदासो हि सैद्धान्तिकं रूपं प्रकटयति । यथा = ऋषि, महर्षय-

स्तपन्ति सांसारिकबन्धननिवृत्तये । दयालुम् = परदुःखप्रहाणपरम् । तथापि अनघ-स्पृष्टम् = नित्यानन्दस्वरूपत्वात् सर्वथा दुःखरहितं विज्ञेयं तद्ब्रह्म ।

ईर्ष्यी घृणी त्वसन्तुष्टः क्रोधतो नित्यशङ्कितः ।
परभाग्योपजीवी च षड़ेते नित्यदुःखिताः ॥ —महाभारते

पुराणम् = अनादिम् । अजरम् = निर्विकारत्वात् सर्वथा विकारशून्यत्वादक्षरं तद् ब्रह्मेति विदाङ्कुर्वन्तु भवन्तः ।

इत्थञ्च सर्वत्राऽन्ततोगत्वा ब्रह्माद्वैतवाद एव परिशिष्यते इति महाकविश्रीकालिदासमहोदया ब्रुवन्ति । तदेव च तैः साधितम् ।

एवमेव आचार्यब्रह्मनन्दिनोऽपि जीवब्रह्मणोरैक्यं स्वीकुर्वन्ति, येनाऽन्ततोगत्वा निर्विशेषाद्वैतवादः समागच्छति । अयमेवाऽस्ति ब्रह्माद्वैतवादः । इयमेवाऽस्ति भारतीय-दर्शनेषु दार्शनिकी दृष्टिः । उक्तञ्च—

'अद्वैतमेव परिरक्षति वाक्यकारः'

सं० शा० पृ० ३ श्लो० २२०

अनेनापि महाकविकालिदासस्यैवाऽद्वैतवादः समर्थ्यते । इत्यनेन सुस्पष्टमेव प्रतीयते यद् आचार्यब्रह्मनन्दिनोऽपि निर्विशेषाद्वैतवादसिद्धान्तं स्वीकरोति । पञ्चपादिकाप्रकरणे यत्र कुत्रापि भेदोद्धरणं मिलति तत् सर्वमेवोपाधिकृतत्वेनौपाधिकमेवेति विज्ञेयम् । उपाधि-व्युपगमे सर्वथा एकमेव ब्रह्मावशिष्यते ।

इत्यनेन पूर्वोक्तकथनेनापि महाकविकालिदाससेनाभितो ब्रह्माद्वैतः सुदृढ़ीकृतो भवति । तथाहि—

बहुधाप्यागमैर्भिन्नाः पन्थानः सिद्धिहेतवः ।
त्वय्यव निपतन्त्योघा जान्हवीया महार्णवे ॥

रघुवं० सर्ग १० । श्लो० २६

अपि च—त्वय्यावेशितचित्तानां त्वत्समर्पितकर्मणाम् ।
गतिस्त्वं वीतरागाणामभूयः सन्निवृत्तये ॥

तत्रैव = २७

ब्रह्माद्वैतमहत्त्वम्

अयञ्च ब्रह्माद्वैतवादसिद्धान्तः महाकविकालिदासाऽश्वघोषभारविश्रीहर्षमहाकवीनां महाकाव्यग्रन्थेषूपलभ्यते । तत्रापि महाकविश्रीकालिदासेन रघुवंशमहाकाव्ये निर्गुणस्यैकस्याऽद्वितीयस्य विभुत्वं वर्णितम् । तथाहि—

प्रत्यक्षोऽप्यपरिच्छेद्यो मह्यादिर्महिमा तव ।
आप्तवागनुमानाभ्यां साध्यं त्वां प्रति का कथा ॥

रघुवं० सर्गः १०।२८

केवलं स्मरणेनैव पुनासि पुरुषं यतः ।
अनेन वृत्तयः शेषाः निवेदितफलास्वपि ॥

तत्रैव = २९

उदधेरिव रत्नानि तेजांसीव विवस्वतः।
स्तुतिभ्यो व्यतिरिच्यन्ते दूराणि चरितानि ते ॥
तत्रैव—३०

अनवाप्तमवाप्तव्यं न ते किंचन विद्यते।
लोकानुग्रह एवैको हेतुस्ते जन्मकर्मणोः॥
तत्रैव—३१

अपि च भगवतो महत्त्वं कीर्त्यते—
महिमानं यदुत्कीर्त्य तव संह्रियते वचः।
श्रमेण तदशक्त्या वा न गुणानामियत्तया ॥
तत्रैव—३२

इति प्रसादयामासुस्ते सुरास्तमधोक्षजम्।
भूतार्थव्याहृतिः सा हि न स्तुतिः परमेष्ठिनः॥
इदमपि-तत्रैव—३३

तस्मै कुशलसंप्रश्नव्यञ्जितप्रीतये सुराः।
भयमप्रलयोद्वेलदाचख्युर्नैऋतोदधेः ॥
तत्रैव—श्लो० ३४

भगवान् स्वयं प्रोवाच

जाने वो रक्षसाऽऽक्रान्तावनुभावपराक्रमौ।
अङ्गिनां तमसेवोभौ गुणौ प्रथममध्यमौ॥
तत्रैव—श्लो० ३८

(४) 'कालिदासरचनासु दार्शनिकतत्वानां निरूपणस्य प्रयोजनम्, तस्य चौचित्य-विचारः'।

कालिदासरचनास्वरूपरघुवंशघटकीभूतसम्बन्धविवेचनावसरसङ्गतिलब्धं सन्दर्भ-स्वरूपं शक्ति, पद, पदार्थ, सम्बन्धानां विवेचनं ग्रथनं, तात्पर्यविशेषो वा विधीयते। सन्दर्भपदार्थश्च-

'गूढ़ार्थस्य प्रकाशश्च सारोक्तिः श्रेष्ठया गिरा।
नानार्थवत्त्वं वेद्यत्वं सन्दर्भः कथ्यते बुधैः'॥

अत्र गूढार्थस्य प्रकाशस्वरूपरचनात्मकसन्दर्भसहितं विवेचनं विधीयते। तथाहि—अत्र 'शक्ति'श्चेत्यादिवाक्यघटकीभूतानि सन्ति चत्वारि पदानि।

(१) शक्तिः (२) पदम्
(३) पदार्थः (४) सम्बन्धश्चेति

इदानीमत्र शक्तेर्लक्षणं, शक्तेराश्रयश्च किमिति निरूप्यते। तथाहि—कारणनिष्ठो यः कार्योत्पादनयोग्यतावान् कारणत्वरूपो धर्मविशेषः शक्तिपदार्थः। अर्थात् स्वरूपयोग्यतारूपा या कारणता तादृशकारणतारूपो योऽस्ति धर्मविशेषः स एव शक्तिपदार्थः। स चास्ति धर्मविशेषः प्रतिबन्धकाभावादिरूपकारणतास्वरूपः।

यथा वह्नौ चास्ति दाहजनिका शक्तिरिति तादृशधर्मस्वरूपकारणतारूपायाः शक्तेर्दाहरूपकार्यत्वावच्छिन्नं प्रति कारणत्वेनाऽयमस्ति कार्यकारणभावो यत् प्रतिबन्धकाभावस्य कार्यत्वावच्छिन्नं प्रति हेतुत्वेन दाहात्मककार्यं प्रति सूर्यकान्तमण्यभावविशिष्ट चन्द्रकान्तमणेः प्रतिबन्धकत्वेन तदभावस्य कारणत्वं वाच्यम् । इत्थञ्च तादृशकारणतारूपा शक्तिरित्यर्थो लभ्यते ।

मीमांसकास्तावत्तन्न सहन्ते किन्तु विवदन्ते यत् कारणत्वरूपा न शक्तिः किन्तु पदार्थान्तरमेवेति वदन्ति, इति तु विचारान्तरमिति

प्राभाकरास्तु अनुमानेनैवेश्वरवदेव शक्तिं साधयन्ति । तच्चानुमानं यथा—वह्निर्दाहानुकूलाऽद्विष्ठाऽतीन्द्रियधर्मसमवायी दाहरूपकार्यजनकत्वात् आत्मवत् । इत्थञ्च-दाहानुकूलोऽद्विष्ठः, अतीन्द्रियश्च धर्मः शक्तिरूपो धर्मस्तत्समवायित्वं वह्नौ चास्तीति शक्तिः सिद्धयति इति भावः ।

एतेषां नये शक्तिविशिष्टत्वेन कारणता स्वीक्रियते न तु साधारणवह्नित्व, दण्डत्वादिनापीति वदन्ति । इत्थञ्च मीमांसकमते दाहत्वावच्छिन्नं प्रति वह्नेर्न वह्नित्वेन कारणत्वं किन्तु शक्तिविशिष्ट वन्हित्वेन । अतश्च दाहकार्यत्वावच्छिन्नं शक्तिविशिष्ट वह्नेः कारणत्वेन तदवच्छेदकतया शक्तिः सिद्धयति ।

(१) केचन मीमांसका व्रीह्यादिषु प्रोक्षणादिसंस्कारत्वावच्छिन्नजनकतानिरूपितजन्यतावतीमाधेयशक्तिं स्वीकुर्वन्ति । परन्तु सा सर्वथा निराकृता ज्ञेया । यथा—

पादाहतो युवतिभिर्विकसत्यशोकः
शोकं जहाति बकुलो मुखसीधुसिक्तः ।
आलिङ्गितः कुरबको विकसत्यजस्र-
मालोकितस्तिलक उत्कलिको विभाति ॥

(२) तत्र तान्त्रिकाः खलु पीठाधिष्ठातृदेवताविशेष एव शक्तिः ।

(३) एवं पौराणिकाः खलु स्त्री, देवता शक्तिरिति वदन्ति । यथा–वैष्णवी, ब्राह्मी तु गौरी चेत्यादिकं विज्ञेयम् । तथा चोक्तम्—

इच्छा क्रिया तथा ज्ञानं गौरी ब्राह्मी तु वैष्णवी ।
त्रिधा शक्तिः स्थिता यत्र तत्परं ज्योतिरोमिति ॥

वराहपुराणे—

(४) तथैव नीतिशास्त्रवेत्तारो विद्वांसो भूपतेः प्रभावोत्साहमन्त्रजातं सामर्थ्यरूपं शक्तित्रयं स्वीकुर्वन्ति ।

(५) वृत्तिविशेषः शक्तिः, स च अर्थस्मृत्यनुकूलः पदपदार्थयोः सम्बन्धरूपः, पदार्थोपस्थितिजनकीभूतः ।

(६) शाब्दिकाश्च खलु पदपदार्थयोर्वाच्यवाचकभावनियामकं सम्बन्धान्तरमेव शक्तिरिति व्याहरन्ति ।

(७) प्राञ्चस्तु तत्र अविनाभावः शक्तिरिति वदन्ति । अर्थात् पदज्ञानं विना पदार्थोपस्थितेरभावोऽविनाभावशब्दार्थो विज्ञेयः ।

(८) तत्र माध्ववेदान्तिनस्तु 'महायोग' नाम्नीं विचित्रामेव वृत्ति (शक्ति) स्वीकुर्वन्ति ।

(९) न्यायनये च सा शक्तिरस्ति त्रैविध्यमापन्ना । यथा—

(१) एका योगात्मिका शक्तिः,

(२) द्वितीया रूढ़्यात्मिका शक्तिः,

(३) तृतीया योगरूढ्यात्मिका शक्तिः,

(१) 'पाचक' प्रभृतिषु पचतीति यौगिकव्युत्पत्त्या निर्धार्यमाणा योगात्मिका शक्तिः स्वीक्रियते । 'पाचकः' इतिस्थले पच् इत्यस्ति एकः प्रकृतिभूतोऽवयवः, अन्यश्च "ण्वुल" इत्यस्ति प्रत्ययरूपोऽवयवः । उभयोर्मिलित्वा 'पाककर्ता' इत्यर्थो बुध्यते योगात्मिकया शक्त्या ।

(२) समुदायशक्तिरेव रूढ्यात्मिका शक्तिर्गीयते । यथा-घट-पटादिपदेषु या शक्तिः सा समुदायात्मिका 'रूढ़ि'शक्तिरेव । एवं "मण्डप" प्रभृतिपदेष्वपि सैव 'रूढ़ि' शक्तिरस्तीति भावः ।

(३) इयञ्च योगरूढ़्यात्मिका शक्तिः पदशक्तिरित्युच्यते । सा च शक्तिः पदस्यवृत्तिविशेषो निगद्यते । यथा-पङ्कजपदम् पङ्काज्जायते इत्यनयाऽवयवव्युत्पत्त्या पङ्कजनिकर्तृरूपार्थबोधनेन योगात्मकशक्तिमन्निगद्यते । एवं पङ्कजपदात् पद्मत्वावच्छिन्नपद्मरूपमर्थं बोधयितुं पद्मत्वावावच्छिन्ने पङ्कजसमुदायस्य रूढ़िरावश्यकी । इत्थञ्च पङ्कजपदे या योगरूढ़्यात्मिका शक्तिः सा योगरूढ़्यात्मिकापदशक्तिः कथ्यते ।

शक्तेराश्रयं किमिति निरूप्यते

तत्र मीमांसका व्यभिचारात्, आनन्त्याच्च, इतिहेतुद्वयमवलम्ब्य व्यक्तौ शक्तिमनादृत्य जातावेव शक्तिमङ्गीकुर्वन्ति ते मीमांसाशास्त्रपारंगताः प्राभाकराः कुमारिलभट्टादयश्च । इमे मीमांसकमहानुभावा जातौ शक्तिमङ्गीकुर्वाणाः सन्तो "व्यक्तिलाभस्त्वाक्षेपाद् भवती" ति वदन्ति ।

तथा च गोत्वप्रकारकगोविशेष्यकशाब्दबोधत्वावच्छिन्नं प्रति गोपदं गोत्वे शक्तमित्याकारकजातिशक्तिज्ञानस्य हेतुत्वमवधारयन्ति अतः शाब्दबोधे जातेरिव व्यक्तेरपि आक्षेपाद् भानसम्भवेन विषयत्वाऽङ्गीकरणं नितान्तमावश्यकम् । इति गोत्वं स्वाश्रयं विना सर्वथाऽनुपपन्नमिति स्वाश्रयम् आक्षिपति इति । आक्षेपश्चार्थापत्तिरेवेति भट्टानुयायिनो वदन्ति । समानवित्तिवेद्यत्वरूप एव वर्तते आक्षेप इति च प्रभाकरमतानुयायिनो व्यवहरन्ति इति संक्षेपः ।

मीमांसकानामिदमस्ति तात्पर्यम् यद् व्यक्तौ शक्तेः परिकल्प्यमानत्वेऽपि तादृशशाब्दबोधत्वावच्छिन्नं प्रति गोपदं गोत्वावच्छिन्नगोमात्रे शक्तमित्याकारकव्यक्तिशक्तिज्ञानत्वेनैव कारणत्वं निर्वक्तुं शक्यते ।

तथापि अनन्तासु व्यक्तिषु अनन्तशक्तिकल्पनामपेक्ष्य तादृशकल्पनागौरवभयेन च व्यक्तिशक्तिस्वीकारो नैव कदापि कथमपि संभवतीति स्वयमेव विभावयन्तु भवन्तो नैयायिकाः । अत एव व्यक्तिशक्तिज्ञानस्य शाब्दबोधं प्रति कारणत्वं समुपेक्षितमिति व्यक्तिशक्तिज्ञानस्य तादृशशाब्दबोधहेतुत्वकल्पनस्य सर्वथाऽनौचित्यादिति भावः ।

तन्न समीचीनम्—जातिशक्तिस्वीकारकर्तॄणां गुरूणां नये गौर्गोपदशक्येत्याकारकस्य शक्तिज्ञानस्य शाब्दबोधत्वावच्छिन्नं प्रति हेतुत्वं नाऽभ्युपगन्तुं शक्यते। यतस्तथात्वे तादृशशक्तिज्ञानस्य गोत्वप्रकारकशाब्दबोधसमानप्रकारकत्वेऽपि भ्रमत्वाऽङ्गीकार प्रसङ्गात्। तदभाववति तत्प्रकारकत्वस्यैव भ्रमत्वेन तादृशशक्तिज्ञानस्य शक्त्यभाववत्यां व्यक्तौ शक्तिप्रकारकत्वात् इति भ्रमत्वापत्तिः सुस्पष्टैवेति।

नापि च गोत्वं गोपदशक्यमित्याकारकस्य शक्तिज्ञानस्य तथात्वं बोध्यम्। तथात्वे च शक्तिज्ञानस्य समानप्रकारकत्वेन शाब्दधीहेतुताकथनविरोधात्।

किन्तु गोपदं गोत्वशक्तम् इति शक्तिज्ञानं कारणम्। इत्थञ्च गोत्वप्रकारक गोविशेष्यकशाब्दबोधं प्रति गोपदधर्मिकगोत्वशक्तताप्रकारकज्ञानत्वेन हेतुतया तादृशहेतुतायां गोविषयकत्वस्याऽनवच्छेदकतया व्यक्तावशक्यत्वव्यवहारः सूपपद्यते। एवं स्थिते प्रागुक्तशाब्दबोधनिरूपिता या गोत्वशक्तताज्ञानत्वावच्छिन्नकारणता तन्निरूपिताऽवच्छेदकतावच्छेदकत्वमेव शक्यत्वव्यवहारप्रयोजकम्। एवञ्च सति व्यक्तौ तादृशावच्छेदकत्वाऽभावात् तत्राऽशक्यत्वं व्यवह्रियते।

न च विनिगमनाविरहात् गोपदं गोशक्तमित्याकारकशक्तिज्ञानस्यैव शाब्दबोधं प्रति कारणत्वेनाऽऽवश्यकतया गोविषयकत्वस्यापि जनकतावच्छेदकतया गवादिव्यक्तेरपि वाच्यत्वं दुर्वारमिति वाच्यम्।

गोत्वशक्तताज्ञानत्वापेक्षया गोशक्तताज्ञानत्वस्य व्यक्तिघटितत्वेन गुरुतया कारणतानवच्छेदकत्वात्। गोपदं गोत्वशक्तमित्याकारकशक्तिज्ञानस्य शक्तिज्ञानत्वेन कारणतायान्तु निरवच्छिन्नस्य शुद्धगोत्वस्यैव विषयितासम्बन्धेन शक्त्यंशविशेषणत्वेन गोत्वत्वादिनिवेशप्रवेश प्रयुक्तगौरवस्याऽदोषत्वात्।

अपि च 'गौः शक्या' इत्येवंरूपेण यदि शक्तिग्रहो जायते तदा व्यक्तौ शक्तिः सिद्ध्यति। यदि तु 'गोत्वं शक्यम्' इत्येवंविधः शक्तिग्रहो जायते तदा गोत्वप्रकारिका पदार्थोपस्थितिः शाब्दबोधश्च न स्यात्। यतः शक्तिज्ञानपदार्थोपस्थितिशाब्दबोधानाञ्च समानप्रकारकत्वेनैव हेतुहेतुमद्भावः। गोत्वं शक्यमिति शक्तिज्ञानस्य गोत्वप्रकारकत्वाभावेन गोत्वप्रकारकस्मरणानुपपत्तेरिति तु परमार्थः।

कालिदासस्याऽद्वैतसिद्धान्तः

जगद्योनिरयोनिस्त्वं जगदन्तो निरन्तकः।
जगदादिरनादिस्त्वं जगदीशो निरीश्वरः॥

कुमार० सर्ग२-श्लो० ९

अनेन कविकुलश्रीकालिदासविरचितमहाकाव्यकुमारसंभवघटकीभूतेन एकेनैव श्लोकेन सर्वमपि दर्शनरहस्यं स्फुटीकृतं भवति।

अत्र नास्तिकाऽऽस्तिकभेदभावभूषितयोरेव दर्शनयोर्वयं समन्वयं पश्यामः। इतः पूर्वमस्माभिर्नास्तिकाऽऽस्तिकव्यावर्त्तंतावच्छेदकं रूपं अविद्याजन्यं प्रादर्शि, यत् नास्तिकाऽऽस्तिकभेदभावभूषितानि द्वैविध्यसम्पन्नानि खलु दर्शनानि भवन्ति। तत्रापि परमार्थतो व्यावहारिकदृष्ट्या विचार्यमाणे भेद-द्वैत घटितत्वेन द्वादशसंख्याकानि इमानि दर्शनानि

जायन्ते इति नाविदितमस्ति केषामपि विदुषाम् । तथाविधा एव च दार्शनिका भवन्ति, तेषां दृष्टिरपि तथाविधैव विलोक्यते, परन्तु अस्या दृष्टेरविद्याजन्यत्वाद् हेयत्वमुपपादितं प्राचीनाचार्यचरणैः श्रीमच्छङ्कराचार्यपादैः । तथाहि—

'भेददृष्टिरविद्येयं:तां सदा परिवर्जयेत्' । महोपनित् ५।११३ ।
'द्वितीयाद्वै भयं भवति' । बृहदारण्यकोप० १।४।२।
मृत्योः स मृत्युमाप्नोति य इह नानेव पश्यति' ।

तत्रैव ४।४।१९।

'अन्योऽसावन्योऽहमस्मि न स वेद यथा पशुरेव'

तत्रैव १।४।१०।

भेददृष्ट्या द्वैतदृष्ट्या वा किं नश्छिन्नमित्याशङ्कायां जायमानायां स्वयं तन्निरासायाऽऽह—

भेददर्शनमासाद्य मुक्तिं वाञ्छन्ति ये नराः ।
ते महाघोरनरके पतन्त्येव न संशयः ॥

सूतसंहिता

अपि चोक्तं तत्रैव—

द्वैतविज्ञानमासाद्य मुक्तिं वाञ्छन्ति ये नराः ।
ते महाघोरसंसारसर्पदंष्टा न संशयः ॥

तत्रैव सूतसंहिता

एवमन्यदप्युक्तम्—

निर्विकारे निराकारे निर्विशेषे भिदा कुतः ।

अध्यात्मोपनि० २२ ।

एतन्मतानुसारं श्रुत्यनुसारं वा सूक्ष्मातिसूक्ष्मस्य निर्विकारस्य निराकारस्य निर्विशेषस्याऽद्वैतब्रह्मणो व्यतिरिक्तं सर्वमेव मिथ्येति सूचितं भवति । यतो ब्रह्मणोऽतिरिक्तस्य सर्वस्यापि प्रपंचस्य तदन्तर्गतपदार्थमात्रस्यैवाविद्याकल्पितत्वात् स्वाप्निकपदार्थवत्, लोकेऽनुभवगम्यत्वेऽपि व्यवहारक्षमत्वेऽपि चोत्तरक्षणबाधितत्वेन भ्रान्तिरूपतया तस्यासद्रूपत्वं मिथ्यात्वं च सिद्ध्यतीत्यत्र नास्ति लेशतोऽपि संशयावकाशो, विवादावसरो वेति पारमार्थिकभावनाभावितान्तः करणाः प्राचीनाचार्यचरणाः समुद्गिरन्ति, प्रमाणयन्ति च

अनुभूतोऽप्ययं लोको व्यवहारक्षमोऽपि सन् ।
असद्रूपो यथा स्वप्न उत्तरक्षणबाधितः ॥

स्वप्ने जागरितं नास्ति जागरे स्वप्नता न हि ।
द्वयमेव लये नास्ति लयोऽपि ह्यनयोर्न च ॥

त्रयमेव भवेन्मिथ्या गुणत्रयविनिर्मितम् ।
अस्य द्रष्टा गुणातीतो नित्यो ह्येष चिदात्मकः ॥

योगशिखोपनि० ४।१०-१२ ।

अपि च—

मयि जीवत्वमीशत्वं कल्पितं वस्तुतो न हि ।

सरस्वतीरहयोप० ३३ ।

मय्यखण्डसुखाम्भोधौ बहुधा विश्ववीचयः ।
उत्पद्यन्ते विलीयन्ते मायामारुतविभ्रमात् ॥

कुण्डकोपनि० १४

जगद्योनिरयोनिस्त्वम् इति महाकविकालिदासोक्त्याऽस्मिन्नेव महाकाव्ये मायायाः प्रभावोऽपि सुस्पष्टं प्रतीयते। तत्र नास्तिकाः खलु बौद्ध, चार्वाकप्रभृतयो दार्शनिका ईश्वरो नास्तीति वदन्ति ।

उदयनाचार्यं, शङ्कराचार्यप्रभृतयश्च दार्शनिका ईश्वरस्याऽस्तित्वं सर्वथाऽक्षुण्णमिति स्वीकुर्वन्ति, अत एवैतेषां नये ईश्वरवाद एव प्रसिद्धि प्राप्तो वर्तते। एतेषां नास्तिकानां नये वेदस्य प्रामाण्यं नाऽभ्युपगम्यते, अत एव वेदप्रामाण्यानभ्युपगन्तृत्वं नास्तिकत्वमिति नास्तिकपरिभाषालक्षणं पारिभाषिकलक्षणं वा ब्रुवन्तो नास्तिका एव निरीश्वरवादिनः कथ्यन्ते। तदेवोक्तम्—

नेश्वरो जन्मिनां हेतुरुत्पत्तिविकलत्वतः ।
गगनाम्भोजवत् सर्वमन्यथा युगपद्भवेत् ॥

न्या० सि० मु० विलासिनीटीका,
पं० ज्वालाप्रसादगौड़ कृत भूमिका, पृ० ३७

एतेन नास्तिकानां निरीश्वरवाद एव पुष्टीकृतः ।

परन्तु आचार्यपादैरीश्वरसाधकानि नवानुमानानि दर्शितानि। अनुमाननवकं च पुनः—

कार्यायोजनधृत्यादेः पदात् प्रत्ययतः श्रुतेः ।
वाक्यात् संख्याविशेषाच्च साध्यो विश्वविदव्ययः ॥

न्यायकु० स्त० ५, कारिका १

इत्यादिना विज्ञेयम् ।

तथा च पूर्वतने 'जगद्योनिरयोनिस्त्वम्' इत्यादिश्लोकेऽयोनिस्त्वम् निरन्तकस्त्वम्, आदिस्त्वम्, निरीश्वरस्त्वम् इति तुरीयपद्यांशकथनं नास्तिकानां नयमवलम्ब्यैव शोभते। यतस्ते नास्तिका ईश्वरानङ्गीकारेण ईश्वरस्य जगत्कारणत्वं खण्डयन्ति, ब्रुवन्ति चाऽकस्मादेव भवतीदं सर्वमपि चराचरात्मकं जगत्। तथा चोक्तम्—

'अनिमित्ततो भावोत्पत्तिः कण्टकतैक्ष्ण्यादिदर्शनात्'

वात्स्यायनभाष्यम्

अर्थाद् यथा कण्टकेषु तैक्ष्ण्यं स्वाभाविकं दृश्यते, एवं पाषाणादिषु काठिन्यं स्वभावतो जायमानं विलोक्यते, तथा अर्थत एवेश्वरस्य जगदयोनित्वमर्थात् जगतोऽकारणत्वं सिद्धयति। अत एव तेषामियमुक्तिरपि साधु सङ्गच्छते यत्—

'नेश्वरो जन्मिनां हेतुः' इत्यादिः ।

जगतोऽकस्मादेव जायमानत्वात् अर्थात् स्वभावतएव समुत्पद्यमानत्वान्नास्ति कस्यापि ईश्वरपदाभिधेयतां गतस्याऽवश्यकता यश्चेश्वरः सन् जगतो निर्माणं विदध्यादिति ।

नास्तिकस्य तादृशतात्पर्याभिप्रायेणैव महाकविकालिदासः जगदयोनिस्त्वम् निरन्तकस्त्वम् अनादिस्त्वम् निरीश्वरस्त्वम् इति तुरीयं पद्यांशमुल्लिखति ।

यश्चोत्पादको भवति स एव खलु तद्विपरीतक्रमेण विनाशकारणमपि भवतीति नियमात्तु ईश्वरपदवाच्यतां गते जगन्नियन्तरि भगवति भवे यदा जगदादिरूपं जगदुत्पादकत्वं नास्ति तदा जगद्विनाशकारणत्वमपि न तत्र स्थास्यति प्रागुक्तनियमादेव ।

अपि च कारणत्वं कार्याऽव्यहितप्राक्क्षाणावच्छेदेन वर्तमानत्वम्, तथा चेश्वरस्याऽस्तित्वाभावे जगदन्तकर्तृत्वमपि तत्रेश्वरे कथं सेत्स्यति, यतस्तावज्जगद्विनाशात्मककार्याऽव्यवहितप्राक्क्षणावच्छेदेन तस्याऽवर्तमानत्वात्, कार्यनियतपूर्ववृत्तिकारणमिति अन्नम्भट्टोक्तेस्तल्लक्षणाच्च ।

अत एव तत्रेश्वरे जगदुत्पादनकर्तृत्वरूपं जगदादित्वमपि नास्तीत्यतोऽर्थत एव सुतरां तत्राऽनादित्वं सिद्ध्यति। यथा यस्मिन् भूतले घटो न वर्तते तत्राऽर्थादेव घटाभावः सिद्धयति तद्वदेव हि प्रकृतेऽपि बोध्यम् ।

ईश्वरस्याऽस्तित्वाभावप्रयुक्तैव तत्र निरीश्वरता वर्तते, यतः अन्तर्बहिश्च सर्वमपि पदार्थजातं व्याप्य नारायणस्तदैव स्थितिसम्पन्नो भवितुं प्रभवति यदा तस्य किमपि सत्यम् अस्तित्वं भवेत् । ईश्वरास्तित्वाभावे कुतो वा कथं वा व्याप्यव्यापकभावोऽपि स्यादित्यतो नास्तिकनयेन स्वामित्वाऽभावरूपो निरीश्वरत्वं तत्राऽक्षतमेवाऽस्ति ।

आस्तिकदृष्टिकोणमाह

जगद्योनिरयोनिस्त्वम् इत्यादिश्लोके आस्तिकानामयमस्ति दृष्टिकोणः यद् ईश्वर एव सर्वं कार्यजातं प्राणिनामदृष्टानुसारं सम्पादयति, अर्थात्तेभ्यः प्राणिभ्यः कर्मानुसारं फलं प्रयच्छति । कर्मवादपक्षमाश्रित्यैव जगतोऽस्तित्वं निर्धार्यते, ज्ञानपक्षे च तदस्तित्वं समाप्यते । अयमेव च कर्मवादपक्षो मायापक्षोऽविद्यापक्षो वेति निगद्यते, अस्य विचारोऽग्रे करिष्यते ।

अस्य च कर्ममूलकस्य जगतः कर्मजन्याऽदृष्टाऽधिष्ठातृतया स एव योनिः =कारणम् स एव च आदि=उत्पादयिता चास्ति जगतः, अर्थात् ईश्वर एव परमाण्वादिसंयोगक्रमेण जगदुत्पादयतीति स जगद्योनिशब्देन व्यपदिश्यते । स एव च जगदन्तको जगदीशोऽपि च । अर्थात् अयमेव जगन्नियन्ता परमेश्वर एव प्राणिनां कर्मानुसारं जगतोऽन्तं विधत्ते । अयमेव च खण्डप्रलयं महाप्रलयं वा कुरुते । यथा इदानीमेव आन्ध्रप्रदेशे खण्डप्रलयो जातस्तस्य कारणं केवलमीश्वरस्तदतिरिक्तो वेति नहि कोऽपि कारणीभूतो भवितुमर्हतीति मया शपथमालम्ब्य प्रोच्यते। मया कर्णाकर्णिकया विश्वस्तसूत्रद्वारैव श्रुतं यत्तत्रप्रदेशवासिभिरानन्दकन्दस्य कौशल्यानन्दवर्धनस्य दशरथनन्दनस्य अयोध्याचन्द्रस्य भगवतो रामचन्द्रस्य मर्यादापुरुषोत्तमस्य राघवेन्द्रस्येश्वरत्वमनङ्गीकृत्य रावणस्य तदङ्गीकृतम् ।

नैतावन्मात्रमेव कथनं श्रवणं वा पर्याप्तमस्ति, भगवतो रामचन्द्रस्य प्रतिमां निर्माय पादत्राणमालया सा तिरस्कृताऽपमानिता च । एवं स्थिते कस्यापि पूज्यतावच्छेदककुक्षि-निक्षिप्तस्य पूज्यस्यापमानसंविधाने स पूज्यः किमप्रसन्नो न भविष्यति ? अप्रसन्नतारूप-कारणवशात् सोऽपि हानिं विधत्तेऽपमानकारकस्य । किं पुनः जगदीश्वरस्य जगन्नियन्तुः परमेश्वरस्य विषये वयं ब्रूमः । स तु सर्वशक्तिमान् सर्वेश्वरः सर्वं विधातुं शक्नोति, खंडप्रलयस्तु तस्य कृते नास्ति किमपि दुष्करं कार्यम् । स तु महाप्रलयमपि विधातुं सर्वथा समर्थः । महाप्रलयन्तु स तस्मिन्नेव काले विधत्ते यस्मिन् काले सर्वे एव मानवाः एवं भूताऽऽन्ध्रप्रदेशीयनास्तिकतासन्तापसन्तापिता भवन्ति, तस्मिन्काले अयमेव परब्रह्म-परमेश्वरः कालरूपतां धत्ते ।

यथोक्तम्—

कालोऽस्मि लोकक्षयकृत्प्रवृद्धो-
लोकान् समाहर्तुमिह प्रवृत्तः । गीताः ११।३२ ॥

अपि च—

यदा संहरते चाऽयम्-
कूर्मोऽङ्गानीव सर्वशः । गीता २।५८

भूमित्वावच्छिन्नाया यात्रत्या भूमेर्भारभूतानां प्राणिनां सर्वेषां क्षयं कर्तुमहं कालोऽस्मि, अर्थाद् एवंविधानां सकलानां प्राणिनां संहारहेतुरहम् । अत इहाऽत्र समवेतान् लोकान् सर्वानेव संहर्तुमहं प्रवृत्तोऽस्मि । यद्यपि प्रतिपक्षसेनास्ववस्थिताः सज्जीभूय वर्तमानास्तव दुर्जयाः सर्वथा इमे भीष्मद्रोणकर्णप्रभृतयः सर्वेऽपि महारथिनो युद्धेऽस्मिन् तव प्रवृत्त्यभावेऽपि मम पुरस्तान्नैव स्थातुं प्रभविष्यन्ति, यतो मयि महा-मृत्युस्वरूपे समुपस्थिते इमे के नु जीविष्यन्ति ? नहि कदापि जीविष्यन्ति, त्वन्तु केवलं निमित्तमात्रं भूत्वैवात्र सन्तिष्ठताम्

एवमन्यान्यविषयाणां शब्दस्वरूपाणां सर्वेषां काव्य-महाकाव्यान्तर्गतानां शक्तेर्वि-निर्णयो दार्शनिकदृष्टिकोणमाश्रित्यैव भवति । यथा–

'धेनुमृषेर्मुमोर्च' रघुवंशमहाका०, २ स०

इत्यत्र धेनुशब्दस्यापि विचारचर्चा दर्शनेष्वेव सम्यक्तया व्यधायि । तत्र च यथा सामान्यधर्मावच्छिन्नवाचकानां शब्दानां विशेषधर्मावच्छिन्ने लक्षणैव स्वीक्रियते तथैव विशेषधर्मावच्छिन्नवाचकानामपि शब्दानां सामान्यधर्मावच्छिन्ने लक्षणेव । तथा च यत्र धानकर्मगोत्वादिविशिष्टवाचकमस्ति 'धेनु' प्रभृतिपदं गोत्वावच्छिन्नतात्पर्येण प्रयुज्यते तत्र लक्षणाश्रयणमन्तरा नास्ति कापि गतिः ।

'धीयते = पीयते, वत्सेनेति धेनुः' इति यौगिकव्युत्पत्त्या धेनुपदं धानकर्मगोत्व-विशिष्टस्य अर्थात् दुग्धप्रदान तृंगोर्वाचकमस्तीति स्वीक्रियते, यत्र धेनुपदं केवलगोत्वा-वच्छिन्नतात्पर्येण प्रयुक्त प्रयुज्यते वा तत्र धेनुपदस्य गोत्वावच्छिन्ने लक्षणैवेति भावः । एवमन्यान्यशब्दानामपि शक्तेर्विनिर्णयः लक्षणाया वा बिनिर्णयः शक्तिवादेऽकारि गदा-धरेण, येषामग्रे प्रदर्शनं भविष्यति ।

वेदान्तमतेन तुलनात्मकं व्याख्यान्तरमेकवाक्यत्वञ्च

सगुण-निर्गुणभेदश्चौपाधिकभेदमाश्रित्यैव ब्रह्मणः सम्पत्स्यते, सम्पादयितुं वा शक्यते ।

"जगद्योनिरयोनिस्त्वम्" इत्यादिलोकस्य व्याख्यानान्तरमपि कर्तुं शक्यते। तत्र भगवच्छङ्कराचार्यमतावलम्बिनोऽद्वैतवेदान्तिन इत्थं समुद्गिरन्ति यत् सगुणं ब्रह्मैव जगद्योनिः, जगदन्तकः, जगदादिः, जगदीशश्चास्ति। अयं च द्वैतप्रतिपादको भेदः खलु मायामाश्रित्य प्रवर्तते। माया, अज्ञानम्, अविद्या, चेति सन्ति अनर्थान्तरभूताः। तत्राऽज्ञानस्य मायाऽविद्यापरपर्यायभूतस्य चास्तीदं लक्षणं यत्—

"सदसद्भ्यामनिर्वचनीयं त्रिगुणात्मकं ज्ञानविरोधि भावरूपं यत्किंचित्" इति वदन्ति। "अहमज्ञः" इत्याद्यनुभवात्। "देवात्मशक्तिं स्वगुणैर्निगूढाम्" इत्यादिस्मृतेश्च"

वेदान्तसारग्रन्थे–अविद्याप्रकरणे–पृष्ठ १८

एतेन जगत्कारणीभूतं मायाऽपरपर्यायभूतमज्ञानं सिद्धयति, तदेवाऽज्ञानम् आहोस्वित सैव मायाऽस्ति ब्रह्मण उपाधिः। एतादृशोपाध्यवच्छिन्नं चैतन्यं ब्रह्म, ईश्वर इति च व्यपदिश्यते तथाचोक्तम्—

कार्योपाधिरयं जीवः कारणोपाधिरीश्वरः।
कार्यकारणतां हित्वा पूर्णबोधोऽवशिष्यते॥

—शुकरहस्यो प० ३।१२।

निर्गुण च ब्रह्मं जगद्योनिः, निरन्तकम्, जगदनादिः, निःशरीरं चोपाध्यनवच्छिन्नं चैतन्यम् ।

सगुणं ब्रह्मैव खलु जगत् उत्पत्ति, स्थिति, लय, कारणं भवति। इदमेव चास्य ब्रह्मणस्तटस्थं लक्षणं बोध्यम्, अर्थात् जगदुत्पत्तिकारणत्वम्, जगत्स्थितिहेतुत्वम्, एवं जगल्लयकारणत्वं च ।

इदं च प्रत्येकमेव खलु सगुणस्य ब्रह्मणो लक्षणं विज्ञेयं न तु चक्र-चीवरादिन्यायेन शक्तिव्युत्पत्त्यभ्यासन्यायेन वा समुदितकारणत्वं लक्षणम्, अपि तु तृणारणिमणिन्यायेन प्रत्येकस्यैव। यथा दाहत्वावच्छिन्नं प्रति कारणत्वम्, तथैव, प्रकृतेऽपीदृश्यमेव गतिश्चिन्तनीया, अर्थात् सगुणब्रह्मणोऽपि प्रत्येकस्यैव कारणत्वघटितस्य लक्षणत्वं बोध्यम्।

तत्रापि च जगदुत्पत्तिकारणत्वमित्यनेन सगुणस्य ब्रह्मणो जगद्योनित्वं, जगदादित्वं च प्रतिपादितं भवति। जगल्लयकारणत्यनेन च जगदन्तकत्वं तस्य ब्रह्मणः संसूच्यते। जगत्स्थितिकारणत्वमित्यनेन च जगदीशत्वं जगत्स्वामित्वं जगन्नियन्तृत्वं परिलक्षितं भवति ।

सगुणमेव च ब्रह्म ईश्वरोऽपि कथ्यते वेदान्ततत्त्ववेत्तृभिर्वेदान्तविद्विद्भिः। सर्व एवास्तिकाः खलु ईश्वरस्य जगत्स्वामित्वं जगन्नियन्तृत्वं करुणावरुणालयत्वं प्रतिपादयन्ति। स चाऽयमीश्वरो दया-दाक्षिण्य-अगाधकारुण्यादिगुणोपेतः सन्नेव जगतां निर्माणं विधत्ते ।

सगुणं निर्गुणस्वरूपं ब्रह्म

त्रिपाद्विभूतिमहानारायणोप० १।१।

इति श्रुतिसिद्धान्तानुसारं सगुणं सविशेषः, एवं निर्गुणं निर्विशेषं सर्वसामर्थ्य सम्पन्नं निष्क्रियं ब्रह्मैवाऽस्ति ।

सगुणस्य ब्रह्मणो विषये उपासकस्य कृते इन्द्रियाणि साधनानि भवन्ति । इन्द्रियाणि च सन्ति पुष्पपत्रस्वरूपाणि यानि च भगवतश्चरणारविन्दयोः समर्पितानि भवन्तीति । तत्र ज्ञानचक्षुषा भगवतः स्वरूपदर्शनम्, श्रोत्राभ्यां भगवतः कथाश्रवणम्, जिह्वया भगवन्नामोच्चारणम्, पाणिभ्यां पूजादिकार्यं, पादाभ्यां तीर्थाटनं विधेयम् । एवं क्रमेण खलु समस्तेन्द्रियाणां प्रभुसेवार्पणसंविधानमेव चास्ति परमं प्रयोजनम् । इयं च भवति साकारस्य सगुणस्य ब्रह्मण उपासना ।

सगुणस्य ब्रह्मण उपासनैव मूर्तिपूजा कथ्यते. अर्थात् भगवतः परमेश्वरस्य मूर्तिं विधाय तस्याः पूजनं सम्पाद्यते तत् पूजनमपि साकारोपासनाशब्देन व्यापदिश्यते । इयं च मूर्तिपूजा स्वीयशक्त्यनुरूपं स्वीयेष्टदेवतानुक्रमेण नानाविधानां देवतानामेव विधीयते । एवं मातुः, पितुः, पूज्यजनस्य, साधोः, महात्मनः, ब्राह्मणस्य, रोगिणस्तथा वृद्धप्रभृतिमूर्तिमतां प्राणिनां पूजा सेवाऽपि साकारस्य सगुणस्य ब्रह्मण एव पूजा कथ्यते । इत्थं च सर्वत्रैव महाकाव्येषु दार्शनिकदृष्टिकोणो यत्र तत्र समुपलभ्यते ।

अन्योपि दार्शनिकदृष्टिकोणः समुद्भाव्यते

कविकुलशिरोमणिमहाकविकालिदासः स्वरचिते एवाऽस्मिन् महाकाव्ये कुमारसम्भवेऽन्यमपि दार्शनिकं दृष्टिकोणं समुद्भावयति । तथाहि —

आत्मानमात्मना वेत्सि सृजस्यात्मानमात्मना ।
आत्मना कृतिना च त्वमात्मन्येव प्रलीयसे ॥

—कुमारसंभवः सर्गः २, श्लो० १०

अर्थात् त्वम् आत्मानं = स्वस्वरूपम्, आत्मना = स्वयम् । वेत्सि । अथ च, आत्मानम् स्वयम् । आत्मना = स्वयमेव । सृजसि = जगद्रूपेण प्रकटयसि । एवं कृतिना = कृतकृत्येन । आत्मना च = स्वस्वरूपेण च । आत्मनि = स्व-स्वरूपे एव । प्रलीयसे = तिरोभवसि ।

अयमाशयः—स्वस्वरूपं स्वयं यदा त्वं वेत्सि, तदा वृत्यन्तरपरिणामं परित्यज्य ध्येयात्मनैव निर्वातस्थप्रदीपवन्निष्क्रियं तिष्ठसि । तस्मिन् काले चित्तपरिपाकविशेषवशात् मायासमुद्रेकात् स्वयमेव जगद्रूपेण प्रकटयसि । यथा रज्जुः स्वस्वरूपमपरित्यज्य सर्पाकारेण भासते, यथा वा भ्रमविषयीभूताधिष्ठानस्वरूपा शुक्तिः स्वस्वरूपापरित्यागेन रजतरूपेण प्रतीयते । तथैव तत्र नित्ये निर्विशेषेऽसङ्गे ब्रह्मणि परिणामस्य कथमप्यदर्शनात् न खलु ब्रह्मणो जगदस्ति परिणामः, किन्तु विवर्त एवेति तदा कर्मबन्धनं सर्वथा समाप्तिं गच्छति । तथा चोक्तम्—

स्वस्मिन्नध्यतरूपस्य प्रपंचस्य तु साक्षिणम् ।
आलानमात्सना पश्यन् कथं बध्येत कर्मणा ॥

—सूतसंहिता

अपि च—

घटनाम्ना यथा पृथ्वी पटनाम्ना हि तन्तवः ।
जगन्नाम्ना चिदाभाति सर्वं ब्रह्मैव केवलम् ॥
—योगशिखोपनि० ४।१८

वस्तुनः स्वरूपापरित्यागेन वस्त्वन्तरमिथ्याप्रतीतिर्विवर्तः यथा रज्जावहेः, शुक्तौ रजतस्य वा प्रतीतिर्जायते ।—वेदान्तसारस्य विद्वन्मनोरंजनी ।

ब्रह्मैवेदं विश्वमिदं वरिष्ठम्—
मुण्डकोप० २।२२१ ।

एवमन्यदप्युक्तम्—

जगद्रूपतयाऽप्येतद् ब्रह्मैव प्रतिभासते ।
आत्मोप० २-

तथा—

जगज्जालपदार्थात्मा सर्वं एवाहमक्षयः ।
महोपनि० ६।५७।

विपरीतानान्तु विपरीतेत्याह—

यथा रज्जुं परित्यज्य सर्पं गृह्णाति वै भ्रमात् ।
तद्वत् सत्यमविज्ञाय जगत् पश्यति मूढ़धीः ॥
रज्जुखण्डे परिज्ञाते सर्परूपं न तिष्ठति ।
अधिष्ठाने तथा ज्ञाते प्रपंचे शून्यतां गते ॥
नारायण बिन्दूपनि० ४०।२६-२७

अपि च—

संकल्पनाहृते नेह किंचिदेवाऽस्ति कुत्रचित् ।
संकल्पजाते गलिते स्वरूपमवशिष्यते ॥
महोपनि० ४।५३ ।

इत्थं च स्वाऽविद्यया जन्म-मरणादिप्रवाहे पतित्वाऽनन्तरमाध्यात्मिक, आधिभौतिक, आधिदैविकतापत्रयाग्निना संतप्यमानस्याऽऽत्मनः स्वस्याऽऽत्मा स्वयमेव मित्रस्थानीयः संसारदुःखसागरतस्तारकः । अन्यच्चापि—

वाचं यच्छ मनो यच्छ यच्छ प्राणेन्द्रियाणि च ।
आत्मानमात्मना यच्छ न स भूयः कल्पसेऽध्वने ॥
शङ्करानन्दीटीका, अ० ६, श्लो० ५

एवं क्रमेण सर्वत्रैव महाकाव्येषु दार्शनिकदृष्टिकोणः सर्वथा ओतप्रोतोऽस्ति ।

मायाविषये किंचित्

अनादिभूतयाऽविद्यापरपर्यायस्वरूपया रजस्तमोऽनभिभूतशुद्धसत्वप्रधानया माययाऽनात्मभूतेऽस्मिन् चराचरात्मके जगति आत्मत्वभ्रमेण मोहं गताः संसारदावाऽनलेन सन्तप्यमानाः प्राणिन इतस्ततो भ्रमन्तोऽहमहमिकया स्वोन्नतिनौकामारुरुक्षव एव दृष्टि-

गोचरतां प्रयान्तीति सर्वे विदाङ्कुर्वन्ति । निष्कामभावनाभावितान्तः करणा हि साधका यतयः खलु ईश्वरार्पणबुद्धया बहुजन्मसु स्वयं स्वानुष्ठितशास्त्रोचितपुण्यजनकीभूतकर्म-विशेषैः शुद्धात्मानः सन्तो महात्मनो विवेकवैराग्याभ्यां सर्वमपि संन्यस्य ब्रह्मविद्गुरोः समीपे श्रद्धया तीव्रमोक्षविषयिण्या इच्छया निराकारे निर्विकारे निष्ठावन्तो भवन्तः श्रवणं, मननं च विधाय निर्गुणत्व-निर्विशेषत्व अदृश्यत्वादिलक्षणकं सच्चिदानन्दस्वरूपं चिदेक-रसं परंब्रह्म विषयीकृत्य नित्यनिरन्तरनिर्विकल्पकसमाधिनिष्ठया क्रियान्तरावकाश-रहितया तदेव प्रपद्यते, विपरीतप्रत्ययराहित्येन सर्वदा स्वात्मनाऽनुसंदधते, त एव च यतयो गुर्वात्मेश्वरप्रसादातिशयात् सम्यगुत्पन्नां प्रतिबद्धपरावरैकत्वविज्ञानेनैतैतामावरण-विक्षेपात्मिकां सर्वानर्थकारणीभूतां सत्त्वरजस्तमोगुणात्मिकां मायां तत्कार्यं च जगदात्मकं नितान्तं सन्तरन्ति । सर्वमिदमहं च ब्रह्मैवेत्यप्रतिबद्धब्रह्मैकत्वज्ञानेन सर्वमपि द्वैतजातं भेददर्शनं च विध्वंसयन्ति । तथा चाभेदकथनं सर्वथा साधु संगच्छते—

'अहो नु चित्रमविद्यमाना याऽविद्या तया विश्वंऽखिलीकृतम्—

महोपनिषत्-४।१३३ ।

"भेददृष्टिरविद्येयम्" तत्रैव-५।११३ ।

अहो महदाश्चर्यमेतद् यद् यस्या अविद्याया नास्ति कापि सत्ता सा सती माया स्वसंकल्पारूढ़ऽविद्योपासकान् भेद, द्वैतदर्शिनश्च सर्वमपि च चराचरात्मकं जगत् मोह-गर्ते निपात्य शोक-मोहादिभिः स्वसैनिकैराक्रमणशीला सती विराजते । उक्तं च—

उलूकस्य यथा भानुरन्धकारः प्रतीयते ।
स्वप्रकाशे परानन्दे तमो मूढस्य जायते ॥

आत्मप्रबोधोपनिषत् २५

यथैव व्योम्नि नीलत्वं यथा नीरं मरुस्थले ।
पुरुषत्वं यथा स्थाणौ तद्वद्विश्वं चिदात्मनि ॥

योगशिखोपनि० ३।१५।

अपि च तत्रैव—

यद्वन्मृदि धटभ्रान्तिः शुक्तौ हि रजतस्थितिः ।
तद्वद् ब्रह्मणि जीवत्वं वीक्ष्यमाणे विनश्यति ॥

तत्रैव, ३।१३

यथैव शून्यो वेतालो गन्धर्वाणां पुरं यथा ।
यथाकाशे द्विचन्द्रत्वं तद्वत्सत्ये जगत्स्थितिः ॥ १६ ॥
घटनाम्ना यथा पृथ्वी पटनाम्ना हि तन्तवः ।
जगन्नाम्ना चिदाभाति सर्वं ब्रह्मैव केवलम् ॥

तत्रैव, योगशिखोप० ४।१७ ।

इमे सर्वेऽपि प्रत्यया अज्ञानमूलकत्वेन प्रत्ययाभासाः सन्तो भ्रान्तिमन्तो भवन्ति, भ्रान्तिरूपा वा भवन्ति, सकलचराचरजगत्प्रकाशकरो भगवान् भास्करोऽप्युलूकस्य यथाऽन्धकारः प्रतीयते, तथैव स्वप्रकाशे परानन्दे परब्रह्मणि मूढस्य तमस्त्वं प्रतीयमानं

भवति। एवमाकाशे यथा नीलत्वं, मरुस्थले वा जलम्, एवं स्थाणौ यथा पुरुषत्वं, प्रतीतिविषयीभूतं भवति, तथैव चिदात्मनि परानन्दे स्वप्रकाशे परब्रह्मणि इदं विश्वं प्रतीयमानं भवति।

अन्यदपि च—

चिद्रूपत्वान्न मे जाड्यं सत्यत्वान्नानृतं मम।
आनन्दत्वान्न मे दुःखमज्ञानाद् भाति सत्यवत्॥

आत्मप्रबोधोपनि० ३०

प्रागुक्ता जाड्यादिधर्मा ब्रह्मणि कथन्न स्वीक्रियन्ते इत्याशङ्कायामाह मे जाड्यं नास्ति, यतः सच्चिदानन्दस्वरूपोऽहम्, अतश्चिद्रूपत्वाज्जडत्वाऽत्यन्ताभावः सिद्ध्यति, आनन्दरूपत्वाच्च मयि दुःखात्यन्ताभावः सिद्ध्यति। सोऽपि दुःखत्रयाऽत्यन्ताभावः, आध्यात्मिक-आधिदैविक-आधिभौतिकतापत्रयाऽत्यन्ताभावस्वरूपः।

एतेषां जाड्य, मिथ्यात्वादिधर्माणां मयि प्रतिभासमानतायां केवलमज्ञानमेवाऽस्ति कारणं, नान्यत् किमपि। आनन्दपूर्णस्य परब्रह्मपरमेश्वरस्य कथं स्याद् दुःखानुभूतिः—

प्राणाश्चलन्तु तद्धर्मैः कामैर्वा हन्यतां मनः।
आनन्दबुद्धिपूर्णस्य मम दुःखं कथं भवेत्॥

तत्रैव २

अपि चेदमप्यस्ति—

स्वपूर्णात्मातिरेकेण जगज्जीवेश्वरादयः।
न सन्ति नास्ति माया च तेभ्यश्चाहं विलक्षणः॥

—वराहोपनि० २।११॥

सर्वाधिष्ठानभूते पूर्णात्मनि मयि मदतिरिक्तस्य सर्वस्याप्यध्यस्तत्वात् जगज्जीवेश्वरादीनामपि तथाविधत्वादेव तेषां नास्ति स्वातन्त्र्येण कापि सत्ता, मायापि नास्ति, अर्थात् मायाया अपि स्वातन्त्र्येण नास्ति किमपि सात्वम् अस्तित्वमिति। अस्मिन् चराचरात्मके जगति ये केचन सन्ति सत्त्वगुणप्रधानाः सात्विकाः खलु ऋषयो ब्राह्मणा देवाश्च एवं ये खलु सन्ति रजोगुणप्रधाना राजसा भावभूताः पदार्थाः क्षत्रियाः गन्धर्वाः यक्षाः, यथा ये च तमोगुणप्रधानास्तामसा राक्षसाः क्रव्यादाः शूद्रास्ते जायन्ते जाता जनिष्यमाणाश्च सन्तो दृष्टिगोचरतां गच्छन्ति। एतान् सर्वानपि प्राणिविशेषान् तत्तद्गुणोपाधिकाज्जगद्बीजान्मत्त एव जायमानान् तान् विजानीहि, नत्वन्यस्मात् कस्माच्चिदपीति। यतस्तावन्मत्तः सच्चिदानन्दलक्षणात् सर्वेश्वरभूतात् परमेश्वरादन्यत् किमपि कारणान्तरमेव न विद्यते, यच्च प्रधानशब्दाभिधेयं सांख्यमतसिद्धम्, यच्च नैयायिक वैशेषिकनयपरिगृहीतं परमाणुलक्षणलक्षितं चास्ति कारणान्तरं तस्य किमपि नास्ति प्रामाण्यं यतस्तेषां कारणताया विवादग्रस्तत्वात् श्रौतप्रमाणागम्यत्वाच्च।

यदि च "यतो वा इमानि भूतानि जायन्ते" इत्यादिश्रुतीनां नात्र प्रामाण्यं स्वीकरणीयम्, "ईक्षते नाशब्दम्" इत्याद्यधिकरणजातेन जगत्कारणत्वं कस्मिश्चिच्चैतन्यधर्मावच्छिन्ने जगदाधारभूते एव धर्मिणि स्वीकर्तव्यमितिप्रतिपादनेन श्रुत्यर्थविषयतया

प्रकृत्यादिकारणानां ब्रह्मातिरिक्तानां मिथ्यात्वेनाऽऽभासमानानां जगत्कारणत्वस्य स्वयमेव निराकृतत्वात् । 'यः सर्वज्ञ स सर्ववित्' 'यस्य ज्ञानमयं तपः' 'एष सर्वेश्वरः' एष सर्वज्ञ एषोऽन्तर्याम्येष योनिः सर्वस्य 'इत्यादिश्रुतीनां प्रामाण्यात् सच्चिदानन्दस्वरूपस्य पर-ब्रह्मपरमेश्वरस्यैव चेतनत्वम्, सर्वज्ञत्वम् सकलचराचरजगत्कारणत्वं च सिद्धयति न तु तदतिरिक्तानां जडभूतानां प्रकृत्यादीनामिति ।

अपि च 'कस्मिन् सर्वे सम्प्रतिष्ठिता भवन्ति' इत्युपक्रम्य श्रुत्या रसातलादि ब्रह्मान्तान् सर्वलोकान् सम्बोध्य सर्वे लोका आत्मनि ब्रह्मणि मणयः इवौताः प्रोताश्च इत्यनेन श्रुतिस्वरूपेण प्रबलप्रमाणेन सर्वाधारभूते सर्वात्मके स्वप्रकाशचिदात्मके ब्रह्मणि एव ओतत्व-प्रोतत्वकथनेन लोकानां प्रकृत्यादिषु आश्रयतां मिथ्याकर्तुम् अहमेवास्मि सर्वाधारभूतः । जगत्कारणीभूते सर्वाधिष्ठानभूते सच्चिदानन्देतिस्वरूपलक्षणलक्षिते मय्येव ब्रह्मणि चराचरात्मकं अव्याकृतादिस्थूलान्तं सकलं जगत् ओतं प्रोतं समनुगतं चास्तीति तन्तुषु पटवत् सूत्रे मणिगणवत् मदीयां सत्तामेवाश्रित्य सन्तिष्ठते नहि खलु मत्तः पृथग् विद्यते । ननु पटमणिगणदृष्टान्तेषु मणेराधारभूतस्य खलु अस्य सूत्रस्य, एवं सूत्रे ओतप्रोतसौवर्णादिमणीनां च प्रतिभासमानो भेदो यथा सर्वानुभवसिद्धः तथैव सर्वाधारभूते सर्वात्मके ब्रह्मणि अपि अव्यक्तस्य ओत-प्रोतस्य जगत्, एवं जगत् आधारभूतस्य च ब्रह्मणोऽपि भेदो न युक्ति सह इति चेन्न । शास्त्रदृष्ट्या सूक्ष्मदृष्ट्या युक्त्या विचार्यमाणे भेदद्वैतसाधकसाधनानाभासत्त्वविनिर्णयात् स्थूलबुद्धीनां सांसारिकवासनावासितान्तःकरणानां सूत्रस्य मणिगणस्य च भेदे गृह्यमाणेऽपि सूक्ष्मबुद्धीनां सदसदविवेकशालिनां स्वानुभवगम्ययुक्त्या शास्त्रदृष्ट्या विचार्यमाणे तन्तुपटयोः सूत्रमणिगणयोश्च आधाराधेयभूतयोरनयोर्द्वयोरपि भौतिकत्वेनैकत्वमेव निश्चियते न तु तत्र कथंचित् कुतश्चित् कदाचित् भेदः परिकल्पयितुं शक्यते । काल्पनिकभेदस्य च अप्रमाणिकत्वेन तादृशभेदत्वावच्छिन्नस्य व्यावहारिकतया औपाधिकत्वेन अवास्तविकतया मिथ्यात्वं निश्चीयते । यथा एकस्या एव भूमेः तत्र स्वास्थ्यगृहादिकल्पनया भेदव्यवहारो भवति, तथैव भौतिकत्वेनैकत्वेपि सूत्रादौ सूत्रमिति मणिरितिभेदकथनं व्यवहारसंविधानादेव कल्प्यते न तु वास्तविकत्वेन स्वीक्रियते प्रमीयते वा इति न स भेदः प्रामाणिकः । अत एव साधूक्तम्—

घटनाम्ना यथा पृथ्वी पटनाम्ना हि तन्तवः ।
जगन्नाम्ना चिदाभाति सर्वं ब्रह्म केवलम् ॥

योगशिखोपनि० ४।१८

ब्रह्मैवेदं विश्वमिदं वरिष्ठम्

मुण्डकोपनि० २।२२१

'जगद्रूपतयाऽप्येतद् ब्रह्मैव प्रतिभासते'

आत्मोपनि० २

'आत्मैवेदं सर्वम्' छा० उ० ७।२५।२।

'ब्रह्मैवेदं सर्वम्' बृ० उ० २।५।१।

'सच्चिदानन्दरूपमिदं सर्वम्'

नृसिंहोत्तरतापनीयोपनि० ७।

गीतायामपि भगवता श्रीकृष्णेन स्वयमुक्तम्—

मत्तः परतरं नान्यत् किंचिदस्ति धनञ्जय ।
मयि सर्वमिदं प्रोतं सूत्रे मणिगणा इव ॥

गीता ७।७।

अत्रेदं बोध्यम्-अध्यस्तस्य मिथ्याभूतस्य पदार्थस्य न हि कापि सत्ता स्वीक्रियते, नाऽप्यनुभवसिद्धा सा सत्ता, अधिष्ठानसत्तैव केवलं तत्राऽनुभूयते । अत एव अध्यस्तस्याऽधिष्ठानसत्तातिरिक्तसत्ताकत्वाभावनियमेन शुक्तावध्यस्तस्य रजतस्याप्यधिष्ठानभूतशुक्तिसत्तातिरिक्तसत्ताकत्वं नैव स्वीक्रियते, तथैव घट-पटादीनामपि सर्वेषां जागतिकानां पदार्थानां शुद्धचैतन्याध्यस्ततया चैतन्यसत्तातिरिक्तसत्ताकत्वानङ्गीकारात् शुद्धचैतन्यसत्तामात्रमवशिष्यते, यतः घटो नाम घटावच्छिन्नं चैतन्यम्, पटो नाम पटावच्छिन्नं चैतन्यम्, एवं मठोऽपि मठावच्छिन्नं चैतन्यमेव । इत्थं च सर्वमेव हि चैतन्यम्, न ततोऽतिरिक्तं किमप्यस्ति । अत एव भगवता श्रीकृष्णेनोक्तम्—

'मत्तः परतरं नान्यत्' इत्यादि

इत्थं च यदा चैतन्यातिरिक्तस्य कस्याऽप्यस्तित्वमेव नास्ति तदा ब्रह्मादिस्तम्बपर्यन्तानां सर्वेषामेव जङ्गमानां स्थावराणां स्थूलभूतानां सूक्ष्मभूतानां च पदार्थानां प्रभवत्वेनोपादानकारणं प्रलयत्वेन च निमित्तकारणमपि स एवास्ति परब्रह्मपरमेश्वर इति ।

दर्शनमन्तरा तु तत्र काव्येषु महाकाव्येषु वा कथमपि गतिरेव नहि भवितुं प्रभवति । यतः यदि कश्चिद् विपश्चिदित्थं ब्रूयाद् यत् 'यस्य ज्ञानदयासिन्धोः' इति वाक्य घटकीभूतस्य 'यस्य' इति पदस्य कोऽर्थः ? दार्शनिकदृष्ट्या 'शक्तं पदम्' इति लक्षणानुसारतः 'यस्य' इत्यत्र पदद्वयमस्ति—(१) एकं 'यत्' पदम् (२) द्वितीयन्तु विभक्तिरूपं पदम् ; तथाऽस्माभिः पृच्छ्यते—'यस्य' इत्यत्र घटकीभूतस्य 'यत्' पदस्य कोऽर्थः । एवं तद्घटकीभूतस्य 'स्य' इत्यस्य च कोऽर्थः । एतत्समाधानायैवैतेषां सर्वेषामेव सर्वासु कृतिष्वेव 'दार्शनिक तत्त्वान्वेषणं नितान्तमावश्यकमिति ।

मायाविषयेऽन्यदपि किञ्चित्

चराऽचरात्मकस्य सकलस्यापि प्रपञ्चस्य मूलकारणमध्यासो वा माया वा मायाऽपरपर्यायरूपाऽविद्याऽज्ञानं वेति ।

अयञ्चाऽध्यासो ऽनादिरनन्तश्च । नैसर्गिको मिथ्याप्रत्ययरूपः । सर्वस्यापि स्थावरजङ्गमलक्षणलक्षितस्य प्रपञ्चस्य कर्तृत्वभोक्तृत्वरूपत्वेन सर्वलोकव्यवहार हेतुत्वम् ।

अत एवाऽध्यासवलेनैव, प्रमाणप्रमेयरूपः, गमनागमनरूपः, भक्ष्याभक्ष्यरूपः, पानपेयस्वरूपः, कार्यकारणभावरूपः, भावाऽभावरूपः संस्कृतकाव्येषु महाकाव्येषु वा दार्शनिकीदृष्टिस्वरूपः, कालिदास, अश्वघोष, माघ, भारवि, प्रभृतीना महाकवीनां महाकाव्येषु । दार्शनिकतत्त्वानां निरूपणस्य प्रयोजनरूपः, एवं तेषां तत्त्वानां तत्तत्सन्दर्भाणाञ्च सोपपत्तिकविवेचनरूपः, शोधप्रबन्धनिबन्धादीनां लेखनादिकार्यरूपः, इत्याद्या-

त्मकः सर्वोऽप्ययं लौकिको व्यवहारः, अहोस्वित् अलौकिकोऽप्यास्ति यो व्यवहारः स अविद्यापरपर्यायभूतां मायामाश्रित्यैव सम्प्रवर्तते इत्यतो मायायाः निरूपणं नितान्तमावश्यकमिति माया निरूप्यते—

अपि च 'जगद्योनिरयोनिस्त्वम्' एतद्ब्रह्माद्वैतसिद्धान्तस्वीकारकर्त्रा महाकविकालिदासेन 'मायाया' अपि अङ्गीकारो व्यधापि। यतो विना मायां 'जगद्योनिस्त्वं' कथमपि ब्रह्मणि नोपपन्नं भवितुमर्हति। एवं 'जगदादिस्त्वं' तथा 'जगदन्तकस्त्व'मपि। 'जगदीशस्त्व'मपि तथा बोध्तम्। अतः अद्वैतवेदान्तानुसारं मयापि मायाया अभ्युपगमो नितान्तमावश्यकः, अतो मायाविवेचनमपि क्रियते। तथा च प्रसङ्गगतस्य, उपोदघातस्य च सङ्गतित्वं बोध्यम्।

तस्या महाकाव्यनिष्ठाता दार्शनिकदृष्टेर्विशेषतो विचारः

काव्यस्य काव्यशास्त्रस्य वा कृते यदपि देयमस्ति तत् सर्वमपि दर्शनशास्त्रेस्यैवेति विभक्तीनां ये सन्ति चार्थाः, ये च सन्ति प्रकृत्यर्थाः, प्रत्ययार्थाश्च ते सर्वेऽपि सन्ति दर्शनप्रतिपाद्याः।

व्युत्पत्तिवादे गदाधरेण सर्वासामेव विभक्तोनामर्थाः सम्यक्तया प्रतिपादिताः। क्वचिच्च स्थलविशेषेषु प्रकृत्यर्थस्य प्रत्ययार्थस्यापि चास्ति विवेचनं तत्रैव।

तत्रापि वृत्तिप्रयोज्यपदार्थोपस्थितेरन्वयव्यतिरेकाभ्यां कारणत्वं निश्चीयते इति नियमाद् वृत्त्या विभक्तीनामथःस्तत्रैव सन्ति निर्णीताः।

सुप्तिङन्तं[1] पदम् इति च सर्वान्तर्यामितया सर्वत्र सन्निविष्टं वैयाकरणानां कथनमपि दर्शनशास्त्रैणैव संगच्छते पूरितञ्च भवति।

श्री विश्वनाथपञ्चाननेन 'सुप्तिङन्तस्य' स्थान शक्तम् इति च सन्नियोज्य तदेव पदलक्षणं व्यधायि, 'शक्तं[2] पदम्' इति। तत्र पद'लक्षणघटकीभूतं 'पदम्' इति सावधारणम्। अर्थात् पदमेव शक्तं न तु वाक्यमपोत्यर्थः। अनेन श्री विश्वनाथपञ्चाननकथनेन पदस्यैव 'शक्तत्वम्' इति लक्षणं दर्शितं भवति। शक्तिनिरूपकत्वं पदत्वमिति तु निष्कृष्टार्थः, न तु 'सुप्तिऽन्तत्वं' पदत्वम्, यतस्तदभावकालेऽपि प्रकृतेः स्वार्थबोधकत्वस्याऽनुभविकत्वात् इति तु सर्वत्र सर्वैरेवाऽनुभूयते। 'हिन्दी' पदोच्चार्यमाणे, आङ्गलिकपदोच्चार्यमाणे, एवम् उर्दू-अरबी भाषाघटकीभूतपदोच्चारणसविधीयमाने वृत्तिज्ञानजन्यार्थोपस्थितौ सत्यां तत्तदर्थं विषयकशाब्दबोधस्याऽवश्यं जायमानत्वेन 'शक्तत्वम्' इत्येव 'पदत्वम्' साधु प्रतिभाति, समीचीनं सङ्गच्छते च।

अस्यैवोदयनाचार्यकथितलक्षणस्य सर्वत्र सर्वथा निर्दोषतामनुभूय स्वार्थबोधकत्वेन समर्थनं विहितम्। तेषां तेषां पदानां शक्तिग्रहमन्तरा स्वार्थोपस्थापकत्वमपि नैव संघटते। स्वार्थोपस्थापकत्वे च तेषां पदानां सुबन्तत्वं वा तिङन्तत्वं नापेक्ष्यते।

---

१. संज्ञाप्रकरणम्—

२. न्या० मु० शब्दखण्डे. पदनिरूपणप्रकरणे, पृ० ४४, विलासिनो टोका, पं० ज्वालाप्रसाद कृता।

निर्विभक्तिकेनापि घट–पटादिपदेन हिन्दीभाषाभाषितेन स एवाऽर्थविषयको बोधो जायते यश्च वैयाकरणाभिमतेन सुबन्तपदेन तिङन्तपदेन वा जायते, तत्र नास्ति कोऽपि विशेषः, इति सर्वमनुभूयैव श्रीविश्वनाथपञ्चाननः शक्तत्वम् शक्तिनिरूपकत्वम् अर्थात् निरूपकतासम्बन्धेन शक्तिविशिष्टत्वम् इत्येव लक्षणं सर्वतोभावेन निर्दुष्टत्वेन व्यवस्थापितवान् पुष्टीकृतवांश्च ।

इत्थञ्च पदं वाग्व्यवहाररूपमिति सिद्धम् । पद्यते = गम्यते = ज्ञायतेऽर्थोऽनेनेति पदं व्यवहारः, स च व्यवहारो वाग्व्यवहाररूपः अनेनैव वाग्व्यवहारस्वरूपेण पदेन पदार्थज्ञानं जायते इति सर्वथा सुनिश्चितमनुभूतञ्च । यथा घट, पटादिव्यवहारास्तत्तदर्थे स्वतन्त्रपुरुषेण जगन्नियन्त्रा परमेश्वरेण प्रयुज्यन्ते तथैव आधुनिकवाग्व्यवहारा अपि आधुनिकैः प्रामाणिकैः पुरुषैस्तत्तदर्थे प्रोच्यन्ते इत्यत्र नास्ति लेशतोऽपि सन्देहावसरः ।

एवञ्च काव्ये काव्यशास्त्रे वा यः कोऽपि पदविषयकः, पदार्थविषयको वा पदार्थोपस्थितिविषयको वा शाब्दबोधात्मको वा व्यवहारः प्रचलति स सर्वोऽपि व्यवहारः काव्यशास्त्रस्य कृते केवलं दर्शनशास्त्रस्यैव देयमस्ति (देन है) ।

विभक्तीनां ये सन्ति चार्थाः, ये सन्ति प्रकृत्यर्थाः प्रत्ययार्थाश्च ते सर्वेऽपि सन्ति, व्युत्पत्तिवादग्रन्थे महामहोपाध्यायश्रीगदाधरेण सप्तसु कारकेषु एकविंशतिसंख्याकानां खलु विभक्तीनामर्थाः सम्यक् विवेचिता निरूपिताश्च, क्वचित्तत्रैव प्रत्ययार्था अपि । प्रकृतीनामर्थाश्च तेनैव विनिर्मिते शक्तिवादग्रन्थे विवेचिता सन्तीत्यपि न तिरोहितमस्ति केषामपि विदुषाम् ।

पदविचारः

इदानीं प्रसङ्गसङ्गतिवशात् उपोद्घातसङ्गतिवशाच्च पदस्यापि विवेचनं विभाजनञ्च नितान्तमावश्यकं प्रतिभातीति तदेवेदानीं संक्षेपतो विविच्यते यथादर्शनं विकारं गतास्ते वर्णा विभक्त्यन्ताः सन्तः पदसंज्ञका भवन्ति । तथाचोक्तं गौतमेन—

'ते विभक्त्यन्ताः पदम्'

गौतमसू० २।२।६० ।

अर्थात् ते = वर्णा एवाऽभिमतानुपूर्वीविशिष्टा विभक्त्यन्ताः पदमित्युच्यते । सूत्रे विभक्त्यन्तत्वञ्च शाब्दबोधोपयिकविभक्तिप्रकृतित्वम् । यथा रामः, घटः, पटो वेति । भवति, पचति, गच्छति वेत्यादिरूपेण विभक्तेर्द्वैविध्यं विज्ञेयम् । तत्र प्रथमा नामिकी, द्वितीया च आख्यतिकी । नाम्नोऽन्ते जायमाना विभक्तिर्नामिकीति निगद्यते । सा च सुबन्तात्मिका द्वितीया चाऽऽख्यातिकी तिङन्तात्मिकेति कथ्यते । अतएव वैयाकरणाः—

'सुप्तिङन्तं पदम्'

सुबन्तस्य तिङन्तस्य च पदसंज्ञां ब्रुवन्ति ! अर्थात् सुबन्तं तिङन्तञ्च पदसंज्ञं स्यात् इति शाब्दिकाः सूत्रात्मकं पदलक्षणं वदन्ति विवदन्ते चात्र वहवः ।

---

१. तत्रैव न्यायसिमु० शब्दखण्डे पदनिरूपणप्रकरणे, पृ० ४४, विलासिनी टीका ।

तत्र नैयायिकाः खलु 'शक्तं पदम्' इत्येव पदलक्षणं वदन्ति।[1]

'पदत्वं वृत्तिमत्त्वम्'— गौतमवृत्तिः, २२।६०

'संकेतवद्वर्णत्वम्'— वै० उप० २।२।२१। तथा च संकेतबलादेव पदादर्थ-प्रतीतिर्जायते इति भावः।

अपरे पुनर्दार्शनिकाः 'अर्थबोधकम्' पदम्। 'वाक्यैकदेशः पदम्' एवं 'वर्णसमूहात्मकं पदम् इत्यपि पदलक्षणं व्याहरन्ति। समूहश्चात्रैकज्ञानविषयभाव एव।

'वर्णाः पदं प्रयोगार्हानन्वितैकार्थबोधका इति'—सा० द० परि २, श्लो० २।[2] एवं तत्र वर्णानां क्रमवतामाशुतरविनाशित्वेनैकदाऽनेकवर्णाऽनुभवाऽसंभवात् पूर्वपूर्ववर्णाननुभूयाऽन्त्यवर्णश्रवणकाले पूर्ववर्णानुभवजनितसंस्कारसहकृतेनाऽन्त्यवर्णसम्बद्धेन पदव्युत्पादनसमयग्रहणाऽनुगृहीतेन श्रोत्रेणैकदैव सदसदनेकवर्णावगाहिनी पदप्रतीतिर्जन्यते। सहकारिसामर्थ्यात् प्रत्यभिज्ञावत्। प्रत्यभिज्ञाप्रत्यक्षे हि अतीतापि पूर्वावस्था स्फुरत्येव इति।

तर्कभाषा प्रभा० ४, पृ० १८–१९।

पदशक्तिविवेचनम्

न्यायनये पदं द्विविधम्, मुख्यं, गौणञ्च। तत्र च यत् पदं स्वीयशक्तिवृत्त्या यमर्थमुपस्थापयति तत् पदं तस्मिन्नेवार्थे मुख्यमुच्यते। यथा—चैत्रामैत्रादिव्यक्त्युपस्थापकं चैत्र मैत्रादिपदम्। एवं घट, पटादिव्यक्त्युपस्थापकं घट, पटादिपदम्।

अयं विषयो विशेषतः 'तर्ककौमुदी' ग्रन्थे द्रष्टव्यः—तच्च, मुख्यं पदं चतुर्विधम्—

(१) यौगिकम्,
(२) रूढम्,
(३) योगरूढम्,
(४) यौगिकरूढम् चेति।

एतानि च वाग्व्यहारस्वरूपाणि स्वस्वशक्त्या तत्तदर्थेषु प्रयुज्यमानानि पदानि चतुर्विधशक्त्याऽर्थं बोधयन्ति। अधो लिखितास्ति चतुर्विधा शक्तिः—

(१) क्वचिद् यौगिकशक्त्या,
(२) क्वचिद् रूढिशक्त्या,
(३) एवं क्वचिद् योगरूढिशक्त्या,
(४) तथाक्वचिद् यौगिकरूढिशक्त्या चेति।

एताश्चतस्रः सन्ति शक्तयोऽर्थबोधिकाः, एता एव चतस्रः शक्तीः समाश्रित्य पदानि स्वं स्वम् अर्थं बोधयन्ति।

यौगिकादिचतुर्णां पदानां लक्षणान्याह

(१) शास्त्रपरिकल्पिताऽवयवार्थनिरूपिता शक्तिर्योगस्तन्निरूपकं पदं यौगिकपदमिति वदन्ति मनीषिणः।

---

१. तर्कसंग्रहः, ४, मुक्ता ४, पृ० ४४, विलासिनी टीकावाली,
२. साहित्यदर्पणः, परिच्छेदः २ श्लो० २

'तथा च यादृशानुपूर्व्यवच्छिन्नविषयिता यादृशानुपूर्व्यवच्छिन्नघटकशब्दमात्रलभ्य-यादृशविशिष्टार्थबोधजनकतावच्छेदिका तादृशानुपूर्वीमच्छब्दत्वमेव तादृशार्थयौगिकत्व-मिति पर्यवसितम् । न्या० सि० मु० विलासिनीटीका, पृ० ४५—पदनिरूपणप्रकरणम्—

तदेव विश्वनाथपञ्चाननेनाप्युक्तं—'यत्राऽवयवार्थ एव बुध्यते तद् यौगिकम् यथा पाचकादिपदम्'— तत्रैव न्या० सि० मुक्तावलिः—

(२) शास्त्रपरिकल्पिताऽवयवार्थभानाऽभावे समुदायार्थनिरूपिता शक्तिः रूढ़िश-रिति च व्यवह्रियते ।

'तथा च यादृशानुपूर्वी' 'इदं पदममुमर्थं बोधयतु' इत्याकारकयादृशार्थविषयक-बोधजनकत्वप्रकारकेच्छाविशेष्यतावच्छेदिका योगरूढ़भिन्नत्वे सति तादृशानुपूर्वीमच्छब्दत्वं तादृशार्थे रूढ़त्वमिति पर्यवसितम्' । इदमपि तत्रैव—

अस्यैव रूढ़पदस्य विषये केचन विद्वांस इत्थं व्याहरन्ति यद् यादृशपदघटकाऽव-यवशक्त्यप्रयोज्यसमुदायशक्तिप्रयोज्याऽनुभवनिरूपितविषयताशाली अर्थो जायते तादृश-पदाघटितशक्ततावच्छेदकसमुदायत्ववत्त्वं रूढ़पदत्वमिति । अथ विश्वनाथः—

'यत्राऽवयवशक्तिनैरपेक्ष्येण समुदायशक्तिमात्रेण बुध्यते तद्रूढ़म् । यथा गवा-दिपदम् । तत्रैव द्रष्टव्यम्—

'गमेर्डोर्दाभाभ्यां नुर्धेट् इच्चे, त्यौणादिकसूत्रेण विहितस्य डोः प्रत्ययस्य शक्तिग्रहं विनैव गोत्वावच्छिन्ने शक्तिग्रहादेव बोधोत्पत्तेरिति भावः ।

तत्रैव विलासिनीटीका—

(३) एवं शास्त्रपरिकल्पिताऽवयवार्थाऽन्वितविशेष्यीभूतार्थनिरूपिता शक्तिर्योगरूढ़ि स्तन्निरूपकं पदं योगरूढ़म् पदमिति च गीयते । इदञ्च योगरूढ़पदमवयवशक्तिसमुदायशक्त्यु-भयग्रहादेव शाब्दबोधं जनयति । श्रीविश्वनाथपञ्चाननेनाप्युक्तं—

'यत्राऽवयवशक्तिविषये समुदायशक्तिरप्यस्ति तद् 'योगरूढ़म्' । यथा पङ्कजा-दिपदन् । न्या० सि० मु० तत्रैव द्रष्टव्यम्—

तथा च यादृशानुपूर्वी स्वाश्रयशक्ययादृशार्थधर्मिकस्वाश्रयघटकशब्दवृत्त्युपस्थाप्य-यादृशार्थप्रकारकाऽन्वयबोधजनकताच्छेदिका तादृशानुपूर्वीमन्नाम तादृशविशिष्टार्थे योग-रूढ़मिति फलितम् ।

तत्रैव विलासिनीटीका, ज्वालाप्रसादकृता—

(४) यत्र च शास्त्रपरिकल्पिताऽवयवार्थयोः स्वतन्त्रा शक्तिः सा यौगिकरूढ़िः शक्तिः प्रोच्यते, तन्निरूपकं पदं 'यौगिकरूढ़म्' कथ्यते । तस्येदमपि स्वरूपं वर्णयन्ति मनीषिणः यत् 'रूढ़िनिरूपकतावच्छेदकरूढ़्यर्थतावच्छेदकाऽसमानाधिकरणधर्मावच्छिन्न-शक्तपदघटितसमुदायत्ववत्त्वम् यौगिकरूढ़त्वम् ।

अन्ये खलु दर्शनशास्त्रवेत्तारो यौगिकरूढ़स्य स्वरूपमित्थं दर्शयन्ति। यत् 'रूढ़िशक्यतावच्छेदकावच्छिन्नविषयताशालिशाब्दबोधत्वावच्छिन्नशाब्दबोधनिष्ठकार्यतानिरूपितज्ञाननिष्ठकारणतानिरूपितविषयत्वसम्बन्धावच्छिन्नाऽवच्छेदकतावच्छेदकरूढ़िशक्यतावच्छेदकाऽसमानाधिकरणधर्मावच्छिन्नविषयताशालिशाब्दबोधनिष्ठकार्यतानिरूपितज्ञाननिष्ठकारणतानिरूपितविषयतासम्बन्धावच्छिन्नाऽवच्छेदकताश्रयपदघटितं यत् समुदायत्वं तद्वत्त्वं यौगिकरूढ़त्वम्, यौगिकरूढ़पदत्वमित्यपि वदन्ति।

अत्र विश्वनाथपञ्चानन इत्थं वदति यद् 'यत्र[1] तु यौगिकार्थरूढ़्यर्थयोः स्वातन्त्र्येण बोधस्तद्यौगिकरूढ़म्' यथोद्भिदादिपदम्। तत्र हि ऊर्ध्वं भिनत्तीति व्युत्पत्त्याऽवयवशक्तिज्ञानमात्रेणोद्भेदनकर्तृत्वविशिष्टतरु, गुल्म, लताप्रभृतयो ज्ञायन्ते।

समुदायशक्तिज्ञानमात्रेण च 'उद्भिदा यजेत पशुकामः इत्यादिश्रुतौ समुल्लिख्यमान उद्भिन्नामको यागविशेषो बुध्यते। एवं यत् पदं लक्षणावृत्त्या यमर्थमुपस्थापयति तत् पदं तस्मिन्नर्थे गौणं लाक्षणिकम् इति चोच्यते। यथा 'गंगायां घोषः' इत्यत्र गङ्गापदं लक्षणावृत्त्या तीररूपमर्थमुपस्थापयतीति गङ्गापदं तीररूपेऽर्थे लाक्षणिकम्।

तर्ककौमुदी ४

अन्यत्र तन्त्रान्तरेषु चत्वारि पदानि इतोऽतिरिक्तान्येव श्रूयन्ते दृश्यन्ते च। तथाहि—

'नामाख्याते चोपसर्गनिपाताश्च'

(निरुक्त०) वैयाकरणभूषणसारदर्पणः—

पृ० ३१

अत्र कर्मप्रवचनीयं पञ्चमम् इति हेलाराजो ब्रूते।

अत्र हरिकारिका एवमस्ति—

द्विधा कैश्चित् पदं भिन्नं-
चतुर्धा पञ्चधापि वा।
अपोद्धृत्यैव वाक्येभ्यः-
प्रकृति प्रत्ययादिवत्॥

(प्रकीर्णके)

कर्मप्रवचनीयेन वै पञ्चमेन सह पदस्य पञ्चविधत्वं व्यवहरति—हेलाराज इत्यपि ब्रूते। सम्बन्धविशेषद्योतनद्वारेण खलु क्रियाविशेषद्योतनवदुपसर्गेष्वेवान्तर्भवन्ति कर्मप्रवचनीयाः इत्यभिसन्धानेनैव पदस्य चतुर्विधत्वं भाष्यकारेण भाषितम्।

आलङ्कारिकाः खलु—वाचकम् लक्षकम्, व्यञ्जकम्, इत्येव केवलं त्रिविधं पदं वदन्ति।

पदार्थविवेचनम्

'पद' विवेचनाऽनन्तरं तदर्थविवेचनमपि नितान्तमावश्यकं प्रतिभातीति 'पदार्थो

---

१. तत्रैव न्या० सि० मु०,

२. तर्कप्रकाशः (शितिकण्ठीटीका सहितः) खं० ४, पृ० ३०

विविच्यते। 'वागर्थाविव संपृक्तौ' इत्यस्मिन् स्वयं स्वेन विनिर्मिते वाक्ये कविकालिदासस्तथैव पुष्टीकृतवान्, तथा साकल्येन सर्वतोभावेन वा तस्मै प्रामाण्यं च दत्तवान्।

यतः 'काव्येषु माघः कविकालिदासः' इत्यभियुक्तोक्त्या यथा काव्येषु माघकवेः प्रामाण्यं महत्त्वञ्चाङ्गीक्रियते, तथैव कविषु कालिदासस्याऽऽप्तत्वं महत्त्वं प्रामाण्यं सर्वोच्चकोटिकत्वं प्राथम्यञ्च गण्यते इत्यत्र नास्ति लेशतोऽपि सन्देहानध्यवसायावसरः। अत एवाऽनेन प्रमाणभूतेन महाकविवरेण श्रीकालिदासेन विरचितस्य 'रघुवंश' नामकस्यापि ग्रन्थस्य प्रामाण्यं गण्यते, येन स महाकाव्यतां गतः प्रशस्यते, तदीयं महत्त्वञ्च स्मर्यते।

तस्मिन्नेव महाकाव्यभूते 'रघुवंश' नामके ग्रन्थेऽयं महानुभावः श्रीकालिदासः 'वागर्थाविव सम्पृक्तौ' इत्यनेन स्वीयेन सदुपन्यासेन स्वयं वागर्थयोः अर्थात् पदार्थयो = र्भेदसहिष्णुमभेदं भेदाभेदं वा मन्यमानः पदविवेचनानन्तरं पदार्थविवेचनस्य पुष्टिं कृतवान्। अन्यथा इमौ सम्पृक्तौ न स्याताम्। तथा च महानुभावस्य कविवरस्य 'सम्पृक्तौ' इति कथनं सर्वथा व्यर्थमेव स्यात्। वाचः शब्दरूपत्वेन पदरूपत्वम्, अर्थस्यचाऽर्थस्वरूपता सुस्पष्टेवेति प्रकरणसंगतिभङ्गभिया पदनिरूपणानन्तरं पदार्थो निरूप्यतेऽस्माभिः।

पदाभिधेयतावान् पदार्थः।

अत एव पदाभिधेयः पदार्थः'—तर्ककौमुदी, तर्कदीपिका, अर्थात् केनापि पदेन घट, पटादिना न केवला जातिरेव वाच्या भवति, नापि चाऽऽकृतिरेव, नापि च व्यक्तिरेव, अपि तु जातिराकृतिर्व्यक्तिश्चेति त्रय एव घट-पटादिपदवाच्यतां गच्छन्तीति त्रयाणामेव पदार्थत्व' कथनमपि साधु संगच्छते। उक्तञ्च— गौतम सू० २।२।६७।

तथा च जातिप्रतीतेराकृतिव्यक्तिप्रतीतिसापेक्षत्वात् आकृतिव्यक्तयोः प्रतीतिंविना जातिप्रतीतिरेव न संभवतीति त्रयाणामेव पदनिरूपिता वाच्यता स्वीकार्या, इत्येतादृशदृष्टिकोणं हृदि निधायैव महर्षिगौतमस्त्रयाणामेव पदार्थत्वमङ्गीकृतवान्। तत्रापि त्रयाणां मिलितानामेव पदार्थत्वं न तु केवलानाम्।

'घटमानय' इत्यत्र घटपदाभिधेयतावान् खलु घटत्वात्मकजातिकम्बुग्रीवादिरूपाऽऽकृतिविशिष्टो व्यक्तिविशेषो घटपदार्थ इति न तिरोहितमस्ति केषामपि विदुषाम्।

पदार्थलक्षणानि विभिन्नमतानुसारं विभिन्नान्येवाऽनुभवपथमायान्ति। तानि च यथा—

(१) वृत्त्या पदोपस्थाप्यत्वं पदार्थत्वम्। —तर्क दीपिका
(२) अभिधेयत्वं पदार्थत्वम्। —न्या० सि० मु०
(३) ज्ञेयत्वं पदार्थत्वम्। —तत्रैव
(४) पदतात्पर्यविषयत्वं पदार्थत्वम्। —तर्क दीपिका
(५) पदशक्तिपदार्थत्वम्। व्युत्पत्तिवादः, कारकप्रथमः

(१) वृत्तिश्चशक्तिलक्षणान्यतरः सम्बन्धः। तादृशशक्तिलक्षणाऽन्यतरात्मकेन वृत्तिरूपसम्बन्धेन जात्याकृतिव्यक्तयश्च त्रय एवाऽर्थाः समुपस्थाप्या भवन्ति, इत्यतस्त्रया-

णामेव पदार्थत्वमभ्युपगम्यते। तेषां त्रयाणामपि मिलितानामेव पदार्थत्वं स्वीक्रियते न तु केवलानाम्।

(२) अभिधातुं योग्यमभिधेयम्, तस्य भावस्तत्त्वम् अभिधेयत्वम्। तदपि प्रागुक्त-जात्याकृतिव्यक्तिषु त्रिष्वेव सन्तिष्ठते इति त्रयाणां पदार्थत्वमक्षुण्णमेवेति न कश्चिद् दोषः।

(३) ज्ञेयत्वं ज्ञानविषयता, तस्या ज्ञानविषयताया अपि प्रागुक्तेषु त्रिषु जात्याकृतिव्यक्तिषु सत्त्वेन न त्रयाणां जात्याकृतिव्यक्तीनां पदार्थत्वहानिः।

(४) सर्वेषामेव पदानां तात्पर्यमर्थं एव सन्तिष्ठते। अत एव लोकेऽपि जनाः पृच्छन्ति यत् कीदृशार्थतात्पर्येण भवद्भिस्त्वया वा इदं पदमुक्तम्। श्रावणप्रत्यक्षानन्तरं स तथैवोत्तरयतीति पदतात्पर्यविषयत्वमपि पदार्थत्वलक्षणं साधु निर्दुष्टञ्च संगच्छते।

(५) पदानां शक्तिः पदशक्तिः, सापि जात्याकृतिव्यक्तिषु त्रिष्वेव वर्तते इति न त्रयाणां पदार्थत्वानुपपत्तिः। तथाहि—घटपदस्य घटत्वविशिष्टे[1] शक्तिः। अर्थाद् घटत्वे, घटघटत्वयोःसमवायात्मकसम्बन्धे, तदाश्रयेषु एव शक्तिः, इत्येव खलु 'घटत्वविशिष्टे शक्तिः' इत्यस्यार्थः। तथा च घटघटत्वतत्समवायेषु घटपदस्य शक्तिरिति सिद्धम्। एवमेवाऽन्यत्रापि पटादिपदस्थलेऽपि विज्ञेयम्।

घटादिपदशक्तिमति द्रव्यत्वादिवैशिष्ट्यसत्त्वेऽपि द्रव्यत्वादौ घटपदनिरूपितायाः शक्तेर्विरहात्—द्रव्यत्व, प्रमेयत्वादीमुपलक्षणता। घटत्वादौ तत्सत्त्वाच्च तेषां विशेषणता।

'घट[2]पदाद घटो वा बोद्धव्यः' 'घटपदं घटत्वावच्छिन्नवाचकम्' इत्याद्याकारा या भगवदिच्छारूपा शक्तिरस्ति तत्र घटो नाम समवायेन घटत्वावच्छिन्ना व्यक्तिरेव। इत्थञ्च भगवदिच्छारूपायां शक्तौ घटो, घटत्वं, समवायश्चेति त्रितयमेव भासमानं भवति, न तु द्रव्यत्वमपि तत्र भासते येन द्रव्यत्वादिविशिष्टेऽपि घटादिपदानां शक्तिः स्यादिति तु परमार्थः।

एवञ्च प्रवृत्तिनिमित्तेऽपि शक्तेः सत्त्वात् तस्यापि च वाच्यतया 'वाच्यत्वे सति वाच्यवृत्तित्वे सति वाच्योपस्थितिप्रकारत्वम्' इत्यस्मिन् प्रवृत्तिनिमित्तलक्षणे 'वाच्यत्वे सति' इति विशेषणदानमपि संगच्छते।

यदि[3] च घटत्वादेर्घटादिपदवाच्यत्वं न स्यात्तदोक्तप्रवृत्तिनिमित्तलक्षणे प्रवृत्तिनिमित्तस्य घटत्वादेः 'वाच्यत्वे सति' इति वाच्यत्वविशेषणं नोपपद्येत। एवं स्थिते 'जात्याकृतिव्यक्तयः पदार्थः' इति गौतमसूत्रोक्तं पदार्थत्वमपि नोपपन्नं स्यात्तस्माद् घटादिवद् घटत्वादेरपि घटादिपदवाच्यत्वमवश्यमेवाऽङ्गीकार्यम्।

ननु[4] 'घटशब्दाद् घटो बोद्धव्यः' इत्याकारिका या भगवदिच्छाविषयीभूता बोधविषयत्वनिष्ठप्रकारतानिरूपिता विशेष्यता तस्यास्तादृशबोधविषयतात्वेन रूपेण घटे एव

१. सादर्शशक्तिवादे, पृ० ३९
२. तत्रैव आदर्शटीका, पृ० ४०
३. तत्रैव आदर्शटीका
४. सादर्शः शक्तिवादः पृ० ४१

सन्तिष्ठमानत्वात् घटत्वादौ च तद्विरहेणेति कथं घटपदनिरूपिता शक्तिस्त्रिषु एव वर्तते इति नियमः संगच्छेतेति चेन्न ?

'घटपदाद् घटो बोद्धव्यः' इत्याद्याकारकेश्वरेच्छानिरुपिता या घटादिपदजन्य-बोधविषयता तत्प्रयोजको यः सम्बन्धः स एव सम्बन्धो घट-घटत्वादौ घटपदनिरूपिता' 'शक्तिः' स्वीक्रियते। शक्तिश्च स्वयं सम्बन्धोऽपि। स च शक्तिरूपः सम्बन्धो घट-घटत्व तत्समवायेषु घटपदवाच्यतासम्पादको नानाविधो नैकविधः। तत्रापि त्रिविध इति न केवलं घटादेरेव वाच्यत्वं किन्तु त्रिविधत्वाद् घटघटत्वसमवायेषु त्रिष्वेव शक्तिःस्वीक्रियते नैकत्रेति न प्रागुक्तसूत्रार्थासंगतिः।

तथा चाऽऽश्रयत्वसम्बन्धावच्छिन्नघटपदजन्यबोधविषयतात्वावच्छिन्नप्रकारता-निरूपितभगवदिच्छीयविशेष्यतासम्बन्धेन घटपदजन्यबोधविषयतायाः घटे सत्त्वेन घटे घटपदशक्तिनिर्वाहः सम्पद्यते।

एवं स्वनिष्ठाऽवच्छेद्यतानिरूपिताऽवच्छेदकत्वसम्बन्धावच्छिन्नघटपदजन्यबोध-विषयतात्वावच्छिन्नप्रकारतानिरूपितभगवदिच्छीयाविशेष्यतासम्बन्धेन घटादिपदजन्य-बोधविषयता घटत्वे वर्ततेऽतो घटत्वेऽपि घटपदशक्तिर्निर्वहति, यतस्तावद् घटपदजन्य-बोधविषयता घटे वर्तते, तादृशविषयतावच्छेदकञ्च घटत्वम्, इति तादृशविषयतानिरूपित-मवच्छेदकत्वं घटत्वेऽस्ति। आहोस्वित्तुल्यवित्तिवेद्यतया इदमपि वक्तुं शक्यते यद् अव-च्छेदकत्वसम्बन्धावच्छिन्नघटजन्यबोधविषयतात्वावच्छिन्नप्रकारतानिरूपितविशेष्यता घटत्वे वर्तते। अस्मिन् पक्षे 'घटत्वं घटपदजन्यबोधविषयतावच्छेदकं भवतु' अयमस्ति भगवदिच्छारूपायाः शक्तेराकारः।

एवं स्वनिष्ठाऽवच्छेद्यतानिरूपिताऽवच्छेदकतावच्छेदकत्वसम्बन्धावच्छिन्नघटपद-जन्यबोधविषयतात्वावच्छिन्नप्रकारतानिरूपितभगवदिच्छीयविशेष्यतासम्बन्धेन घटपद-जन्यबोधविषयता घटत्वसमवाये वर्ततेऽत घटत्वसमवायेऽपि घटपदशक्तिनिर्वाहः। एव-मन्यत्रापि पटादिस्थलेऽपि पटपदशक्तिनिर्वाहो विधेयः। अत्रापि समवाये 'घटघटत्वयोः समवायः घटपदजन्यबोधविषयतावच्छेदकतावच्छेदकं भवतु 'अयमेव खलु भगवदिच्छा-स्वरूपायाः शक्तेराकारो बोध्यः।

इत्थञ्च तादृशबोधविषयता आश्रयतासम्बन्धेन घटव्यक्तौ तिष्ठति। स्वावच्छेद-कतासम्बन्धेन तादृशविषयता घटत्वे, तथा स्वावच्छेदकतावच्छेदकसम्बन्धेन सा विषयता घट-घटत्वयोः समवाये सन्तिष्ठते इति न काचिदनुपपत्तिरिति जात्याकृतिव्यक्तिषु त्रिष्वेव पदानां शक्तिसत्त्वस्याऽक्षुण्णतया न कोऽपि दोषः। तथाचोक्तम् गदाधरेण—

'एवञ्चाऽऽश्रयत्वसम्बन्धावच्छिन्नबोधविषयत्वप्रकारतानिरूपितविशेष्यत्वं घटस्य, अवच्छेदकत्वसंसर्गावच्छिन्ना घटविशेषणतापन्नबोधविषयत्वस्य या प्रकारता तन्निरूपित-विशेष्यत्वं घटत्वस्य, घटविशेषणतापन्नबोधविषयत्वांशेऽवच्छेद्यत्वसम्बन्धेन प्रकारत्वं वा घटत्वस्य, घटत्वे बोधविषयतायाः संसर्गविधया भासमानेऽवच्छेदकत्वेऽवच्छेदकतया भास-मानत्वं समवायस्य, इति त्रितयमेव घटपदजन्यबोधविषयतायामुपयुज्यते इति त्रयाणां वाच्यतोपपत्तिः'

सादर्शः शक्तिवादः, सामान्य का० पृ० ४२-४३।

एतावता प्रबन्धेन जात्याकृतिव्यक्तिषु त्रिष्वेव पदार्थत्वं सोपपत्तिकं सुनिश्चितं भवति। परन्तु प्रागुक्तेयं व्यवस्था गवादिपदानामेव साधुत्वेन संगच्छते, अर्थात् शोभते। गुणकर्मादिपदानान्तु 'त्रिष्वेव शक्तिः' इति कथनं नैव साधु प्रतिभाति, किन्तु, तत्र गुण-कर्मादिरूपाऽर्थवाचकपदानां जातिव्यक्ती एवार्थस्तत्राऽऽकाराभावात् इति मयूखग्रन्थे सविस्तरं सुस्पष्टीकृतम्। तथाचोक्तं शङ्करमिश्रेण—

'गवादिपदानामियं गतिः, गुणकर्मादिवाचकपदानान्तु जातिव्यक्ती एवार्थ इति मयूखे विपश्चितम्'

वै० उ० ७।२।२०

ननु आकाशादिपदं न जातिवाचकम्, यत आकाशादिपदस्य शब्दाश्रयत्वावच्छिन्नस्य, अष्टद्रव्यातिरिक्तद्रव्यत्वावच्छिन्नस्य वा वाचकत्वात् इति चेन्न। जातिवाचकपदस्थलीयानुरोधेनैव सौत्रं पदार्थलक्षणं शोभते, अन्यथा तु तत्र जातिपदस्य धर्मपरत्वान्न कश्चिद् दोषः। तथाचोक्तम्—

'आकाशादिपदस्य जात्यवाचकत्वेऽपि च न क्षतिः। जातिपदं वा धर्मपरम्'

गौतमवृत्तिः, २।२।६८।

अस्मिन् विषये साम्प्रदायिकाः। स्वतन्त्रं स्वीयं मतं दर्शयन्ति यज्जात्याकृतिव्यक्तिषु तिसृषु अर्थेषु एकैव शक्तिरिति ज्ञापनार्थं 'जात्याकृतिव्यक्तयस्तु पदार्थः' इति सूत्रे 'पदार्थः' इत्येकवचनं समुल्लिखितम्।

अत्र नव्या इत्थं वदन्ति यत् जातिव्यक्त्योरेव अर्थात् जातिविशिष्टव्यक्तावेवैका शक्तिरस्तीति बोधनार्थमेव 'पदार्थः' इति सौत्रमेकवचनमुपात्तम्। तत्र चाऽऽकृतिरूपन्तु संस्थानं पृथगेव शक्त्याश्रयीभूतमित्यवधेयम्।

द्रष्टव्योऽयंविषयः—गौ० सू० वृ० २।२।६८।

तथाशब्दशक्तिप्रकाशिका—

तात्त्विकदृष्ट्या अर्थात् सैद्धान्तिकदृष्ट्या विचार्यमाणे इदमेवाऽऽयाति यद् आकृतिपदं नास्ति संस्थानपरम्। किन्तु घट-घटत्वादिरूपजातिव्यक्त्योः योऽस्ति समवायात्मकः सम्बन्धस्तत्परमेवेत्यन्यत्र चिन्तामणिप्रभृतिग्रन्थादौ विस्तरः।

अस्मिन्नेव घट-घटत्वादिरूपजातिव्यक्त्योः। समवायात्मके संसर्गे घटादिपदजन्यबोधविषयतानिष्ठाऽवच्छेद्यतानिरूपिताऽवच्छेदकताऽवच्छेदकत्वसंब-धावच्छिन्नबोधविषयतात्वावच्छिन्नप्रकारतानिरूपितभगवदिच्छीयविशेष्यतासम्बन्धेन घटादिपदजन्यबोधविषयता वर्तते इति तत्रापि घटादिपदशक्तिनिर्वाहो बोध्यः, इत्युपपादितं विशेषतश्चोपरिष्टात्।

पदार्थविभागः

दार्शनिकतत्त्वविवेचनकालेऽस्माभिः 'सतश्च' सद्भावः, असतश्च असद्भावः' इत्यनेन पदार्थतत्त्वं विवेचितं प्रागेव। अर्थात् ये सन्ति अस्तित्वेन गृह्यमाणाः पदार्थास्तेषां सद्भावः = अस्तित्वमेव। ये च सन्ति नास्तित्वेन गृह्यमाणाः पदार्थास्तेषां नास्तित्वमेव असद्भावः।

एवञ्च सदसद्रूपेण गृह्यमाणः खल पदार्थो द्विविधः—भावोऽभावश्चेति । तत्र भावः षड्विधः–द्रव्यगुणकर्मसामान्यविशेषसमवायभेदात् । तर्कामृतम्–पृष्ठ ३ । पं० ज्वालाप्रसाद की टीकावाला—

अभावस्तु प्रागभावादिभेदेन चतुर्विधः । तेषामभावानां चातुर्विध्यं श्रीमदन्नम्भट्टेन, श्रीविश्वनाथपञ्चाननेन च सविस्तरं दर्शितं स्वीयग्रन्थेषु ।

तत्र गोतमः—प्रमाण, प्रमेय, संशय, प्रयोजन, दृष्टान्त, सिद्धान्त, अवयव, तर्क, निर्णय, वाद, जल्प, वितण्डा, हेत्वाभास, छल, जाति, निग्रहस्थानस्वरूपान् एतान् षोडशपदार्थानङ्गीकृतवान् ।

परन्त्वेतेषां षोडशपदार्थानां कणादाभिमतेषु सप्तसु पदार्थेष्वेवाऽन्तर्भावो बोध्यः । तथाहि—प्रमाणानामिन्द्रियव्याप्तिज्ञानादीनां द्रव्यगुणयोरन्तर्भावः । प्रमेयपदार्थानां द्वादशविधानां यथायथं द्रव्य-गुण-अभावेष्वन्तर्भावः ।

(३) संशयस्य ज्ञानरूपत्वाद् गुणेऽन्तर्भावः ।

(४) प्रयोजनस्य साध्यतयेच्छाविषयरूपत्वाद् द्रव्यादिषु ।

(५) साध्यसाधनोभयवत्तानिश्चयविशेष्यीभूतस्य दृष्टान्तस्यापि यथायथं द्रव्यादिष्वन्तर्भावः ।

(६) सिद्धान्तस्यापि च तत्तच्छास्त्रसिद्धस्यार्थभूतस्य द्रव्यादिष्वेवान्तर्भावो बोध्यः ।

(७) अवयवाः खलु प्रतिज्ञाद्यन्यतमरूपाः शब्दस्वरूपाः सन्तो द्रव्य, गुणादावन्तर्भवन्ति ।

(८) तर्कस्याऽऽरोपरूपस्य ज्ञानात्मकस्य गुणेऽन्तर्भावः ।

(९) निर्णयस्यापि अर्थावधारणरूपस्य ज्ञानात्मकत्वेन गुणेऽन्तर्भावः । एवं क्रमेणैव वाद-जल्पादीनामपि तत्र तत्रान्तर्भावो बोध्यः ।

(१०) वादस्य तत्त्वबुभुत्सोः कथास्वरूपस्य शब्दात्मकत्वेन गुणेऽन्तर्भावः ।

(११) जल्पस्यापि विजिगीषुकथास्वरूपस्य शब्दात्मकत्वेन गुणेऽन्तर्भावो बोध्यः ।

(१२) वितण्डायाः स्वपक्षस्थापनाहीनकथास्वरूपायाः शब्दात्मकत्वेन गुणेऽन्तर्भावः ।

(१३) हेत्वाभासानामनुमितितत्करणाऽन्यतरप्रतिबन्धकज्ञानविषयस्वरूपाणां वन्ह्यभाववद्ध्रदादिरूपाणां यथायथं द्रव्यादिष्वेवाऽन्तर्भावो बोध्यः ।

(१४) छलस्य वक्तुरनभिप्रेतस्याऽर्थान्तरस्योपपादनेन वाक्यविरोधप्रदर्शनस्वरूपस्य ज्ञानात्मकस्य गुणेऽन्तर्भावः ।

(१५) असदुत्तरस्वरूपाया जातेर्गुणेऽन्तर्भावः ।

(१६) निग्रहस्थानानां प्रतिज्ञाहान्यादीनां यथायथं द्रव्येषु अभावे, गुणेचान्तर्भावो बोध्यः ।

अयं च विषयः—दिनकर्यां १, पृ० २०-२२, नीलकंठ्यां पृ० ४५-४६ ।

मायावादिनो वेदान्तिनश्चिदचिदात्मकौ अर्थात् चेतनजडात्मकौ द्वावेव पदार्थौ स्वीकुर्वन्ति । चेतनो भोक्ता, जडश्च भोग्यः । अयञ्च सर्वोऽपि चराचरस्वरूपः जडात्मकः

संसारः भोग्यतावच्छेदककुक्षिनिक्षिप्तः चेतनश्च भोक्ताऽतः स भोक्तृतावच्छेदककुक्षिनिक्षिप्तः। भोक्तृभोग्यौ इत्यपि व्याहर्तुं शक्यते।

मध्वमतानुयायिनो माध्वा अपि खलु स्वतन्त्र, परतन्त्रभेदेन द्वौ पदार्थौ स्त इत्येव ते संगिरन्ते। स्वतन्त्रः स एव चेतन ईश्वरः, तदतिरिक्तः सर्वोऽपि परतन्त्रः। जीवश्च स्वातन्त्र्य, पारतन्त्र्योभयधर्मावच्छिन्नः। परन्तु स न सर्वथा स्वतन्त्र एवेत्यपि बोध्यम्।

रामानुजमतावलम्बिनो रामानुजीयास्तु त्रयः पदार्थाः सन्तीति स्वीकुर्वन्ति। ते च पदार्थाः "चिदचिदीश्वरे" ति भेदभिन्ना भवन्ति। तत्र चित्पदेन जीवस्य ग्रहणम्। अचित् अर्थात् चिदतिरिक्तः सर्वोऽपि चराचरस्वरूपो जडात्मकः संसारः।

नकुलीशनयानुयायिनो नाकुलीशाः शैवाः पति, पशु, पाशेत्याख्यान् त्रीन् पदार्थान् स्वीकुर्वन्ति। शैवसिद्धान्तानुसारं 'पति' शिव, 'पशु, "पाश" पदेन च। मलकर्मप्रभृत्यर्थाः गृह्यन्ते।

(१) 'पतिः' = परमैश्वर्य, स्वातन्त्र्य, सर्वज्ञत्व, प्रभृतिगुणगणविशिष्टः परशिवः परमेश्वरः। मुक्तेषु जीवेषु, विद्येश्वरादिषु च शिवत्वं निवसति सन्तिष्ठते चेत्यतो मुक्ति गता जीवा शिवत्वप्राप्तिमन्तो भवन्तीति शैवा वदन्ति।

(२) अणुः, परिच्छिन्नरूपस्तथा सीमितशक्तिसमन्वितो जीव एव 'पशु' पदाभिधेयतां भजते। स च पशुर्नास्ति चार्वाकवद् देहाकारः, नापि च नैयायिकवत् प्रकाश्यः, नापि च जैनसमानोऽव्यापकः, किन्तु स व्यापकः, प्रकाशरूपः, अनेकश्चास्ति। सांख्यपुरुषवत् सर्वथाऽकर्ताऽपि नास्ति। यतः पाशानां दूरीकरणानन्तरं शिवत्वप्राप्तौ सत्यां तत्र निरतिशया ज्ञानशक्तिः क्रियाशक्तिश्च समुदेति। विस्तरस्तु पुनः।

(३) पाशश्च बन्धनरूपः, येन खलु स्वयं शिवस्वरूपः सन्नपि जीवः पशुत्वप्राप्ति मान् भवति स एव पाशः। ते च पाशाः मल, कर्म, माया, रोधशक्तिभेदेन चतुर्विधाः सन्ति। विस्तरस्तु अन्यत्र आहोस्वित् पुनः।

सांख्यैः खलु संक्षेपतश्चतुर्विधाः पदार्थाः स्वीक्रियन्ते। तथाहि—(१) कश्चित् पदार्थः प्रकृतिरेव, प्रकरोति = रचयति जगत् या सेति। तल्लक्षणन्तु अजन्यत्वे सति जनकत्वम्। सांख्यकां, भूमिका, पं० ज्वालाप्रसादगौड़स्य—

(२) कश्चित् पदार्थो विकृतिरेव = विकारएव अर्थात् कार्यस्वरूप एव। स च विकृतिस्वरूपः पदार्थो न कस्यचित् कारणं भवति, नापि च पुष्करपलाशवन्निर्लेप एव जायते। तल्लक्षणन्तु—जन्यत्वे सति तत्त्वान्तराऽनारम्भकत्वम्। —इदमपि तत्रैव

(३) कश्चित् पदार्थः प्रकृति विकृति उभयात्मक एवास्ति। अर्थात् कार्यस्वरूपोऽपि कारणात्मकोऽपि च। तल्लक्षणन्तु—जन्यत्वे सति जनकत्वम्।

इदमपि तत्रैव द्रष्टव्यम्—(४) कश्चिच्च पदार्थोऽनुभयरूपः, अर्थान्न जन्यः, नापि च जनक एव। स च पुष्करपलावन्निर्लेपः किन्तु चेतनः। तल्लक्षणन्तु—अजन्यत्वे सति अजनकत्वम्। इदमपि तत्रैव दृश्यताम्—

इत्थञ्चेमे सन्ति चत्वारः पदार्थाः, परन्तु संकलनया पञ्चविंशतिपदार्थास्ते भवन्ति। तथाहि—

(१) 'पुरुषः' बुद्धिगतचैतन्याऽभिमानाऽन्यथानुपपत्त्या तत्कल्पनम्। प्रथमोऽयं पदार्थः।

(२) 'प्रकृतिः', इयञ्च सर्वमपि चराचरात्मकं जगद् रचयति पुरुषसाहाय्यमाश्रित्य। अयञ्च द्वितीयः पदार्थः।

(३) 'महत्तत्वम्' बुद्धितत्त्वाऽपरपर्यायभूतम्। तृतीयोऽयम्।

(४) "अहङ्कारः" अभिमानलक्षणकः, चतुर्थोऽयम्।

(५) अस्माच्चाऽहङ्कारात् षोडशको गणः प्रवर्तते। तत्र च ज्ञानेन्द्रियपञ्चकम् अर्थात् चक्षुः श्रोत्रम्, रसनम्, त्वक्, घ्राणेन्द्रियम् चेत्येतानि पञ्च ज्ञानेन्द्रियाणि समुत्पद्यन्ते। कर्मेन्द्रियाणि जायन्ते, तथा मनोऽपि। एवं तन्मात्रपञ्चकञ्च, अर्थात् तन्मात्रस्वरूपाः सूक्ष्माः रूपादयोऽप्यर्थात् रूप, रस, गन्ध, स्पर्श, शब्दस्वरूपा अप्यनेनैवाऽहङ्कारेण जायन्ते। इत्येवं रूपेण विंशति २० संख्या जाता पदार्थानाम्।

(६) षोडशान्तर्गतपञ्चतन्मात्रेभ्यः पञ्चमहाभूतानि भवन्ति, तानि च पृथिवी, जल, तेजो, वायु आकाशस्वरूपाणीति मिलित्वा सांख्यनये सर्वेषां पदार्थानां पञ्चविंशतिसंख्या जाताः।

विद्वन्मूर्धन्यमीमांसकशिरोमणिश्रीप्रभाकरनये सन्त्येष्टौ पदार्थास्ते च द्रव्यगुणकर्मसामान्यविशेषसमवायसादृश्यशक्तिस्वरूपाः सन्ति। अभावस्तु स्वरूपवानपि नोद्दिष्टः। प्रतियोगिनिरूपणाधीननिरूपणत्वात्, न तु तुच्छवत् अभावः।

तुतातभट्टमतानुयायिनां मते द्रव्यगुणकर्मसामान्यरूपाश्चत्वार एव पदार्थाः सन्ति।

इत्थञ्च पदार्थत्वस्य पदजन्यबोधविषयत्वरूपस्य प्रागुक्तस्य काव्येषु महाकाव्येषु च घटितत्वरूपसन्निवेशः सत्त्वात् दार्शनिकतत्त्वानां काव्योपयोगित्वं महाकाव्योपयोगित्वं च सर्वथा संगच्छते। यतः पदजन्यबोधविषयतारूपस्य सामान्यतः पदार्थत्वस्य केवलान्वयित्वेन सर्वत्र विद्यमानत्वात्, अप्रतिहतगतिकत्वाच्च काव्य, महाकाव्यघटकीभूतानि यानि सन्ति पदानि तैः पदैर्यादृशार्थविषयको बोधो जन्यते समुपस्थाप्यते वा तादृशबोधविषयतायास्तेषु तेषु अर्थेषु सर्वत्र विद्यमानत्वेन न तेषां पदार्थानां काव्य-महाकाव्योप योगित्वानुपपत्तिः। दार्शनिकतत्त्वानान्तत्राऽभावे शब्दबोधानुपपत्तिश्च स्यादित्यप्यनुसन्धेयम्।

तात्त्विकदृष्ट्या विचार्यमाणे सतीदमेवाऽऽयाति यत् प्रागुक्तेषु पदार्थेषु, एवं लोके ये सन्ति दृष्टिगोचरतां गताः पदार्थास्तेषु च काव्य, महाकाव्यघटकीभूतेषु च काव्य, महाकाव्यघटकीभूतेषु कश्चिदस्ति प्रमाता, कश्चिदर्थः प्रमेयभूतः कश्चित् प्रमाणभूतः, प्रमितिस्तु तुरीयः स्वयञ्च फलस्वरूपोऽर्थः।

"घटमहं जानामी" त्यत्राऽहम्पदार्थः प्रमाता, घटश्चास्ति प्रमेयभूतोऽर्थः, धात्वर्थश्चास्ति तुरीयः फलस्वरूपोऽर्थः। प्रमितिकरणञ्च प्रमाणम्, इत्येतेभ्यो नहि क्वापि किमप्यवशिष्टमस्ति यस्य चाऽर्थजातस्यप्रमात्रादिचतुष्टयातिरिक्तत्वं वक्तुं शक्ष्यामः। इत्थञ्च सर्वत्रैव व्याकरणादि, ज्यौतिषादिशास्त्रेष्वपि एवमेव सर्वेषां पदार्थानां प्रमात्रादिचतुष्टये एवाऽन्तर्भावो बोध्यः। इदञ्च सर्वमपि देयं (देन) दर्शनशास्त्रस्यैवेति विज्ञेयम्।

संस्कृतमहा-काव्येषु दार्शनिको दृष्टिः

सर्वेषां विषयाणां स्रोतांस्युपलभ्यन्ते संस्कृत-महाकाव्येषु; विशेषतो दर्शनशास्त्रस्य विभिन्न-धाराणां सिद्धान्ताः सर्वत्रोपलभ्यन्ते। दार्शनिक-विचारधारा तु प्रचलिता साहित्येन सहैव विज्ञेया।

व्यास-वाल्मीकि-कालिदासेभ्य आरभ्याष्टोत्तरशतशताब्दीपर्यन्तं महाकाव्येष्वनुस्यूतदर्शनधारणां विश्लेषणं, तत्प्रभावः, परिवर्तनम्, परस्परविनिमयश्चादयः प्रस्तुत गवेषणाया लक्ष्या भविष्यन्ति। औपनिषद्वाङ्मयादारभ्याष्टोत्तरशतशताब्दीपर्यन्तमुपलभ्यमानानां सर्वेषां दर्शनानां सङ्गतिषु कार्यमुख्यो लक्ष्यो भविष्यति।

काव्यशब्दार्थः—

'महाकाव्येषु दार्शनिको दृष्टिः' इति वाक्येऽस्मिन् त्रीणि प्रधानानि पदानि सन्ति-काव्यम्, दर्शनम्, दृष्टिश्च। संक्षेपत एषां त्रयाणां पदानामर्थे विचारः प्रस्तूयते। मूलरूपेण विचारणीयोऽयं विषयो यत् किं काव्यशब्दार्थः? काव्यशास्त्रैरालङ्कारिकैः सर्वथा दोषरहितौ, सगुणौ, सालङ्कारौ च 'शब्दार्थौ काव्यमि' ति मन्यते। उक्तञ्च—

'अदोषौ सगुणौ सालङ्कारौ शब्दार्थौ काव्यमि' ति।

अपरैः दोषवर्जितः, सगुणः सालंकारः, शब्दविशिष्टो योऽर्थः, अथवा अर्थविशिष्टो यश्शब्द एतदन्यतरत् काव्यमुच्यते। तद्यथा—

'दोषवर्जितः सगुणं सालंकारं शब्दविशिष्टार्थः अर्थविशिष्टशब्द एतदन्यतरत् काव्यमि' ति।

इतरैर्गुणालङ्कारसहितौ, दोषवर्जितौ शब्दार्थौ गद्यपद्योभयात्मकं काव्यलक्षणमुक्तम्। तदुक्तम्—

गुणालङ्कारसहितौ शब्दार्थौ दोषवर्जितौ।
गद्यपद्योभयमयं काव्यं काव्यविदो विदुः॥ इति।

(द्र० प्रमाणपद्धतिः, जयतीर्थविरचितः पृ० ५६)

काव्यप्रकाशकारेणापि दोषरहितौ, सगुणौ, सर्वतः सालङ्कारौ शब्दार्थौ काव्यलक्षणत्वेनाभिमतौ स्तः। तद्यथा—

तददोषौ शब्दार्थौ सगुणावनलंकृती पुनः क्वापि इति।

(द्र० का० प्र० पृ० १९९, सम्वत् १९२३, वाराणस्यां मुद्रितः)

रसङ्गगाधरादिसाहित्यग्रन्थेषु च दोषवर्जितं सगुणं तथा सालङ्कारं शब्दमेव काव्यं स्वीकृतवान्। तद्ग्रन्थेष्वर्थं काव्यलक्षणं नाङ्गीकृतम्। अर्थात्तत्रार्थे काव्यत्वस्य सर्वथा निषेधो विद्यते, तद्यथा—

पूर्वोक्तविशेषणविशिष्टः शब्द एव काव्यम्; नार्थः काव्यमिति।

(रसगङ्गाधरकृदादयः)

विद्याधरेण काव्यविषये—

'शब्दार्थौ वपुरस्य तत्र विबुधैरात्माभ्यधायि ध्वनिरिति'।

(एकावली पृ० १, १३)

अनेनोक्तं यच्छब्दार्थौ काव्यस्य शरीरम्, ध्वनिः आत्मे'ति। विद्वद्भिः काव्यस्य का चास्ति सम्पत्तिः ? इत्यस्या अपि दिग्दर्शनं विहितम्। तदुक्तम् 'काव्यसम्पत्तिसामग्री तु—शब्दार्थौ मूर्तिराख्यातौ जीवितं व्यङ्ग्यवैभवम्। हारादिवदलङ्कारास्तत्र स्यु-रुपमादयः।

श्लेषादयो गुणास्तत्र शौर्यादय इव स्थितिः।
आत्मोत्कर्षावहास्तत्र स्वभावा इव रीतयः॥
शोभामाधुर्यकं प्राप्ता वृत्तयो वृत्तयो यथा।
पदानुगुण्यविश्रान्तिः शय्या शय्यैव सम्मता॥
रसास्वादप्रभेदाः स्युः पकाः पाका इव स्थिताः।
प्रख्याता लोकवादीयं सामग्री काव्यसम्पदः॥ इति।

(प्रमाणपद्धतिः पृ० १२)

अर्थात् शब्दार्थौ काव्यमूर्तिः (स्वरूपः) उक्तः। वाङ्मयार्थवैभवन्तु काव्यजीवन-मुक्तम्। उपमादि अलङ्काराः कण्ठाभरणादि आभरणवत् काव्यालङ्कारा उक्ताः। यादृश-शरीरे शूरता वीरतादिगुणा मन्यन्ते, तादृशमेव काव्ये श्लेषादिकं गुण उक्तः। काव्यात्मा रसः, रीतयश्च स्वभाववत्सन्ति। माधुर्यः काव्यशोभास्ति। पदानुरूपा विश्रान्तिः काव्य-शय्या उक्ता। इत्थं पूर्वोक्तकाव्यसम्पत्तेः सामग्री उक्ता।

दृष्टिशब्दार्थः—

'दार्शनिकी दृष्टिः' इत्यस्मिन् संक्षेपतः 'दर्शनं तथा दृष्टिः' इमौ द्वौ विषयौ विचार-णीयौ स्तः। अनयोर्दृक्शक्तिं दृष्टिशब्दार्थो मन्यते-दृक्-शक्तिरेकाऽपि विषयभेदात् पञ्चविधो पचर्यते, दर्शनं, मननं विज्ञानं, सर्वज्ञत्वञ्चे'ति।

(सर्वद० सं० पृ० १६६ नकुली० ई० १८५८ कालिकाता)

दृष्टिः = विचारः, मननादिपर्यायवाच्यस्तीति मन्यते। प्रकृते दर्शनस्य मननात्मिकां दृष्टिमादाय महाकाव्येषु तस्यैव विचारः करिष्यते, अथवा पदार्थान्वेषणं करिष्यते। अर्थात् महाकाव्येषु कुत्र-कुत्र दर्शनसम्बन्धिनो विचाराः सन्तीत्यादिः।

दर्शनशब्दार्थः—

अधुना संक्षेपेण दर्शनशब्दार्थं विचार्य, तदनन्तरं महाकाव्येषु दार्शनिकदृष्टिरूप-विचारविषय उपस्थाप्यते।

सामान्यतः 'दर्शन' शब्दार्थः 'अवलोकनम्' अर्थाच्चाक्षुषप्रत्यक्षमितिः। यथा—'घटं पश्यामि' 'चैत्रमवलोकयामी' त्यादयः।

केचन दार्शनिकाः ज्ञानसामान्यमेव दर्शनशब्दार्थं मन्यन्ते। यथा—'विश्वं माया दृश्यत्वात् शुक्तिरजतवत्' 'जगन्मिथ्या दृश्यत्वात् शुक्तिरजतवत्' इत्यादिषु स्थलेषु सर्व-त्रानुमितिस्वरूपज्ञानमेवानीय दर्शनशब्दार्थस्योपपत्तिर्विहिता। अत्र चाक्षुष-प्रत्यक्षात्मकं दर्शनं नितान्तमपेक्षितमस्ति। तथा च—

'सूक्ष्मव्यवहितविप्रकृष्टाशेषचाक्षुषस्पार्शनादिविषय ज्ञानं दर्शनमि'ति विषयकं

(सर्वद० सं० प० १६६ नकुली०)

तज्ज्ञानशक्तिर्दर्शनं येन—चाक्षुषविषयरूपाणां तथा रूपाश्रितद्रव्याणां स्पार्शनादि विषयस्पर्शाणां तथा स्पर्शाश्रितद्रव्याणां ज्ञानं जायते। सत्यपि तानि परमाण्वादिरूपे सूक्ष्माणि सन्तु, अथवा केन मध्यवर्तिपदार्थेन व्यवहितानि सन्तु, अथवा दूरदेशस्थितानि सन्तु, सर्वेषां विषयाणां ज्ञानं जीवः स्वविशिष्टशक्त्या विदधातीति सिद्धान्तयन्ति।

महर्षिगौतमप्रभृतयो दार्शनिकाः तत्वज्ञानसाधनीभूतं शास्त्रमेव दर्शनं मन्यन्ते। दर्शनञ्च—नास्तिकास्तिकयोर्भेदेन द्विधा विभज्यते। तयोः षट्प्रकारकं नास्तिकं दर्शनम्। यथा—

चार्वाकः, जैनः, सौत्रान्तिकः, वैभाषिकः, योगाचारः, तथा माध्यमिकः। षड्-प्रकारकञ्चास्तिकं दर्शनम्। यथा—

'सांख्यः, योगः, न्यायः वैशेषिकः, वेदान्तः, मीमांसा चेति।

महाकाव्येभ्यो दर्शनस्य सम्बन्धः—

महाकाव्येभ्यो दर्शनस्य सम्बन्धोऽथवा महाकाव्येषु दर्मनसम्बन्धिपदार्थानां विचार एव तेषु दार्शनिकी दृष्टिरुच्यते। उदाहरणार्थं रघुवंशमहाकाव्यस्य प्रथमो मङ्गलश्लोकः प्रस्तूयते। यथा—

वागर्थाविव सम्पृक्तौ वागर्थप्रतिपत्तये।
जगतः पितरौ वन्दे पार्वतीपरमेश्वरौ॥ इति।

(रघु०। स० श्लोक)

श्लोकेऽस्मिन् महाकविकालिदासेन—माता पार्वती तथा परमपिता परमेश्वरो भगवान् शंकरो मयि सर्वथा प्रसन्ना भूत्वा मह्यं काव्यनिर्माणशक्तिं प्रयच्छन्तु अतः स्व-काव्यविषये शब्दार्थज्ञानाय तदर्थमीश्वरो जगतः पितरौ पार्वतीपरमेश्वरौ वन्द्येते = प्रणम्येते।

अस्मिन् मङ्गलश्लोके समस्तं विवेचनमस्ति दर्शनेनौ प्रौतम् च ओतं। अस्य प्रत्येकस्मिन् वाक्ये पदे च सन्निविष्टा दार्शनिकता, अत्र प्रत्येकस्मिन् पदे दार्शनिकता दरीदृश्यते = अनुभूयते च। 'वन्दे' इत्यस्मिन् पदे यदि—वन्दनपदार्थस्य ग्रहणं भवेत्तदा तस्मिन्नपि दार्शनिकता पूर्णतया प्रविष्टाऽस्ति, 'वागर्थाविव सम्पृक्तावि'त्यत्र तु दार्शनिकतायाः पूर्णाभि-व्यक्तिः। अत्र तु समस्ते शब्दखण्डे स्वरूपदर्शनमेव सन्निविष्टं वर्तते इति वयं स्वयमनु-भवामः। 'जगत्' पदार्थः 'प्रामाण्यवादे' विस्तरेण प्रपञ्चितं गदाधरेण। एषां सर्वेषामु-ल्लेखोऽग्रे करिष्यते।

वागर्थयोः सम्बन्धः—

'वागर्थाविव सम्पृक्तावि'त्यत्र वाग्रूपाया वाण्या अर्थस्य च सम्बन्धो वृत्तिरूपः सम्बन्धोऽस्ति। यतो हि वाणी शब्दरूपाऽस्ति। शब्दार्थयोः सम्बन्धो वृत्तिरूपः। तद्यथा

'सङ्केतो लक्षणा चार्थे पदवृत्तिः' इति।

(शक्तिवादः सामा० ख० पृ०।)

संकेतश्चास्ति शक्तिरूपः लक्षणारूपश्च। लक्षणा च स्वयं लक्ष्मीभूतस्यार्थस्यास्ति बोधिकाः। सापि वक्तुस्तात्पर्यानुपपत्तिस्थले कल्प्यते। प्राचीनास्तु लक्षणाया आवश्यकता

मन्वयानुपपत्तिस्थले दर्शयन्ति कथयन्ति वेति । अनेनैतत्सिद्धयति यत्--शब्दार्थयोः सम्बन्धो वाच्यार्थस्थले 'शक्तिः' लक्ष्यार्थस्थले च लक्षणा स्वीक्रियते । सिद्धान्तितञ्चैतदेव-विश्वनाथपञ्चाननेन--

'वृत्तिश्च शक्तिलक्षणान्यतरः सम्बन्धः । अत्रैव शक्तिज्ञानस्योपयोगः । पूर्वं शक्ति ग्रहाभावे पदज्ञानेऽपि तत्सम्बन्धेन स्मरणानुपपत्तेः । पदज्ञानस्य हि एकसम्बन्धिज्ञान-विधया पदार्थोपस्थापकत्वम्' इति ।

(न्या० सि० मु०, शब्द ख० शक्तिनि० प्र०)

अर्थाद्-वृत्तिः शक्तिलक्षणा अनयोरन्यतरः सम्बन्धोऽस्ति । अनयोर्ज्ञानमर्थस्यो-त्पत्तौ कारणम् । यदि शक्तिरूसम्बन्धस्य ज्ञानं पूर्वं न भवेत्तर्हि पदस्य श्रावणप्रत्यक्षात्मक ज्ञानेऽपि सति तस्य सम्बन्धेनार्थज्ञानस्योत्पत्तिः सर्वथाऽसम्भवा । यतो हि वाच्यार्थस्थले-शाब्दबोधकारणे उत्पत्तिरूपज्ञानस्य कारणं शक्तिमेव मन्यते । यथोक्तम्—

'वृत्तित्वं शाब्दबोधजनकोपस्थितिजनकज्ञानविषयत्वम् । अतः एव 'शाब्दबोधो-पयिकोपस्थितिजनकः पदपदार्थयोः सम्बन्धः कल्प्यते इति शब्दमण्यालोके मिश्रैरभिहित-मिति ।—पं० ज्वालाप्रसादकृत न्या० सि० मु० कृष्णा टी० शब्दखण्ड पृ० ५ प्र० सं०)

पदेन सह पदार्थस्य सम्बन्धः शक्तिरस्ति । अस्माच्छब्दादयमर्थो बोद्धव्यः, एतस्याः स्वेच्छाशक्तेरुल्लेखं सृष्टिप्रारम्भे जगन्नियन्ता परमेश्वरश्चकारः । इमा-मेवेच्छारूपां शक्तिमधिकृत्याधुनिकशब्दानां शक्तेर्निश्चयोऽस्माभिः क्रियते । अतः केचन केवलमीश्वरेच्छामेव शक्ति मन्यन्ते । तदुक्तम्—

'शक्तिश्च पदेन सह पदार्थस्य सम्बन्धः । सा च अस्माच्छब्दादयमर्थो बोद्धव्य इति ईश्वरेच्छारूपेति । (द्र० तत्रैव)

'नव्यास्तु ईश्वरेच्छा न शक्तिः किन्तु इच्छैव' इति । (द्र० तत्रैव पृ० ८)

वैयाकरणैः पदपदार्थयोर्वाच्यवाचकभावस्य नियामकसम्बन्धान्तरमेव शक्तिर्मन्यते । तद्यथा—

पदपदार्थयोर्वाच्यवाचकभावनियामकं सम्बन्धान्तरं शक्तिः, इति शाब्दिका वदन्ति ।

प्राचां मतेनाविनाभावसम्बन्धमेव शक्तिः स्वीक्रियते । अर्थाच्छब्दं विनाऽर्थस्य नहि किमप्यस्तित्वम् अर्थं विना शब्दस्य च न काऽपि सत्ता । अस्याभिप्रायं यद्अन्योन्या-श्रय एव अविनाभावरूपः सम्बन्धो भवति । तदुक्तम्—

'अविनाभाव एव शक्तिः, इति प्राञ्च अङ्गीचक्रुः' । इति ।

(द्र० तर्कप्रकाशः (शितिकण्ठी) ले०—श्रीकण्ठः)

वन्दनपदार्थः—

'जगतः पितरौ वन्दे' अत्र वन्दनपदार्थेऽपि दार्शनिकताऽवच्छेककुक्षिनिक्षिप्ता वर्तते, पूर्वमप्युक्तमेतत् । सम्प्रति—तस्यैव विवेचनं विधीयते ।

वन्दनस्तु नमस्कारस्त्रिविधः परिकीर्तितः ।
कायेन मनसा वाचा स्वाहंकारविमर्दनः ॥ इति ॥

(भक्तिदर्शनम्—पृ० १४९)

यमुद्दिश्य स्वापकर्षबोधानुकूलव्यापारविशेषस्तस्य स नमस्कारः ॥

(न्यायास० जरीप्र० लौगाक्षिभास्वरस्य पृ० ७३)

अयमाशयः—यमुद्दिश्य स्वापकर्षबोधानुकूलव्यापारस्य प्रदर्शनं नमनकर्ता पुरुषः करोति, तस्मै एव स नमस्कारो मन्यते। यथा—'विश्वनाथमूतावनुप्रविष्टांतामतीन्द्रियामर्थादिदृश्यात्मिकां शक्तिमुद्दिश्य यदि कोऽपि नमति तन्नमनन्तु तस्मै एवादृश्यशक्त्यै नमिष्यते। प्रकारान्तरेणापि सिद्धान्तितमेतत्—

'स्वापकर्षबोधानुकूलः विलक्षणः स्वीयव्यापार इति परमार्थः' इति।

(गदाधरींव्युत्पत्तिवादः कार० ३ पृ० १०१)

देवानां स्तुतिर्यत्र प्रवर्तते तत्रापि आदिमध्यावसानेषु नमस्कारो नितान्तमावश्यकोऽस्ति। शिष्टैस्तं माङ्गलिकं मत्वा नमस्कारपदार्थं मङ्गलस्वरूपमेवोक्तम्। तदुच्यते—

'यथा–देवतास्तुतिनमस्कारादिषु मङ्गलव्यवहारः शिष्टानाम्' इति।

(मूलमथुरानाथो (तत्वाचिन्तामणिव्याख्या) पृ० ७६७ कालिकातातः प्रकाशितम्)

इतरैः—

'अयं मत्त उत्कृष्टः, अहमस्मादपकृष्ट इति ज्ञानविशेष इत्युच्यते।'

(तर्कप्रकाशः, श्रीकण्ठकृत् पृ० ३)

इत्यादिभिर्बहुभीरूपैर्वन्दनपदार्थः वन्दनघटितस्थलविशेषेषु सर्वत्र दार्शनिकदृष्ट्या ओतः प्रोतोऽस्ति।

इत्थं न केवलानि महाकाव्यानि, अपि तु सम्पूर्णः साहित्यिकवाङ्मयो दार्शनिकदृष्ट्या परिपूर्णमवलोक्यते।

'काणादं पाणिनीयञ्च सर्वशास्त्रोपकारकमि 'त्याद्युक्तिरप्येतदाधारेणैव चरितार्थी भवति।

जगत्पदार्थे दार्शनिकदृष्टिः—

'जगतः पितरौ वन्दे' अस्मिन् वाक्ये जगत्पदार्थेऽपि पूर्णदार्शनिकता सन्निविष्टाऽस्ति। जगत्पदार्थविषये श्रीगङ्गेशापाध्यायो न्यायकर्तुः श्रीगौतममुनेः कथनस्य किञ्चिद्विवेचनं स्वचिन्तामणि' ग्रन्थे चकार। अत्र तु केवलं तावन्मात्रदार्शनिकदृष्ट्या आबद्धजगत्पदार्थस्यात्यन्तसंक्षिप्तोल्लेखस्य किंचिद् दिग्दर्शनं क्रियते।

सम्पूर्णमिदं विश्वं दुःखपङ्कनिमग्नमास्तीति जगतो दुःखरूपतां ज्ञात्वा मुनिः अत्यन्तं दयापरवशोऽभूत्। तदा तेन करुणावरेण मुनिमाऽष्टादशविद्यास्वर्थात्—

अङ्गानिवेदाश्चत्वारो मीमांसा न्यायवितरः।
धर्मशास्त्रं पुराणञ्च विद्या ह्येताश्चतुर्दश॥
आयुर्वेदो धनुर्वेदो गान्धर्वश्चेति ते त्रयः।
धर्मशास्त्रञ्च विज्ञेयं विद्या अष्टादशैव तु॥ इति।

(प्रामाण्यवाद टीका—)

आस्वष्टादशविद्यासु सर्वश्रेष्ठा तथा प्रशस्ततमा आन्विक्षिकोविद्यान्यायविद्या प्रणीता। उक्तञ्च—

'अथ जगदेव दुःख-पङ्कनिमग्नमुद्दिधीर्षुरष्टादशविद्यास्थानेष्वभ्यर्हिततमामान्वीक्षिकीं परमकारुणिको मुनिः प्रणिनाय'। इति।

(प्रामाण्यवादः (चिन्तामणि०) पृ० ५)

प्र०—किमस्ति जगत्पदार्थः ?

उ०—मिथ्याज्ञानविपरीतज्ञानादिदूषितज्ञानैरुत्पन्नवासनया विशिष्ट आत्मसमूह एव जगत्पदार्थोमन्यते। यथा—केचन विद्वांसः स्थावरजङ्गमात्मकान् समस्तान् पदार्थानेव 'जगत्' पदवाच्यत्वेन कथयन्ति। तदुक्तम्—

'जगत् स्थावरजङ्गमात्मकं सर्वपदार्थजातम्'। यथा—

यच्च किञ्चिज्जगत्सर्वं दृश्यते श्रूयतेऽपि वा।
अन्तर्बहिश्च तत्सर्वं व्याप्य नारायणः स्थितः॥ इति।

(नारायणोपनिषत्)

पुनश्च—'यदा स देवो जागर्ति तदेदं चेष्टते जगत्'। इति च।

(मनुस्मृ० अ०। श्लो० ५२)

अर्थाद् यत्किञ्चिदपीदं जगद् दृग्गोचरोऽथवा श्रुतिगोचरो भवति, तस्य सर्वस्य बाह्याभ्यन्तरे सर्वावयवावच्छेदेन भगवान् नारायणो व्याप्य स्थितोऽस्ति।

यदा च चैतन्यरूपः स प्रभुर्नारायणो जागर्ति तदेवेदं जगच्चेष्टात्मकं क्रियाशीलञ्च जायते। भूयोऽप्युक्तम्—

जगद्योनिरयोनिस्त्वं जगदन्तो निरन्तकः।
जगदादिरनादिस्त्वं जगदीशो निरीश्वरः॥ इति च।

कुमारसं० (सर्गः–२ श्लो० ९)

अर्थात्—प्रभो! त्वमस्य जगतः कारणमकारणञ्चाप्यसि। त्वमस्य जगतः संहर्ताऽसि, असंहर्ता चाप्यसि। तथा त्वमस्य जगत आदिरप्यसि, अनादिरप्यसि च। एवं त्वमस्य जगतः स्वामी असि नापि चे'ति। इदमेवास्ति भगवतः सच्चिदानन्देतिस्वरूपलक्षणलक्षितस्य निर्विकारस्य निराकारस्य निर्गुणस्य निष्कलस्य परब्रह्मपरमेश्वरस्याद्वैतस्य वास्तविकं स्वरूपम्। एतेन मनुस्मृतिघटकीभूतेन श्लोकेन प्रागुक्तेन ब्रह्मणः सगुणनिर्गुणमयात्मकं रूपं व्याख्यातम्। उक्तञ्च—

"सगुणनिर्गुणस्वरूपं ब्रह्म"—त्रिपाद्विभूतिमहानारायणोप०—१।१

पितृत्वविवेचनम्

इदानीन्तनकालावच्छेदेनाहं पितृनिष्ठंपितृत्वशब्दार्थो विचार्यते। "जगतः पितरौ" इति वाक्यघटकीभूतपितृनिष्ठपितृत्वञ्च जगत्पितृवृत्तिपितृत्वमेवेह विवक्षितमस्ति, न तु श्राद्धोद्देश्यत्वरूपं पितृत्वम्, सपिण्डीकरणोत्तरश्राद्धजन्यफलभागित्वरूपं वा पितृत्वं तथा। यतः खलु इदञ्चास्ति पितृत्वं श्राद्धीयदेवतास्वरूप'पितृनिष्ठमिति विज्ञेयम्। आहोस्वित् "त्वमेव माता च पिता त्वमेव" इत्यादि--श्लोकात्मकपद्यघटकीभूतयुस्मत्पदाभिधेय जगत्पितृनिष्ठं पितृत्वमेवेह विवक्षितमित्यवधेयम्। यथोक्तवान् याज्ञवल्क्यः--

१०

"वसुरुद्रादितिसुताः पितरः श्राद्धदेवताः" एवं प्रीणयन्ति मनुष्याणां पितॄन् श्राद्धेन तर्पिताः ॥

याज्ञव० स्मृ० अ० १ श्लो० २६८

एवमन्येऽपि सन्ति एतदर्थातिरिक्ता, अर्थपदाभिधेयाः पितृपदार्थाः पितृत्वपदार्था-वा ये चात्र साम्प्रतं सङ्ख्यातुमेव न पार्यन्ते मादृशैः साधारणमनुजैर्नात्र परिगण्यन्ते विचार्यन्ते वेति । तेषां विचारस्य विचारधाराया वा सर्वथाऽत्राऽनुपयुक्तत्वात् ।

दार्शनिकदृष्टिरूपवन्दनशब्दार्थविचारः

इदानीं "जगतः पितरौ वन्दे" इत्यादिवाक्यघटकीभूत 'वन्दन' पदार्थो विचार्यते ।

काव्यमहाकाव्यघटकीभूतश्लोकान्तर्गततत्तत्पदार्थानां या दर्शनदर्शितदिशा विचारधारापद्धतिः सैव खलु काव्येषु महाकाव्येषु वा दार्शनिकदृष्टिः कथ्यते । एवम्भूता हि विचारधारापद्धतिः सर्वत्रोपलभ्यते । काव्येषु महाकाव्येषु वा दर्शनदर्शितादिशा दार्शनिकी दृष्टिः सर्वत्रैवाऽन्तः सन्निविष्टा चास्तीत्यत्र नास्ति लेशतोऽपि सन्देहानध्यवसायावसरः ।

इत्थञ्च "जगतः पितरौ वन्दे" इत्येतद्वाक्यघटकीभूत—'वंदन' पदार्थो दर्शनदर्शितदिशा विचारगोचरीभूतो विधीयते । भक्तिरत्नावलीनामके महाकाव्यग्रन्थे—

पादौ हरेः क्षेत्रपदानुसर्पणे-
शिरो हृषीकेशपदाभिवन्दने ।
कामञ्च दास्ये न तु कामकाम्यया-
यथोत्तमश्लोकजनाश्रया रतिः ॥ ५ ॥

भक्तिरत्नावली, तृतीयं विरचनं, श्लो० ५

अयं श्लोको भगवतः परमेश्वरस्य गुणगणान् गणयति तथा स्वघटकीभूतेन 'हृषीकेशपदाभिवन्दने इत्यनेन च पदेन वाक्येन वा तथा भगवच्चरणनमस्कारे'त्यर्थं बोधयति, अभिवन्दननमस्कारयोश्चाऽभेदम् अथैक्यस्वरूपं योजयति च ।

तथा च "जगतः पितरौ वन्दे" इत्येतद्वाक्यघटकीभूतस्य 'वन्दन' पदस्य नमस्कारार्थकतया, नमस्कारस्य च स्वापकर्षबोधकप्रयोक्तृव्यापारार्थकत्वमनुभवबलाल्लभ्यते ।

नन्वेवं सति प्रयोक्तृव्यापारस्य नमस्कारपदार्थत्वे प्रकृते 'जगतः पितरौ' इत्यत्र का गतिः स्यादिति विचार्यताम् । एवमेव 'गुरुं नमस्करोति' इत्यत्रापि गतेर्विचारो विधेयः । तथैव 'गुरुं प्रणमति' इत्यादौ सर्वत्र द्वितीयाया अनुपपत्तिरेव स्यात् । यतो जगतो गुरोश्च धात्वर्थतावच्छेदवत्ताया अभावेन कर्मत्वानुपपत्तेः । अतः प्रकारान्तरमन्विष्यताम् ।

तच्च प्रकारान्तरं "स्वावधिकोत्कर्षवत्तया ज्ञापनं" वक्तव्यम् । इत्थञ्च 'नमस्कार' पदस्य स्वावधिकोत्कर्षवत्तया ज्ञापनरूपो नमस्कारो नमस्कारकर्तरि सन्तिष्ठमानोऽपकर्षवत्त्वं द्योतयति । "मत्तोऽयमुत्कृष्टः" इति उत्कृष्टताप्रकारकबोधनानुकूलव्यापारविशेषञ्च बोधयति ।

अस्मिन् नमस्कारविषये चिन्तामणिकृतः श्रीगङ्गेशोपाध्याया इत्थं स्वाभिप्रायं प्रकटयन्ति—

"यमुद्दिश्य यस्य स्वापकर्षबोधनानुकूलव्यापारविशेषस्तस्य स नमस्कारः" ।

चिन्तामणौ, मङ्गलप्रकरणे १, दृ० १०१

"स्वापकर्षबोधानुकूले विलक्षणः स्वीयैव्यापार इति तु परमार्थः" । अत्र स्व-मुच्चारयिता ।

गदाधरीयव्युत्प०, कारक ४, पृ० १०९

यथा देवतास्तुतिनमस्कारादिषु मङ्गलव्यवहारो भवति भव्यानां शिष्टानां जनानाम् इत्यादौ ।

मूलमथुरानाथी, (चिन्तामणिव्याख्या) मङ्ग० १, पृ० १०१

यथा वा 'हरये नमः' 'विष्णवे नमः' इत्यादौ सर्वत्र नमस्कारो व्यवह्रियते । अथ "नमः स्वस्तिस्वाहास्वधालंवषड्योगाच्च"–पा० सू० २।३।१६ । इत्यनेन चतुर्थी विधायकेन सूत्रेण चतुर्थी विधीयते ।

स्वापकर्षबोधजनकतावच्छेदकजातिमत्वं वा नमस्कारत्वम्" इत्यपि तत्रैव ।

मूलमथुरानाथी, मङ्ग० १, पृ० १०४

अथवा मानत्वव्याप्यजातिविशेषो नमस्कारत्वम् । अयं मत्त उत्कृष्टः, अहमस्मादपकृष्टः, इति ज्ञानविशेषो वा । स च विशेषः—व्यवहारसाक्षिको जातिभेदस्वरूपः । कायिकाद्यन्यतमत्वं वा नमस्कारत्वम् इत्यपि विज्ञेयम् ।

न्यायसिद्धान्तदीपः, शशधरस्य, पृ० ३

तथा चेमे वन्दनापरपर्यायभूतनमस्कारपदजन्यवोधविषयतावन्तौऽर्थाः प्रदर्शिताः । काव्येषु महाकाव्येषु वा सर्वत्रेदमेवाऽस्ति प्रयोजनं दार्शनिकतत्त्वानां निरूपणस्य । तेषां प्रागुक्तानां दार्शनिकतत्त्वानां काव्येषु महाकाव्येषु वा यथास्थाने प्रयोगसंविधानं सन्निवेशो वा भवति तदीयौचित्यविषयको विचारः । अयञ्चौचित्यविषयको विचारः खलु अनुपदमेव विवेचयिष्यते ।

वन्दनशब्दार्थविचारः—

'स्वापकर्षबोधनानुकूलः स्वीयव्यापारः'—तत्रैव यथा—'हरये नमः 'हराय नमः' 'बाबाविश्वनाथाय नमः' इत्यादिस्थलेषु सर्वत्राऽयमेवास्ति नमः पदार्थः । स्वम् उच्चारयिता पुरुषः । अवधित्वम् अवधिमत्त्वम् अयमस्ति चतुर्थीविभक्तेरर्थः । तस्य च वन्दनाऽपरपर्यायभूतनमस्कारपदार्थंघटकीभूतेऽपकर्षेऽन्वयः ।

तथा च बाबाविश्वनाथभक्ताद्युच्चारितात् 'बाबाविश्वनाथाय नमः' इत्यादिपदात् खलु बाबाविश्वनाथावधिकतादृशभक्तापकर्षबोधानुकूलो भक्तीयो व्यापार इत्याकारको बोधस्तत्र निर्विवादं जायते ।

(गदाधरयीव्युत्पत्तिवादः, का० ४, पृ० १०१)

तत्रापि च कायिकवाचिकमानसक्रियाविशेषस्वरूपे स्वापकर्षबोधानुकूलव्यापारे

कश्चन विशेषो वाच्यः, स च जातिविशेषः, स च नमस्कारत्वरूपः, जगन्नाथं भगवन्तं बाबाविश्वनाथं नमस्कृत्य आहोस्वित् तं नमस्करोमीत्यनुभवसाक्षिकः।

चिन्तामणिः १, पृ० १०३—

अत्र शाब्दिका इत्थं व्याहृन्ति व्यवहरन्ति च—यत् नमस्करोति, नमस्कृत्य इत्यादौ सर्वत्रैव 'कृ' धातोरेव नमनार्थकत्वं 'नति'रूपो वाऽर्थः। नमः पदं तदर्थद्योतकः। तेन 'नारायणं नमस्कृत्य' इत्यादौ द्वितीयाविभक्तिः समायोजिता भवति।

'उपपदविभक्तेः कारकविभक्तिर्बलीयसी,—इति न्यायात्।

तत्रापि नमसो वाचकत्वे 'नमस्कृत्य ब्राह्मणेभ्यः' इत्येवंरूपेण 'नमः' शब्दप्रयोगे कृते सति चतुर्थी स्यात्, अर्थात् 'नमस्कृत्य' इत्यस्य योगेऽपि सति चतुर्थी विभक्तिः प्रसज्येत। 'नमःस्वस्तिस्वाहाऽलंवषड्योगाच्च'।

पा० सू० २।३।१६।

इत्यत्र त्यागार्थकनमनार्थकयोरुभयोर्ग्रहणं जायते। त्यागार्थकोऽपि 'नमः' शब्दः प्रयुज्यते क्वचित्। यथा—'एषोऽर्घ्यः शिवाय नमः' नमः शब्दार्थस्त्याग एवास्ति।

गदा० व्युत्प० वा० का० ४, पृ० ९९

अत्र शाब्दिकाः खलु इत्थं प्रोट्टङ्कयन्ति यत् 'स्वस्वत्वनिवृत्त्यनुकूलो व्यापारस्त्यागः। यथा—'एषोऽर्घ्यः शिवाय नमः' इत्यदौ त्यागो नमः शब्दार्थः। अस्मिन् शाब्दिकनये 'उद्देश्यत्वम्' चतुर्थ्यः। इत्थञ्च 'एषोऽर्घ्यः शिवाय नमः' इत्यत्र शिवोद्देश्यक विषयीभूतोऽर्घ्य इति शाब्दबोधो भवतीति भावः।

द्रष्टव्योऽयं विषयः लघुमं०, का० ४, पृ० १०५

अपरे तु मन्त्रकरणकस्त्यागोऽर्थः। यथा—'पुष्पमिदं विष्णवे नमः' इत्यादौ तादृश एव त्यागोऽर्थः खलु अनुभूयते। अत्र प्रीत्युद्देश्यकत्वं तदिच्छाधीनत्वरूपं नमः पदार्थे मन्त्रकरणकयागे चतुर्थ्या बोध्यते। प्रकृत्यर्थस्य विष्वादेः प्रीतौ तदिच्छायां वाऽन्वयो भवति। एवञ्च विष्णूद्देश्यकमन्त्रकरणकत्यागस्य कर्मेदं पुष्पम् इति शाब्दबोधो जायते।

केचन विद्वांसः—'अपकृष्टत्वबोधनानुकूलोव्यापारो 'वन्दन' पदार्थः। यथा—"श्रीबाबाविश्वनाथय नमः" इत्यादौ सर्वत्राऽयं वन्दनपदार्थो घटते। अत्राऽपकृष्टत्वं जगद् वन्द्य श्रीबाबाविम्वनाथावधिकं सदेवप्रयोक्तृत्वावच्छिन्ननिष्ठं प्रतीयते। तादृशव्यापारोऽपि प्रयोक्तृत्वावच्छिन्ननिष्ठ एव भासमानो भवतीति भावः। व्यापारश्च तत्र करचरणसंयोगरूपः, आहोस्वित् करशिरः संयोगरूप एव। चतुर्थीविभक्तेरर्थश्चोद्देश्यत्वम्। इत्थञ्च बाबाविश्वनाथोद्देश्यकस्तादृशव्यापारस्तत्र प्रतीयते।

सुस्पष्टीकृतोऽयं विपयो लघुनं० का० ४, पृ० १०५

अपरे दार्शनिकमनीषिणः—'अयं मत्तोऽस्ति उत्कृष्टः, अहञ्चास्मादपकृष्ट इति ज्ञानविशेष एव वन्दनपदार्थो नमस्कारपदार्थो वेति वदन्ति।

तर्कप्रकाशः, श्रीकण्ठविरचितः १, पृ० ३

स च वन्दनापरपर्यायभूतो नमस्कारस्त्रिविधः।

(१) कायिकः—

(२) वाचिकः—

(३) मानसिकः—

(१) तत्र कायिकादिनमस्कार लक्षणानि द्रष्टव्यानि खलु योगिनी तन्त्रे गन्धर्व तन्त्रे च प्रोक्तानि। तदर्थं व्यर्थपरिश्रमो न विधेयः—तत्रैवोल्लिखितानि खलु दर्शन-गोचरीभूतानि विधेयानि यथोक्तम्—

जानुभ्यामवनीं गत्वा संस्पृश्य शिरसा क्षितिम्।
क्रियते यो नमस्कारः प्रोच्यते कायिकस्तु सः॥ गन्धर्व तन्त्रे

अर्थात् स एव खलु कायिको नमस्कारः प्रोच्यते, यो जानुभ्याम् अवनीं = पृथिवीं गत्वा (अर्थात् घुटनों को पृथिवी के ऊपर टेककर, सिर से पृथिवी का स्पर्श कर) नमस्कारः क्रियते।

२. वाचिको नमस्कारः—

या स्वयं गद्यपद्याभ्यां घटिताभ्यां नमस्कृतिः।
क्रियते भक्तियुक्तेन वाचिकस्तूत्तमः स्मृतः॥

अर्थात् या नमस्कृतिः=नमस्कारः = प्रणामः = वन्दनं वा मानवेन सदभावना-भाविताऽन्तःकरणावच्छिन्नभक्त्या गद्यपद्यावलिद्वारा क्रियते सा नमस्कृतिर्नमस्कारो वा वन्दनं वा उत्तमकोटिको नमस्कारः कथितः।

३. मानसिको नमस्कारः—

इष्टमध्यानिष्टगतैर्मनोभिस्त्रिविधं भवेत्।
नमनं मानसं प्रोक्तमुत्तमाधममध्यमम्॥
—गन्धर्वतन्त्रे, वाचस्पत्येऽपि

इत्थञ्चोत्तममध्यमाऽधमात्मकं त्रिविधं नमनं मानसं प्रोक्तम् अस्माकं प्राचीनाचार्यचरणैः।

प्रकारान्तरेण वन्दनं नमस्कारो वा पुनर्द्वैविध्यमिष्यति, ऐहिक, आमुष्मिकभेदात्। तत्रैहिकस्तावद् यो नमस्कारो रात्रिन्दिवमस्माभिर्बाबाविश्वनाथस्य चरणारविन्दयोः क्रियते स खल्वैहिको नमस्कारो वन्दनं वा कथ्यते।

आमुष्मिकश्च नमस्कारः कारीरीयागादौ जायमानो द्रष्टव्यः। विशेषस्तु न्याय-सिद्धान्तदीपेऽवलोकनीय इति।

वेदान्तमतेन दार्श० दृष्टौ तुलनात्मकं व्याख्यान्तरम्—

दार्शनिकी दृष्टिर्विलोक्यताम्। तथाहि—

यस्मान्न जातः परो अन्यो अस्ति-
य आविवेश भुवनानि विश्वा।
प्रजापतिः प्रजया संरराणस्त्रीणि-
ज्योतींषि स च ते स षोडशी॥
यजुर्वेदः—८।३६।

अर्थात् यस्मात् = सच्चिदानन्दलक्षणलक्षितात् पुरुषोत्तमत्वेन ख्यातिं गतात् परब्रह्मपरमेश्वरात्। अन्यः। परः = श्रेष्ठ = उत्तमः। न। जातः। नाऽप्यस्ति। अर्थात् प्रकृतिः, पुरुषः; क्षरोऽक्षरश्च यदपेक्षया निम्नकोटौ सन्ति परिगणिताः स एव सर्वोच्चकोटिमाटीकमानः परमात्मा परब्रह्मपरमेश्वरः :पुरुषोत्तम' इत्याख्यया गीयते। यः = परमात्मा पुरुषोत्तमः पुरुषधर्मसंसर्गशून्यत्वात् नित्यशुद्धबुद्धमुक्तस्वभावः। विश्वा भुवनानि = सकलभुवनेषु = भूर्भुवः स्वरादिलोकेषु। आविवेश = व्यापकत्वेन सर्वभूतसंयोगित्वेन प्रविष्टो बभूव। प्रजापतिः = प्रजायाः स्वामिभूतः परमात्मा। प्रजया = स्वीयप्रकटीकृत प्राकृतिकप्रजातः। संरराणः = सम्यग् रममाणः। त्रीणि ज्योतींषि = त्रित्वसंख्याकानि अग्नि, विद्युत्, भास्करेत्याख्यानि ज्योतींषि। सचते = प्रकाशयति। स षोडशी = स परमपिता परमेश्वरः, (१) इच्छा, (२) प्राण, (३) श्रद्धा, (४) पृथिवी, (५) जल, (६) अग्नि, (७) वायु, (८) आकाश, (९) दशविधेन्द्रियाणि = चक्षुरादिपञ्चज्ञानेन्द्रियाणि वागादिपञ्चकर्मेन्द्रियाणि च। (१०) मनः, (११) अन्नम्, (१२) वीर्य, (१३) तपः, (१४) मन्त्र, (१५) लोक, (१६) नाम, एतान् षोडश लोकान् सचते = सेवते, अर्थादितेषु सर्वत्र व्यापकत्वेन सन्तिष्ठते इति तु परमार्थः स एव खलु परमपिता परमेश्वरः पुरूषोत्तमः।

अपि च पुनः लोके वेदे च प्रथितः पुरुषोत्तमो दार्शनिकदृष्टिमापन्नः स्तूयते, निरूप्यते तदीयं दार्शनिकं वा स्वरूपं प्राकाश्यं नीयतेऽथर्ववेदमन्त्रेणापि। तथापि—

'तदिदास-भुवनेषु ज्येष्ठं यतो जज्ञ उग्रस्त्वेषनृम्णः।
सद्यो जज्ञानो नि रिणाति शत्रूननु यदेनं मदन्ति विश्व ऊमाः' ॥

अथर्ववेदः—५-२-१

अयमर्थः—तत्-इत् = तद् ब्रह्मैव। भुवनेषु = प्राग्रुक्तेषु भूरादि चतुर्दशभुवनेषु। ज्येष्ठम् = सर्वोत्कृष्टतं श्रेष्ठञ्च। आस = अस्ति। यतः = यस्माद् ब्रह्मणः = परमात्मनः कृपात एव। उग्रः = बलवान्। त्वेषनृम्णः = तेजोवान् भगवान् भास्करः। जज्ञे = प्रकटीभूतो बभूव। सद्यो जज्ञानः = तत्कालमेव प्रकटीभूय स सूर्यः। शत्रून् = शत्रुस्वरूपान् शैत्य, शीत अन्धकारान्। नि रिणाति = निःशेषरूपेण नाशयति। यत् विश्वे ऊमाः = जागतिक सम्पूर्णप्रजाः। एनम् = सूर्यं समवाप्य। अनुमदन्ति = अनुमदन्ति = अनुमोदम् = हर्षप्रकर्षम् = प्रसन्नतां प्राप्नुवन्ति।

अयमभिप्रायः—गीतायां प्रोदृङ्कित्ताभ्यां क्षराऽक्षराभ्यामपि चास्ति सर्वथा समुत्कृष्टः सर्वोत्तमः पुरूषोत्तमः परमात्मा। स एव च वेदेष्वपि तथाविधत्वेन गीयते, अर्थात् यो हि पुरूषोत्तमो यावतोऽपि जागतिकान् पदार्थान् जगच्चाऽवच्छेदावच्छेदेन व्याप्य सन्तिष्ठमानो वर्तते स एव पुरूषोत्तमो भगवान् परमपिता परमेश्वरो विश्वात्मतः प्रजापतिर्भूत्वा स्वयं स्वोद्भावितायां प्रजायां रमणं विधत्ते, सकलाश्च स्वीयाः प्रजाः साक्षित्वेन पश्यति। तमेव साक्षित्वेन द्रष्टारं पुरूषोत्तमं ज्ञानमयीदृष्टिसम्पन्नो विद्वान् पुरुषो नित्यनिरन्तरब्रह्मनिष्ठया निःशेषरूपेण विगतरजस्तमोगुणकार्यत्वात् विशुद्धसत्त्वभावमापन्नः परमामनुत्तमफलप्रदानकर्त्रीं सिद्धिं समनुप्राप्तो योगी केवलं तं ब्रह्म मन्वानः समुपासते। सर्वमपि जगत् सर्वेऽपि जागतिकाः पदार्थास्तत्रैवं स्वप्रकाशचिदात्मके ब्रह्मणि निवसन्ति

सन्तिष्ठन्ते च। सर्वेऽपि भगवन्तो भास्करप्रभृतयः प्रकाशस्वरूपाः अपि पदार्थास्तत एव समुत्पद्य सर्वमपि चराचरात्मकं जगत्-जागतिकांश्च पदार्थान् प्राकाश्यं नयन्ति, तमोऽन्धकारञ्चाऽपनयन्ति दूरीकुर्वन्ति च।

अस्यैव च तमोऽन्धकाराऽपनयनकर्तु = जागतिकान् सर्वानिव पदार्थान् प्राकाश्यं नेतुः परब्रह्मपरमेश्वरस्य भयादग्निस्तपति येन तापेन शीतापनयनादिकं कार्यं जायते। सूर्योऽपि तस्यैव भयात्तपति, येन शीतापनयनस्वरूपं कार्यमन्धकारापनयनरूपञ्च कार्यं भवति, एवम् इन्द्रवायुप्रभृतयोऽप्यस्यैव भयात् स्वीयं स्वीयं सर्वमप्यनित्यं कृत्यं सम्पादयन्ति। तथा चोक्तम्—

भयादस्याऽग्निस्तपति भयात्तपति सूर्यः।
भयादिन्द्रश्च वायुश्च मृत्युर्धावति पञ्चमः॥

कठोपनि० २।३।३

पुनस्तत्रैव—"तस्य भासा सर्वमिदं विभाति"।—तत्रैव।२२।१५।

अयमेव सर्वस्य द्रष्टा, अयमेव च ज्योतिषां ज्योतिः। यथोक्तम्—

"सर्वस्य द्रष्टा"। नृसिंहोत्तरतापनीयोप० २।

"ज्योतिषां ज्योतिः"। त्रिपाद्विभूतिमहानारायणोप० ४।१

"जाग्रत्-स्वप्न-सुषुप्त्यादिप्रपञ्चं यत् प्रकाशते तद्ब्रह्म"।

कैवल्योपनि० १।१७

किमत्र वयमधिकं ब्रूमहे—मुमुक्षवोऽपिजना अस्यैव पुरुषोत्तमस्य भगवतः परमेश्वरस्य प्रसादभाजनं स्वात्मानं मन्यमाना विधातुकामा वा खल्वस्यैवोपास्ति सञ्चरन्ति, येन भगवतः पुरुषोत्तमस्योपास्ति प्रकुर्वतां तेषां हृदि रागादिदोषा मा जायन्ताम्। अपि च—

"यदादित्यगतं तेजो जगद् भासयतेऽखिलम्।
यच्चन्द्रमसि यच्चाग्नौ तत्तेजो विद्धि मामकम्"॥

गीता—१५।१२

अर्थात् भगवतो भास्करस्याऽपरपर्यायभूतस्याऽऽदित्यस्य बाह्याऽऽभ्यन्तरप्रदेशाऽवच्छेदेन सन्तिष्ठमानं वर्तमानं वा यत्तेजोऽखिलं जगद् भासयते, एवं चन्द्रमसि वर्तमानं यत्तेजोऽखिलं जगद् भासयते, तथैवाऽग्नौ स्वस्थितिमापन्नं यत्तेजोऽखिलंवन्हिमद्देशाऽवच्छिन्नं जगद् भासयते तत्र सर्वत्र तत्तेजो मामकं विद्धि।

अपि चेयमेव पुनर्दार्शनिकी दृष्टिर्वेदगताऽप्यनुसन्धेया। यथा—

"तस्माद्वै विद्वान् पुरुषमिदं ब्रह्मेति मन्यते।
सर्वा ह्यस्मिन् देवतागावो गोष्ठ इवाऽवसते॥

अथर्ववेदः—११।८।३२

अयमर्थः—तस्मात्। वै = निश्चयेन। विद्वान् = सदसद्विवेकवान् पुरुषः। पुरुषम् = प्रागुक्तोभाभ्यामुत्तमं पुरुषम्, निष्कलत्व, नित्यत्व, निर्विकारत्व, निर्गुणत्व, प्रभृतिधर्मैः सर्वथोत्तमत्वात् पुरुषोत्तमपुरुषमित्यर्थः। इदं ब्रह्मेति मन्यते। हि = यतः। सर्वा देवताः। अस्मिन् = पुरुषोत्तमे = परब्रह्मपरमात्मनि। अवसते = निवसन्ति। गावो गोष्ठे इव = यथा सर्वा अपि गावो गोष्ठे = गोशालायाम्। निवसन्तीति शेषः।

अयं नित्य, शुद्ध, बुद्ध, मुक्तस्वभावः सच्चिदानन्दैकरसस्वरूपोऽयं परमात्मा पुरुषोत्तमः सर्वाधिष्ठानभूतो ज्ञानस्वरूपः प्राग्दर्शितदिशा सर्वानेव प्राकाश्यं नयति। इयमेव दार्शनिकी दृष्टिः कर्तृत्व, भोक्तृत्वादिकार्यलक्षणकं संसारधर्मं सर्वमेव तुच्छं हेयं सर्वथा चाऽनादरणीयतावच्छेदककुक्षौ निक्षिप्तमस्तीति ब्रूते।

कालिदासस्याऽद्वैतदृष्टिः

अद्वैतवादस्य चर्चा खल्वस्ति भारतीयदर्शनस्य प्राणभूता प्रभूता चर्चा। भारतीय-साहित्ये शङ्कराद्वैतवादतः प्राक्कालावच्छेदेनापि अस्याऽद्वैतवादस्य चर्चा यत्र तत्र सर्वत्रैव परमार्थतो मिलति। यतो ब्रह्मैवास्ति एकं पारमार्थिकं तत्त्वम् तच्चाऽद्वैतरूपम्। ततोऽतिरिक्तस्य नास्ति कस्यापि पारमार्थिकं सत्त्वम्—येन तस्यास्तित्वं तेषां वाऽस्तित्वं वयं तात्त्विकत्वेन ब्रूमः। तथा चोक्तम्—

स्वपूर्णात्मातिरेकेण जगज्जीवेश्वरादयः।
न सन्ति नास्ति माया च तेभ्यश्चाहं विलक्षणः॥

वराहोप० २।११

यद्यपि संहितासु अद्वैतवादस्य सैद्धान्तिकरूपेण निरूपणं किमपि नोपलभ्यते। तथापि अद्वैतपरकत्वेनाऽभिव्यक्तयोऽवश्यमेव मिलन्ति। उपनिषत्सु अस्याऽद्वैतसिद्धान्तस्य रेखाचित्रं सप्रमाणं सुस्पष्टञ्च सर्वथोपलब्धं भवति।

महाभारतादिग्रन्थेष्वपि अद्वैतसिद्धान्तस्य परिचयः प्राप्यते। प्राचीनवेदान्तसूत्राणां प्रणेतृष्वपि केचन सूत्रकारा अद्वैतवादस्य सन्ति सिद्धान्ततः सर्वथा परिचिता इतीयं किम्बदन्ती इदानीन्तनकालावच्छेदेनापि श्रूयते।

द्वैतस्य भेदस्य च द्वैतव्याप्यभेदस्य च केवलं संकल्प-विकल्पौ समाश्रित्य जायमानत्वात् प्रवर्तमानत्वात् च द्वैतभेदाववभासेते। यथा स्वप्नावस्थां गत एको जीवः संकल्पवशादेवाऽनेकानि रूपाणि धारयति। तथैव जाग्रज्जगत्कालीन एक एव जीवः संकल्पकारणवशादेव नाना रूपाणि दधानः सन् दृष्टिगोचरतां गच्छति। संकल्पविकल्पादौ खलूपशान्ते सर्वमेव शान्तं भवति। तथाचोक्तं योगवा०—

उपशान्ते हि संकल्पे उपशान्तमिदं भवेत्।
संसारदुःखमखिलं मूलादपि महामते॥

योगवा० स्थि० स० ५०।१९-२१

संकल्पनादृते नेह किञ्चिदेवास्ति कुत्रचित्।
संकल्पजाते गलिते स्वरूपमवशिष्यते॥

महोपनि०—२।५४

अर्थात् अनासन्नक्रियेच्छारूपं[1] संकल्पमाश्रित्यैव सर्वेऽपि जागतिकाः सर्वेऽपि व्यवहाराः प्रचलन्ति नान्यथा। यथा इदन्त्वावच्छिन्नत्वेन भासमानायां शुक्तौ संकल्पप्रभावादेव "दोषो[2]ऽप्रमायाजनकः" इति सार्वजनीनदृष्टेरनुसारतो विश्वनाथपञ्चाननोक्तिमाश्रित्यैवाऽसतोऽपि रजतस्य तत्र भानं भवति।

---

१. प्रशस्त० २ पृ० ५१

२. भाषाप० गुणनिरूपणे

एवमनागतेषु सर्पव्याघ्रादिषु संकल्पजन्यमेव दुःखं समनुभवन्ति सर्वेऽपि मानवा-प्राणिनो वा।

धर्मशास्त्रवेत्तारस्तु विद्वांसः "कर्मसाधनायाभिलापवाक्यमेव" संकल्पः। यथा मनसामानवः संकल्पं करोति, वाचा वदति वाग्व्यवहारं सम्पादयति, कर्मणा च सम्यगेव तादृशं कार्यं चोपपादयति, इत्येवास्ति संकल्पकृता प्रक्रिया। तथाचोक्तम्—

संकल्पमूलः कामो वै यज्ञाः संकल्पसंभवाः।
व्रतानि यमधर्माश्च सर्वे संकल्पजाः स्मृताः॥

पश्यन्तु—एवकारवादार्थम्—आपस्तंबकृतं,

ब्रह्मपुराणेऽपि यथा—

संकल्पेन विना राजन्? यत्किञ्चित् कुरुते नरः।
फलं स्यादल्पकं तस्य धर्मस्यार्धक्षयो भवेत्॥

ब्रह्मपु०

कर्मविषयकज्ञानशीलाः कर्मज्ञाश्च—अभीष्टसिद्धये इदमित्थमेव कार्यम् इत्येवंरूपो मानसो व्यापारविशेषः" संकल्पः। मानसव्यापारविशेषस्य केवलं सुषुप्तिमवस्थां विहाय सर्वथा अप्रतिहतगतिकत्वेन जायमानत्वेन संकल्पस्याऽद्वैतवेदान्तिनां नयेन निमित्तकारणत्वं सिद्ध्यति जगतः। अयञ्च संकल्पो द्वैतभेदौ समाश्रित्य प्रवर्तमानो भवति। संसारस्य द्वैतरूपत्वाद् भेदरूपत्वाच्च संकल्पस्य द्वैत-भेदात्मकस्य जगतो निमित्तकारणत्वं सुतरामेव सिद्ध्यतीति। अत एवोक्तम्—

'संकल्पनादृते नेह किञ्चिदेवास्ति कुत्रचित्'

अर्थात् संकल्पमन्तराऽन्योन्याभावलक्षणलक्षितो भेदः कथमवभासेत, भेदव्याप्यो वा द्वैतः कथं भानास्पदीभूतो भविष्यतीति सार्वजनीनोऽयं विषयः।

'राजपुरुषः' इत्यादौ 'राज' पदस्य राजसम्बन्धिनि लक्षणां सम्पाद्य तस्य च पुरुषपदार्थेन सहाऽभेदान्वयः सम्पाद्यते। अस्ति चात्र नियमः—'निपातातिरिक्तनामार्थयोर्भेदेनान्वयबोधस्याऽव्युत्पन्नत्वात्' इत्यत्र भासमानस्य भेदस्यापि तादृश्येव गतिश्चिन्तनीया।

अयमेव संकल्प आत्मनः शरीरादिसम्बन्धरूपं बन्धम् जनयति। आहोस्वित् 'मिथ्यादर्शनाविरति प्रमादकषायवशाद् योगवशाच्चात्मा सूक्ष्मैकक्षेत्रावगाहिनामनन्त प्रदेशानां पुद्गलानां कर्मबन्धयोग्यानामादानमुपश्लेषणं यत् करोति स बन्धः'। इत्यपि बन्धलक्षणम्।

सर्व० द० सं० पृ० २४९-आर्ह०

तथा चोक्तम्—

'संकल्पमात्रसंभवो बन्धः'

निरालम्बोप० २।४६।

'संकल्पजाते गलिते स्वरूपमेवाऽवशिष्यते'

---

३. वाचस्पत्यम्

अर्थात् कारणनाशात् कार्यं नश्यतीति नियमात् संकल्परूपकारणनाशात् चराचरात्मकं भासमानं दृश्यादृश्यरूपं जगदिदं सर्वथा समाप्तिं गच्छति। उक्तञ्च—

'यस्य संकल्पनाशः स्यात् तस्य मुक्तिः करे स्थिता'।

श्रुतिः—

इत्थञ्चास्यैव बन्धकारणीभूतस्य संकल्पस्य संकल्पकारणीभूतस्य चाऽज्ञानस्य विनाशार्थं ज्ञानमार्गः, ब्रह्ममार्गः अद्वैतमार्गश्चादृतः खलु महाकविकालिदासेन। सचमार्गो दरः प्रतिबन्धकाभावमाश्रित्य प्रतिबन्धकनिवृत्त्या वा भवितुं प्रभवति नान्यथा। नान्यः पन्था विद्यते तन्निवर्तनाय। यतः।

अद्वैत दृष्टेः प्रतिबन्धक विचारः

सर्वत्र सर्वेषां कार्याणां समुत्पादिका कारणसामग्री दृश्यतेऽनुभूयते चापि इत्यस्ति सार्वजनीनो विषयः। कारणसामग्री च कारणकूटरूपा। तत्र कारणतावच्छेदक कुक्षिनिक्षिप्तश्चास्ति प्रतिबन्धकाभावोऽपि। प्रतिबन्धकसत्त्वे प्रतिबन्धकसमवधानकाले वा कार्योत्पत्तिर्नहि जायते इत्यनेन पतिबन्धकाऽभावस्यापि कार्यमात्रं प्रतिकारणत्वेन निर्धार्यते। इत्थञ्चाऽऽत्मदर्शनप्रतिबन्धकीभूतस्य संकल्पस्य विनाशो नितान्तमावश्यकः।

स चाऽखण्डब्रह्माकारितायाश्चित्तवृत्तेः समुदयानन्तरमेव संसार सम्पादकीभूतस्य, अद्वैतदर्शनप्रतिबन्धकीभूतस्य ब्रह्मदर्शनकारणीभूताप्रतियोगिभूतस्याऽज्ञानजन्यसंकल्पस्य विनाशे सत्येव भवितुमर्हति नान्यथेति तदेव दर्शयति—महाकविः कालिदासः—

(१) रसान्तराण्येकरसं यथा दिव्यं पयोऽश्नुते।
देशे-देशे गुणेष्वेवमवस्थास्त्वमविक्रियः॥

रघु० सर्गः १०, श्लो०१७॥

(२) अप्रमेयो मितलोकस्त्वमनर्थी प्रार्थनावहः।
अजितो जिष्णुरत्यन्तमव्यक्तो व्यक्तकारणम्॥

तत्रैव—श्लो० १८॥

(३) सर्वज्ञस्त्वमविज्ञातः सर्वयोनिस्त्वमात्मभूः।
सर्वप्रभुरनीशस्त्वमेकस्त्वं सर्वरूपभाक्॥

इत्याद्युक्त्या—तत्रैव १९॥

(१) यथा एकरसस्वरूपं "जले मधुरशीतलौ" मधुरैकरसं वर्षा जलम्, दिव्यम्=दिविभवमिति यौगिकव्युत्पत्त्या दिव्यं पयो वर्षोदकं सर्वत्र देशे देशे उषरादिप्रदेषु पतित्वा रसान्तराणि=विभिन्नानि रसान्तराणि, अश्नुते=समवाप्नोति। एवमविक्रियस्त्वं निर्विकारस्त्वम् निर्विशेषस्त्वं सर्वथा सर्वदा चास्ति एकरूपः। तथापि सत्त्वरजस्तमस्त्रिगुणसम्बन्धवान् भवान् स्रष्टृत्वादिरूपा अवस्था अश्नुते। अर्थात् नानाविधानि रूपरूपान्तराणि धारयतीत्यर्थः।

एतावता प्रबन्धेन महाकविः श्रीकालिदासेन चिन्मयस्याद्वितीयस्य निष्कलस्याऽशरीरिणः शरीरानवच्छिन्नस्य सर्वथाऽविच्छिन्नस्य तस्य भगवतः परब्रह्मपरमेश्वरस्य कूटस्थस्य त्रैरूप्यकथनं सर्वथोपाधिकृतत्वेनौपाधिकम् इति दर्शितम्॥१७॥

(२) हे देवाधिदेव ? महापुरुष ? पुराणपुरुषोत्तम ? श्रीविष्णो ? त्वम् अप्रमेयः सन् = अपि, मितलोकः = लोकैरियत्तया न परिच्छेद्यः इत्यर्थः । अनर्थी = स्वयमर्थ विषयकेच्छाविरहितः सन्नपि, प्रार्थनावहः = परेषामर्थविषयिणीमिच्छां पूरयसीति तेषां प्रार्थनायाः पूर्णरूपेण पूरकः इति कामदः अजितः = न केनापि बलवता शत्रुणा वा जितस्त्वम्, तथापि जिष्णुः = जयशीलस्त्वम् असि, अव्यक्तः = नास्ति व्यक्तिमापन्नस्त्वम् । तथापि त्वं स्वयं व्यक्तकारणम् इति ॥

एतेन चिन्मयस्याद्वैत ब्रह्मणः स्वरूपं दर्शितम् ॥१८॥

(३) हे देवः ? त्वं सर्वं जानासीति सर्वज्ञः सन्नपि सर्वथाऽविज्ञातः = नहि केनापि विज्ञातुं शक्यः । हे देव ? त्वं सर्वस्य योनिः = कारणम् सन्नपि त्वं स्वयमेव आत्मन एव भवतीत्यात्मभूः = स्वयम्भूरित्यर्थः । हे देव ? त्वमेकः सन्नपि सर्वरूपभाक् = सर्वरूपावच्छिन्नः, सर्वात्मना वर्तसे । एवं त्वम् सर्वप्रभुः = सर्वेषामेव प्रभुः, असि । तथापि हे देव ! त्वम् सर्वथा अनीशः = ते = भवतां नास्ति कश्चिद् ईशः = स्वामीत्यर्थ ।

एतेन महाकविः श्रीकालिदासः स्वीयमहाकाव्यग्रन्थानुसारं माया एव प्रकृतिः. उभयोस्त्रिगुणात्मकत्वात्, उभयोश्च जगद्रचनाविधायकत्वात् न तत्रास्ति कोऽपि प्रागुक्तो भेदः । तादृशमहाकाव्यग्रन्थानुसारमेव खलु माया जीवं पुरुषस्वरूपादात्मनो पृथक् करोतीति भावः । तदा पार्थक्यमापन्नो जीवः संसारं नश्वरं स्वीकरोति ।

अपि च श्रीकालिदासः तस्यैव चिन्मयाऽद्वितीयस्य ब्रह्मण एव सर्वास्तित्वसम्पन्नस्य मायारहितस्य निर्गुणस्य ब्रह्मणोऽद्वैतवादं स्वीयमहाकाव्येषु ब्रह्माद्वैतसिद्धान्तरूपेण समुपस्थापितवान् ।

अथातो दार्शनिक (तत्त्व) मायाविचारः

इत्थञ्च महाकविकालिदासानुसारं तदीयमहाकाव्यग्रन्थानुसारं वा मायैव जीवं स्वस्वरूपात् परब्रह्मपरमेश्वरात् पृथक् करोति । अर्थात् स परब्रह्मपरमेश्वरः कथयति यस्त्वयाऽहंविस्मृतोऽतस्त्वां स्वस्मात् पृथक् करोमीति स्वस्मात् पार्थक्यं विधत्ते ।

तदनन्तरकालावच्छेदेन पृथग्भूतश्चाऽयं जीवोभ्रमान्धकारभूते खल्वसारसंसारसागरेऽस्मिन् निपतितः । अयञ्चास्ति सर्वोऽपि संसारः सांसारिकश्चायं प्रपञ्चोमायारूपः अत एव सर्वथास्ति मिथ्याभूतः । नास्ति नितान्तं वन्ध्यापुत्रवत्, गगनारविन्दवत्, शशशृङ्गवत्, गन्धर्वनगरवच्चसर्वथातुच्छोऽपि येन जगद्विषयिणो तद्घटकीभूतपदार्थविषयिनी वा प्रतीतिरेव व्याहन्येत, येन सर्वमेव भद्रकं लुप्येत ।

इत्थञ्च चलन्तो भ्रमन्तो निद्रावन्तो ह्युपविशन्तश्चसम्यक् स्थितिमन्तः सर्वेऽपि मानवाः सन्ति मायावन्तो मायिनो मायाजालसमन्विताश्च साक्षान्मायारूपाः । पर्वतानां गगनस्पर्शिशिखराण्यपि माया, पाताललोकस्य परिस्थितिसूचका अगाधगर्ता अपि माया, स्वीयामृततुल्यपयःपानविधानपरायणा गावोऽपिमाया, भयङ्करदन्तदाढ प्रहारद्वारा मदमत्तहस्तिनोऽपि माया, तेषां हस्तिनां गण्डस्थलविदीर्ण शीर्णकारका हिंसकाः सिंहव्याघ्रादयोऽपि माया, पशुरक्षकादयोऽपि माया, तथाऽन्ये प्राणिनोऽपि माया, पिताऽपि माया, माताऽपि माया, भ्राताऽपि माया, दशाश्वमेधवदृश्यो राजमार्गोऽपि माया, तादृश-

राजमार्गोपरि भ्रमन्तोऽपि माया, प्रासादानां भोगविलासोऽपि माया, मथुरानिवासिनां 'चौबे' पदाभिधेयानां जठरोऽपि माया, तेषां क्षीरभोजनमपि माया, शुष्कल्यपि माया, मणिकर्णिकापि माया, वियोगवशसाश्रुनेत्रोऽपि माया, गान्धी अपि माया, 'गोडसे'ऽपि माया, राजगुरुरपि माया, चन्द्रशेखर आजादो माया, कचौड़ीवीथिकाऽपि माया, तत्र च विशालवपुष्मन्तो जठरवन्तोऽपि च माया।

किमधिकं वयं ब्रूमः

"मायावीव विजृम्भयत्यपि महायोगीव यः स्वेच्छया" इयमेव माया अश्वघोष, भारवि, कालिदास, भारविप्रभृतीनां मायाबिनां महाकविनां महाकाव्येषु तत्त्वान्वेषण-निर्देशंविधाने। प्रवृत्तिजनयति। महाकाव्येषु दार्शनिकतत्त्वानां निरूपणस्य प्रयोजनं, तस्यौचित्यविषयकंविचारञ्च दर्शयति। इत्थञ्च सर्वमेव जागतिकं सद्भावनाभूषितन्मुप-कारभारभावितं सर्वमपि कार्यजातमियमेव सम्पादयति पूरयति च।

इत्यमेवम्भूतस्य विघ्नबाधास्वरूपस्य मायाजालस्य तत्कार्यभूताऽसारसंसार-सागरविलक्षणलक्षणलक्षितस्य पारं गन्तुं कामयमानो महाकविः श्रीकालिदासः अवाङ्-मनसगोचरं भगवन्तं तं परब्रह्मपरमेश्वरं पौनःपुन्यैन नमस्करोति प्रणमति च। तथाहि--

प्रणिपत्य सुरास्तस्मै शमयित्रे सुरद्विषाम्।
अथैनं तुष्टुवुः स्तुत्यमवाङ्मनसगोचरम्॥

रघुवंशमहाकाव्ये—१० सर्ग १५

अपि च पुनस्तत्रैव—

नमो विश्वसृजे पूर्वं विश्वं तदनुविभ्रते।
अथ विश्वस्य संहर्त्रे तुभ्यं त्रेधा स्थितात्मने॥

तत्रैव, १० स० १६

अर्थात् पूर्वम् = एकोऽहं बहुस्याम्" इतीच्छासमभ्युदयकाले। विश्वसृजे = जगत्-स्रष्ट्रे,

"यतो वा इमानि भूतानि जायन्ते येन
जातानि जीवन्ति अभिसंविशन्ति तद् ब्रह्म"

तैत्तिरीयोप०—३।१

तदनु = तादृशेच्छोदयानन्तरम्, विश्वम् = चराचरात्मकं जगदिदम्, विभ्रते = पुष्णते, अथ च पुनः विश्वस्य संहर्त्रे, एवं सृष्टि स्थिति संहारकर्तृत्वेन त्रेधा, स्थितात्मने = स्थित आत्मा = स्वरूपं यस्य तस्मै ब्रह्मविष्णुहरात्मने तुभ्यम् = निर्विशेषाय, निर्गुणाय, निराकाराय, निर्विकाराय परब्रह्मणे नमः।

महर्षिवसिष्ठोऽपि यस्याऽद्वितीयस्य चिदम्बरे चिद्भूतपञ्जरे स्थारेषु चरेषु च सर्वत्रास्तित्वसम्पन्नस्य परब्रह्मणः स्वरूपास्तित्वमित्थं वर्णितवान्—

"सर्वशक्तिरनन्तात्मा सर्वभावान्तरस्थितः।
अद्वितीयश्चिदन्तर्यः पश्यति स पश्यति"॥

योगवा० ४।२२।२८

निर्गुणब्रह्माद्वैतविचारः

"अहं चिदम्बरे भानावहं चिद्भूतपञ्जरे ।
सुरासुरेषु चिदहं स्थावरेषु चरेषु च ॥

तत्रैव ५।२७।१२

अपारपर्यन्तनभो दिक्कालादिक्रियान्वितम् ।
अहमेवेति सर्वत्र यः पश्यति स पश्यति ॥

तत्रैव ४।२२।२५

मयि सर्वमिदं प्रोतं सूत्रे मणिगणा इव ।
चित्तन्तु नाहमेवेति यः पश्यति स पश्यति ॥

तत्रैव ४।२२।३१

यन्नाम किञ्चित् त्रैलोक्ये स एवावयवो मम ।
तरङ्गोऽब्धाविवेत्यन्तर्यः पश्यति स पश्यति ॥

तत्रैव ४।२२।३३

अपि च—द्वैतं यथा नास्ति चिदात्मजीवयो—
स्तथैव भेदोऽस्ति न जीवचित्तयोः ।
यथैव भेदोऽस्ति न जीवचित्तयो—
स्तथैव भेदोऽस्ति न देहकर्मणोः ॥

तत्रैव—३।६५।१२

अनया महर्षिवसिष्ठेनोक्तया वाचोभङ्ग्या इयमपि शङ्का निराकृता भवति यत् महाकवि श्रीकालिदासेन "नमो विश्वसृजे पूर्वम्" इत्यादिना स्वीयेन श्लोकेन कूटस्थस्य ब्रह्मणो "त्रेधा स्थितात्मने" इत्यादिना यत् "त्रैरूप्यम्" दर्शितं तत् कथं संगच्छते इति ।

महाकविना श्रीकालिदासेनाऽपि कूटस्थस्य ब्रह्मणः त्रैरूप्यकथनं कथमिति शङ्का निराक्रियते समाधीयते च

"रसान्तराण्येकरसं यथा दिव्यं पयोऽश्नुते ।
देशे देशे गुणेष्वेव भवस्थास्त्वमविक्रियः ॥

रघुवं० १० स० श्लो १७—

अर्थात् यथा एकरसं दिव्यं पयोवर्षाजलं देशे देशे रसान्तराणि प्राप्नोति, तथैव अविक्रियो निर्बिकारो निर्विशेषः सन्नपि गुणत्रसम्बन्धात् नानारूपाणि धारयतीति । एतेन निर्विशेषब्रह्माद्वैतसिद्धान्तो दर्शितः ।

संकल्पनादृते नेह किञ्चिदेवास्ति कुत्रचित् ।
संकल्पजाते गलिते स्वरूपमवशिष्यते ॥

महोपनि०—४।५४

महाकविश्रीकालिदासेनापि परमार्थतोऽप्रमेवाऽद्वैतसिद्धान्तः सर्वथा हृदयङ्गमो विहितः समर्थितः पुष्टीकृतश्च ।

सर्वेषामेव भ्रमान्धकारपतितानां भेद—द्वैतगर्भितानां विभिन्नानां सिद्धान्तानां तथा विधानां तद्रूपावच्छिन्नानाञ्च जागतिकां पदार्थानां सर्वथा तस्मिन्नेव खलु निराकारे निर्विकारे, निरञ्जने निर्विशेषे परब्रह्मणि एव पर्यवसानं भवतीति भावः।

स एव खल्वद्वैतं ब्रह्म नानात्वेन प्रतिभासमानं भवति। यथैकमेवाऽऽकाशं घट-पटादिषु पृथक् पृथक् भासते, तद्वदेव हि प्रकृतेऽपीदृश्येव गतिः। उक्तञ्च—

"आकाशमेकं हि यथा घटादिषु पृथग् भवेत्।
तथात्मैको ह्यनेकश्च जलधारेष्विवांशुमान्॥

याज्ञव०स्मृ०—३।१४४

अपि च पुनः—

ब्रह्मैकमद्वितीयं स्यान्नेह नानास्ति किञ्चन।
मायिकं सर्वमज्ञानाद् भाति वेदान्तिनां मतम्॥

शुकनीतौ—१।१५२

एवञ्चाऽविद्यापरपर्यायभूतमायोपाधिवशादेव सर्वेऽपि जागतिकाः पदार्था भास-मानाः सन्तो दृष्टिगोचरतां गताः समनुभूयन्ते। तादृशमायोपाधिमाश्रित्यैव च सर्वेऽपि व्यवहाराः प्रचलन्ति। उक्तञ्च—

मायाकल्पित देशकालकलनावैचित्र्यचित्रीकृतम्। श्रुतिः—

अत एव कालिदासस्य हृदये देवी-देवतानामपि महादेवोच्चतरं स्थानमासीत्। अस्मादेव कारणात् जगज्जनन्या जगदम्बिकायाः श्रीमहाकाल्या उपासनाजन्यवरप्रसादत एवैवंभूतं प्रभूतं वैदुष्यमनुपमञ्च कवित्वं समुपलब्धवान् महाकविः श्रीकालिदासः।

परन्तु इदं सर्वमनुपहिते निर्विशेषे निरञ्जने ब्रह्मणि मनसः स्थिरवृत्तियोगमन्तरा नहि कदापि कथमपि भवितुं प्रभवति। अतस्तस्मिन्नेवाऽवाङ्मनसगोचरीभूते मनसो वृत्तिं निधाय तद्ध्यानपरो भूत्वा मानसिकविकारजालं सर्वथा दूरीकृत्य तस्यैव स्तुतिः कार्या। यथोक्तम्—

प्रणिपत्य सुरास्तस्मै शमयित्रे सुरद्विषाम्।
अथैनं तुष्टुवुः स्तुत्यमवाङ्मनसगोचरम्॥

रघुवं० सर्गः १०।१५।

किन्त्वेतावांस्तु विशेषो यन्निर्गुणब्रह्मज्ञानेन भवति केवलं ब्रह्मणि लयः। तथा जगत् कर्तृत्वादिस्वरूपतटस्थलक्षण-लक्षितसगुणब्रह्मोपासनया च भवति केवलं वैकुण्ठादि पवित्र सात्त्विकलोकप्राप्तिः। तथा चोक्तम्—

"सगुणविद्याविपाकावस्थानं त्वेतत् स्वर्गादि—
वदवस्थान्तरम् यत्रैतदैश्वर्यमुपवर्ण्यते"

ब्र०सू० ४।४।१६। शा०भा०

एतावांस्तु विशेषोयत् रूपविषयमधिकृत्य, उपासनाविषयमधिकृत्य अन्तस्तद्धर्मा-धिकरणे व्यतिहारधिकरणे च ब्रह्मसूत्रभाष्ये श्रीशङ्कराचार्येण विषयस्यास्य बहुधा निरू-पणं कृतम्।

"अहो नु अविद्यमाना याऽविद्या तया विश्वं खिलीकृतम्"

महोपनि० ४।१३३।

मायापरपर्यायभूताऽज्ञानजन्यसंकल्पविकल्परूपकारणवशादेव पाञ्चभौतिकनश्वर-शरीरावच्छिन्नो जीवो ब्रह्मविस्मरणं विद्यत्ते इति महदेवचित्रम्। उक्तञ्च—

"अहो नु चित्रं यत् सत्यं ब्रह्म तद् विस्मृतं नृणाम्।
स्वतः सिद्धाद्वयानन्दः स्वयमेव विभाति च ॥

तत्रैव—४।१३२।

अपि च—

"स्वसंकल्पवशाद् बद्धो निःसंकल्पाद्विमुच्यते"

महोपनि० २।७०।

नह्यपसंन्यस्तसंकल्पो योगी भवति कश्चन" श्रीमद्भ० अन्यच्चापि—

"संकल्पमात्रप्रभवो बन्धः" निरालम्बोप० १।४६।

अपि च—

यस्य संकल्पनाशः स्यात् तस्य मुक्तिः करे स्थिता"

श्रुति—१०४

कुमारसंभवे

जगद्योनिरयोनिस्त्वं जगदन्तो निरन्तकः।
जगदादिरनादिस्त्वं जगदीशो निरीश्वरः॥

कु०सं०सर्गः २, श्लो० ९,

अनेन महाकाव्यकुमारसंभवोक्तेन श्लोकेन महाकविः श्रीकालिदासः ब्रह्माऽद्वैत सिद्धान्तानुसारं सगुणं ब्रह्म सविशेषं भवति, एवं निर्गुणञ्च तत् निर्विशेषमिति तयोरस्ति केवलमौपाधिको भेदः इति यच्चास्ति अनुपहितं ब्रह्म तदेवोपाधिविशिष्टमुपाध्यवच्छिन्नं सोपाधिकमुपहितं सत् सगुणमिति संज्ञां लभते। अनेन श्लोकेन सगुण निर्गुणयोरेव ब्रह्मणोः स्वरूपं प्रदर्श्यते। तथाहि—अर्थात् हे भगवन्! त्वं जगद्योनिः जगकारणम्, स्वयञ्चाऽयोनिरनादित्वात् अहेतुकस्त्वम्। जगदन्तः = जगतोऽन्तर्जगत् संहारकर्ता, त्वमसि स्वयञ्च निरन्तकः = अन्तरहितस्त्वमसि नित्यत्वात्। एवम्—जगदादिः-जगत् आदिस्त्व-मसियतः सृष्टेः प्रागपि विद्यमानत्वादित्यर्थः। अतएव त्वमनादिस्ते आदिर्नास्ति आदिर हित इत्यर्थः। त्वं जगदीशः = चराचरात्मकस्य प्रपञ्चभूतस्य जगतस्त्वं ईशः = नियन्ता, स्वयञ्चत्व निरीश्वरः = अनियम्यः = नियन्त्रणरहितः इत्यर्थः।

त्रिपाद् विभूतिमहानारायणोपनिषदि— 'सगुणानिर्गुणस्वरूपं ब्रह्म" १।१।

अर्थात् यच्चास्ति ब्रह्म सगुणं तदेवास्ति निर्गुणम्, नास्ति कोऽपि भेदः। यश्चापि भेदः प्रतीयमानो भवति स उपाधिकृतो भेदो न तु वास्तविकः।

अर्थात् मायारूपोपाध्यावच्छिन्नः सन् त्वं जगद् रचयसीति जगतस्त्वं कारणं भवसि। तदनवच्छिन्नश्च त्वं सर्वथाऽयोनिः = अकारणमेवाऽसि। एवम् तादृशोपाध्यव-च्छिन्नः सन् त्वं जगदन्तः = जगतः संहारकर्ताभवसि, अन्यथा नहि इति। एवमनयैव दिश दृष्ट्या चाग्रेऽपि वोध्यम्।

नहि ते प्रपञ्चस्येव ज्ञानोत्पत्तिलयेषु मायापेक्षा इत्याह

आत्मानमात्मना वेत्सि सृजस्यात्मानमात्मना ।
आत्मना कृतिना च त्वमात्मन्येव प्रलीयसे ॥

कुमार सं० सर्गः २, श्लो० १०

अनेन श्लोकेन निर्गुणब्रह्मणः स्वरूपं वर्णयन् महाकविः कालिदासः स्वीयं ब्रह्माऽद्वैतसिद्धान्तं पुष्टीकरोति—हे भगवान् ! त्वमात्मानं लोकानुग्रहार्थं ब्रह्मरूपेणोत्पादनेच्छाविषयीभूतं स्वस्वरूपमात्मनैव केवलं वेत्सि = जानासि । तथाऽऽत्मनैव आत्मानमात्मन्येव सृजसि, एतेन स्वयमेव त्वमधिष्ठानमप्यसीति सूचितं भवति ।

"स्वे महिम्नि प्रतिष्ठितम्" इति श्रुतेस्तत्रास्ति प्रामाण्यम् । एवम् कृतिना = समर्थेन = सामर्थ्यसम्पन्नेन = सर्वशक्तिमता, आत्मना, त्वम् आत्मन्येव = स्वाधिष्ठानभूते स्वस्मिन्नेव । प्रलीयसे = प्रलीनो भवसि ।

अपि च—सर्वतोभावेन निरपेक्षस्य निर्गुणस्य ब्रह्मणः निर्गुणे च ब्रह्मणि लीनस्य तत्स्वरूतां गतस्य सर्वथाऽनपेक्षस्य च स्थितप्रज्ञस्य वर्णनम् "आत्मानमात्मना वेत्सि" इत्यस्मिन् श्लोके कृतवान् महाकविः श्रीकालिदासः स्वीयब्रह्माद्वैतसिद्धान्तपुष्ट्यर्थम् ।

तदेव च निर्गुणब्रह्माऽभिन्नं निर्वक्तुमशक्यत्वेन सर्वथाऽनिर्वचनीयं स्वरूपं सच्चिदानन्दो नन्दनन्दनो मथुराचन्द्रः श्रीकृष्णचन्द्रोऽपि इतःपूर्वद्वापरयुगात्मककालावच्छेदेनैवाऽर्जुनं प्रति वर्णितवान् । तदेवाह—

प्रजहातियदा कामान् सर्वान् पार्थ ! मनोगतान् ।
आत्मन्येवाऽऽत्मना तुष्टःस्थितप्रज्ञस्तदोच्यते ॥

श्रीमद्भगवद्गीता, अ० २, ५५

कामयन्तीति यौगिकव्युत्पत्तिसिद्धाः कामाः = कामपदेनोच्यमानाः कामपदार्था विषयभोगेच्छारूपास्तान् सकलान् यादृशकालावच्छेदेन समाधिसिद्ध्यवस्थायां सम्यग्विज्ञातात्मतत्त्वोमुमुक्षुर्निःशेषंप्रजहाति । तादृशकालावच्छेदेन स्वप्रकाशचिदात्मके स्वतःसिद्धे नित्यकूटस्थाऽसङ्गचिद्रूपे निर्विशेषे चक्षुषो रूपवत् सर्वत्रोपलभ्यमाने सच्चिदानन्दस्वरूपे ब्रह्मणि रममाणो ब्रह्मवेत्ता प्रागुक्तलक्षणेन स्वस्वरूपेणैव पूर्णसन्तोषमापन्नः स्वात्मानन्दरसानुभूत्यैव स्वात्मसन्तोषं तृप्तिं च सर्वथा समवाप्याऽमृतरसपानकर्ता लवणाम्बुवत् असद्विषयजन्यं क्षणभङ्गुरं तुच्छं सुखवदाभासमानं नाऽपेक्षते । अत एव तद्विषयान् सर्वानिव कामान् निःशेषं प्रजहाति । एवंभूतलक्षणलक्षितः सन्नेव सम्यग्विज्ञातात्मतत्त्वे मुमुक्षुः स्थितप्रज्ञसंज्ञासंज्ञितो भवति । यथोक्तम्—

"यदा सर्वे प्रमुच्यन्ते कामायेऽस्य हृदि स्थिताः ।
अथ मर्त्योऽमृतो भवत्यत्र ब्रह्म समश्नुते" ॥

कठोपनि० २।३।१४

एवम्— भिद्यते हृदयग्रन्थिश्छिद्यन्ते सर्वसंशयाः ।
क्षीयन्ते चास्य कर्माणि तस्मिन् दृष्टे परावरे ॥

मुण्डकोपनि०—२।२।८

परावरैकत्वग्राहकमहाविज्ञानद्वारा बन्धनप्रदानकर्तृत्वावाच्छिन्ना अन्योन्याध्यासात्मिका चिदचिद्ग्रन्थिः--अविद्योपहितचैतन्यस्य जीवत्वभावश्च सर्वथा समाप्ति गच्छति । ब्रह्मविषयकाः सर्वेऽपि संशयाश्छिद्यन्ते । एवं प्रारब्धकर्मातिरिक्तानि सर्वाण्येव कर्माणि क्षीयन्ते इति तु निष्कर्षः । सांख्यमतेनापि संस्तुवन्ति—

"त्वामामनन्ति प्रकृतिं पुरुषार्थप्रवर्तिनीम् ।
तद्दर्शिनमुदासीनं त्वामेव पुरुषं विदुः ॥

कुमार सं० सर्गः २, श्लो० १३

अर्थात् हे भगवान् ! त्वाम् पुरुषार्थप्रवर्तिनीम् = पुरुषस्य योऽस्ति अर्थः = भोगाऽपवर्गरूपः तदर्थं प्रवर्तते इति पुरुषार्थप्रवर्तिनी 'तां प्रकृतिं त्रिगुणात्मिकां जगतो मूलकारणम् । तथाचोक्तम्--

"प्रकृतिः पञ्चभूतेषु प्रधानं मूलकारणम्"

इति यादवः--

आमनन्ति = कथयन्ति । त्वामेव च प्रकृतिं साक्षित्वेन पश्यति पुरुषः । स च दर्शनशीलः पुरुषः प्रकृतिविकृत्युभयात्मकत्वाभावेन अनुभयात्मकः । तथाचोक्तम्--

"न प्रकृतिर्न विकृतिः पुरुषः"

सांख्यका०-३ कारिका--

अतस्तद्दर्शिनम् = प्रकृतिदर्शिनम् । उदासीनम् । पुरुषम् । त्वामेव । विदुः = जानन्ति ।

अयमाशयः = प्रकृतिः खलु सत्त्वरजस्तमसां साम्यावस्था । अपिच—

"सत्त्वं रजस्तम इति एषैव प्रकृतिः सदा ।
एषैव संसृतिर्जन्तोरस्याः पारे परंपदम् ॥

श्रुतिमिदम् ।

अन्यच्चापि--"सत्त्वं रजस्तमश्चैव गुणत्रयमुदाहृतम् ।
साम्यावस्थितिरेतेषां प्रकृतिः परिकीर्तिता ॥
केचित् प्रधानमित्याहुरव्यक्तमपरे जगुः ।
एतदेव जगत्सृष्टिं करोति विकरोति च ॥

प्रकृतिश्चास्ति भोग्या, भोग्यत्वेन कञ्चित् चेतनं भोक्तारं पुरुषमपेक्षते । स च पुरुषो भेदाग्रहनिबन्धनरूपकारण-वशादेव बुद्धिच्छायापत्त्या तदगतं दुःखत्रयं स्वस्मिन् मन्यमानः कैवल्यार्थं प्रधानमपेक्ष्यते । ततश्च पङ्ग्वन्धवदुभयोरपि संयोगो जायते । तथाचोक्तवान् ईश्वरकृष्णः---

पुरुषस्य दर्शनार्थं कैवल्यार्थं तथा प्रधानस्य ।
पङ्ग्वन्धवदुभयोरपि संयोगस्तत्कृतः सर्गः ॥

सां० का० २१---

पुरुषस्य भोगापवर्गरूपार्थप्रयोज्या प्रकृतेः प्रवृत्तिर्जायताम् परन्तु निवृत्तिस्तु केन कारणेन स्यादित्यप्युच्यताम् । इति यदुच्यते = श्रूयताम्--यथा भर्त्रा दृष्टदोषा स्वै-

रिणी पुनः स्वीयं भर्तारं प्रतिनोपगच्छति । एवं यथा नर्तकी नाट्यशालास्थितान् पुरुषान् स्वीयं नृत्यं दर्शयित्वा नृत्याद् विनिवृत्ता भवति, तथैव प्रकृतिरपि पुरुषस्य स्वस्वरूपं दर्शयित्वा निवृत्ता भवति । तथाचोक्तम्—

रङ्गस्य दर्शयित्वा निवर्तते यथा नृत्यात् ।
पुरुषस्य तथात्मानं प्रकाश्य विनिवर्तते प्रकृतिः ॥

इदानीं प्रकरणसङ्गतिवशादवसरसङ्गति वशाच्च महाकविश्रीकालिदासीयोक्तिघटकीभूतपितृनिष्ठं यत् पितृत्वं तदपि संक्षेपतो विचार्यते—

त्वं पितॄणामपि पिता देवानामपि देवता ।
परतोऽपि परश्चासि विधाता वेधसामपि ॥

कुमारसं० सर्ग २, १४,

हे भगवन् ? त्वं पितॄणामपि पिता अर्थात् पितामहः = जगत् पितामह इत्यर्थः । अत्रेदं यत् पितामहस्य यथाश्रुतार्थकत्वे तस्यापि कस्यचित् पुत्रत्वेन यन्निरूपितपुत्रत्वं पितामहनिष्ठत्वेनाऽनुभूयते पितामहनिष्ठपुत्रत्वनिरूपितपितृत्वं तन्निष्ठमेवेति लोकसिद्धः सार्वजनीनोऽयं व्यवहारः ।

व्यवहारस्य शब्दप्रयोगरूपत्वमनुभवसिद्धम् । "इमे इत्थं व्यवहरन्तीत्यनुभवात् । अयञ्चानुभवोबुबोधयिषापूर्वको जायते, सर्वव्यवहारहेतुर्गुणोबुद्धिर्ज्ञानम् इत्यनेनज्ञानस्येच्छां प्रतिकारणत्वं स्पष्टमेव । व्यवहारं प्रतिव्यवहर्तव्यतावच्छेदकप्रकारकज्ञानस्य कारणत्वात् ।

परन्तु प्रभाकरमतानुयायिनस्तावत्तन्न सहन्ते । ते व्यवहारं प्रति व्यवहर्तव्यतावच्छेदकाऽसंसर्गाग्रहस्य कारणत्वं वदन्ति । अत एव शुक्तौ "इदं रजतम्" इति व्यवहारः सूपपन्नो भवति ।

प्रकृतमनुसरामः—त्वं पितॄणां पिता 'इत्यनेन कालिदासमहाकवेः कीदृशं पितृत्वं प्रकृते विवक्षितमस्ति ? किं श्राद्धोद्देश्यत्वरूपम् ? आहोस्वित् सपिण्डीकरणोत्तर श्राद्धजन्यफल भागित्वरूपम् ? यथोक्तं याज्ञवल्क्येन—

वसुरुद्रादितिसुताः पितरः श्राद्धदेवताः ।
प्रीणयन्ति मनुष्याणां पितॄन् श्राद्धेन तर्पिताः ॥

याज्ञव० स्मृ०, अ० १, श्लो० २६८

परन्तु प्रागुक्तं तादृशं पितृत्वं नात्रोल्लिखितमस्ति, किन्तु प्रथमपितृनिष्ठं पितृत्वं पितृपदाभिधेययावत जागतिक पितृनिष्ठं पितृत्वरूपम् 'प्रत्युच्चारणं शब्दो भिद्यते' इति नियमेन लक्ष्यलक्षणघटकीभूतमुभयमेव पितृत्वं भिन्नमिति नान्योन्याश्रया ।

द्वितीयपितृनिष्ठञ्च पितृत्वं पितृपदवाच्ययावत् पितृवृत्तिपितृत्वरूपम् । तच्च जगत् पितामहत्वरूपमिति बोध्यम् ।

"देवानामपि देवता" हे भगवन् ? त्वं देवानामपि देवताऽसि । देव एव देवता, इत्यत्र स्वार्थे तल् प्रत्ययः । देवताश्च—इन्द्रादयो विज्ञेयाः । तत्र देवतानिष्ठं देवतात्वञ्च मन्त्रकरणकहविः कर्मकत्यागभागित्वेनोद्देश्यत्वरूपम् ।

[1]द्रव्यत्यागोद्देश्यत्वरूपमेव देवतात्वमिति गदाधरो ब्रूते। वेदबोधिताऽबाधितद्रव्य-स्वामित्वप्रकारेणेच्छाविषयत्वमित्यर्थः। यथा—अग्नये स्वाहा पितृभ्यः स्वधेत्यादाव-ग्न्यादीनां चेतनानामेव देवतात्वं सिद्धयति।

यास्को मुनिर्निरुक्तग्रन्थस्य दैवतखण्डप्रकरणे देवतानां त्रयस्त्रिंशत्कोटिसंख्याकत्वं प्रोद्‌ङ्कितवान्। अर्थात् त्रयस्त्रिंशत् कोटिकाः (३३ करोड़) देवता भवन्तीत्यर्थः देवतानां पूर्णां संख्यां विज्ञातुं पद्मपुराणस्योत्तर खण्डं विलोकयताम्।

इत्थञ्चैतेषां त्रयस्त्रिंशत्कोटिकानां देवतानां योऽस्ति अधिष्ठातृभूतो देवो महादेवः जगदीशो विष्णुर्वा देवः, आहोस्वित् "सत्यं ज्ञानमनन्तं ब्रह्म" "नित्यं विज्ञानमानन्दं ब्रह्म" इत्यादिश्रुति प्रतिपाद्यो निर्गुणो निर्विशेषो असङ्गः परमब्रह्मपरमेश्वर एवाऽत्रश्लोके स्तुतिप्रतिपाद्यो वर्तते इति।

तत्र शैवानां नये तादृशस्तुति विषयीभूतो देवानां देवता चास्ति शिवो महादेव इति। वैष्णवानां मतेन चास्ति जगदीशो विष्णुरेव "देवानां देवता" इत्यादि—स्तुति-प्रतिपाद्यः।

एवं निर्गुणोपासकानां नये चास्ति "देवाना देवतां" इत्यनेन स्तुत्यो देवो देवता वा "यस्य ब्रह्मणोदर्शनेन निर्दग्धभेदगन्धो भवति भक्तः" स एव परमब्रह्मपरमेश्वरः, एकारसो वा विज्ञेयः। स एव च स्तुत्यो देवः "तत्त्वमसि" अहं ब्रह्मास्मि" "अयमात्मा ब्रह्म" "एकमेवाऽद्वयं ब्रह्म" "सर्वं खल्विदं ब्रह्म" इत्यादि श्रुतिप्रतिपाद्यो देवश्चास्तीति। एवं "अयमात्मा सन्मात्रो नित्यः शुद्धो बुद्धः सत्योमुक्तो—

निरञ्जनोविभुरद्वयानन्दः परः प्रत्यगेकरसः विज्ञेयः। अत्रेदं बोध्यम्—सांख्यासि-द्धान्ते चेतनतत्त्वभूतस्य प्रभूतस्य सर्वथा पुष्करपलासवन्निर्लेपस्य अतएवाऽसङ्ग—निर्विका रस्य तस्य पुरुषस्य सर्वतोभावेन कस्यापि कर्मणः कर्तृत्व, कारणत्वयोरभावेन तत्र सुख-दुःखकारणीभूतयोर्धर्माधर्मयोरनुत्पत्तेधर्माऽधर्मयोरभावेन सुखदुःयोरपि समुत्पादो न स्यात्। तत्र च दुःखानुत्पत्तौ सत्यां दुःखसम्बन्धलक्षणलक्षितस्य बन्धस्य तद्ध्वंसरूपस्य च मोक्षस्य नहि कदापि कथमपि भवितुमर्हति। अतः पुरुषे सम्बन्ध, ध्वंसरूपयोर्भोगाप-वर्गयोर्नास्ति संभवः।

इत्थञ्च "कर्मणा बध्यते जन्तुर्विद्यया च विमुच्यते" इत्यादिशास्त्रप्रामाण्येन जीवा-त्मस्वरूपः पुरुष एव भवति बन्धमोक्षभागी। भोगमोक्षार्थ चेतनतत्त्वस्य प्रवृत्तेः सार्वत्रि-कत्वेन सांख्यसिद्धान्तेऽपि प्रकृतेः प्रवृत्तिः चेतनतत्त्वस्वरूपस्य पुरुषस्य भोगापवर्गार्थमेव वर्तते इत्यत्र नास्ति लेशतोऽपि विचारावसरः।

तत्र च सांख्यसिद्धान्ते प्रकृतेर्विषयाकारेण परिणाम एव चास्ति पुरुषस्य भोगः। एवं प्रकृतिपुरुषयोर्योऽस्ति विवेकात्मकः परिणामः स एव खलु पुरुषस्य मोक्षः। तत्र च यदस्ति कथनं पुरुषस्य मोक्षकारणीभूतं प्रकृतिपुरुषयोः प्रकृतिः पुरुषाद् भिन्ना "इत्या-कारकं विवेकात्मकं भेद ज्ञानम्। तत् सर्वथा तुच्छम्।

१. गादाधरी व्युत्पत्तिवादः, प्रथमकारकः,

यद्यपि सर्वत्र शास्त्रेषु चेतनतत्त्वस्वरूपस्य जीवात्मन एव बन्धमोक्षभागित्वं समुल्लिखितमस्तीत्यत्र नास्ति कोऽपि केषामपि विदुषां विवादः ।

तथापि सम्बन्धरूपबन्धध्वंसरूपयोर्भोगापवर्गयोरस्तित्वं प्रधानापरपर्य्यायभूतायां प्रकृतावेव विश्राम्यति, न तु पुरुषेऽपीति, तस्य असङ्गनिर्विकारत्वात्, पुष्करपलाशवन्निर्लेपत्वाच्च । प्रधानापरपर्यायभूताया बुद्धेरस्तित्वाऽस्तित्वाभावदशायामेव बद्धत्वमुक्तत्वयोर्यो व्यवहारो जायते पुरुषे सचास्ति सर्वथौपचारिकः । तथाहि—बुद्धेस्तित्वदशायामेव चक्षुरादिबाह्येन्द्रियरूपेन्द्रियप्रणालिकया बाह्यघटपटादिरूपं प्रदेशं गताया बुद्धेः "अयं घटः" "अयं पटः" इत्यादिलक्षणलक्षितो घट—पटादि विषयाकारः परिणमो जायते । स एव परिणामः, वृत्तिः, ज्ञानम्- वृत्तिरूपं वा ज्ञानं कथ्यते ।

तथा च तथाविधेनप्रागुक्तेन वृत्तिज्ञानेन सार्धं विषयविषयिभावसम्बन्धे गृह्यमाणे सति घट-पटादयो विषयाः पुरुषे उपचर्यन्ते, उपचरिता भवन्तीत्यर्थः । इत्थञ्च घट-पटादिस्वरूपाविषया एव खलु जीवात्मस्वरूपस्य चेतनतत्त्वस्य पुरुषस्य पुष्करपलाशवन्निर्लेपात्मकम् असङ्गनिर्विकार स्वरूपमभिभूय संसारं सम्पादयन्तीत्ययमेवास्ति तस्य बन्धः ।

अभेदज्ञानात्मके विवेके जायमाने तादृशवृत्तिज्ञानरूपः परिणामः सर्वथा समाप्तिं गच्छति । एवं स्थिते वृत्तिज्ञानरूपपरिणामस्याऽत्यन्ताभावो जायते तदानीं घट-पटादि बाह्यविषयाणां पुरुषात् सम्बन्धो विच्छिद्यते इति पुरुषस्य कैवल्यावस्थानरूपो मोक्षो जायते । अर्थात् तदानीं पुरुषः स्वकीये विशुद्धे असङ्गनिर्विकारस्वरूपे पुष्कर पलाशन्निर्लेपात्मके स्वरूपे सन्तिष्ठते इत्यस्ति 'पुरुषार्थं प्रवर्तिनीम्'' इति कालिदासोक्तेः, परम रहस्यम् ।

जगत् पदार्थो विचार्यंते

महाकविः श्रीकालिदासोक्ति स्वरूप महाकाव्य रघुवंशघटकीभूत' जगतः पितरौ वन्दे' इत्यादिश्लोकघटकीभूतैतद् वाक्य घटकीभूतं तदङ्गस्वरूपं मिथ्या ज्ञान प्रभवा या वासना तदात्मकं जगद् विचार्यते । जगदपि दार्शनिक दृष्टिस्वरूपम् ।

गच्छतीति जगदनया यौगिकव्युत्पत्त्या दृश्यादृश्य स्वरूपं स्थावरजङ्गमलक्षणलक्षितं नश्वरं ध्वंसप्रतियोगित्वे सति प्रागभाव प्रतियोगि सर्वमपि पदार्थजातं--जगत् पदेनोच्यमानं भवतीति सर्वेऽपि विद्वांसो ऽङ्गीकुर्वन्ति ।

तदिदं जगत् प्रवाहरूपेण सर्वथाऽनादि स्वीक्रियते शास्त्रकारैः । व्यक्तिगतरूपेण च सादीति नहि तिरोहितमस्ति केषामपि विदुषाम् । यथोक्तवान् स्व रमुदयनाचार्यः—

'प्रवाहो नादिमानेष न विजात्येकशक्तिमान् ।
तत्त्वे यत्नवता भाव्यमन्वयव्यतिरेकयोः ॥

न्याय कुसु० प्र० स्तवकः

अपि च—'यचच किञ्चिज्जगत् सर्वं—
दृश्यते श्रूयतेऽपि वा ।
अन्तर्बहिश्च तत् सर्वम्
व्याप्य नारायणः स्थितः ॥—नारायणोपनि०

अपि च—'यदा स देवो जार्गीत तदेदं चेष्टते जगत्' ।

मनुस्मृतिः—१ अ०, श्लो० ५२

जगदिदं चराचरात्मकं सत्यस्वरूपं सर्वमपि विश्वं मायावादिनां श्रीशङ्कराचार्य-मतेनाऽपि व्यावहारिक्या दृष्ट्या सत्यमेव । तत्र च नैयायिका इत्थं वदन्ति—तस्माद् यन्नास्ति नास्त्येव यत्त्वस्ति परमार्थतः'

श्रुतिः

अर्थात् सर्वथा स्वास्तित्वशून्यं वन्ध्यापुत्र, गगनारविन्द, शशशृङ्गादिरूपमवस्तु-भूतं यन्नास्तितन्नास्त्येव । यत्तु चराचरस्वरूपं सत्यभूतं जगदिदमहर्निशमनिश समनुभूतं चाक्षुषप्रत्यक्षविषयीभूतं चास्ति परमार्थतः सत्तावत् इत्यहं 'राजेन्द्रप्रतापः' सर्वथा वक्तुं शक्नोमि। यतः 'अनुभवस्य कथमप्यपलपितुमशक्या'दिति प्राचीनाचार्यचरणोक्तिमा-श्रित्य स्वयं समनुभूय च जगतो मिथ्यात्वं पराभिमतं नहि कदापि कथमऽपि केनापि कुतोस्वीकर्तुं प्रभवामीति नूनं विभाव्यताम् ।

अत एव वाच्यत्व, ज्ञेयत्व, अभिधेयत्वादिनानालक्षणलक्ष्यीभूतस्य प्रभूतस्यास्य जगतः 'प्रमेयत्व' मप्येकं लक्षणं वर्तते । तच्च प्रभाविषयत्वम् = यथार्थज्ञानविषयत्वम् अर्थात् जगद्विषयिणी या जगत्त्वप्रकाशिका जगद्विशेषिका 'जगदिदम्' इत्याकारिका प्रभा तद्विषयत्वस्य जगति सत्त्वेन प्रमेयत्वमिति जगतो लक्षणं सर्वथा साधुत्वेन सूपपन्न मेवेति नहि जगतो कदापि मिथ्यात्वं वक्तुं शक्यते ।

ब्रह्माद्वैतसिद्धान्तेन दार्शनिकदृष्ट्यन्तर्गत जगद् विचारः

पुरा पूर्व कल्पवासनयासमान्वितः स्वीयमायायाऽभेदेन स्थितिमान् सन् स पर-मेश्वरो जगन्निरूपित कर्तृत्वधर्मवान् भवति। एवं कालकर्मानुगुण्येन स्वाभिन्नस्वीय-मायया तयाऽभिन्नोऽपि सन् स प्रभुः स्वस्य भेदं जगदात्मकं कल्पयति ।

तथा मायाया अविद्यापरपर्यायभूतायाः सत्त्वगुणादीनां भेदेन रुद्रं विष्णुं पितामहं सृष्ट्वा तेषामन्तर्यामितया हरोऽनुप्राविशत् । इत्थञ्च एक एव शिवः पुनः साक्षात्तिस्रो मूर्त्तीर्दधौ । तथा चोक्तम्—

ईश्वरो जगतः कर्ता मायया स्वीयया पुरा ।
अभेदेन स्थितः पूर्वकल्पवासनयाऽन्वितः ॥

सूत सं० यज्ञवैधवखण्डे, १ भागे, २ अ० श्लो० ४

कालकर्मानुगुण्येन स्वाभिन्नस्वीयमायया ।
अभिन्नोऽपि तथा स्वस्य भेदे कल्पयति प्रभुः ॥

—तत्रैव

मायाया गुणभेदेन रुद्रं विष्णुं पितामहम् ।
सृष्ट्वाऽनुप्राविशत्तेषामन्तर्यामितया हरः ॥
एक एव शिवः साक्षात् तिस्रो मूर्त्तीर्दधौ पुनः ।

—पुनस्तत्रैव

अपि च—'रजोगुणं समास्थाय ब्रह्मा स्यात् सृष्टिकारणम् ।
सत्त्वमास्थाय विष्णुः स्यात् पालनार्थं बृहस्पते ! ॥
तमसा कालरुद्राख्य- सर्वसंहारकारणम् ॥ —पश्यन्तु तत्रैव

अर्थात् ब्रह्मा रजोगुणं समास्थाय सृष्टिकारणं स्यात् = भवतीत्यर्थः। विष्णुश्च सत्त्वगुणमास्थाय हे बृहस्पते ? पालनार्थं भवति, अर्थात् सृष्टिं पालयति।

एवं महाकालरूपो रुद्राख्यो भगवान् तमसा = तमोगुणमास्थाय संहारकारणं भवतीति शेषः। इत्थञ्चाऽविद्यापरपर्यायभूतया मायया समन्वितः परमेश्वरो जगदात्मकं विषयमधिकृत्य सर्वमेव जागतिकं स्वरूप सम्पादनं विधत्ते।

तथा जीवात्मनो ब्रह्मसाक्षात्कारानन्तरम् ब्रह्मविषयकाऽज्ञाननाशेन स्वरूपाज्ञान-नाशेन वा संसारः सर्वथा विनश्यति।

अर्थात् एवं भूतो ब्रह्मसाक्षात्कारवान् यतियोगी सर्वमपि चराचरात्मकं जगत् ब्रह्मरूपतया पश्यति। ब्रह्मातिरिक्तत्वेन जगतोऽस्ति त्वमेवनास्ति। सर्वगं सच्चिदानन्द-स्वरूपं जद् ब्रह्मज्ञानचक्षुष्मन्तः क्षीणदोषा एव यतयोयोगिनो वा साक्षात्कर्तुं प्रभवन्ति नहि मायारूपाऽज्ञानावृता मादृशा अपि जनाः। उक्तञ्च—

सर्वगं सच्चिदानन्दं ज्ञानचक्षुर्निरीक्ष्यते।—वाराहोपनि० १।१८।

क्षीणदोषाः प्रपश्यन्ति नेतरे माययावृताः।—अध्यात्मोपनि०—४।३६।

अपि च—'आत्मावलोकनार्थन्तु तस्मात् सर्वं परित्यजेत्'।—अन्नोपनि० १।४६।

'यावत् सर्वं न संत्यक्तं तावदात्मा न लभ्यते'।—तत्रैव' १।४५।

अज्ञानादेव हि संसारो ज्ञानादेव विमुच्यते।—योगतत्त्वोप०—१।१६।

ज्ञानेनैव हि संसार विनाशो नैव कर्मणा।—सरस्वतोरहस्योप० ३५

तस्मादज्ञनमूलस्य संसारस्य हरेर्दर्शनात् जगन्मूलभूताज्ञाननाशेन कार्यभूतस्य संसारस्य क्षयः सुतरामेव जायते।

अपि च— बीचितरङ्गफेनाद्याः यथा भान्ति महोदधौ।
महदादिविशेषान्तं तथा भाति चिदात्मनि॥

सू० सं० यज्ञवैभवखण्डे, १५ अ० १७ श्लो०

यद्यदस्तितया भाति यद्यन्नास्तितया तथा।
तत् सर्वं महादेव मायया परिकल्पितम्॥

सूत सं०, ४ खं, १ भागे, अ० १२, श्लो० १६।

अतश्च संक्षेपमिदं शृणुध्वम्-
जगत् समस्तं चिदचित् प्रभिन्नम्।
स्वशक्तिक्लृप्तंशिवमात्रमेव-
न देवदेवात् पृथगस्ति किञ्चित्॥

तत्रैव, १ ख०, २३ अ., श्लो० २९

इत्थञ्च यथा महोदधौ बीचितरङ्गफेनाद्या स्वल्पकालपर्यन्तमेव प्रतीयन्ते, तथा महदादिविशेषान्तं जगत् अपि तस्मिन् स्वप्रकाशचिदात्मके ब्रह्मणि स्वल्पकालपर्यन्तमेव प्रतीयते। अस्तितया नास्तितया च भासमानं सर्वमेव महादेवस्य माययैव परिकल्पित-त्वेन भासमानं भवतीतिभावः। अतश्च चिदचित् प्रभिन्नं समस्तमेव जगत् ब्रह्मणो माया शक्तिक्लृप्तं न तु वास्तविकमतः शिवमात्रमेव, नहि देवदेवात् महादेवात् ब्रह्मणः पृथक् किञ्चिदस्ति। अतोऽखण्डब्रह्माकाराकारितचित्तवृत्तीनामत एव ज्ञानचक्षुष्मतां सर्वथा

क्षीणदोषाणां यतीनां योगिनां वा ब्रह्मातिरिक्तं नहि किमपि भासमानं भवति। तथा चोक्तम्—

'सर्वं खल्विदं ब्रह्म नेह ना नास्ति किञ्चन'

निरालम्बोपनि०—

'एकमेवाऽद्वयं ब्रह्म नेह नानास्ति किञ्चन'।

अध्यात्मो प०—६३

'मायामात्रमिदं द्वैतमद्वैतं परमार्थतः'।

'न तु तद् द्वितीयमस्ति'

वृहदारण्यकोप०—४।३।२३

एतेन ब्रह्माऽपरपर्यायभूतमहादेवानतिरिक्तत्वं सर्वस्य प्रतिपादितं भवति, अतो नास्ति तदतिरिक्तं तद्भिन्नं किमपि वस्तुजातं पदार्थान्तरं वेति भावः।

'पार्वतीपरमेश्वरौ' इत्यत्रापि दार्शनिकदृष्ट्या विचार्यमाणे इदमेवाऽऽयाति, सिद्ध्यति च यत् जगज्जननी जगदम्बा महाकालीत्यपरनामधेया हिमाचलकृताश्रया मदीया लेखकस्य राजेन्द्रप्रतापस्य माता पार्वती एवास्ति जगन्नियन्तुः सर्वस्वरूपस्य ब्रह्मणोमहादेवस्य शक्तिस्वरूपा अर्धाङ्गिनी।

इयमेव खलु आदिमाया, आदिशक्तिः, चण्डी, दुर्गादेवी, महाकाली, कालिकेत्यादिभिर्नामभिर्व्याह्रियते व्यवह्रियते च।

'कालिकेति समाख्याता हिमाचलकृताश्रया' दुर्गासप्तशती—

इयमेव भगवतोऽव्ययस्य ज्ञानस्वरूपस्याऽव्ययस्याऽजस्य ब्रह्मणोमहादेवस्य मायाशक्तिरपि कथ्यते। अनयैव शक्त्या ज्ञानस्वरूपः सच्चिदानन्दरूपो भगवान् महादेवः शक्तिमान् निगद्यते। इयञ्च शक्तिः शक्तिमतो ब्रह्मणो महादेवात् सर्वथाऽभिन्नैवेति नाऽद्वैतसिद्धान्तो भज्येत। अव एवोक्तम्—'शक्तिमतोरभेदात्' इति।

'पार्वतीपरमेश्वरौ' इत्यादिवाक्यघटकीभूतः परमेश्वरः सच्चिदानन्द स्वरूप आनन्दकन्दरूपः क्लेशकर्मविपाकाशयैरपरामृष्टः सर्वसम्प्रदाय प्रवर्तको भक्तानाञ्चास्ति सर्वथाऽनुग्राहकः। तथोक्तवन्तः पातञ्जलदर्शनानुयायिनो योगशास्त्रिणः। तथाहि—

'क्लेशकर्म विपाकाशयैरपरामृष्टः पुरुषः स्वच्छया
निर्माणकायमधिष्ठाय लौकिक वैदिकसम्प्रदाय प्रवर्तकः
संसाराङ्गारे तप्यमानानां प्राणभृतामनुग्राहकश्च'

सर्वद० सं० पृ० ३३३, पातंजल

अपि च— 'शुक्तिका रजताकारा यथा भाति स्वभावतः।
तथा सर्वतया भवति शिवः सर्वविभासकः॥

सू० सं० य० वैभवखण्डे, अ० १५, श्लो० १५

चेतना चेतनाकारी ब्रह्मणो यौ प्रकल्पितौ।
तौ शिवादन्यतो न स्तः सम्यगर्थनिरूपणे॥ तत्रैव—१७

'शिवादन्यतो न स्तः' इत्यादिना प्रदर्शितं समर्थितं ब्रह्माद्वैतसिद्धान्तं सच्चिदा-

नन्दो वसुदेवानन्दवर्धनो भगवान् श्री कृष्णचन्द्रोऽपि धनञ्जयापरपर्यायभूतमर्जुनं निमित्ती-कृत्य समुल्लितवान् । तथाहि—

मत्तः परतरं नान्यत् किञ्चिदस्ति धनञ्जय ।
मयि सर्वमिदं प्रोतं सूत्रे मणिगणा इव ॥

श्रीमद्भगवद्गीता—७।७

'सर्वे लोका आत्मनि ब्रह्मणि मणय इवौताः प्रोताश्च'

गीतायाः—शङ्करानन्दी टीका—

इत्यनेन सर्वेषामेव खलु लोकानां सर्वात्मभूते परब्रह्मण्येवौतत्व प्रोतत्व प्रति-पादनाल्लोकानां सर्वेषामेव प्रकृत्याश्रयत्वं सर्वथा चास्ति मिथ्याभूतं प्रत्युत् अहमेवास्मि सर्वाधारभूत इत्याह—मत्तः = सच्चिदानन्दस्वरूपात् भगवतः परमेश्वरात् परतरं कारणम् अन्यत् किमपि नास्त्येव नूनं विभाव्यताम् ।

इदं सर्वमेव चराचरात्मकं जगत् मय्येव सर्वाधिष्ठानभूते सच्चिदानन्देतिस्वरूप-लक्षणलक्षिते ब्रह्मणि अव्याकृतादि स्थूलान्तं जगत् सर्वं प्रोतमस्ति । तन्तुषु पटवत्, सूत्रे च मणिगणवत् मत्सत्तामेवाऽनुवृत्य सन्तिष्ठते इति न ततः कथमपि पार्थक्यं विज्ञेयम् ।

यथा एकस्या एव भूमेः स्वास्थ्यगृहादिकल्पनया भेदव्यवहारो निष्पन्नो भवति तथैव सूत्रादौ सूत्रमिति मणिरिति च व्यवहारोऽपि कल्पितो न तु वास्तवः । अन्यथा—'ब्रह्मैवेदं[1] सर्वम्' 'आत्मैवेदं[2] सर्वम्' 'सच्चिदानन्दरूपमिदं[3] सर्वम्' इत्यादिश्रुति विरोधश्च स्यादिति भावः ।

अपि च— 'अहं चिदम्बरे भानावहं चिद्भूतपञ्जरे ।
सुरासुरेषु चिदहं स्थावरेषु चरेषु च ॥

योग वा० ५।२७।१२

सर्वशक्तिरनन्तात्मा सर्वभावान्तरस्थितः ।
अद्वितीयश्चिदन्तर्यः पश्यति स पश्यति ॥

तत्रैव = ४।२२।२८।

भूतानि शम्भुर्भुवनानि शम्भु-
र्भुवनानि शम्भुर्गिरयश्च शम्भुः ।
स एव सर्वं न ततोऽतिरिक्तम्-
ततः स एकः परमार्थमेतत् ॥

सू० सं०, य० १खं, ३८ अ० श्लोक १८

एतावता प्रबन्धेन 'पार्वतीपरमेश्वरौ' इत्यादौ घटकीभूतस्य परमेश्वरस्य ब्रह्मा-द्वैतरूपता श्रुतिस्मृतिनिरूपिता प्रदर्शिता । देवतायाः स्तुतिरप्यस्ति एका दार्शनिकी दृष्टिः सैव प्रदश्यते महाकविः श्री कालिदासः कुमारसंभवेऽपि स्वीयां दार्शनिकी दृष्टि दर्श-यति स्तुतिरूपेण । स्तुतिश्च गुणवत्तया ख्यापनमित्येकः पक्षः । यथा—'निर्विघ्नसमाप्ति-

---

१. वृहद्वारण्यकोप० २।५।१, २. छान्दाग्योप० ७।२५।१।
३. नृसिंहोत्त रतापनीयोपः—७ ।

कामोदेवतास्तुतिमाचरेत्' । सा च देवतास्तुतिः 'अजं निर्गुणं निर्विकल्पं निरीहम्' इत्यादिरूपेण तदीयगुणवत्तया ख्यापनरूपा विज्ञेया ।

अपि च "उत्कर्षवत्तया ज्ञानानुकूलः शब्दः" इत्यपि केचन दार्शनिका देवतास्तुतिरूपेण प्रमाणयन्ति । अर्थात् "सर्वतोऽयमुत्कृष्टः" इत्येवंरूपेण सर्वथा सर्वोत्कृष्टगुणत्तया-प्रतिपादकशब्दो देवतास्तुतिरूपः । यथा—

स्वकालपरिमाणेन व्यस्तरात्रिदिवस्य ते ।
यौ तु स्वप्नावबोधौ तौ भूतानां प्रलयोदयौ ॥

कुमारसंभवः, २ सर्गः, श्लो० ८

अर्थात् स्वकालस्य परिणामेन अर्थात् "चतुर्युगसहस्राणि ब्रह्मणो दिनमुच्यते" इत्येवंरूपेण व्यस्तरात्रिदिवस्य ते भगवतः परमेश्वरस्य यौ तु स्तः स्वप्नावबोधौ तौ एव वर्तेते भूतानां प्रलयोदयौ = संहारसृष्टी । तथाचोक्तम्—

यदा स देवो जागर्ति तदैव चेष्टते जगत् ।
यदा स्वपिति शान्तात्मा तदा सर्वं प्रलीयते ॥"

तत्रैव—मल्लिनाथटीकायाम्—

इत्यञ्च पूर्वश्लोकात्मकप्रबन्धघटक "स्वकालपरिमाणेन व्यस्तरात्रिदिवस्य ते" इतिपद्यघटक "व्यस्तरात्रिदिवस्यते" इति पद्यैकदेशघटकरात्रिदिवसयोः स्वरूपनिर्वचनावसरे उपर्युक्तेन श्लोकात्मकेन प्रबन्धेन श्रीमहाकविकालिदासस्तथा श्रीमल्लिनाथश्चतुर्षु युगेषु सहस्रचतुष्टवारं व्यतीतेषु ब्रह्मणो दिनमेकं भवति, तथा तथैव रात्रिरपि दिनवदेव विज्ञेयेति चास्ति तयोः शास्त्रानुमोदितं कथनम् ।

तत्र च "रात्रिः' निरस्तैतद्द्वीपवर्तिरविरश्मिजालः कालविशेषः" किरणाव० १ एवं "सम्पूर्णादित्यमण्डलदर्शनयोग्यो यः कालस्तद्भिन्न कालो वा रात्रिः"—वैशेषिकव० । तथा—इतोऽतिरिक्ता विद्वांसस्तु-मानवानां स्वदेशाऽपेक्षया सूर्यमण्डलस्याऽदर्शनयोग्यतासम्पत्तिमान् काल एव रात्रिरिति वदन्ति ।

पौरणिकप्रभृतयस्तु विद्वांस इत्थमुदीयन्ति यत्—पितॄणां शुक्लपक्ष रूपः काल, देवानाञ्च दक्षिणायनरूपः कालः । यथोक्तम्—

मासेन च मनुष्याणांपितॄणां तदहर्निशम् ।
कृष्णपक्षे दिनं प्रोक्तं शुक्ले रात्रिः प्रकीर्तिता ॥

वाचस्पत्यम्—

एवं देवानां दिनरात्रिविषये तादृशविषयवेत्तारो विद्वांसो दिनमुत्तरायने सति प्रोक्तवन्तस्तथा रात्रिञ्च दक्षिणायने सत्येव जायते नान्यथेति प्रोद्‌ङ्क्यन्ति । रात्रिदिवसयोः प्रागुक्तमानातिरिक्तं मानं सर्वथा चास्ति अशास्त्रीयम् ।

इदञ्चास्ति शास्त्रीयम् अप्रवृत्तप्रवर्तनरूपं विधानम्, अर्थविशेषाधायको वा प्रत्ययो विधिरिति तदनुसृत्यैव सर्वमपि शास्त्रीयं विषयजातं प्रस्फोरणीयं सम्पादनीयञ्च । "ज्ञात्वा शास्त्रविधानोक्तम्" इति न्यायेनैव शास्त्रीयं यावदेव कार्याऽकार्यं समुपपादनीयम् ।

इत्थञ्च देवतास्तुतेरपि अर्थविशेषाभिधायकप्रत्ययत्वेन विधिरूपतयाविधेः फलवादलक्षणा या चास्ति प्रशंसा सा स्तुतिः । सम्प्रत्ययार्थं स्तूयमानं श्रद्दधीत इति प्रवर्तिका च फलश्रवणात् प्रवर्तते ।—वात्स्या० भा० २।१।६४।

प्रशंसा च सर्वोत्कृष्टगुणवत्ताप्रतिपादकशब्दात्मिका इति तस्या देवतास्तुतिरूपत्वात् दार्शनिकदृष्ट्यन्तर्गतत्वं सिद्धयति । अपि च—"साक्षाद् विध्यर्थस्य प्रशंसार्थकं वाक्यम्, यथा सर्वजिता वै देवाः सर्वमजनयन् इति विधेः सर्वस्याप्त्यै सर्वस्य जित्यै सर्वमैवैतेनाऽऽप्नोति सर्वं जयति" इत्यादि सर्वमेव वाक्यमस्ति स्तुतिः गौतमवृत्तिः २।१।६४।

एवमिन्द्रोऽग्निस्तौति । यथा—

"प्रीतः स्वाहास्वधाहन्तकारैः प्रीणयसे स्वयम् ।
देवान् पितॄन् मनुष्यांस्त्वमेकस्तेषां मुखं यतः ॥"

कु० सं०, १० सर्गः, श्लोक १७

अर्थात् हे अग्ने ! त्वं प्रीतः सन्, स्वाकारः, स्वधाकारो, हन्तकार, एतैः शब्दैः कृत्वा होतृजनैः-अग्नौ प्रक्षिप्तेन हविषा इन्द्रादीन् देवान्, पितॄन्, मनुष्यांश्च त्वं स्वयं प्रीणयसे । कथमित्याकाङ्क्षायामाह—त्वम् यत एक एव तेषां देवादीनां मुखमसि इति भावः । अपि च—

"त्वयि जुह्वति होतारो हवींषिध्वस्तकल्मषाः ।
भुञ्जन्ति स्वर्गमेकस्त्वं स्वर्गप्राप्तौ हि कारणम्" ॥१८॥

तत्रैव—

अर्थात् होतारो हवींषि त्वयि जुह्वति । अतएव ते होतारोध्वस्तकल्मषाः = ध्वस्तपापाः सन्तः स्वर्गं भुञ्जन्ति । हि = यतः, त्वमेक एव स्वर्गप्राप्तौ कारणम् । इत्यप्यस्ति सर्वोत्कृष्टगुणवत्ताप्रतिपादकशब्दात्मिका देवतास्तुतिरिति । अन्यच्चापि—

हवींषि मन्त्रपूतानि हुताश ! त्वयि जुह्वतः ।
तपस्विनस्तपःसिद्धिं यान्ति त्वं तपसां प्रभुः ॥१९॥

निधित्से हुतमर्काय = स पर्जन्योऽभिवर्षति ।
ततोऽन्नानि प्रजास्तेभ्यस्तेनासि जगतः पिता ॥२०॥

एवम्—अन्तश्चरोऽसि भूतानां तानि त्वत्तौ भवन्ति च ।
ततो जीवितभूतस्त्वं जगतः प्राणदोऽसि च ॥२१॥

तथा—जगतः सकलस्यास्य त्वमेकोऽस्युपकारकृत् ।
कार्योपपादने तत्र त्वत्तोऽन्यः कः प्रगल्भते ॥२२॥

अमीषां सुरसंघानां त्वमेकोऽर्थं समर्थने ।
विपत्तिरपि संश्लाघ्योपकारव्रतिनोऽनलः । २३॥

तत्रैव पश्यन्तु—

अर्थात् हे हुताश ! तपस्विनो महात्मानोजना मन्त्रपूतानि हवींषि त्वयि जुह्वतः सन्त. तपःसिद्धिं प्राप्नुवन्ति, यतस्त्वं तपसां प्रभुः ॥१९॥

हे अग्ने ! त्वमर्काय = भगवते भास्कराय = सूर्याय, हुतं हविर्निधानरूपेण प्रयच्छसि । अतएवाऽर्कः पर्जन्यः सन्नभिवर्षति ततश्चाऽभिवर्षणजन्यैरन्नैर्वयं सर्वेऽपि जीवनं यापयामः । एतस्माद्धेतोर्भवान् जगत पितेतिगीयते । पाति = रक्षतीति पितेति यौगिकव्युत्पत्त्या रक्षकमात्रस्य पितृत्वं व्याहर्तुं व्यवहर्तुं च शक्यते, नहि केवलं जन्मदातुर्जनकस्यैवेति भावः । तथाचोक्तम्—

अन्नदाता भयत्राता यश्च कन्यां प्रयच्छति ।
जनिता चोपनेता च पञ्चैते पितरः स्मृताः ॥२०॥

कुमारसं० भल्लिनाथटीका—

हे अग्ने ! त्वं भूतानां = प्राणिनाम्, अन्तश्चरोऽसि = अन्तर्व्याप्यअसि । तानि च भूतानि त्वत्त एव भवन्ति । ततो जीवितभूतः = जीवितानि भूतानि येन स तथोक्तो जगतः प्राणदश्चासि । अर्थात् अग्नेरन्तराधेयतया = जठराग्निरूपेण, प्राणिनां जीवनमतो जीवितभूतत्वम् । तथाऽग्नेरेव विश्वोत्पादकत्वेन प्राणदातृत्वञ्च सिद्धयति । अस्मिन श्लोके उत्पादकत्व प्राणदातृत्वयोर्नास्ति साहचर्यनियमः = सामानाधिकरण्यनियमः । यतः कुलालस्य घटोत्पादकत्वेऽपि नास्ति जीवनदातृत्वम् इति तु निष्कर्षः ॥२१॥

हे अग्ने ! त्वमेक एव खलु चास्य सकलस्य जगतः उपकारकृत् = उपकारदक्षः । असि । अत एवाऽस्माकं तत्र कार्यसम्पादने त्वत्तोऽन्यः कः प्रगल्भते = समर्थो भवेत् इति, न कोऽपि परिलक्ष्यते एवंभूतसामर्थ्यवान् ॥२२॥

हे अनल ! अमीषां सुरसंघानां = देवसमुदायभूतानामस्मदादीनामर्थसमर्थने = कार्यसाधने, त्वमेक एव समर्थोऽसि । एवं विधेनापि विपन्नेन मया किं विधेयमित्याह—विपत्तिरपीति । उपकारेषु = परहितेषु, व्रतिनः = नियमवतः, पुरुषस्य, विपत्तिरपि = आपत्तिरपि । सम्यक् श्लाघ्या भवति, अतो विपन्नोऽपिजनः स्तूयसे इत्यर्थः ॥२३॥

इयञ्च अग्निप्रभृतिदेवानां स्तुतिर्मङ्गलरूपैव । स्तुतेर्वस्तुनिर्देशात्मकमङ्गलरूपताऽङ्गीक्रियते । तत्र मङ्गलस्य त्रैविध्यं प्रतिपादितं वर्तते । तथाचोक्तम्—

आशीर्वादनमस्कारवस्तुनिर्देशभेदतः ।
मङ्गलं त्रिविधं प्रोक्तं शास्त्रादीनां मुखादिषु ॥

सिद्धान्तचन्द्रोदयः—

तत्र वस्तुनिर्देशात्मकं मङ्गलम्—"पुण्यजनकशब्दनिबन्धः" "पुण्यकृत्स्तुतिप्रतिपादकशब्दो वा ।"—न्यायसिद्धान्तमञ्जरीप्रकाशः—

वस्तुनिर्देशात्मकमङ्गलस्य पुण्यजनकशब्दनिबन्धरूपतया, पुण्यकृतस्तुतिप्रतिपादकशब्दरूपतया, स्तुतेरपि तथाविधत्वेन अर्थात् स्तुतेरपि शब्दनिबन्धरूपत्वेन, स्तुतिरूपस्य च शब्दनिबन्धस्य पुण्यजनकत्वेन पुण्यजनकशब्दनिबन्धरूपवस्तुनिर्देशात्मकमङ्गलरूपता स्तुतेरपि सिद्धयति ।

मङ्गलञ्च ग्रन्थस्यादौ ग्रन्थमध्ये ग्रन्थान्ते च कर्तव्यमेव । इति कृत्वा स्तुतिरूपो मङ्गलविशेषोत्र विधीयते । तथा च चिन्तामणिग्रन्थे सुस्पष्टमिदं लिखितं वर्तते यत्—

"मङ्गलमाचरेत् इति न विधिः किन्तु निर्विघ्न, समाप्तिकामः प्रारिप्सितविघ्नोपशमन-कामो वा देवतास्तुतिमाचरेत् इत्यादिः प्रत्येकमेव विधिः।" अपि च—

"मङ्गलाचारयुक्तानां नित्यञ्चप्रयतात्मनाम्।
जपतां जुव्हतां चैव विनिपातो न विद्यते।।

इत्यनेन बोधितादर्शदर्शनादेः पृथगेव मङ्गलत्वं वर्तते न तु विघ्ननिवर्तकतया।— चिन्ताम० १ मङ्ग०

योगशास्त्रज्ञा विद्वांसः—"अगर्हिताभीष्टावाप्तिर्मङ्गलम् वदन्ति। अभीष्टं च सुखाऽवाप्ति दुःखपरिहाररूपतयेष्टम्।

सर्वदर्शन-पातञ्ज०

तस्य च स्तुतिरूपस्य वस्तुनिर्देशात्मकस्य मङ्गलस्य प्रागुक्तस्य दार्शनिकदृष्टिरूप-त्वेन महाकाव्येषु तन्निरूपणस्य नितान्तमावश्यकत्वेन तन्निरूपितमितिध्येयम् इति संक्षेपः।

"नमस्कारादिरूपमङ्गलमन्तरा परमेश्वरस्य कीर्तनं वस्तुनिर्देशः।"—तर्क-प्रकाशः—देवतास्तुतावपिविशेषतः परमेश्वरस्य कीर्तनमेव जायते इत्यनेनापि देवास्तुतेः मङ्गलरूपता सुस्पष्टैवेति भावः। एवम्—'

लवणेन विलुप्तेज्यास्तामिस्रेण तमभ्ययुः।
मुनयो यमुनाभाजः शरण्यं शरणार्थिनः' ॥

रघु० १५ सर्गः, श्लो० २

अनेन श्लोकात्मकेन पद्येन शरणागतिरूपा भक्तिर्दर्शिता। भक्तिमात्रस्य ब्रह्मज्ञानं प्रति हेतुत्वेन सा हि भक्तिरमृतत्वाय कल्पते। भक्ति परायणानां भक्तानां नित्यनिरन्तर श्रवणमननादि निष्ठानां कृते सच्चिदानन्दो भगवान् तादृशं बुद्धियोगं प्रयच्छति येन बुद्धि-योगेन ते मद्भक्ता निःसङ्गं, निर्विकारं, व्योमवन्निराकारं, सदानन्दैकरसं, निर्विशेषं, नित्यकूटस्थं, चिद्रूपं, परं ब्रह्माऽद्वितीयं मामेवोपयान्ति। तदेवोक्तवान् सच्चिदानन्दो भगवान्—

मच्चित्ता मद्गतप्राणा बोधयन्तः परस्परम्।
कथयन्तश्च मां नित्यं तुष्यन्ति च रमन्ति च ॥ ९ ॥

तेषां सततयुक्तानां भक्तानां प्रीतिपूर्वकम्।
ददामि बुद्धियोगं तं येन मामुपयान्ति ते ॥ १० ॥

गीता—अध्याय १०

महाकविः श्रीकालिदासोऽपि रघुवंशीय पञ्चदशसर्गीय द्वितीय श्लोकेन 'मुनयो यमुनाभाजः शरण्यं शरणार्थिनः' इत्यादिना शरणाऽऽगतिरूपाया भक्तेरेव महत्त्वं प्रभा-वञ्च वर्णितवन्तः।

अपि च—'मयि भक्तिर्हिभूतानाममृतत्वाय कल्पते'।

श्रीमद्भाग० १०।८२।४५।

'भक्त्या बिना ब्रह्मज्ञानं कदापि न जायते'

त्रिपाद्विभूति महानारायणोप:--८।१

'बुद्धिमतामनायासेनैवाऽचिरात् तत्त्वज्ञानं भवति'

--तत्रैव

महाकाव्ये रघुवंशे महाकवि श्रीकालिदासेन पञ्चदशसर्गे द्वितीयश्लोके वानरार्भकात्मिकां शरणागतिरूपां भक्तिमालम्ब्य तादृशभक्तिशालिनां भक्तानां कृते तत्त्वज्ञानम् = आत्मज्ञानम्, अविलम्बेनैव जायते यदि सा शरणागतिरूपा भक्तिः वानरार्भकात्मिका स्यात्, नहि तत्र मार्जारार्भकात्मिकापि भक्तिरपि तत्र ब्रह्म ज्ञानस्य जायमानत्वे हेतुरित्यर्थः ।

अत एवाऽहं सच्चिदानन्दो भगवान् मथुराचन्द्रः श्रीकृष्णचन्द्रस्तेषामेव तादृशप्रागुक्तेभक्तिशालिनामेवोपरि अनुग्रहदृष्टि दिशाऽज्ञानजं तमो भास्वता ज्ञानदीपेन नाशयामि । तथा चोक्तम्--'तेषामेवाऽनुकम्पार्थमहमज्ञानजं तमः ।

नाशयाम्यात्मभावस्थो ज्ञानदीपेन भास्वता ॥

श्रीमद्भागवद्गीता--अ० १०, ११ श्लो०

ननु "सत्यज्ञानमनन्तं ब्रह्म" "नित्यं विज्ञानमानन्दं ब्रह्म" इत्यादिनाऽनन्तस्याऽनन्तगुणयुतस्य सर्वथा परिपूर्णतां गतस्य तस्य परमात्मनो ब्रह्मणस्तत्र समवाप्तिरस्त्येवेति कथं पुनरुक्तम्—

यत् 'ददामि बुद्धियोगं तं येन मामुपयान्ति ते' इति । सत्यमुक्तं त्वया नात्रमिथ्या किञ्चिदपि नहि प्रोट्टङ्कितम् । तथापि मां मूढा अज्ञानेन प्राप्तमप्यप्राप्तमेव मन्यते । यथा जन्मनाऽन्धा जनाः प्राप्तमपि भगवतो भास्करस्य प्रकाशमप्राप्तमेव मन्यन्ते । अतस्तेषामस्मद्भक्ति परायणानां मत्प्राप्तिकारणीभूतज्ञानस्याऽऽवरणभूतं प्रभूतमज्ञानं नाशयामि । तदेव स्पष्टयति 'नाशयाम्यात्मभावस्थो ज्ञानदीपेन भास्वता' इति । अर्थात् मच्चित्तत्व, मद्गतप्राणत्वादिभिर्ज्ञानपरिपाकसाधनभूतैः प्रभूतैरुपायैर्ये सच्चिदानन्दम् आनन्दकन्दं भगवन्तं मां परमात्मानं भवबन्धनतो मुक्त्यै भजन्ति तेषामेव वानरार्भकात्मिकां मुक्तिमाश्रित्य प्रवर्तमानानां मद्भक्तिनिष्ठानां ब्रह्मविदां यतीनामनुकम्पार्थनिमित्तमेवाऽहमात्मभावस्थः सन् नित्यनिरन्तरवानरार्भक भक्तिसमाधिनिष्ठाऽसम्भाविताऽप्रतिबद्धभावेन प्रकाशात्मकेन ज्ञानदीपेनाऽनाद्यविद्याजातमावरणात्मकमज्ञानाऽन्धकारं सर्वतोभावेन नाशयामि । यथा—उदयाचलारूढो भगवान् भास्करः स्वीयेन प्रकाशेन घट, पटाद्यावरणकर्तृ तमो निःशेषं विनाशयति तथैव मामेव सच्चिदानन्दस्वरूपलक्षणलक्षितं भगवन्तं परब्रह्म परमेश्वरं परमात्मानं नैरन्तर्येण ध्यायतां यतीनां धीवृत्तिफलकारूढः सन्नहं स्वीयप्रकाशव्याप्तेन धीवृत्तिविशेषण नित्य, शुद्ध, बुद्ध, मुक्तस्वरूपं मदीयम् अशेषमविद्यान्धकारं नाशयित्वा स्वीयं परिपूर्णमनन्तमखण्डानन्दैकरसात्मकं सर्वथाऽविद्यातत्कार्य सम्बन्धलेशशून्यं प्रकाशयामि । तेनैव प्रकाशेन तस्य विदेहमुक्तिरूप कैवल्यलाभो जायते । एवमविद्यान्धकार स्तज्जन्यश्च भ्रमान्धकारश्च सर्वतोभावेन निवर्तते ।

इत्थञ्च बुद्धिमान्द्यसम्पन्नस्य मुमुक्षोः कृते एव स्वमुपासितुं साधारणतया विभू-

तियोगं विविच्य स्वीयोपासनया विशुद्धान्तः करणस्याऽधिगतात्मतत्त्वस्य यतेर्योगिनो वा निर्विशेषोपासनं तत् फलञ्च सच्चिदानन्दो भगवान् स्वयमेव विवेचितवान् ।

ततश्च निर्विकल्पस्य, निर्गुणस्य, निर्विशेषस्य परब्रह्मपरमेश्वरस्य स्वरूपस्य मूढानां कृते सर्वथाऽनुपास्यत्वेन विनिश्चित्य मतेरतिमान्द्यवतो मुमुक्षोः सर्वात्मकमीश्वर-स्वरूपं सविशेषमप्युपासनाऽशक्यमिति विज्ञायैव तदुपर्यनुग्रहविधानेच्छयैव तदुपासनानुरूपमुपाध्यवच्छिन्नस्यैव तस्य परमात्मने । विशेषेण विस्तरेण च सख्यभक्तिभावनाभावितान्तः करणोऽर्जुनः श्लोकद्वयेन स्तुतिं विद्यते—"परं ब्रह्म परं धाम" इत्यादिना—

"परं ब्रह्म परं धाम पवित्रं परमं भवान् ।
पुरुषं शाश्वतं दिव्यमादि देवमजं विभुम् ॥१२॥
"आहुस्त्वामृषयः सर्वे देवर्षिर्नारदस्तथा ।
असितो देवलो व्यासः स्वयं चैव ब्रवीषि मे ।।

गीता—अ० १०, श्लो० १२-१३ ।

अर्थात्—परम् = अद्वितीयम्, आकाशन्निर्लेपं, नित्यनिरञ्जनम्, सविशेषब्रह्मणः सर्वथा विजातीयम् अप्राकृतम्, अतिसूक्ष्मम्, अप्रमेयम्, अतीन्द्रियम्, बारमेकं स्मृतिमात्रेण शतकोटिकल्पार्जितपापपुञ्जविनाशकत्वात् सर्वथा सर्वोत्कृष्टममं, वायोर्भगवतो भास्करस्य अग्निप्रभृतीनामपि देवानां पावित्र्यजनकत्वेन तेभ्योऽपि सदोत्तमं "पवित्राणां पवित्रं यो मङ्गलानाञ्च मङ्गलम्" इत्यादिस्मृतिप्रसिद्धमसङ्गं निराकारं 'नित्यं विज्ञानमानं ब्रह्म' इति श्रुतिप्रसिद्धं नित्यम् = ध्वंसाऽप्रतियोगित्वावच्छिन्नेव सति प्रागभावाऽप्रतियोगित्वावच्छिन्नमानन्दस्वरूपं विज्ञानरूपं परं ब्रह्म भवानेवास्तीति भगवद्भक्तिमापन्नोऽर्जुनो ब्रूते स्तौति च, अर्थात् स्तुतिरूपेण भगवन्तमानन्दकन्दं सच्चिदानन्दं श्रीकृष्णचन्दं ब्रूते इति तु परमार्थः ।

नैतावन्मात्रं पर्याप्तमपि च देवर्षिर्नारदः, असितो देवलो व्यासः—इत्येवंविधा अन्येऽपि ऋषयो महर्षयो मुनयो महामुनश्च त्वामेव आदिदेवं जन्ममरणादिविकारशून्यत्वेनाऽजं परमात्मानं सर्वमूर्तसंयोगित्वेन च विभुम् आहुः कथयन्तीति वानरार्भकात्मिकया भक्त्या श्रद्धान्वितोऽर्जुनः स्तौति यत्त्वमेव यज्ञतपसामसि भोक्ता, एवन्त्वमेव 'सर्वभूतस्थितं यो माम्' इत्यादिना त्वमेव खलु स्वं परमात्मानं मे वर्णितवानसि, एतस्माद्धेतोस्त्वमेवासि सर्वात्मको नित्य, शुद्ध, बुद्ध, मुक्तस्वरूपो भगवान् सच्चिदानन्द इति ।

इयञ्च वानरार्भकात्मिका परमा भक्तिरर्जुननिष्ठा परम्परया तत्त्वज्ञानोत्पादनद्वारा अद्वैतभावनां जनयति द्रढ़यति च । तथाहि—

भक्तिरेव परमार्थदायिनी—
भक्तिरेव भवरोगनाशिनी ।
भक्तिरेव परवेदनप्रदा—
भक्तिरेव परमुक्तिकारिणी ॥

अर्थात् अद्वैतरूपः. सच्चिदानन्दरूपः नित्यशुद्धबुद्धमुक्तस्वभावो निर्विकारः, मायाऽपरपर्यायभूताऽज्ञान, तत् कार्यं, तत्कर्म, तद्धर्म, सम्बन्धलेशवर्जितः, तथा स्वशक्तिभूतया स्ववशीकृतमायया सृष्टिस्थितिविनाशप्रवेशनियमनादिक्रिया समर्थो योऽस्ति परमार्थस्तद् दायिनी चाऽस्तीयमेव भक्तिः प्रागुक्तलक्षणलक्षिता। एवम्—भवरोगनाशिनी चाप्यस्ति इयमेव खलु वर्तते भक्तनिष्ठा भक्तिः। अर्थात् भवस्य = जगतो ये सन्ति, रोगाः = जनन-मरण जननीजठरेशयनस्वरूपाः महादुःखस्वरूपा महादुःखाप्रदा वा—तेषाम्, आहोस्वित् "को रोग एव भव एव साधो ?" इत्याद्युक्तं गुरुशिष्ययोः प्रश्नोत्तरानुसारं भवस्वरूपो भवलक्षणलक्षितो योभवात्मको रोगस्तस्य सर्वथा विनाशिनी चास्तीयमेव पूर्वोक्तलक्षण-लक्षिता भक्तिः। अथ च परब्रह्मस्वरूपं यद्वेदनम् = ज्ञानम्, परम्परया तत्त्वज्ञानद्वारा नित्यशुद्धबुद्धमुक्तब्रह्म प्रापिका चास्तीयमेव विशुद्धा भक्तिः। यथावानरार्भकादिमकया विशुद्धया भक्त्या तत् व्योमवन्निर्लेप परं ब्रह्म समवाप्यते। अपि चेयमेव भक्तिर्विदेह-कैवल्यलक्षणलक्षिता या चास्तिपरमा मुक्तिः = भवबन्धनतः सर्वथा निवृत्तिकारणीभता तत् प्रापिकाऽपि चास्तीयमेव भक्तिः।

अपि च यादृशेन स्वात्मबोधात्मकेनाऽऽत्मज्ञानेन प्रागुक्त लक्षणलक्षिता पवित्रा विशुद्धा च मुक्तिः समवाप्यते सः स्वात्मबोधः सच्चिदानन्द स्वरूपस्य परमानन्दरूपस्य भगवतः श्रीकृष्णचन्द्रस्य प्रकाशमन्तरा नैव कस्यचित् यतेर्योगिनोवा मुमुक्षोर्वा भवितु-मर्हतीति भावः। उक्तञ्च—

"कृते कृष्णप्रकाशन्तु स्वात्मवोधो न कस्यचित्"।

श्रीमद्भाग० ३।९।

वेदान्तमतेन दार्शनिकदृष्टी तुलनात्मकं व्याख्यान्तरम्—

सगुण— निर्गुणभेदमौपाधिकमाश्रित्यापि खलु ब्रह्मणः

"जगद्योनिरयोनिस्त्वम्" इत्यादिश्लोकस्य व्याख्यानान्तरमपि कर्तु शक्यते। तत्र भगवच्छङ्कराचार्य मतावलम्बिनोऽद्वैतवेदान्तिन इत्थं समुद्गिरन्ति यत् सगुणं ब्रह्मैव जगद्योनिः, जगदन्तकः, जगदादिः, जगदीशश्चस्ति। अयञ्च द्वैताऽवस्थाप्रतिपादको भेदः खलु मायामाश्रित्य प्रवर्तते। माया = अज्ञानम् = अविद्या चेति सन्ति अनर्थान्तरभूताः। तत्राऽज्ञानस्य मायाऽविद्यापरपर्यायभूतस्य चास्तीदं लक्षणं यत्—

"सदसद्भ्यामनिर्वचनीयं त्रिगुणात्मकं ज्ञानविरोधी भावरूपं यत्किञ्चित् "इति वदन्ति। "अहमज्ञः" इत्याद्यनुभवात्। "देवात्मशक्तिं स्वगुणैर्निगूढाम्" इत्यादि स्मृतेश्च वेदान्तसारग्रन्थे अविद्याप्रकरणेः पृष्ठ—१८

एतेन जगत्कारणीभूतं मायाऽपरपर्यायभूतमज्ञानं सिद्ध्यति, तदेवाऽज्ञानम् आहो स्वित् सैव मायाऽस्ति ब्रह्मण उपाधिः। एतादृशोपाध्यवच्छिन्नं चैतन्यं = ब्रह्म, ईश्वर इति च व्यपदिश्यते।

तथाचोक्तम्—

कार्योपाधिरयं जीवः कारणोपाधिरीश्वरः।
कार्यकारणतां हित्वा पूर्णबोधोऽवशिष्यते॥

शुकरहस्योप० ३।१२।

निर्गुणं च ब्रह्म जगदयोनिः, निरन्तकम्, जगदनादिः, निरीश्वरञ्चोपाध्यनवच्छिन्नं चैतन्यम् ।

सगुणं ब्रह्मैव खलु जगत उत्पत्ति-स्थिति-लयकारणं भवति। इदमेव चास्य ब्रह्मणस्तटस्थं लक्षणं बोध्यम्, अर्थात् जगदुत्पत्तिकारणत्वम्, जगत् स्थिति हेतुत्वम्, एवं जगल्लयकारणत्वञ्च ।

इदञ्च प्रत्येकमेव खलु सगुणस्य ब्रह्म ब्रह्मणो लक्षणं विज्ञेयं न तु चक्र-चीवरादिन्यायेन शक्ति-व्युत्पत्त्यभ्यासन्यायेन वा समुदितकारणत्वं लक्षणम्, अपि तु तृणारणिमणिन्यायेन प्रत्येकस्यैव यथा दाहत्वावच्छिन्नं प्रति कारणत्वम्, तथैव प्रकृतेऽपीदृश्येव गतिश्चिन्तनीया, अर्थात् सगुणब्रह्मणोऽपि प्रत्येकस्यैव कारणत्वघटितस्य लक्षणत्वं बोध्यम् ।

तत्रापि च जगदुत्पत्तिकारणत्वमित्यनेन सगुणस्य ब्रह्मणो जगद्योनित्वं, जगदादित्वञ्च प्रतिपादितं भवति। जगल्लयकारणत्वमित्यनेन च जगदन्तकत्वं तस्य ब्रह्मणः संसूच्यते। जगत्स्थितिकारणत्वमित्यनेन च जगदीशत्वं=जगत्स्वामित्वं जगन्नियतृत्वं परिलक्षितं भवति।

सगुणमेव च ब्रह्म ईश्वरोऽपि कथ्यते वेदान्ततत्त्ववेत्तृभिर्वेदान्तविद्भिः सर्वे एवाऽऽस्तिकाः खलु ईश्वरस्य जगत्स्वामित्वं करुणावरुणालयत्वञ्च प्रतिपादयन्ति। स चाऽयमीश्वरो दया—दाक्षिण्य-अगाधकारुण्यादिगुणोपेतः सन्नेव जगतो निर्माणं विधत्ते ।

सगुणं निर्गुँणस्वरूपं ब्रह्म ।

त्रिपाद्विभूतिमहानारायणोप० ।।।

इति श्रुतिसिद्धान्तानुसारं सगुणं=सविशेषः एवं निर्गुणं=निर्विशेषं सर्वसामर्थ्यसम्पन्नं निष्क्रियं ब्रह्मैवाऽस्ति ।

सगुणस्य ब्रह्मणो विषये उपासकस्य कृते इन्द्रियाणि साधनानि भवन्ति। इन्द्रियाणि च सन्ति पुष्पपत्रस्वरूपाणि यानि च भगवतश्चरणारविन्दयोः समर्पितानि भवन्तीति। तत्र चक्षुर्भ्यां भगवतः स्वरूपदर्शनम्, श्रोत्राभ्यां भगवतः कथाश्रवणम्, जिह्वया भगवन्नामोच्चारणम्, पाणिभ्यां पूजादि कार्यम्, पादाभ्यां तीर्थाटनं विधेयम्। एवं क्रमेण खलु समस्तेन्द्रियाणां प्रभुसेवार्पणसंविधानमेव चास्ति परमं प्रयोजनम्। इयञ्च भवति साकारस्य सगुणस्य ब्रह्मण उपासनया।

सगुणस्य ब्रह्मण उपासनैव मूर्तिपूजा कथ्यते, अर्थात् भगवतः परमेश्वरस्य मूर्तिं विधाययन्मूर्तेस्तस्याः पूजनं सम्पाद्यते तत् पूजनमपि साकारोपासनाशब्देन व्यपदिश्यते। इयञ्च मूर्तिपूजा स्वीयशक्त्यनुरूपं स्वीयेष्टदेवतानुक्रमेण नानाविधानां देवतानामेव विधीयते। एवं मातुः, पितुः, पूज्यजनस्य, साधोः, महात्मनः, ब्राह्मणस्य, रोगिणः, तथा वृद्धप्रभृतिमूर्तिमतां प्राणिनां पूजा सेवाऽपि साकारस्य सगुणस्य ब्रह्मण एव पूजा कथ्यते : इत्थञ्च सर्वत्रैव महाकाव्येषु दार्शनिकदृष्टिकोणो यत्र तत्र समुपलभ्यते।

अपि च "त्वदीयः परमात्मा कीदृशः, किंस्वरूपः, कुत्र च वर्तते" इत्यादिरूपेण हिरण्यकशिपुना पृष्ठो भक्तिभावभूषितो भक्तप्रवरप्रह्लादोऽप्यस्य भक्तानुकम्पिनो भगवतो नृसिंहस्य गोविन्दकृष्णप्रभृतिशब्दाभिधेयस्य सर्वमूर्त्तपदार्थसंयोगित्वेन सर्वत्र विराजमानस्य व्यापकीभूतस्याऽनन्तशक्तिशालिनः सगुणब्रह्मभूतस्य जगन्नियन्तुः परमेश्वरस्य विषये परमेश्वरीयं विभुत्वं, सर्वस्वरूपत्वं, सर्वान्तर्यामित्वञ्च प्रतिपादितवान् । तथा चोक्तं चित्सुखमुनिना परमहंस परिव्राजकाचार्येण—

स्तम्भाभ्यन्तरगर्भभावनिगदव्याख्यात तद्वैभवो—
यः पाञ्चाननपाञ्चजन्यवपुषा व्यादिष्टविश्वात्मतः ।
प्रह्लादाभिहितार्थतत्क्षणमिलत्दृष्टप्रमाणं हरि,
सोऽव्याद्वः शरदिन्दुसुन्दरतनुः सिंहाद्रि चूड़ामणिः ॥
चित्सुखी = प्रारम्भिकमंगलश्लोः—

अर्थात् स्तम्भस्याऽऽभ्यन्तरमिति स्तम्भाभ्यन्तरम्, तत्र च गर्भभावः इति स्तम्भाऽभ्यन्तरगर्भभावः, गर्भत्वञ्च प्रकेतेऽनभिव्यक्ततया वर्तमानत्वं, नहि खलु गुहान्तरावस्थित चैत्रमैत्रादिवत्प्रकटतया वृत्तित्वरूपम् । अनेन भगवतः सर्वान्तर्यामित्वं दर्शितम् । अनेनैव च सर्वगतत्वं व्यापकत्वञ्चापि दर्शितं भवति ।

सर्वगतमपि नैयायिकादेखि वस्तुतः परिच्छिन्नं स्यादित्यतस्तन्निवृत्तये तस्य सर्वस्वरूपतां दर्शयति—

"यः पाञ्चाननपाञ्चजन्यवपुषा व्यादिष्ट विश्वात्मतः" तत्रैव—

अर्थात् पञ्चाननः = सिंहः, पञ्चाननसम्बन्धि पाञ्चाननं, पञ्चसु दिक्षु आननमस्य विपरिवर्तते इति व्युत्पत्त्या विस्तृतमुखत्वाद्वा, 'पचि विस्तारे' इत्येतस्माद्धातोः पञ्चशब्दस्य यौगिकव्युत्पत्तेर्दर्शनान्न कोऽपि दोषः ।

पञ्चजनाः = मनुष्याः, तत्सम्बन्धि पाञ्चजन्यम् । पाञ्चाननं च तत्पाञ्चजन्युञ्चेति पाञ्चाननपाञ्चजन्यं तादृशं वपुः पाञ्चाननपाञ्चजन्यवपुः नरसिंहात्मकमित्यर्थः । तेन तथाविधेन वा वपुषा, व्यादिष्टा = कथिता विश्वात्मता = विश्वरूपता, येन यस्य वा । एतेन सर्वस्वरूपता दर्शिता तस्य सगुणस्य ब्रह्मणोनृसिंहरूपावच्छिन्नस्य सर्वलोकात्मन सर्वलोकस्वरूपस्य परमेष्ठिनः प्रह्लादोऽपि एतादृशरूपावच्छिन्नं सगुण ब्रह्मैव नमस्कृतवान् । तथाहि—

नमस्ते पुण्डरीकाक्ष ? नमस्ते पुरुषोत्तम् ? ।
नमस्ते सर्वलोकात्मन् ? नमस्ते तिग्मचक्रिणे ॥
विष्णु प्र०, प्रथमेंऽशे, १९अ०, श्लो० ६४—

अपि च—

नमो ब्रह्मण्यदेवाय गोब्राह्मणहिताय च ।
जगद्धिताय कृष्णाय गोविन्दाय च नमो नमः ॥६५॥
ब्रह्मत्वे सृजते विश्वं स्थितौ पालयते पुनः ।
रूद्ररूपाय कल्पान्ते नमस्तुभ्यं त्रिमूर्तये ॥६६॥

तत्रैव द्रष्टव्यम्—

इत्थञ्चेमे एव राम, कृष्ण, नृसिंह आदिरूपेण अवतरिताः सगुणब्रह्मभूताः परमात्मानः परमेश्वररूपावच्छिन्ना विष्णुशंकरप्रभृतयोऽनन्तशक्तिशालिनः स्वीयं परिपूर्णरूपं विहाय क्वचित् किञ्चिदंशेन क्वचिच्च सम्पूर्णतया वाऽवतरन्तीत्यत्र नास्ति लेशतोऽपि सन्देहानध्यवसायावसायावसरः।

इमे एव अयमेव च सगुणब्रह्मभूतात्मा परमात्मा यज्ञपुरुषरूपावच्छिन्नः खलु देवोद्देश्यकं हविः स्वरूपं हव्यम्, पितृपुरूषोद्देश्यकं हविः स्वरूपञ्चकव्यम्, भुङ्क्ते, अतएव चायं 'हव्यकव्यभुक्' पदाभिधेयतां भजते। यतः स पितृपुरूषाणां देवानाञ्च स्वरूपधृक्। पितृस्वरूपं धृत्वा कव्यं देवस्वरूपञ्च धृत्वाहव्यंमपि चाऽयं देवः परमपिता परमेश्वर एव भुङ्क्ते।

नानारूपावच्छिन्नं विजातीयं विलक्षणमिमं परमात्मानं योगिनोऽपि परिचिन्तयन्ति। तथाहि—

त्वां योगिनश्चिन्तयन्ति त्वां यजन्ति यज्विनः।
हव्यकव्यभुगेकस्त्वं पितृदेवस्वरूपधृक्॥
विष्णुपु०, प्रथमेंशे, १९अ० श्लो० ७३—

अपि च—

रूपं महत् ते स्थितमत्र विश्वम्-
ततश्च सूक्ष्मं जगदेतदीश।
रूपाणि सर्वाणि च भूतभेदा-
स्तेष्वन्तरात्माख्यमतीव सूक्ष्मम्॥
तत्रैव द्रष्टव्यम्—

त्वामेव योगिनश्चिन्तयति, त्वामेव याजकाः खलु यजन्ति इत्यादिना प्रापञ्चिकरूपावच्छिन्न तं सगुणं परमात्मानं निरूप्येदानीं शुद्धस्वरूपं वदति। विश्वरूपं ब्रह्माण्डं सावरणं किलैतज्जगद्ब्रह्माण्डान्तवर्त्तिविराट्स्वरूपं त्वामेव परिचिन्तयन्ति। महद्रूपमिदं ब्रह्माण्डं त्वय्येव सन्तिष्ठमानं विलोकयन्ति ज्ञानचक्षुषो योगिनः। ततश्च सूक्ष्मरूपावच्छिन्नं जगदेवता। ततोऽपि सूक्ष्माणि रूपाणि भूतभेदाः जरायुजादिभेदभिन्नाः खलुः सन्ति चतुर्विधा देहाः। एवं तेष्वपि अन्तरात्माख्यं क्षेत्रज्ञसंज्ञकमतीव सूक्ष्मं रूपं सर्वमेव त्वय्येव सगुणब्रह्मभूते परमात्मनि पश्यन्ति योगिनो महात्मानः।

अपि च—

तस्माच्च सूक्ष्मादिविशेषणाना-
मगोचरे यत् परमात्मरूपम्।
किमप्यचिन्त्य तव रूपमस्ति
तस्मै नमस्ते पुरुषोत्तमाय॥ तत्रैव—

अर्थात् तस्मादपि क्षेत्रज्ञसंज्ञकात् अन्तरात्माख्यात् परं सूक्ष्मादि विशेषणानाम् अविषये वर्तमानं तव किमप्यचिन्त्यं रूपमस्ति तस्मै पुरुषोत्तमाख्याय ते रूपाय नमः। यथोक्तम्—

यस्मात् क्षरमतीतोऽहमक्षरादपि चोत्तमः ।
अतोऽस्मि लोके बेदे च प्रथितः पुरुषोत्तमः ॥
गीता—१५।१८।

अर्थात् यस्मात् = प्रागभावाप्रतियोगित्वे सति ध्वंसाप्रतियोगित्वरूपनित्यत्वरूपधर्मात् एवं सर्वशक्तिमत्व, सर्वज्ञत्वादिरूपधर्मात्, क्षरम् = महदादिस्थूलान्तमुत्पत्तिविनाशादिविकारविशिष्टं जगन्निरूपितकर्त्तृत्वभोक्तृत्वादिजगद्धर्मकं कार्यं स्वरूपं पुरुषमहमतीतोऽतिक्रान्तोऽस्मि। एवं स्वयं प्रकाशत्व, सर्वाधिष्ठानत्वादिरूपधर्मैर्महत्त्वादक्षरात् संसारबीजादव्यक्तादपि सर्वथा चास्मि चोत्तमः, अतो हेतोरहं लोके वेदेषु च पुरुषोत्तमत्वेन प्रसिद्धिं गतोऽहं वर्ते। अर्थात् पुरुषोचितधर्मकर्मादि सम्बन्धशून्यत्वेन नित्यशुद्ध-बुद्ध-आनन्दादिस्वभावः केवलं सच्चिदानन्दस्वरूपोऽहं 'परमात्मा' इत्याख्यया गीयमानोऽस्मि। कार्यकारणसम्बन्धराहित्यावच्छिन्नत्वेन केवलः शिवोऽहम्।

एवं 'मायामात्रमिदं द्वैतमद्वैतं परमार्थतः'—श्रुति
'द्वितीयाद्वै भयं भवति'—बृहदारण्यकोपः १।४।२।

इत्यादिश्रुतिभिरिदं सकलं चराचरात्मकं दृश्यमानं जगन्मायाकार्यत्वात् सत्ताराहित्याच्च अर्थाद् ब्रह्मसत्तातिसत्ताकत्वात्

'सर्वंह्येतद् ब्रह्मैव'—बृहदारण्यकोप १।४।२।
'अहमेव जगत् सर्वम्'—तेजोविन्दूप ६।४३।
'अहमेवेदं सर्वम्'—छां० उ० ७।२५।१।

इत्यादिप्रबलप्रमाणभूतश्रुतिरूपवाक्यबलादेव पुरुषोत्तमत्वेन प्रसिद्धिं गतं 'पुरुषोत्तमे'ति नामधेयं खल्विद्वितीयं परं सिद्ध्यतीत्येव महाकाव्येषु 'जगद्योनिरयोनिस्त्वम्' इत्यादिनादार्शनिकी दृष्टिः सुस्पष्टीकृता। अपि च वेदेष्वपीयमेव अपि च प्रल्हादेन सगुणब्रह्मभूतस्य भूतानुकम्पिनो भगवतः परमेश्वरस्य राधारमणस्य माधवस्याऽनन्तगुणगणावच्छिन्नस्य यद् विशिष्टं रूपं तद्रूपावच्छिन्नं ब्रह्म प्रार्थितम्। प्रार्थना विषयीभूतं तदेव चैतन्यात्मकं रूपं दर्शितं विष्णुपुराणादिषु।

एवं भागवतप्रभृतिष्वपि तथैव श्रूयते। यथा—
गोविप्रसुरसाधूनां छन्दसामपि चेश्वरः।
रक्षामिच्छंस्तनूर्धत्ते धर्मस्यार्थस्य चैवहि ॥
भाग०, स्कन्धः ८, अ० २४, श्लो० ५—

इत्येवंविधं तोत्रवेत्रैकपाणेः भगवतः श्रीकृष्णस्य वचनमपि प्रमाणत्वेन समुपस्थापयन्ति।

अन्यच्चापि भागवतवचनप्रामाण्यमत्र समुपस्थाप्यते यथा—
विभर्षि रूपाण्यवबोध आत्माक्षेमाय लोकस्य चराचरस्य।
सत्त्वोपपन्नानि सुखावहानिसतामभद्राणि मुहुः खलानाम् ॥
तत्रैव स्कं० १०, अ० २,

भगवदीयं सर्वमेव ज्ञानं सत्त्वात्मकम्, सत्त्वञ्च भगात्मकमैश्वर्यादिषड्गुणरूपम्। अतस्त एव षड्गुणा ऐश्वर्यादय सर्वथा प्रार्थिता भवन्ति, येन सर्वात्मक भगवद्ब्रह्मसाक्षात्का-

रेणाऽज्ञानाऽन्धकारस्वरूपो निवर्तताम्। चराचरात्मकश्च लोकः खलुः कल्याणभाजनं जायताम् । अपि च—

सुरेशष्वृषिष्वीष ? तथैव नृष्वपितिर्यक्षु यादःस्वपि तेऽजनस्य ।
जन्मासतां दुर्मदनिग्रहायप्रभो ! विधातः ! सदनुग्रहाय च ॥

तत्रैव १० । १२ । १० ।

एवम्— शृण्वन् गृणन् संस्मरयंश्च चिन्तयन्नामानि रूपाणि च मङ्गलानि ते ।
क्रियासु यस्त्वच्चरणारविन्दयोराविष्टचित्तो न भवाय कल्पते ॥

तत्रैव १० । २ । ३८ ।

इत्थञ्च भक्तियुक्तः समाहितश्च सन्नात्मनि स्वास्मिल्लोके च व्याप्य स्थितं मां पश्यति, एकाग्रचित्तः सन् स्वेन योगे न आत्मनि देहमध्ये वा हृदि सर्वतो भावेन सन्तिष्ठमानम्, अस्मिश्च दृश्यमाने चेत्तनाचेतनात्मके जगति व्याप्तं मां, मत्तः प्रसूतान् लोकान् मद्व्याप्यांश्च धार्यान् लोकान् पश्यति स सर्वथा मलमपाकुर्वन् मलाऽभावे सति च ब्रह्मभावनाभाविताऽन्तः करणः सन् ब्रह्मभावमधिगच्छति, स्वीयं रूपं परिचिनोति, मुक्तिञ्चापि गच्छति । उक्तश्च--

ब्रह्मविद् ग्रसति ज्ञानात् सर्वं ब्रह्मात्मनैव तु । पाशुपतब्रह्मोप ३८—

अपि च—

जगज्जीवादिरूपेण पश्यन्नपि परात्मवित् ।
न तत् पश्यति चिद्रूतं ब्रह्मवस्त्वेव हि पश्यति ॥ तत्रैव, २४

अर्थाद् ब्रह्मातिरिक्तं नद्वि किमपि पश्यति । सर्वथा सर्वतन्त्र-स्वतन्त्रः सर्वात्मदर्शी भूत्वा ब्रह्मभूतः सन् सांसारिक सर्वद्वन्द्वविनिर्मुक्तः स्वसंवेद्यानन्दस्वरूपे ब्रह्माणि सर्वदा सन्तिष्ठमानः स्वात्मनैव स्वात्मनि सार्वकालिकीं परमां तुष्टिमधिगच्छति, तदा नावशिष्यते किमपीति तदानीन्तना स्थितिरधस्ताद् वर्णिता विलोक्यताम् । यथा—

स्वात्मनैव सदा तुष्टः स्वयं सर्वात्मना स्थितः ।
निर्धनोऽपि सदा तुष्टोऽप्यसहायो महाबलः ॥
नित्यतृप्तोऽप्यभुञ्जानोऽप्यसमः समदर्शनः ।
कुर्वन्नपि न कुर्वाणश्चाऽभोक्ता फलभोग्यपि ॥
शरीर्यप्यशरीर्येष परिच्छिन्नोऽपि सर्वगः ।

आत्मोपनि० १२-१४

अस्यैव पुष्टिं प्रमाणान्तरेणाऽप्याह—

'स मोदते मोदनीयं हि लब्ध्वा' । कठोपनि० १।२।१३ ।

कालिदासः

अपि च गोत्वादि जातौ शक्तेः स्वीक्रियमाणायां गोत्वत्वस्य शक्यतावच्छेदकत्वं वाच्यम् । गोत्वत्वन्तु गवेतरासमवेतत्वे सति सकलगोसमवेतत्वमेव विज्ञेयम् । इत्थञ्च शक्यतावच्छेदकुक्षौ समस्तगोव्यक्तीनां प्रवेशे मीमांसकस्यैव गौरवं स्यादिति तु निष्कर्षः । तस्माज्जात्याकृतिविशिष्ट व्यक्तिविषयक बोधानुपपत्तिभयेन कल्प्यमाना शक्तिः जात्याकृतिविशिष्टव्यक्तौ विश्राम्यत्वेन निर्णीयते इति तु तत्त्वम् । तथा च सूत्रम्—

'जात्याकृतिव्यक्तयस्तु पदार्थः' ।
गो० सू० अ०

अत्र भाष्यम्—'तु शब्दो विशेषणार्थः । किं विशिष्यते ? प्रधानाङ्गभावस्याऽनियमेन पदार्थमिति । यदा हि भेदविवक्षा विशेषगतिश्च तदा व्यक्तिः प्रधानमङ्गन्तु जात्याकृती । यदा तु भेदोऽविवक्षितः सामान्यगतिश्च तदा जातिः प्रधानम्, अङ्गन्तु व्यक्त्याकृती' इत्यवधेयम् ।

कालिदासीयरचनास्वरूपरघुवंश घटकीभूतसम्बन्धत्व सम्पादकीभूत पदार्थ विचारमाह पदार्थो-विचार्यते

'सुप्तिङन्तं पदम्' ते च विभक्त्यन्ताः पदम्' 'शक्तं पदम्' एवम्भूतलक्षणलक्षितो यो ऽस्ति व्यक्ति विशेषः स एव पदार्थं इत्यभिधीयते । आहोस्वित् प्रागुक्ततत्तल्लक्षण-लक्षितैः पदैरभिधीयमानो योऽर्थः सोऽपि पदार्थं इत्यभिधीयते । तल्लक्षणञ्च 'जात्याकृति-व्यक्तयस्तु पदार्थः' । गौ॰ २।२।६५ यथा 'घटमानये'त्यत्र घटत्वजाति, कम्बुग्रीवादि स्वरूपाऽऽकृतिविशिष्टो व्यक्तिविशेषो घटपदार्थो घटपदवाच्यो भवति । आकाशादि-विषयकशाब्दबोधस्थले आकाशादिपदस्य जात्यवाचकत्वेऽपि तादृशपदार्थविषयक शाब्द-बोधोपपत्तमे सूत्रघटकीभूतं जातिपदं धर्मपरं वाच्यम् । 'जात्याकृतिव्यक्तयस्तु पदार्थः' इत्यत्र घटकीभूतः 'तु' शब्दः प्रत्येकस्य पदार्थत्वव्यवच्छेदायेति बोध्यम् । 'पदार्थ इत्येक-वचनन्तु तिसृषु जात्याकृतिव्यक्तिषु-एकैव शक्तिरिति ज्ञापनाय ।

वृत्त्या पदोपस्थाप्यत्वमेव पदार्थत्वम् । नव्यास्तु जातिविशिष्टव्यक्तावेव एका शक्तिरस्तीति लाभार्थमेव सौत्रमेकवचनं विज्ञेयम् । आकृतिः संस्थानं तच्च पृथगेव शक्त्याश्रयीभूतं बोध्यम् । तात्त्विकदृष्ट्या विचार्यमाणे आकृतेर्नास्ति संस्थानपरत्वम्, अपि तु जातिव्यक्त्योर्याऽस्ति समवायात्मकः सम्बन्धस्तत्परत्वमेवेति भावः । समवायश्चास्ति पदार्थः, स च सम्बन्धः । इहेदमिति यतः कार्यकारणयोः स समवायः । वैशेषिकद० ७।२।२६। तदर्थश्च कार्यकारणयोरवयविनोर्यतः सम्बन्धात 'इहेदम्' इति यः प्रत्ययः स समवायः । कणादसूत्रविवृतिः ।७।२।२६ अयुतसिद्धानामाधार्याधारभूतानां यः सम्बन्धः इहप्रत्ययहेतु स समवायः । स च अयुतसिद्धयोर्द्वयोरेव पदार्थयोरङ्गीकृतो नैयायिकैः ।

तत्त्वतो विचार्यमाणे—कारणनिष्ठः कार्योत्पादनयोग्यो धर्मविशेषः स च धर्मः प्रतिबन्धकाभावादिरूपकारणत्वात्मकः यथाः वन्ह्नौ दाहानुकूलाशक्तिः ।

तत्र कुब्जशक्तिवादिनो दार्शनिकाः पटपदस्य पटत्वे पटे च शक्तिं स्वीकुर्वन्ति । तत्र पटत्वे च शक्तिर्ज्ञाता सती मन्यमाना भवति । पटेतु कुब्जा शक्तिरेवाऽनुभूयमानोप-युज्यते । पटत्वादिजातिशक्तेर्ज्ञातत्वं च शाब्दबोध कारणीभूतपदार्थस्मरणनिरूपिता या शक्तिज्ञाननिष्ठा कारणता तन्निरूपितविषयत्वसम्बन्धावच्छिन्ना या शक्तिज्ञानविषयीभूत-शक्तिनिष्ठाऽवच्छेदकता तत्र च पटत्वादिजातिविषयकत्वावच्छिन्नत्मेव शक्तेः कुब्जत्वम् विज्ञेयम् । एवं तादृशशक्तिज्ञानविषयीभूतशक्तिनिष्ठाऽवच्छेदकतायां च पटादिव्यक्तिविषय-कत्वानवच्छिन्नत्वमेव शक्तेर्व्यक्त्येकदेशे कुब्जत्वमिति जानीयात् ।

इत्यञ्च पट पदनिरूपितपटत्वविषयकशक्तिमान् पट इत्याकारकश्च शक्तिग्रहो जायते। एवम्भूते शक्तिज्ञाने पटत्वविषयकत्वेन शक्ते विषयत्वात् पटत्वांशे शक्तेर्ज्ञातत्वं सुस्पष्टमेवेति पटविषयकत्वेन शक्तेरविषयत्वात् पटांशे कुब्जत्वं विज्ञेयम्।

एवं स्थिते पटविशेष्यकपटपदनिरूपितपटत्वविषयकशक्तिप्रकारकज्ञानसहकृत-पट पदज्ञानात् जनकतावच्छेदककोटौ पटविषयकत्वप्रवेशेन पटत्वस्येव पटस्याप्युपस्थितेर्जायमानत्वेन पटपदान्न पटरूपार्थविषयकशाब्दबोधानुपपत्तिरिति वदन्ति इति भावः।

तत्र प्राभाकरास्तु पदार्थान्तरमेव शक्तिः, न तु सा कारणत्वरूपा, नापि च कुब्ज शक्तिवादिनामभिमता शक्तिर्वागर्थयोः सम्बन्धः। तत्र प्राभाकरा नैयायिकैस्वाभिमतेश्वरवत् तां शक्तिं खल्वनुमाया गोचरीभूतां प्रवदन्ति। तत्रेदमनुमानमस्ति यत् "वन्हिर्दाहानुकूलाऽद्विष्ठाऽतीन्द्रियधर्मसमवायी दाहरूपकार्यजनकत्वात् आत्मवत्। अयमाशयः—यद्रूपावच्छिन्नादेव करतलानलसंयोगाद् दाहो जायते तद्रूपावाच्छिन्नादेव सति प्रतिबन्धके नहि जायते। अतो यदभावत्वावच्छिन्नप्रयुक्तः कार्याभावस्तदभावत्वावच्छिन्नस्य कारणत्वमवश्यमेवाऽभ्युपेयम्। यथा वन्हित्वावच्छिन्नाद् वन्हितः दाहो जायतेऽनुभूयते चापि करतालानलसंयोगात्। परन्तु प्रतिबन्धकीभूतचन्द्रकान्तमणिसत्वे दाहोनजायते। तदभावे तु जायते, तेन विना तद्भावात्, इत्थञ्च व्यतिरेकमुखेन शक्तिः सिद्धयति।

सा च शक्तिर्न द्रव्यस्वरूपा गुणादिवृत्तित्वात्। अस्मादेव कारणात् न गुणस्वरूपा कर्मस्वरूपा वा। नापि सामान्याधन्य तमरूपा, जन्यत्वे सति विनाशालित्वात् इति शक्तिरतिरिक्तः पदार्थः सिद्धयति। तथोक्तम्—

"न द्रव्यं गुणवृत्तित्वाद् गुणकर्मबहिष्कृता।
सामान्यादिषु सत्वेन सिद्धाभावान्तरं हि सा॥
न्या०सि०मु०—बिलासिनी टीका—

वागर्थयोः सम्बन्ध घटकीभूतं पदं निरूप्यते

'संकेतो लक्षणा चार्थे पदवृत्तिः' संकेतश्च इदं पदममुमर्थं बोधयति—'इत्यत्र, पदम्—पद्यते = प्रत्याय्यते = ज्ञायतेऽर्थोऽनेनेति प्रत्यायकम्। 'ते विभक्त्यन्ताः पदम्, गौ० सू० २।२।५७। अस्य सूत्रस्येदं भाष्यमाह—'यथा दर्शनं विकृता वर्णा विभक्त्यन्ता पदसंज्ञा भवन्ति। विभक्तिर्द्वयी–नामिकी, आख्यातिकी च। ब्राह्मणः पचतीत्युदाहरणम्। उपसर्ग निपातास्तर्हि न पदसंज्ञाः लक्षणान्तरं वाच्यम् इति? शिष्यते च खलु नामिक्या विभक्तेरव्ययाल्लोपः तयोः पदसंज्ञार्थमिति'।

गौतमसूत्रवृत्तौ विश्वनाथपञ्चाननः 'वृत्तिमत्त्वम् पदत्वम्' इति पदलक्षणं निरूपितवान्। श्रीशङ्करमिश्रः—'संकेवद्वर्णत्वम् पदत्वम्' इति च तल्लक्षणं प्रस्फोरितवान्।

व्याकरणदिशा 'नापभ्रंशित वैः' 'नापि म्लेच्छित वैः' इत्यादिरूपेण हिन्दीभाषायां घटकीभूतानामपभ्रंशशब्दानाम्, इंगलिश, उर्दू, प्रभृतिम्लेच्छभाषान्तर्गतानां म्लेच्छपदानामुच्चारणस्य 'सर्वथा निषेधश्रवणात् व्याकरणशास्त्रतो निष्पन्नसाधुपदानां पुण्यजनकतावच्छेदकत्वं धर्मकारणतावच्छेदकत्वं वा सिद्धयति।

अत एव वैयाकरणाः 'सुप्तिङन्तं पदम्' इति साधुनिष्पन्नपदानां सूत्रात्मकं लक्षणं बदन्ति। अन्ये दार्शनिकाः 'वाक्यैकदेशः पदम्' इतिपदलक्षणं समुद्गिरन्ति। तत्र विश्वनाथपञ्चाननः 'वृत्तिमत्त्वं पदत्वम्' 'संकेतवद्वर्णत्वम्'

न्यायमते तु 'शक्तं पदम्' 'शक्तिनिरूपकं पदम्' इत्येव पदलक्षणं ब्रुवन्ति। तच्च पदं द्विविधम्—मुख्यम्, गौणञ्च। तत्र यत् पदं संकेतात्मिकया वृत्त्या यादृशमर्थमुपस्थापयति तत् पदं तस्मिन्नेवाऽर्थे मुख्यम्। यथा = गोघटादिरूपार्थोपस्थापकं गोघटादिपदम्।

तच्च मुख्यं पदम् चतुर्विधम्—(१) यौगिकम्, (२) रूढ़म्), (३) योगरूढ़म्, (४) यौगिकरूढ़ञ्च। (१) तत्राद्यमाह—यत्राऽवयवार्थ एव बुध्यते तद् यौगिकम्। यथा—पाचकादिपदम्। पाचकपदेन पचतीति यौगिकव्युत्पत्त्या प्रकृतिप्रत्ययादिना पाककर्तारूपोऽर्थोबोध्यये अत्र धातुशक्त्या पाकस्य, प्रत्ययशक्त्या च कर्तुर्बोधनादिति भावः।

यन्नाम स्वान्तर्निविष्टपदानां योगशक्त्यालभ्यस्यैव यस्यार्थस्य शब्दबोधं प्रति कारणत्वं तन्नाम तस्मिन्नेवार्थे यौगिकं गीयते। इत्थञ्च यद्रूपावच्छिन्नानुपूर्व्यवच्छिन्नविषयिता यद्रूपावच्छिन्नानुपूर्व्यवच्छिन्नघटकशब्दमात्रलभ्ययादृशविशिष्टार्थविषयकबोधजनकतावच्छेदिका तद्रूपावच्छिन्नानुपूर्वीमच्छब्दत्वं तद्रूपावच्छिन्नेऽर्थे यौगिकमितिध्येयम्। (२) रूढ़म्—यत्र अवयवशक्तिनैरपेक्ष्येण समुदायशक्तिमात्रेणार्थोबुध्यते तद्रूढ़म्। यथा—गवादिपदम्, गोमण्डलादिपदम् वा। नहि तत्र गच्छतीति गौरिति यौगिकी व्युत्पत्तिरप्यपेक्षते। (३) योगरूढ़म्—यत्रावयवशक्तिविषये समुदायशक्तिरप्यस्ति तत् पदं योगरूढ़ं कथ्यते। अर्थात् अवयवसमुदायैतदुभयशक्तिकमेकजातीयार्थप्रतिपादकं पदं योगरूढं कथ्यते। यथा पङ्कजादिपदम्, एवं धेनुपदम्। पङ्काज्जायते इत्यवयवशक्त्या पङ्कजनिकर्तृरूपमर्थंबोधयति, समुदायशक्त्या च पद्मत्वेन पद्मरूपमर्थं बोधयति। (४) यत्राऽवयवार्थरूढ़यर्थयोः स्वातन्त्र्येणबोधोजायते तत् यौगिकरूढ़म्-पदमिति कथ्यते। यौगिकञ्च तद्रूढ़ञ्चेत्युभयात्मिका व्युत्पत्तिरत्रानुसन्धेया। केचन दार्शनिका यौगिकरूढ़मेवपदं रूढ़ यौगिकमित्यपि कथयन्ति। यथा—'उद्भित्पदम्' अत्र ऊर्ध्वं भिनत्तीतियौगिकीं व्युत्पत्तिमाश्रित्य तरुगुल्मादिरूपार्थविषयको बोधो जायते। रूढ़िशक्त्या च 'उद्भित्' नामको यागविषयको बोधो भवति।

वागर्थयोः सम्बन्धविवेचनावसरे सम्बन्धसामान्यविचारः

तत्र समवायविचारः

सम्बन्धिद्वयभिन्नत्वे सति सम्बन्ध्याश्रितः सम्बन्धो विज्ञेयः। यथा 'अयं घटः' इत्यत्र घट-घटत्वयोर्भासमानसमवायाख्यसम्बन्धस्य सम्बन्धलक्षणाक्रान्तत्वेन सम्बन्धत्वं सर्वथाऽप्रत्यूहमेव।

अर्थात् कार्यकारणयोरवयवाऽवयविनोर्यतः सम्बन्धात् "इहेदम" इति प्रत्ययोजायते स समवायः।—वै०वि०७।२।२६।

सचायं समवायाख्यः सम्बन्धः—अयुतसिद्धयो = र्द्वयोरेव पदार्थयोर्जायते। यथा—

१. गौतमवृत्ति२।२।५७।   २. वैशेषिकोप० २।२।२१।

"अवयवाऽवयविनोः, गुणगुणिनोः, क्रियाक्रियावतोः, जातिव्यक्त्योः, विशेषनित्यद्रव्ययोश्च यः सम्बन्धः स समवायः।"

न्यायसि०मु०समवायनिरूपणे, पृ० ६५

उक्तं विश्वनाथपञ्चानेन—"घटादीनां कपालादौ द्रव्येषु गुणकर्मणोः।
तेषु 'जातेश्च सम्बन्धः समवायः प्रकीर्तितः॥

तत्रैव, कारिका-११

अपि च—"अयुतसिद्धानामाधार्याधारभूतानां यः सम्बन्ध इहप्रत्ययहेतुः स समवायः"—भाष्यम्—

समवायास्तित्वे प्रमाणन्तु अनुमानमेव—यथा—"गुणक्रियादिविशिष्टबुद्धिर्विशेषणविशेष्यसम्बन्धविषया विशिष्टबुद्धित्वात् दण्डीपुरुष इति विशिष्टबुद्धिवत्।"

गुणक्रियादिवृद्धिस्थले अर्थात् "रूपवान् घटः" क्रियावान् घटः" इत्यादिस्थले प्रतीयमानः सम्बन्धः समवाय एव। संयोगादयश्चा वाध्यन्ते।

संयोगविचारः—

इमौ भूतलघटौ, घट पटौ वा परस्परं संयुक्तौ इति संयुक्तव्यवहाराऽसाधारणं कारणं संयोगः। पूर्वोक्तसम्बन्धसामान्यलक्षणाक्रान्तत्वेन तस्य सम्बन्धत्वमप्यक्षुण्णमेव। संयोगं प्रति युतसिद्धिः प्रयोजिका ज्ञेया। यथा—घटवद्भूतलम् इत्यत्र शाब्दबोधीयः संयोगाख्यः सम्बन्धो विज्ञेयः। सचाऽसंयोगस्वरूपः सम्बन्धः सर्वोऽप्यनित्य एव। विभ्रद्वयस्यापि नित्यत्वेन तत् संयोगश्चापि स्वीक्रियते चेत्तदा सोऽपि नित्य एव स्वीकार्यः।

तात्त्विकदृष्ट्या विचार्यमाणेऽनुभवानुरोधात् विभ्रद्वयसंयोगो नाङ्गीकार्यः। "अप्राप्तयोस्तु या प्राप्तिःसैव संयोगईरितः"।

भाषाप०संयोगप्रक०का०११५

"अप्राप्तयोः प्राप्तिः"।—कणाद सू० पृ० ३१—
"अप्राप्तिपूर्विका प्राप्तिः"—वैशे०उप० ७।२।९।

विभूनां द्रव्याणां केषामपि कदापि अप्राप्तिरेव नानुभूयते तेषामप्राप्तिपूर्विका या प्राप्तिस्तद्रूपः संयोगो भवेत्।

स च संयोगो द्रव्यगुणकर्म हेतुः। अयञ्चास्ति संयोगः द्रव्यारम्भे सर्वथा निरपेक्षः गुणकर्मारम्भे तु सापेक्षोविज्ञेयः।

अत्राऽवधेयमस्ति—संयोगजन्य एकसंयोगो भवति। तथाहि—(१) कचित्स्थले एकसंयोगजन्य एकसंयोगो भवति। (२) कचिच्चैक एक संयोगः संयोगद्वयजन्योऽपि जायते।

(३) कचिच्चेदमप्यनुभवामः—यत् एक एव संयोगः बहुसंयोगजन्योऽपि भवति।

(४) एकसंयोजन्यं संयोगद्वयमपि क्वचिज्जायते।

(१) प्रथमं संयोगमाह—यथा कपालतरुसंयोगजन्यो घट तरुसंयोगोजायते।

(२) द्वितीयः—यथा—द्वाभ्यां तन्त्वाकाशसंयोगाभ्यां द्वितन्तुपटस्याऽऽकाशसंयोगो भवति।

(३) तृतीयो यथा—बहुभ्यः खलु तुरीतन्तुसंयोगेभ्य एक एव पटतुरीसंयोगो भवति, इति।

(४) चतुर्थो यथा—द्रव्यानारम्भको यः पार्थिवजलपरमाणवोः संयोगस्तेन समुत्पद्यमानौ द्व्यणुकारम्भकौ द्वौ संयोगौ भवतः।

अयञ्च संयोगो विभागादाश्रयनाशाच्च जायते। इमौ च संयोगसमवायात्मकौ सम्बन्धौ मुख्यौस्त इति तौ संक्षेपेण दर्शितौ। गौणभूतास्तु सन्ति सम्बन्धा नानाविधाः स्वरूप कालिकादिभेदभिन्ना इति। इमे सम्बन्धाः सन्ति वृत्ति नियामका इति। इमे एव वृत्तिनियामकाः सम्बन्धा आधाराधेयभावप्रयोजकीभूता भवन्ति

ये च सन्ति वृत्त्यनियामकाः सम्बन्धाः—यथा—विषयविषयिभाव, प्रतियोग्यनुयोगिभावः, आधाराधेयभाव, स्वस्वामिभाव,—तादात्म्यादिभेदेन सन्ति नानाविधाः।"

नीतिशास्त्रवेत्तारस्तु विद्यासम्बन्धम्, योनिसम्बन्धम्, प्रेमसम्बन्धञ्चातिरिक्तं सम्बन्धमपि वदन्तीति भावः।

'वागर्थाविव सम्पृक्तौ' इत्यत्र घटकीभूतस्य 'इव' शब्दस्यार्थः सादृश्यम्। तच्च सादृश्यं 'तद्भिन्नत्वे सति तद्गतभूयो धर्मवत्त्वम्'। आहोस्वित् 'असाधारणान्य तद्गत बहुधर्मवत्त्वम्'

यथा—'चन्द्रवन्मुखम्' चन्द्रसदृशं मुखम् अर्थात् चन्द्रनिरूपितसादृश्यवन्मुखम् इत्यादौ मुखादौ आल्हादकत्वमेव चन्द्र सादृश्यम्। तथाचोक्तम्—

'सामान्यान्येव भूयांसि गुणा-तुल्यग्रेवयवकर्मणाम्।
भिन्नप्रधान सामान्यव्यक्तं सादृश्यमिष्यते॥

चिन्तामणिः—रव० ३ पृ० २

इत्थञ्च मुख्यधर्ममादायैव तत्र सादृश्यानुयोगि प्रतियोगिनौविचार्यते। अर्थात् मुख्यधर्मावच्छिन्ने एव सादृश्यं भवति नतु सर्वत्र। अन्यथा यं कमपि धर्ममादाय यदि सादृश्यं विचार्यते तदा सर्वस्यैव सादृश्यं सर्वस्यैव स्यात् सर्वत्रस्यादित्यर्थः द्रव्यत्वधर्ममादाय घटनिरूपितं सादृश्यं पटेऽपि स्यात्, इत्थञ्च घटसदृशः पटः इत्यापत्तिः स्यात्।

एवमेव चन्दनिरूपितं सादृश्यं खलु वाच्यत्वेन, प्रमेयत्वेन, पदार्थत्वेन, अभिधेयत्वेन वा गर्दभेऽप्यस्तीति मुख्यवद् गर्दभोऽपि चन्द्रसदृशः स्यादिति। अत इदमेव तत्र विचारणीयं यत् मुख्यधर्ममादायैव सर्वत्र सादृश्यमारोप्यताम्।

प्रकृते सचास्ति चन्द्रनिष्ठो मुख्यधर्म आल्हादकत्वरूप एव, स च गर्दभे नास्तीति न गर्दभे चन्द्रनिरूपितसादृश्यापत्तिः। युवत्याः सुन्दरमुखे तस्याऽऽल्हादकत्वरूपस्य मुख्यधर्मस्य विद्यमानत्वेन 'चन्द्रवन्मुखम्' इति व्यवह्रियते व्याह्रियते च। अतएव कश्चिच्चन्द्रग्रहणकाले नवविवाहितां सुन्दरीं युवतीं पत्नीं निरीक्ष्य वदति यत्—

'झटिति प्रविश गेहं मा बहिस्तिष्ठ कान्ते!
ग्रहणसमयवेला वर्तते शीतरश्मेः।
तव मुखमकलङ्कं वीक्ष्य नूनं स राहुः-
ग्रसति तव मुखेन्द्रं पूर्णचन्द्रं विहाय॥ श्रुतिः

इत्थञ्च चन्द्रप्रतियोगिक मुखानुयोगिकसादृश्यप्रयोजकीभूतस्तावदाल्हादकत्वरूपो धर्मा युवत्या मुखे वर्तते न तु गर्दभे इति न गर्दभे चन्द्रसादृश्यापत्तिः !

तथैव प्रकृते 'वागर्थाविव सम्पृक्तौ' इत्यत्रापि' वागर्थनिरूपितं सादृश्यं जगतः पितृभूतयोः प्रभूतयोस्तयोः पार्वतीपरमेश्वरयोरप्यस्तीति 'तौ' अहमपि राजेन्द्रप्रतापो वन्दे, यतस्तौ जगतः पितरौ स्तः। अत एव जगद्वन्द्यौ स्तः। एवं स्थिते ममापि राजेन्द्र-प्रतापस्यापि तौ वन्दनीयौ स्तः। अत्र चास्ति देवतात्वरूपो मुख्यधर्मः सादृश्यप्रयोजकी·भूत उभयत्र विद्यमानोधर्मः इतिध्येयम् इत्यलं पल्लवितेन ।

द्वितीयोऽध्यायः

अश्वघोषः

अश्वघोष एको महान् प्रख्यातिं प्राप्तो बौद्ध विद्वानासीत् स च बौद्धदार्शनिक-कवित्वेन महतीं प्रसिद्धिं प्राप्तवानासीदित्यपि कर्णाकर्णिकया श्रावणप्रत्यक्षगोचरीक्रियते न तु प्रमाणान्तरेण परिलक्ष्यते इति ।

अश्वघोषस्य संशयविरहविशिष्टत्वेन नास्ति कश्चित् निश्चयवैशिष्ट्यावगाहितां गतो जन्मकालो येन वयं "इत्थं" मेवेति दृष्टिकोणमाश्रित्य तदीयं जन्मकालं निश्चाया-नास्कन्दितत्वाभावविशिष्टत्वेन निर्दिशामः । केवलं चीनीपरम्परानुसारतोऽश्वघोषो निश्चितरूपेण दार्शनिककविरासीत् । स चाऽश्वघोषः कालिदासस्य कतिपयशताब्द्याः पूर्व-मासीदिति च तदीया काव्यशैल्येव चास्ति ब्रुवाणा ।

एवं चीनीपरम्परागतकथानुसारः कनिष्कस्य समकालीस्तथा अभिधर्मस्य व्याख्या स्वरूपाया **विषाषायाः**—लेखकोऽप्ययमेवाऽऽसीत् श्री अश्वघोषः । अथ च सम-कालीनत्वेनाऽयमश्वघोषस्तथाऽऽर्थिकपरिस्थितेर्दुर्बलत्वेन कनिष्कसमाश्रितोऽपि आसी-दितिश्रूयते ।

प्रोफेसर "ल्युडर्स" नामकः पाश्चात्यदेशीयो विद्वान् वदति यदश्वघोषकृतशारि-पुत्र प्रकरणस्य प्रमाणभूतस्य पाण्डुलिपिसम्बन्धितहस्तलेखदर्शनानुसारतः—इदमेव प्रतीयते यत् स पाण्डुलिपिस्वरूपो हस्तलिखितो लेखः कनिष्कस्य हुविष्कस्य वा समकालीनत्वेन सुनिश्चीयते ।

अत्र विषये डा० "जौन्स्टन" इत्याख्यस्य व्यक्तिविशेषस्येदमस्ति कथनं यत् ५० ईशवीयतः[1] पूर्वम् १०० ईशवीयस्य मध्यकाले एवं कविवरस्य श्री अश्वघोषस्य घोषप्रा-दुर्भावः समजीजनत् इति चानुमानेनाऽद्यापि याथार्थ्येन प्रतीयते ।

इदानीं १९४२ ईशवीयेवर्षे वयं स्वयमिदं घोषयितुं शक्नुमोयत् कविवरोऽयं श्रीघोष इदानीन्तनकालतः प्रायः सहस्रद्वयवर्षतः पूवमेव स्वास्तित्वसम्पन्न आसीत् ।

अतोऽनुश्रुतिप्रामाण्यमाश्रित्य श्री अश्वघोषस्य दार्शनिककवेः समयनिर्धारणं कनिष्कसमसमयप्रामाण्यमवलम्ब्यैव भवितुं प्रभवति नान्यथेति नूनं विदाङ्कुर्वन्तु भवन्तः । इदमपि चावश्यं मया " रजोला" शास्त्रिणाऽवश्यमेव शक्यते व्याहर्तुं यत्तस्मिन् समये किञ्चिन्मात्रया कालिकपरत्वापरत्वे सर्वथावर्तते इत्यत्र चास्ति सर्वेषामेव सम्मतिः ।

अश्वघोषस्य कृते पूर्णत आश्रयप्रदानकर्तुः श्रीकनिष्कस्य समयः प्रायः ३२० ईशवीयोऽनुमानेनाऽव्यभिचारिणा ध्यानाभ्यासरसेन च निर्णीयते, निर्णेतुं वा शक्यते ।

अयञ्च निर्णयोऽस्मन्मते नास्तिभ्रमात्मकः अपि तु प्रमात्मक एवेति मन्तव्यम् । अस्ति चेदत्र वैपरीत्यमिति तु सर्वज्ञः सर्वेश्वर एव वेत्तीत्यत्र नास्ति लेशतोऽपि सन्देहान-ध्यवसायावसरः ।

---

१. पश्यन्तु बुद्धचरितम् ।

अपि चाऽनुस्मृतिप्रामाण्यबलेनैवेदमपि ज्ञातुं शक्यते विज्ञायते वा यदयं दार्शनिको बौद्धकविः श्रीअश्वघोषो मूलतश्चास्ति[1] ब्राह्मणशरीरावच्छिन्नो जात्यन्तरानवच्छिन्नो ब्राह्मणत्वजातिमान् बौद्धविद्वान् इति प्रामाण्येनानुभूयते स्मूयते च। अस्त ब्राह्मणत्वेन नास्ति कोऽपि विवादो संशयलेशावसरो वेति नूनं विभाव्यताम्।

अयञ्च महानुभावोऽश्वघोषो हिन्दूधर्मग्रंथसम्बन्धितशास्त्रीयवैदुष्यसम्पत्ति प्राप्त्यनन्तरकामावच्छेनैवऽवलम्बितवान् बौद्धधर्ममिति चास्ति महतीं प्रसिद्धिं गताकिम्बदन्ती। अयमश्वघोषो जटिलायाः कठिनायाः कस्याश्चित् परिस्थितेर्वशादेव बौद्धाभिमत सर्वास्तिवादसम्प्रदानु यायितां गतः। पुनश्च बुद्धगतविश्वासोद्धारकशक्तिसिद्धान्तामाश्रित्य आहोस्वित् तादृशसिद्धान्ताकर्षणरूपहेतुबलादेवाऽयमश्वघोषो[2] महायानसम्प्रदायस्यैको मार्गदर्शक आचार्योजातः।

नैतावन्मात्रं पर्याप्तमस्ति तावन्मात्रेण सन्तोषाभावमापन्नोऽयं श्रीघोषो बौद्धधर्मस्य प्रचारकस्तथोपदेशकोऽपि बभूव। अत एवाऽश्वघोषस्याऽधिकांशतो ग्रन्था बौद्धधर्मस्योपदेशैरस्ति सर्वथा सर्वतोभावन परिपूर्णाः। कतिपयेषु च तदीयग्रंथेषु प्रधानविषयत्वेन धर्मदीक्षैव चास्ति तत्र घटकीभूतो विषयः।[3]

इदमपि स्मूयते यदयमश्वघोषो बौद्धधर्मं प्रचारयितुं प्रसारयितुञ्च गायक, गायिकानाञ्चैकं समुदायं विधाय बादन, बादनसाधनसामग्रीसहितोजीवनस्याऽनित्यतां नश्वरताञ्च दर्शयतिस्म तेषु गायनेषु। अर्थात् सर्वमपि जीवनमनित्यं नश्वरञ्चास्तीति सर्वाभ्यो जनताभ्योऽबोधयत्, येन सर्वा एव जनतास्तत्र बौद्धधर्मानुयायिन्यो भवेयुः। पुनश्च सर्वा अपि जनता बौद्धगायनद्वारा जीवनस्याऽनित्यतां नश्वरताञ्च विज्ञाय तादृशधर्मपरिग्रह परायणाऽभवन्। इत्येवं रूपेणाऽश्वघोषो बौद्धधर्मं प्रचारितवान् प्रसारितवांश्च।

इत्यपि च स्मूयते यदेकदा चीनीतीर्थयात्री ह्वेनसाङ्गअपरनाम[4] ६७१ ईशवीयमारभ्य ६९५ ईशवीयवर्षं यावत् भारतभ्रमणकालेऽश्वघोषस्येतिहासं पूर्णतया सर्वतोभावेनस्वयं विज्ञाय परप्रतिपत्त्यर्थं प्रोदृङ्कितवान् यत् प्राचीनकाले अश्वघोषो दार्शनिककविबौद्धधर्मस्य महानेव प्रबलतमः समर्थक आसीत्। एवमश्वघोषकाले बौद्धमठेषु अपि बौद्धदर्शनसम्बन्धित संस्कृतरचनानां सम्यग्ज्ञानमभवत्।

अश्वघोषस्य मातुर्नाम

अश्वघोषस्य स्वीयग्रंथानां पुष्पिकाभ्यो विज्ञायते यदस्य श्रीघोषस्य प्रातः स्मरणीयाया मातुर्नामधेयं "श्री सुवर्णाक्षी" आसीत्। अर्थात् "श्रीसुवर्णाक्षी" तिनामपदजन्यबोधविषयतावती या आसीत्। सा तथा 'साकेत' ग्राम निवासी चाऽयमश्वघोष आसीत्

१. पश्यन्तु महायानश्रद्धोत्सवम्।

२. पश्यन्तु "गण्डीस्तोत्र गाथाम्"

३. ,, ,, ,,

४. ,, बुद्धचरितम्–पृ० ५

पुष्पिकाणां प्रभावत एवाऽयं श्री अश्वघोषः 'आचार्यस्य' 'भदन्तस्य' चोपाधिं लब्धवान् इति ।

अस्य माता[1] हिन्दूधर्मावलम्बिनी सती साध्वी तथाऽऽस्तिकशास्त्रविधानोक्तकर्मं कर्तुं सर्वथा मनसा, वाचा, कर्मणा चासीत् । तस्या अन्तःकरणे बौद्धदर्शनस्य लेशमात्रमपि संसर्गः संस्कारश्च नासीत् । तादृशसंस्कारभूषणभूषिता चासीदित्यपि श्रूयते । अयञ्चाश्वघोषः पूर्णतमा वैदुष्यसम्पत्ति प्राप्त्यनन्तरकालावच्छेदेनैन वहुकालानन्तरं बौद्धधर्मं परिगृहीतवान् ।

अस्याऽश्वघोषस्य मृत्युकालस्तु नहि कदाचित् कथञ्चित् केनाचिदुपलभ्यते महता परिश्रमेणापीति विज्ञेयम् ।

मनसःशान्तिफलविचारः

इन्द्रियाणां निग्रहस्य तेषामन्तर्मुखित्वस्य च मनसः शान्तिफलकत्वेन तत्रैका कथा समुल्लिख्यते । अष्टादशपुराणानां लेखको व्यास एकदा श्रीमद्भागवतलेखनकालावच्छेदेनेदं पद्यं तत्र समुल्लिखन्नासीत्—''बलवानिन्द्रियग्रामो विद्वांसमपि कर्षति' इति ।

श्रीमद्भागवते

तत्रैव तदानीं लेखनकाले संयोगवशादेव पूर्वमीमांसा जन्मदाता मुनिः श्री जैमिनिरपि समागतवान् । स चाऽभिवन्द्य मुहुः समादरात् प्रोवाच, किं लिखन्ति श्री चरणाः ?

व्यासः प्रोवाच—यद् ''बलवानिन्द्रियग्रामो विद्वांसमपि कर्षति" इत्येव लिखामि वर्तमानकालावच्छिन्नोऽहम् ।

अनन्तरं जैमिनिर्ब्रूते एवं स्थिते मूर्खामूर्खयोः किमन्तरं विधास्यते भवान् ? इत्यप्युच्यताम् ।

एतदुत्तरस्वरूपं समाधानं पृच्छति खल्वखिलशास्त्रविचारचर्चाचतुरो व्यासः—यन्मुनिवर ? तर्हि किं लिखामि ?

जैमिनिराह—''बलवानिन्द्रियग्रामो विद्वांसं नैवकर्षति" अर्थात् इन्द्रियग्रामो अथवा विषयग्रामो बलवान् अवश्यमस्ति परन्तु पुनरपि स विद्वांस माक्रष्टुं नैव पारयिष्यति इत्येव लिखन्तु भवन्तः, नोचेत् मूर्खाऽमूर्खयोर्भेद एव सर्वथा समाप्तिं गमिष्यति ।

व्यास उवाच--अस्तु एतदेव लिखिष्यामि । ततो जैमिनिः प्रोवाचः—पूज्यगुरुवर ? इदानीं सन्ध्याहवनादिसमयः, संवृत्त इत्युक्त्वा ततः स्वस्थानम् = स्वाश्रमं जगाम मुनिवरो जैमिनिः ।

तदनन्तरं गते तस्मिन् मुनिवरे भगवान् व्यासो योगमायां समाहूय प्रोवाच । अरे योगमाये ? मदीयं षोडशवर्षीययुवत्यारूपं निर्माय किञ्चिद्रूपावाच्छिन्नं भगवन्तं भास्करं समाच्छादयतु, मन्दसुगन्धशीतलञ्च पवनं चालयतु येन वसन्तर्तोः प्रादुर्भावो वस्तुस्थितिमाश्रित्य प्रतीयमानो भवेत् ।

---

१. 'सौन्दरनन्द' ग्रन्थे—पयन्तु—

तदनन्तरं युवत्या रूपं दधानो व्यासो जैमिनेराश्रमं प्रति गन्तुमारब्धवान् । व्यासशिष्यो जैमिनिः सुन्दररूपयौवन समन्वितां मन्दान्धकारे समागतां तां सुरूपां युवतीं विलोक्य प्रोवाच । अये विलक्षण रूपयौवनातिशयसमन्विते युवति ? कुत्र गन्तुं कामयते भवती ।

युवती—ग्राममार्गपरिभ्रष्टा सती विस्मृता सती चाहं परिभ्रमामि तपोधन मुनिवर ?

जैमिनिः—अस्मिन्नेवाऽतीव सन्निकटे मदीये सर्वसौविध्यप्रदे खल्वाश्रमे मनोवाञ्छितकालपर्यन्तं सन्तिष्ठमाना भवतु भवता अत्रैव, विश्रामं च लभताम् ।

ततो युवतीरूपमादधानो भगवान् श्रीव्यासः कामातुरं तं मुनिवरं परिलक्ष्य परमं हर्षप्रकर्षं मनसि समनुभूतवान् । ततश्च युवती स्वाश्रमघटकीभूतैकप्रदेशे सन्तिष्ठमानाऽभूत् ।

एतदनन्तरं कामातुरो जैमिनिः पौनः पुन्येन समयं नियमञ्च सर्वमपि परिहाय युवत्या रूपं रूपनिष्ठं वा सौन्दर्यं मुहुर्मुहुर्विलोकयन् तन्निष्ठामेवेष्टसाधनतां सर्वतोभावेन मन्यमानः सर्वमपि सन्ध्यावन्दनादिरूपनित्यं कृत्यं नित्यं वा कृत्यमविलम्बेनैव परिसमाप्य युवत्याः पार्श्वे समागत्य तस्याः कपोलयोर्हस्तप्रदानेन व्यासस्य कपोलस्थकेशपाशः = (दाढ़ी) एव हस्ते समागतः ।

हस्ते समागतं तं दाढ़ीस्वरूपं केशपाशं संस्पृशन् सावधानतया मुखञ्चापि विलोक्य बद्धाञ्जलिः श्री जैमिनिर्महानेवाऽपराधो जातः इतिब्रूते । व्यासो-नास्त्यपराधस्त्वदीयः परन्तु भवानेतदेव ब्रूयात् यदहं तत्र तादृशपद्यघटकीभूतैकभागैकदेशे "विद्वांसमपि कर्षति' इति वासमुल्लिखामि । आहोस्वित् "विद्वांसं नैव कर्षति" इति वा लिखमीति सर्वतोभावेन सुनिश्चित्य सुनिरूप्यताम् ।

जैमिनिराह—हे गुरो कृपालो ? भवन्तः सन्ति सर्वशास्त्रविशारदाः, अत भवद्भिः समुदीरितं सर्वथा वचः सर्वथा सर्वदाकालावच्छेदेन चास्ति प्रमाणभूतामित्यतो भवन्तः "बलवानिन्द्रियगामो विद्वांसमपि कर्षति" इत्येव लिखन्तु ।

एतादृशमेवाऽभिप्रायं मनसि निधाय प्रोक्तवान् महाकविः श्री अश्वघोषः स्वविरचिते महाकाव्ये बुद्धचरिते—

ततो रागाद्भयं दृष्ट्वा वैराग्याच्च परं शिवम् ।
निगृह्णन्निन्द्रियग्रामं यतते मनसः शमे ॥४८॥

बुद्धचरिते—सर्गः १२, अराडदएतावता प्रबन्धेन महाकविश्रीअश्वघोषेण मनसो वृत्तिनिरोधपूर्वकमिन्द्रियनिग्रहस्य नितान्तमावश्यकत्वेन दर्शितो वर्णितश्च । यतः—मनसो निग्रहमन्तरा जीवो हि इन्द्रियाणां विषयदेशगमनद्वारा बद्धतां गच्छति ।

तस्यैव च निग्रहसत्त्वे इन्द्रियाणामन्तर्मुखित्वेन च सांसारिकविषयदेशाऽगमन प्रयोज्या मनसः परमा शान्तिजयितेऽयमेवाऽऽश्वघोषेणोपर्युक्तपद्येन घोषितः इति तु निष्कर्षः ।

अपि चेन्द्रियनिग्रहसाहित्यावच्छिन्नो मनसो वृत्तिनिरोधः काम—क्रोधादिलक्षणलक्षितं विश्वं विजित्य परमापदां कारणीभूतमविवेकं विहाय सत्तर्कतर्कितम् आहोस्वित्

प्रमाणानामनुग्राहकेण तर्केण समन्वितं ध्येयध्यानं विधत्ते प्राप्नोति वेति। तथाचोक्तम्—अश्वघोषेण। तथाहि—

"अथाऽविविक्तं कामेभ्यो व्यापादादिभ्य एव च।
विवेकजमवाप्नोति पूर्वध्यानं वितर्कवत् ॥४९॥
बुद्ध च०सर्गं १२, अराडदर्शं०

अपि च पुनस्तत्रैव—

"तच्च ध्यानसुखं प्राप्य तत्तदेव वितर्कयन्।
अपूर्वसुखलाभेन ह्रियते बालिशो जनाः॥—तत्रैव

अर्थात् तद्ब्रह्मभिन्नविषयकध्यानजन्यं सुखं समवाप्य तादृशमेव तद्ध्यानं सञ्चिन्तयन् वितर्कयंश्च मूर्खो जनः सुखाभासस्वरूपं तन्नश्वरं सांसारिकं सुखं वास्तविकं मन्यमानः शास्त्रविधानोक्तसन्मार्गतः परिभ्रष्टो भवति। एवम्भूतः पथश्च्युतो जनः पुनरपि जननं पुनरपि मरणं पुनरपि जननीजठरे शयनम्" इत्येवंविधमहादुःखभाजनभूतो भवति भवलक्षणलक्षितरोगग्रस्ताव्यस्ताः सन्तो रुग्णास्तेजना इतस्ततो भ्रमन्तो नैव कदाचित् कथञ्चित् सुखशान्ति सुखशय्याञ्चानुभवन्ति।

प्रत्युत ते आधुनिकनवनवाधिभौतिक पदार्थजालजवनिका प्रोर्णु वितायां नूतनतनपदव्यां केचन आधुनिकभवरोगरुग्णा भारतीयमहर्षिप्रणीतार्षग्रंथानध्ययनेन, केचन अमेरिका, इंग्लैण्डप्रभृतिदूषितवातावरणविषयकानुभवजन्य दूषितभावनाभावितान्तःकरणेन केचन स्वीय प्राचीनाचार्यचरणाऽवलम्बितकुलपरम्परानुवर्तमानाचारपरिवर्जनेन, अपरे च खीष्ट, बौद्धप्रभृतिग्रंथ भासानामभ्यासेन, अन्ये च खलु तद्विज्ञैः सह वादविवादेन तद्रूपावच्छिन्नतां गतां सन्तस्तन्मयतामिवाऽऽपन्नास्तेपरानुकृतिमेव सभ्यतां धर्मसाधनञ्च प्रमिण्वन्तोऽहर्निशं चञ्चलां प्रवृत्तिमाश्रित्य चक्रभ्रमिवत् भ्रमन्ति नैकक्षणमपि सुखशय्यां लभन्ते। नहि कदाचित् कथञ्चित् विश्रामं भजन्ते। इत्याद्यनुभवेन सुस्पष्टमिदं विज्ञायते यद् भोगा न भुक्ता भवन्ति अपितु वयं स्वयं भुक्ता भवामः। तथा चोक्तम्—

कामेष्वनैकान्तिकता च यस्मा—
दतोऽपि मे तेषु न भोगसंज्ञा।
य एव भावा हि सुखं दिशन्ति—
ते एव दुःखं पुनरावहन्ति॥
बु०च० सर्गः ११, श्लो० ४१

अर्थात् कामानां नास्ति कश्चिदप्यन्तोऽतः कामानां सर्वथाऽनैकान्तिकत्वात् तेषु नास्ति भोगसंज्ञा, इति तेषामानन्त्यमेवास्ति भोगसंज्ञात्वाभावे हेतुः। तेषां कामानामयमप्यस्ति एको भोगसंज्ञात्वाभावे हेतुर्यत् ये कामभूताः प्रभूता सन्ति भावास्ते एव पुनर्दुःखमावहन्ति। सर्वेषामेव भावभूतानां कामानां विषयस्वरूपाणां वा तेषां त्रिगुणात्मकत्वेन य एव भावभूताः कामादिस्वरूपाः पदार्थास्ते केचन सुखं दिशन्ति, त एव दुःखं पुनरावहन्ति, इत्यतस्ते कामा नहि भोगसंज्ञात्वेन निर्दिष्टा निर्दिश्यन्ते वा।

अपि च—

"गुरूणि वासांस्यगुरूणि चैव—
सुखाय शीते ह्यसुखाय घर्मे ।
चन्द्रांशवश्चन्दनमेव चोष्णे—
सुखाय दुःखाय भवन्ति शीते ॥

तत्रैव, सर्गः ११, श्लो० ४२

अर्थात् गुरूणि कम्बलप्रभृतीनि वस्त्राणि शीतकाले सुखं प्रयच्छन्ति, तान्येव च घर्मे दुःखम् । एवमेव चन्द्रांशवश्चन्दनमेव वोष्णकाले सुखाय भवन्ति, शीतकाले च दुःखाय भवन्तीति स्वयमेवोहनीयम् । इत्यतस्ते कथमपि न सुखं नापि शान्तिञ्चाऽनुभवन्ति लभन्ते वेति ।

भगवद्बुद्धाभिमतोऽश्वघोषविचारः

अतः स्वधर्मकर्मपरायणो यमोऽवशं जगत् सर्वास्ववस्थासु सर्वाऽवस्थान्तर्गतान् वा प्राणिनो विप्रकर्षति, तदाऽव्यवस्थिते विनाशकाले समुपस्थिते शान्तिमभीप्सन् शरीरावच्छिन्नो जीवः सर्वथा कष्टमयीं जरावस्थां कथमपि कदापि नहि प्रतीक्षेत ।

इत्थञ्च स्वेष्टलाभाय स्वकीयपरमेष्ट साधनभूतं प्रभूतं स्वीयं धर्ममाश्रित्य युवा वा भवेत् वृद्धो वा भवेत् शिशुर्वा स्यात् सर्वत्र सात्त्विककार्येषु शीघ्रतां विधातुमर्हति येन विशुद्धात्मा सन् विशुद्धेन मनसा तत्र स्वेष्ट साधनोभूता प्रवृत्तिर्जगतश्च विनिवृत्तिः सर्वथा सर्वदा च भूयात् । तथाचोक्तवानश्वघोषस्तत्रैव—

"स्वकर्मदक्षश्च यदान्तको जगत्—
वयः सु सर्वेष्ववशं विकर्षति ।
विनाशकाले कथमव्यवस्थिते—
जरा प्रतीक्ष्या विदुषा शमेप्सुना" ॥६१॥

तत्रैव, सर्ग ११, कामनिन्दा

अपि च पुनस्त्रैव—

"अतो युवा वा स्थविरोऽथवा शिशु—
स्तथा त्वरावानिह कर्तुमर्हति
यथा भवेद्धर्मवतः कृतात्मनः—
प्रवृत्तिरिष्टा विनिवृत्तिरेव वा ॥

तत्रैव सर्ग ११, श्लो० ६३

इदमपि बौद्धदर्शननिष्ठं दार्शनिकं परमं रहस्यं वर्णितवान् स्वीयेमहाकाव्ये बुद्धचरितेऽश्वघोषः स्वेष्टफलां स्वकुलोचितां यागादिक्रियां धर्माय कुरुष्व फलेप्सया, परन्तु कस्यापि करुणावरुणालयात्मनः सतो मानवस्य कृते यागादिविधानं नैव शोभते । अतः परकीय प्राणिहिंसापूर्वकाय तस्मै यागाय नमः । अत्र 'नमः' इति नोत्कृष्टत्वाभिधायि किन्तु यागनिष्ठापकृष्टत्वाभिधायीति अश्वघोषवर्णितपौर्वापर्यक्रमेण विज्ञेयम् ।

यागीयहिंसायाः पापजनकत्वविचारः

परमतेन तस्य यागस्य शाश्वतिकफलकत्वेपि परकीयप्राणिहिंसाजन्यदुःखजनकत्वेन, हिंसायाः पापजनकत्वेन अत एव शास्त्रनिषिद्धत्वेन सर्वथा निष्फलं तत् यागादिकर्मेति बोध्यम् । स्वयमपि ते "मा हिंस्यात् सर्वाभूतानि" इत्युक्तवन्तो वेदप्रामाण्यवादिनः ।

तेषां वेदप्रामाण्यवादिनां नये सर्वतो बलशालि वर्तते प्रमाणभूतं सीमानुबन्धि शास्त्रं केवलं विशेषतो वेदशास्त्रमिति यागादीनामितिकर्तव्यतायाश्च नितान्तं हेयत्वं विज्ञेयम् । हिंसामात्रस्य पापजनकत्वेन दुःखजनकत्वात्, दुःखस्य निन्दितकर्मजन्यत्वेन नरकसाधनत्वं सिद्धयति ।

ईश्वरकृष्णेनापि दुःखत्रयापघातके हेतौ जिज्ञासा व्यक्तीकृता । तथाहि—

"दुःखत्रयाभिघाताज्जिज्ञासा तदपघातके हेतौ ।
दृष्टे साऽपार्था चेन्नैकान्ताऽत्यन्तोऽभावात् ॥

सांख्यका० १

एवम् खलु संसारसंतापसंतप्तानां मानवानां ज्ञानामृतपानीयपानमन्तरा तापशान्तिर्दुःखनिवृत्तिर्वा न जायते नापि भवितुमर्हति । तथाचोक्तम्—

"संसारदुःखतप्तानामात्मज्ञानामृताम्भसा ।
तापशान्तिर्नचान्येन सत्यमेव न संशयः ॥—सूतसंहिता

अपि च—सांसारिकाणां दुःखानां सर्वेषां वा दुःखानाम् आहोस्वित् दुःखपङ्कनिमग्नानां जनानां संसार एव सीमान्तो निरूपितः । अतः संसारमध्ये पतितानां शरीरावच्छिन्नानां जीवानां नहि कदाचित् कथञ्चित् सुखरसास्वादनं भवितुं प्रभवति । तथाचोक्तम् पुष्टीकृतं प्रमाणम्—

"संसार एव दुःखानां सीमान्त इति कथ्यते ।
तन्मध्ये पतिते देहे सुखमास्वाद्यते कथम् ॥

महोपनि० ६।२६ ।

अपि च—

"ज्ञानयज्ञोड्डयेनैव ब्राह्मणोऽन्त्यजोऽपि वा ।
संसारसागरं तीर्त्वा मुक्तिपारं हि गच्छति ॥"

सूतसंहिता—

अत्र विषये स्वसिद्धान्तं स्वसिद्धान्ताभिमतं वा विषयजातं महाकविः श्रीअश्वघोषो यागीयं सुखं यागजन्यं वा स्वःपदास्पदं सुखं दुःखमेवास्तीति वर्णितवान् । तथा चोक्तम्—

"यदात्थ चापीष्टफलां कुलोचितां-
कुरुष्वधर्माय मखक्रियामपि ।
नमो मखेभ्यो न हि कामये सुखं-
परस्य दुःखक्रियया यदिष्यते ॥

बुद्धच० सर्ग ११। श्लो० ६४ ।

अपि च षड्दर्शनाचार्यं श्रीवाचस्पतिरपि दुःखनिवृत्तेरानुश्रविकस्य यागादिस्वरूपस्योपायस्यापि दुःखपरिणामित्वेन वर्णितवान् । तथा चोक्तम्—

"दृष्टवदानुश्रविकः स ह्यविशुद्धिक्षयातिशययुक्तः ।
तद्विपरीतः श्रेयान् व्यक्ताव्यक्तज्ञविज्ञानात्" ॥ २ ॥
सांख्यका०, २

एतेनापि दुःखनिवृत्तेः श्रेष्ठतममुपायभूतं साधनं ज्ञानमेव समुपवर्णितम्, न तु यागादिस्वरूप आनुश्रविकोह्युपायोपि ।

दुःखनिवृत्त्युपायभूतं यागादिस्वरूपं साधनं तथापि नैव सेवितुमर्हति यदि व्रतशीलादिरूपं दानाऽऽतिथ्यादिसात्त्विकपवित्रकर्मानुष्ठानजन्यं धर्मलक्षणलक्षितं किमप्यन्यत् साधनं न भवेत् इति च घोषितवान् श्री अश्वघोष इति । तथा चोक्तवांस्तत्रैव—

"भवेच्च धर्मो यदि नापरो विधि-
र्व्रतेन शीलेन मनः शमेन वा ।
तथापि नैवार्हति सेवितुं क्रतुम्-
विशस्य यस्मिन् परमुच्यते फलम् ॥६६ ॥ तत्रैव सर्ग ११

प्रमाणान्तरेणापि उपर्युक्तं समर्थयति श्री अश्वघोषः—

इहापि तावत् पुरूषस्य तिष्ठतः-
प्रवर्तते यत् परहिंसाया सुखम् ।
तदप्यनिष्टं सघृणस्य धीमतो-
भवान्तरे किं बत यन्न दृश्यते ॥ तत्रैव, श्लो० ६७

चार्वाकोऽपि यागीयहिंसां दुःखजनिकां मन्यमानो ब्रूते—
"पिता कस्मान्न हन्यते" इत्यादि । चार्वाकषष्टिः—

अन्यच्चापि श्री अश्वघोषस्य ज्ञानमाहात्म्यम्

अपि च महाकविः श्रीअश्वघोषः सर्वतोभावेन साक्षाद् बुद्धोपदिष्टं ज्ञानमार्गं बुद्धचरितनामकमहाकाव्यघटकीभूतं वैशिष्ट्यानवगाहित्वेन, विशिष्टवैशिष्ट्यानवगाहित्वेन वोभयथा वर्णितवान् । ज्ञानरूपस्य ब्रह्मणो, ब्रह्मरूपस्य वा ज्ञानस्य सर्वथा निरवच्छिन्नत्वेन सर्वदा सर्वरूपानवच्छिन्नत्वाऽभ्युपगमात् ।

तस्य महाकवेः श्री अश्वघोषस्याऽयमाशयः—यत् महान्धकारे आलोकाभावेन पथभ्रष्टा हि जीवा भ्रान्तिमूलकत्वेनेतस्ततो भ्रमन्तोऽपि नहि सन्मार्गमन्वेष्टुं प्रभवन्ति ।

स्पर्शनेन्द्रियजन्यस्पार्शनप्रत्यक्षेण कदाचित् कथञ्चित् तद्रूपावच्छिन्नस्य तस्य मार्गस्याऽन्वेष्टुं शक्यत्वेऽपि तावतापि सम्यक्त्वेन सर्वथाऽननुभवेन महान्धकारपतनस्याऽवश्यंभावित्वात् ।

अतोऽज्ञानरूपे तादृशमहान्धकारे ज्ञानप्रदीपस्यैव कल्याणकारित्वेनाऽश्वघोषोक्तज्ञानप्लवलक्षणलक्षितस्य तस्य नितान्तमावश्यकत्वात् ।

यथा—रागद्वेषलोभमोहप्रभतिषु भवरोगेषु स्वीयं जीवनं यापयन्तस्तत्कालीना

जीवा ज्ञानरूपौषधार्थं परिखिद्यमाना—महाभिषक्पार्श्वमनुव्रजन्तीत्यनुभवसिद्धः सर्वजनीनोऽयं विषयः।

बहुभिः कुमार्गैः परिभ्रष्टो जनो यदि "घट्टकुट्टीप्रभात" न्यायेन श्रमेण सन्मार्गमन्विच्छति समागच्छति च तदा तस्य पथप्रदर्शकत्वेन ज्ञानप्रदीपलक्षणलक्षितो हि ज्ञानमार्ग एव श्रेष्ठः श्रेयस्करश्चास्तीति सर्वाणि शास्त्राणि शास्त्रकाराश्च समुद्गिरन्ति। तथाचोक्तवानश्वघोषः—

"तल्लोकमार्तं करूणायमान—
रोगेषु रागादिषु वर्तमानम्।
महाभिषङ् नार्हति विघ्नमेष—
ज्ञानौषधार्थं परिखिद्यमानः" ॥
बुद्धच०, सर्गः १३, श्लो० ६१।

अन्यच्चाप्यश्वघोषस्य ज्ञानमाहात्म्यम्—

"हृते च लोके बहुभिः कुमार्गैः—
सन्मार्गमन्विच्छति यः श्रमेण।
स दैशिकः क्षोभयितुं न युक्तम्—
सुदेशिकः सार्थ इव प्रनष्टे" ॥ तत्रैव, श्लो० ६२

तत्रैव पुनर्दार्ढ्यं दर्शयति श्री अश्वघोषः—

"सत्त्वेषु नष्टेषु महान्धकारे—
ज्ञानप्रदीपः क्रियमाण एषः।
आर्यस्य निर्वापयितुं न साध्र
प्रज्वाल्यमानस्तमसीव दीपः" ॥ तत्रैव, श्लो० ६३

अपि च पुनस्तत्रैव--

"दृष्ट्वा तु संसारमये महौघे—
मग्नं जगत्पारमविन्दमानम्।
यश्चेदमुत्तारयितुं प्रवृत्तः—
कश्चिन्तयेत्तस्य तु पापमार्यः" ॥ तत्रैव श्लो० ६४

इत्थञ्च जनन, मरण, जननी जठरे शयनात्मके संसारचक्रस्वरूपे महौघे निमग्नं जगत्पारमविन्दमानं जनं कस्तावदुत्तारयितुं प्रवृत्तिशीलः स्यादित्याशङ्कायां जायमानायामिदमेव समाधीयते--

"ज्ञानप्लवमधिष्ठाय शीघ्रं दुःखार्णवं तर"
ब्र० च० सं० १२, श्लो० ९

इत्येवास्ति श्रीअश्वघोषविरचितस्य महाकाव्यस्य बुद्धचरितस्य महत्त्वमिति। यतस्तावज्जगदात्मकदुःखार्णवसन्तरणनिष्ठजन्यतानिरूपितजनकतावान् वर्तते ज्ञानप्लवः। तद्बोधकञ्चेदं महाकाव्यमिति तु निष्कर्षः।

१. महाबाढ़ में--

इतोऽतिरिक्ता खल्वियमप्यस्ति दार्शनिकी दृष्टिरस्मिन् बुद्धचरितनामके महाकाव्ये श्रीअश्वघोषस्य यत् संसारे कथं प्रवृत्तिर्जायते अर्थात् संसारे जायमानायाः प्रवृत्तेः किमस्ति कारणम् ? ततश्च निवृत्तिकारणञ्च किमित्याह—

"श्रूयतामयमस्माकं सिद्धान्तः शृण्वतां वर ? ।
यथा भवति संसारो यथा चैव निवर्तते ॥

बु० च० सर्गः १२, श्लो० १६

इदानीं समर्थनदिशा सर्वसम्मतं श्रीगुरुनानकवाक्यमाह—

तां नानकः शान्तमनाः बभाषे-
मोहेन रूक्षाणि समालपन्तीम् ।
लोष्ठैर्हतो वा कुसुमैर्वृतो वा-
ज्ञानी विकारं न मनागुपैति ॥

नानकचन्दोदयमहाकाव्यम् ६ प्रस्ताव०, श्लो० १३० ॥

ज्ञानमाहात्म्यम्

विवर्तवादश्च

'ज्ञात्वा विद्वान् वितर्कांस्तु मनःसंक्षोभकारकान् ।
तद्वियुक्तमवाप्नोति ध्यानं प्रीतिसुखान्वितं' ॥ तत्रैव, श्लो० ५२
'ह्रियमाणस्तया प्रीत्या यो विशेषं न पश्यति ।
स्थानं भास्वरमाप्नोति देवेष्वाभास्वरेषु सः' ॥ तत्रैव, श्लो० ५३
'तादृशं सुखमासाद्य यो न रज्यत्युपेक्षकः ।
चतुर्थं ध्यानमाप्नोति सुखदुःखविवर्जितम्' ॥ तत्रैव, श्लो० ५६
'ततो रागाद्भयं दृष्ट्वा वैराग्याच्च परं शिवम् ।
निगृण्हन्निन्द्रियग्रामं यतते मनसः शमे' ॥ तत्रैव, श्लो० ४८
'सन्तोषं परमास्थाय येन तेन यतस्ततः ।
विविक्तं सेवते वासं निर्द्वन्द्वः शास्त्रवित्कृती ॥ तत्रैव, श्लो० ४७

एतत् सर्वं परीक्ष्य निरीक्ष्य चाऽन्ततो गत्वा ज्ञाने परिसमाप्यते । ज्ञानमन्तरा सर्वत्र सर्वथा वर्तते ऽन्धकारः । अत्राप्यमहर्निशमनिशमनुभवामि यद् विद्युतोऽभावे ऽन्धकारस्तदव्यवहितोत्तरक्षणावच्छेदेनैव समागच्छति, नैकस्यापि क्षणस्य विलम्बं विधत्ते । अतो ज्ञानप्लवेनैव भवसागरमिमं तर्तुं पारयिष्यति नान्यः पन्था विद्यते सन्तरणाय । तथाचोक्तमश्वघोषेण—

'ज्ञानप्लवमधिष्ठाय शीघ्रं दुःखार्णवं तर'

तत्रैव, सर्ग १२, श्लो० ९

गीतायामपि भगवता श्रीकृष्णेनाऽयमेवाभिप्रायो दर्शितः—

'अपि चेदसि पापेभ्यः सर्वेभ्यः पापकृत्तमः ।
सर्वं ज्ञानप्लवेनैव वृजिनं सन्तरिष्यति ॥

श्रीमद्भगवद्गीता—४।३६ ।

ज्ञानमाहात्म्यम्

'कदलीगर्भनिःसारः संसार इति निश्चयः'

बुद्ध च० सर्ग १४, श्लो० ६।

पुनरप्यश्वघोषो बुद्धोक्तं ज्ञानमार्गमुपदिशतीति ज्ञानमार्गस्यैव सर्वथा श्रेष्ठत्वं श्रेयस्करत्वञ्चेति मन्वानो ब्रूते। तथा हि—

'द्वितीये त्वागते यामे सोऽद्वितीयपराक्रमः।
दिव्यं लेभे परं चक्षुः सर्वचक्षुष्मतां वरः॥

तत्रैत, सर्गः १४, श्लो० ७।

अपि च पुनस्तत्रैव—

'ततस्तेन सदिव्येन परिशुद्धेन चक्षुषा।
ददर्श निखिलं लोकमादर्श इव निर्मले॥ तत्रैव, श्लो० ८

दिव्यं चक्षुः ज्ञानचक्षुरित्यर्थः। तेन च पुनः परिशुद्धेन दिव्येन चक्षुषा निर्मले आदर्शे इव निखिलं चराचरात्मकं लोकं ददर्श। तेन च दिव्येन चक्षुषा सर्वोऽपि चराचरात्मको लोको ब्रह्मस्वरूप एव प्रतिभाति।

गीतायामपि भगवता श्रीकृष्णेन अर्जुनाय दिव्यं चक्षुरेव प्रदत्तम्। तेन परिशुद्धेन दिव्येन चक्षुषाऽर्जुनोऽपि ऐश्वरं रूपं ददर्श।

'दिव्यं ददामि ते चक्षुः पश्य मे योगमैश्वरम्'। गीता, अ० ११

एवम्—'कृत्वा ज्ञानमयीं दृष्टिं पश्येद् ब्रह्ममयं जगत्'॥

तेजोबिन्दूपनि० १।२९।

एतावता प्रबन्धेन श्रीअश्वघोष एतदेव दर्शितवान् यथा निर्मले आदर्शे मुखं मुखाकृतिर्वा सर्वथा परिशुद्धा परिलक्ष्यते, तथैव दिव्येन ज्ञानमयेन चक्षुषा सर्वमपि चराचरात्मकं ब्रह्ममयं पश्यति। केवलं तत्र भेदद्वैतावभासकाऽज्ञाननिवृत्तिरपेक्ष्यते।

उक्तमपि—'तमोनिवृत्तौ सूर्यस्तु यथा नान्यदपेक्षते।
तथाऽज्ञाननिवृत्तौ तु ज्ञानं नान्यदपेक्षते॥ सू० सं०

अन्यत्रापि च—

महाविद्वान् रावणः स्वयमेव मारीचं प्रति ब्रूते—

'सर्वं खल्विदं ब्रह्म है जब-
तब सारा झूठा नाता है।
फिर किसको ज्ञान सिखाता है
और क्या बनकर समझाता है॥ राधेश्याम रामायण

अपि चाऽन्यत्रापि—

'जानत तुमहिं तुमहिं होई जाई'—तुलसीकृतरामायण

एतावता प्रबन्धेन सर्वशास्त्रविशारदो रावणः भगवता बुद्धेनोक्तं ज्ञानमार्गं महाकवि श्रीअश्वघोषेणाऽनूदितमनुवदितञ्च तं प्रागुक्तं मार्गं सुस्पष्टीकृतवान्। यतः

'कृत्वा ज्ञानमयीं दृष्टिं पश्येद् ब्रह्ममयं जगत्' तेजोबिन्दूपनि० १।१९।

एतेन जगतो ब्रह्मरूपता प्रतिपादिता भवति, अर्थाद् यथा रज्जुपदार्थस्य विवर्तभूतः सर्पो, नास्ति रज्जुपदार्थातिरिक्तोऽपि तु रज्जुस्वरूप एव, सर्पस्योपादानं रज्जुः। एवं ब्रह्मणोऽपि जगदुपादानकारणत्वेन नित्यस्य निरञ्जनस्य निष्कलस्य तस्य सर्वात्मना एकदेशेन च जगत् परिणामो नैव भवितुमर्हति। अतो ब्रह्मणो विवर्तभूतं प्रभूतं जगन्नैव परिणामीति मन्तव्यम्, अपितु विवर्तभूतत्वेन ब्रह्मस्वरूपमेव तत्, इत्याशयं हृदि निधाय रावणो व्याहृतवान् '[1]सर्वं खल्विदं ब्रह्म' इति। अर्थात् चराचरात्मकं जगदिदं सर्वमेव ब्रह्मरूपम् = ब्रह्ममयमित्यर्थः। ततोऽतिरिक्तं किमपि नास्त्येव। उक्तञ्च —

'आत्मनोऽन्यन्नहि क्वचित्'। अध्यात्मोपनि० ५।५९।

अपि च— 'उपादानं प्रपञ्चस्य ब्रह्मणोऽन्यन्न विद्यते।
तस्मात् सर्वप्रपञ्चोऽयं ब्रह्मैवास्ति नचेतरत्॥
योगशिखोपनि० ४।३।

'सर्पादौ रज्जुसत्तेव ब्रह्मसत्तैव केवलम्।
प्रपञ्चाधाररूपेण वर्ततेऽतो जगन्नहि॥ आत्मोपनि० १२।
'ब्रह्ममात्रमिदं सर्वं ब्रह्मणोऽन्यन्न किञ्चन' तेजोबिन्दूप० ३।३२।

एवं तुलसीकृतरामायणेनापि ज्ञानस्यैव विशेषतो माहात्म्यं दर्शितं भवतीति ब्रह्मस्वरूपता प्रतिपादिता भवति।

आचार्यपादाः श्रीमण्डनमिश्रमहोदया अपि विवर्तवादपक्षमेवाङ्गीकृतवन्तः समादृतवन्तश्च। परिणामवादपक्षञ्च खण्डितवन्तः। तेन ब्रह्मसिद्धेः प्रथमकारिकाया अक्षरपदव्याख्यानावसरे प्रोट्टङ्कितम्—

'अन्ये तु मृदादिदृष्टान्तदर्शनात् परिणामितां ब्रह्मणो मन्यन्ते, तदपाक्रियते अक्षरम् इति।

एवं शङ्करपाणिनापि सुस्पष्टाक्षरैर्ब्रह्मणः परिणामवादे पक्षोऽयं सर्वथा खण्डितो न तु मण्डित इति ब्रह्मणोऽपरिणामित्वमेव सिद्ध्यतीत्यत्र नास्ति विशेषतो विवादः।

अन्यत्रापि ब्रह्मणो विवर्तवादपक्षप्रामाण्यमस्ति—

'जगत् परब्रह्मविवर्तमेतत्-
पृथङ् न तस्मात् पृथगीक्षमाणम्।
स्वापस्य विश्वस्य यथैव निद्रा-
माया तथास्य प्रतिभासहेतुः॥
नानकचन्द्रोदय भ० का० ८, प्र० श्लो० ६१

न बन्धमोक्षौ मयि निर्विकारे-
सदा सदानन्दचिदात्मरूपे।
अभ्यासदार्ढ्यादिति पक्वबोधः-
कृताकृते शोचति नैव साधुः॥
तत्रैव, श्लो० ६२

---

१. छान्दोग्योपनि० ३।१४।१।

यदस्ति भाति प्रियनामरूप-
स्वरूपमेतत् सततं प्रतीतम् ।
मायाऽत्र मिथ्या किल नामरूपे-
ब्रह्मास्मि भाति प्रियमत्र सत्यम् ॥
तत्रैव, श्लो० ६३

अपि च— 'रूपेऽस्मिन् धारणादार्ढ्यात् सूक्ष्मग्राहिणि मानसे ।
विलाप्य सकलं विश्वं ब्रह्मात्मानं विभावयेत् ॥ तत्रैव श्लो० ६०

ब्रह्मणो मानसपुत्रेण श्रीवसिष्ठेनापि स्वयं साक्षाद् विरचिते योगवासिष्ठनामके ग्रन्थे ब्रह्मणो विवर्तभूतं जगदिदम् इत्येव विवर्तवादपक्षः स्वीकृतः समादृतश्च ।

'सर्वञ्च खल्विदं ब्रह्म नित्यं चिद्घनमक्षतम् ।
कल्पनान्या मनोनाम्नी विद्यते नहि काचन ॥
योगवसि० ३।१२५।१ ।

'सर्वमात्ममयं विश्वं नास्त्यनात्ममयं क्वचित्' तत्रैव, ५।७२।४५ ।

एतेन सर्वस्याप्यनात्मभूतस्य चराचरात्मकस्यास्य जगतो ब्रह्मविवर्तभूतत्वं मिथ्यात्वञ्च प्रतिपादितं भवति ।

अपि चाऽयमेव पक्षः पुनस्तत्रैव सुदृढ़ीक्रियते—

'पाताले भूतले स्वर्गे तृणे प्राण्यम्बरेऽपि च ।
दृश्यते यत् परं ब्रह्म चिद्रूपं नान्यदस्ति हि' ॥ तत्रैव,६।१।२।२८ ।
'वस्तुतस्तु जगन्नास्ति सर्वं ब्रह्मैव केवलम्' तत्रैव, ४।४०।३० ।

प्रागुक्तेभ्यो विवर्तवादपक्षेभ्योऽप्ययं विवर्तवादपक्षः सुदृढ़ीकृतो विलोक्यताम् । तथाहि—

'यस्मिन् सर्वं यतः सर्वं यत् सर्वं सर्वतश्च यत् ।
सर्वं सर्वतया सर्वं तत् सर्वं सर्वदा स्थितम् ॥
तत्रैव, ३।१८४।४६ ।

ज्ञानप्लवमहत्त्वविचारः

कश्चिदस्मात् भवसागरतो भवसागरीयेभ्यो वा विषयेभ्यो वैराग्यमापन्नो मुमुक्षुः शिष्यः श्रोत्रियं ब्रह्मनिष्ठं गुरुमुपसृत्य पृच्छति हे कृपालो गुरो ! मयि परमां महतीं कृपां विदधानो भवान् ब्रवीतु यदस्मिन् खल्वसारसंसारसमुद्रमध्ये समज्जतो मे शरणं किमस्ति, अर्थात् बन्धनकारणीभूताया अनाद्यविद्यापरपर्यायस्वरूपायाः त्रैगुण्यावच्छिन्नाया मायायाः कथं पारमहं गमिष्यामीत्यनुगृह्णन्तु भवन्तः ।

गुरुणा समाधीयते—"विश्वेशपादाम्बुजदीर्घनौका" अर्थात् विश्वेश्वरस्य जगन्नियन्तुर्नित्यानन्दस्वरूपस्य कार्यकरणातीतस्याऽक्षरस्य प्रकाशरूपस्यनिर्लेपस्य तस्य परब्रह्मपरमेश्वरस्य दर्शनात्मिका = ज्ञानरूपा पादाम्बुजदीर्घनौकैवाऽस्मादसारसंसारसागरात् दुःखार्णवलक्षणलक्षितात्तारयिष्यतीति हे शिष्य ? परीक्षितोऽयं मदीयो विषयः— इत्यत्र नास्ति लेशतोऽपि सन्देहानध्यवसायावसरः ।

अयं मे च ज्ञानप्लवात्मको विषयो महाकविः श्री अश्वघोषेणेत्थं वर्णितः। तथाहि—

"तद्विज्ञातुमिमं धर्मं परमं भाजनं भवान्।
ज्ञानप्लवमधिष्ठाय शीघ्रं दुःखार्णवं तर॥ ९॥
बुद्धचरिते, १२ सर्गः, श्लो० ९

एवमन्यच्चापि—

यथा किमपि घटपटादिस्वरूपं वस्तुजातं दिदृक्षुः पुरुषः प्रकाशमपेक्षते, यथा वा गमनविषयिणीच्छावान् यात्राविषयिणीच्छावान कश्चित् विपश्चित् पुरुषो मार्गदर्शकं कमपि सत्पुरुषमन्विष्यति, एवमेव दुस्तरम् अस्थिरम्, क्षणभङ्गुरम्, अत एव परिवर्तनशीलं नश्वरं भवसागरमिमं तितीर्षुर्यतिर्वा योगी मुमुक्षुर्वा ज्ञानप्लवं = ज्ञाननौकामपेक्षते। सर्वथा सर्वतोभावेन वाह्यविषयेभ्यो मनोवृत्तिं निरुध्य चाऽहर्निशमनिशं तमेव ज्ञानप्लवं ध्यायति, चिन्तयति, अन्विष्यति च।

एवं स्थिते जरामरणप्रभृतिरोगसमन्वितेभ्यो रुग्णव्यक्तिविशेषेभ्य एतद्रूपावच्छिन्नरोगनिवृत्यर्थं यच्छास्त्रविधानोक्तं वक्तव्यं समपेक्षितमस्ति तदेव समादरणीयम्। तच्च शास्त्रविधानोक्तं वक्तव्यं ज्ञानप्लवरूपम्। यस्य चानुवादं स्वयं कृतवान् महाकविः श्रीअश्वघोषः स्वीये महाकाव्ये "बुद्धचरित" नामके ग्रन्थे इति। "ज्ञानप्लवमधिष्ठाय शीघ्रं दुःखार्णवं तर।" पश्यन्तु तत्रैव—

भगवता सच्चिदानन्दस्वरूपलक्षणलक्षितेन आनन्दकन्दमथुराचन्द्रश्रीकृष्णचन्द्रेण—गीतायां सुष्पष्टीकृतोऽयं विषयः तथाहि—

"अपि चेदसि पापेभ्यः सर्वेभ्यः पापकृत्तमः।
सर्वं ज्ञानप्लवेनैव वृजिनं सन्तरिष्यसि॥
श्रीमद्भगवद्गीता, ४।३६

अर्थात् हे अर्जुन! यदि त्वं सर्वेभ्यः पापिभ्योऽपि पापकृत्तमो वर्तसे तथापि त्वमवश्यमेव समस्तमपि पापपुञ्जस्वरूपं पापसागरं सन्तरिष्यसि। अर्थात् महापातकोपपातकभूतानि प्रभूतानि सन्ति महापापानि तथा तत्समसङ्करीकरणमलिनीकरणादीनि यानि सन्ति शास्त्रेषु कथितान्यकथितानि च पापानि विदधाना ये सन्ति पापकारिणो जना भूतभविष्यद्वर्तमानकालीनास्तेभ्यः सकलेभ्योऽपि पापकृद्भ्यस्त्वं पापकृत्तमश्चेत्तदाऽपि पापकृत्तमस्त्वं समस्तमपि पापसागरमेनेनैव ज्ञानप्लवेन सन्तरणं विधास्यसे किमु वक्तव्यं तत्र भीष्म, द्रोण, प्रभृतिवधजन्यं पापं सन्तरिष्यसीति। तदेव साधूक्तं भगवता—

"सर्वं ज्ञानप्लवेनैव" इत्यादि।

अपि च सूतसंहितायामपि महाकविश्रीअश्वघोषस्यैव पुष्टीकृतं प्रमाणं मिलति। तथाहि—

'ज्ञानयज्ञोड्डयेनैव ब्राह्मणोऽन्त्यजोऽपि वा।
संसारसागरं तीर्त्वा मुक्तिपारं स गच्छति॥ सू० सं०

अपि च श्रीमद्भगवद्गीतायां साक्षात् प्रमाणभूतेन प्रभूतेन नन्दनन्दनेन आनन्दकन्द श्रीकृष्णचन्द्रेणाऽप्ययमेव पक्षः समर्थितः पुष्टीकृतश्च । तथाहि—

"ज्ञानविज्ञानतृप्तात्मा कूटस्थो विजितेन्द्रियः ।
युक्तइत्युच्यते योगी समलोष्टाश्मकाञ्चनः ॥
सुहृन्मित्रार्युदासीन मध्यस्थद्वेष्यबन्धुषु ।
साधुष्वपि च पापेषु समबुद्धिर्विशिष्यते ॥

भगवद्गीता, अ० ६, श्लो० ८-९ ।

अथात् तीव्र, तीव्रतर, वैराग्याभ्यां, योगसमाधिना च विशेषरूपेण जितानि असद्विषय-ग्रहणं प्रति गमितानीन्द्रियाणि वाह्याभ्यन्तरकरणभूतानि येन स योगी योगसमाधा-वचलः सन् ब्रह्मविद् यतिः, साक्षाद् ज्ञानविज्ञानतृप्तात्मा "आत्मा[१] ब्रह्मैव भवति सद्रू-पत्वात्, चिद्रूपत्वादानन्दरूपत्वात्, इत्यादि, [२]अहं ब्रह्मास्मि, [३]ब्रह्मैवेदं सर्वम्, [४]"आत्मैवेदं सर्वम्" [५]"अहमेवेदं सर्वम्" [६]"अभेददर्शनं ज्ञानम्"

[७]"सर्वं खल्विदं ब्रह्म नेह नानास्ति किञ्चन" । अपि च—[८]"सत्यं ज्ञानमनन्तं ब्रह्म" इति श्रुतिघटकीभूतं ब्रह्मैव ज्ञानम् ज्ञानञ्च सत्यम् । "त्रिकालाबाध्यं सत्यम्, त्रिकालानुस्यूतं सत्यम्, यदस्ति तत् सत्यम् किं ज्ञानमिति स्वप्रकाशं ज्ञानम्, सर्वंप्रकाशकं ज्ञानम्, निरावरणचिन्मात्रं ज्ञानम् किमानन्दमिति अम्भसामर्णव इव सुखचेतनानाम धिष्ठाननित्यशुद्धाऽखण्डाऽद्वैतचिदानन्दैकरसमानन्दम्" इत्यादिश्रुतयः । तत्र नित्यत्वमपि त्रिकालाबाध्यत्वमेव साधयन्ति । सर्वस्यापि चराचरात्मकस्यास्य जगतो नामरूपादि-स्वरूपतां निराकुर्वन्त्यो नियमेन ब्रह्ममात्रत्वं प्रतिपादयन्ति । तथाचोक्तम्—

"सच्चिदानन्दरूपमिदं सर्वम्" नृसिंहोत्तरतापनीपः ।७

"अहमेव जगत् सर्वम्" तेजोविन्दूपनि, ५।४।३ तथा श्रीमद् भागवतेऽपि—
अहं ब्रह्म परंधाम ब्रह्माहं परं पदम्"

भागवते—१२।५।११।

इत्याद्युपनिषद्वाक्यप्रमाणबलात् सर्वस्यापि जगतो ब्रह्मत्वनिश्चयः सर्वथाऽप्रतिहत एव । "ज्ञानविज्ञानतृप्तात्मा" इत्यस्य च ज्ञानविज्ञानाभ्यां सर्वस्यैव जगतो ब्रह्ममात्रत्वाऽवगाह-काभ्यां सर्वतोभावेन निर्बन्धाभ्यां तृप्तः = पूर्णः = स्वीयसुखविशिष्टान्येच्छावत्त्वरूपः, अर्थात् विकल्पान्तरस्याऽवकाशरहित आत्मा = मनो, यस्य स ज्ञानविज्ञानतृप्तात्मा स ब्रह्मविद्यतिर्योगी वा समलोष्टाश्मकाञ्चनः = सर्वत्र ब्रह्मदर्शी भवतीत्यत्र शास्त्रस्यैव प्रामाण्यमभ्युपेयम् । तथाचोक्तम्—

"ब्रह्ममात्रमिदं सर्वं ब्रह्मणोऽन्यन्न विद्यते"

तेजोबिन्दू प० ३।३२ ।

"आत्मनोऽन्यन्नहि क्वचित्"—अध्यात्मोप०—५।५९ ।

---

१. श्रुतिः, २. वृ० आ० उ० १।४।१०, ३. तत्रैव, २।५।१। ४. छां० उ० ७।२५।२, ५. तत्रैव ७।२५।१, ६. स्कन्दोप० ११, ७. निरालम्बोप०, ८. तैत्तिरीयोप० २।१।, ९. अद्वैत-मार्तण्डः पृ० ७ ।

अपि च— उपादानं प्रपञ्चस्य ब्रह्मणोऽन्यन्न विद्यते।
तस्मात् सर्वप्रपञ्चोऽयं ब्रह्मैवास्ति नचेतरत्॥
योगशिखोपनि०—४।३।

स एव समलोष्टाश्मकाञ्चनो ब्रह्मदर्शी 'युक्त' योगीति कथ्यते।

"युक्तस्य सर्वदा भानम्" इति—भाषापरिच्छेदः का० ६५ अपि च सूतसंहितायाः प्रबलतमेन प्रमाणेन पुनरपि श्रीअश्वघोषोक्त एव ज्ञानप्लवः समर्थ्यते पुष्टीक्रियते च। तथाहि—

"पद्मपत्रं यथा तोयैः स्वस्थैरपि न लिप्यते।
तथा शब्दादिभिर्ज्ञानी विषयैर्नहि लिप्यते॥ सूतसंहिता—
[1]"सर्वगं सच्चिदानन्दं ज्ञानचक्षुर्निरीक्ष्यते॥
क्षीणदोषाः[2] प्रपश्यन्ति नेतरे माययावृताः॥

अन्यच्चापि प्रमाणमुद्ध्रियते, श्रीअश्वघोषोक्तिपुष्ट्यर्थम्—

"यदा सर्वे प्रमुच्यन्ते कामा येऽस्य हृदि स्थिताः।
अथ मर्त्योऽमृतो भवत्यत्र ब्रह्म समश्नुते॥
कठोपनि० २।३।१४।

"भिद्यते हृदयग्रन्थिश्छिद्यन्ते सर्वसंशयाः।
क्षीयन्ते चास्य कर्माणि तस्मिन् दृष्टे परावरे॥
मुण्डकोपनि० २।२।८।

जननमरणधर्मवानपि जीवोऽमृतत्वमाप्नोति केवलं श्रीअश्वघोषोक्तज्ञानप्लवलक्षणलक्षितेन ज्ञानचक्षुषा। एवं परावरैकत्वग्राहकज्ञानप्लवद्वारा बन्धनप्रदाऽन्योन्याध्यासात्मकचिदचिद्ग्रन्थि—अविद्योपहितचेतनतत्त्ववृत्तिजीवत्वभावोऽप्यनेनैव ज्ञानप्लवेन शान्तिमधिगच्छति। ब्रह्मविषयीकुर्वाणाः सर्वेऽपि संशयाः जीवगताः सर्वथा विनाशं प्रयान्ति। तथा जीवनिष्ठानां ब्रह्मविषयकसंशयानां सर्वेषामेव समाप्तौ सत्यां तदव्यवहितोत्तरकालावच्छेदेनैव संचित, क्रियमाणकर्माणि सर्वाण्येव नश्यन्ति। संसारहेतुभूतानां कर्मणां विनाशे जायमाने कर्मबन्धनरूपः संसारः स्वयेव विनश्यति।

तथा चोक्तवानश्वघोषः—

"एतत्तत्परमं ब्रह्म निर्लिङ्गं ध्रुवमक्षरम्।
यन्मोक्ष इति तत्त्वज्ञाः कथयन्ति मनीषिणः"॥
बुद्धच० १२ सर्गः, ६५

एतेन तत्त्वज्ञा मनीषिणो हि तस्यैव खलु ध्रुवस्य निर्लिङ्गस्याऽक्षरस्य ब्रह्मरूपतां प्रतिपादयन्ति। ज्ञानब्रह्मणोश्चास्ति सर्वथाऽभेदः, भेदबुद्धिश्चाऽज्ञानम्। अज्ञानजन्या भेदबुद्धिः, स्वयञ्चाऽज्ञानं कर्म, तृष्णा च सन्ति संसारहेतुभूताः। उक्तञ्च—

---

१. वराहोपनि० १।१८ २. अध्यात्मोपनि० ४।३६।

अज्ञानं कर्म तृष्णा च ज्ञेयाः संसारहेतवः ।
स्थितोऽस्मिंस्त्रितये जन्तुस्तत् सत्त्वं नातिवर्तते ॥
बु० च० सर्गः १२, श्लो० २३

इत्थञ्च प्रागुक्तदिशाऽभेदे जायमानेऽज्ञानजन्या भेदबुद्धिर्निवर्तते । तथाचोक्तम्—
"श्रुतं ज्ञानमिदं सूक्ष्मं परतः परतः शिवम्"
तत्रैव, सर्गः १२, ६९

अर्थात् गुरुद्वारा शास्त्रमधिकृत्य श्रावणप्रत्यक्षविषायीभूतमिदं ज्ञानं सूक्ष्मं परतः परतः = उत्तरोत्तरं कल्याणकारि जायते, यतो हि एवम्भूतस्य ज्ञानस्य अन्धकार = भ्रमान्धकारनिवर्तकत्वेन प्रकाशस्वरूपत्वं विज्ञेयमित्यस्ति खलु महाकविः श्री अश्वघोषस्य हार्दिकोऽभिप्रायः ।

तदेव च सूक्ष्मं परमार्थिकं श्रुतं ज्ञानं निर्गुण, निष्कल, निर्विशेष, निरञ्जनब्रह्माद्वैतसिद्धान्तं सामान्यविशेषरहित्यावच्छिन्नं सर्वथाऽविच्छिन्नं बोधयतीत्यश्वघोषोक्त्या प्रतीयते । अन्यतोऽप्यस्यैवाऽश्वघोषस्य सिद्धान्तः समर्थितः पुष्टीकृतश्च भवति । तथाहि—

"ज्ञानामृतेन तृप्तस्य कृतकृत्यस्य योगिनः ।
नचास्ति किञ्चित् कर्तव्यमस्तिचेन्न स सत्त्ववित् ॥
"लोकत्रयेऽपि कर्तव्यं किञ्चिदस्य न विद्यते"
श्री जाबालदर्शनो० १।२३-२४ ।

अपि च पुनः—

"लोकद्वयेऽपि कर्तव्यं किञ्चिदस्य न विद्यते ।
इहैव स विमुक्तः स्यात् सम्पूर्णः समदर्शनः" ॥ शिवधर्मोत्तर
"न स पुनरावर्तते न स पुनरावर्तते"
छान्दोग्योपप० ८।५।१ ।

"भूयस्ते न निवर्तन्ते परावरविदो जनाः"
कुण्डिकोपनि०, २२ ।

श्रीअश्वघोषः स्वीयविचारधारया ब्रह्मण आकाशसमत्वं प्रतिपादयति, तच्च सामान्यविशेषवर्जितमाकाशवत् ।

अपरो बुधः पुरुष आकाशगतमात्मानं अर्थात् आकाशे व्याप्तमात्मानं संकुचितं विधाय पुनश्च तमेवाऽऽत्मानमनन्ततः पश्यन् विशेषं समवाप्नोति । तथाहि—

"आकाशगतमात्मानं संक्षिप्य त्वपरो बुधः ।
तदेवानन्ततः पश्यन् विशेषमधिगच्छति ॥
बुद्धचरिते, सर्गः १२, ६२ ।

मोक्षोऽपि तत्त्वज्ञानेन जायतेऽन्यदार्शनिकप्रभृतिवत् । तत्त्वज्ञानेन मोक्षे सम्पाद्यमाने संसारं सर्वथा प्रणश्यतीति निष्कर्षः ।

ज्ञानस्य माहात्म्यं निरतिशयित्वञ्च सर्वैरेव शास्त्रकारैः स्वीयेषु स्वीयेषु च शास्त्रेषु महता समुद्घोषेण गीतम् । गीतायामपि--

"नहि ज्ञानेन सदृशं पवित्रमिह विद्यते" गीता, ४।३८

अपि च— "ज्ञात्वा तं मृत्युमुखात् प्रमुच्यते"

नारदपरिव्राजकोप० ९।१

"ज्ञानादेव तु कैवल्यं नान्यथा श्रुतिशासनम् ।
अज्ञानादेव बन्धः स्यादिति वेदान्तडिण्डिमः ॥४॥
ज्ञानव्याप्तमिदं सर्वं यत्किञ्चिज्जगतीतले ।
तस्माज्ज्ञानस्य प्राप्त्यर्थं नचाऽज्ञानपरो भवेत् ॥

ज्ञानयोगः—मङ्गलप्रक०

इत्येनापि मङ्गलसमवायसमन्वितेन वाक्येन भवसागरतः संततुं कामानां ज्ञानप्लवस्यैव महत्त्वं प्राबल्यं परमसाधनत्वंञ्च दर्शितं भवति । "नान्यः[1] पन्था विद्यतेऽयनाय" अर्थात् अयनाय = सांसारिकभवबन्धनतो विमुक्तये अर्थात् भवसागरतः पारंगन्तुमित्यर्थः । ज्ञानप्लवातिरिक्तो नास्ति कश्चन साधनीभूत उपायः ।

अपि च—

"नहि ज्ञानेन सदृशं पवित्रमिह विद्यते ।

भगवद् गीता—अ० ४।३८।

एवम्— "यज्ज्ञात्वा मुनयः सर्वे परां सिद्धिमितो गताः ।

तत्रैव, १४।१ ।

तथा— "इदं ज्ञानमुपाश्रित्य मम साधर्म्यमागताः ।
सर्गेऽपि नोपजायन्ते प्रलये न व्यथन्ति च ॥

तत्रैव, १४।२।

सर्वेषामेव पापानां पुण्यानां तन्मिश्रितानाञ्च कर्मणां सञ्चितादीनाम् विनाशविधाने परमं सदुपायभूतं साधनं सर्वथा पवित्रीभूतं प्रभूतं ज्ञानमेव खलु तत्त्वमसीत्यादिमहावाक्य जन्यं सर्वोपद्रवरहितं ज्ञानं जगत्कारणीभूताऽज्ञाननिवृत्तौ निरतिशयानन्दात्मलाभरूपपरमपुरुषार्थस्तुरीय मोक्षाऽपरपर्यायभूतः सिद्ध्यति । तथाचोक्तम्—

"आत्मलाभान्न परम् विद्यते"

आपस्तम्बस्मृतिः—

अत्रेदं वा--यत् "नत्वेनाहं जातु नासम्" इत्यादिनाऽऽत्मात्मभूतां प्रभूतां दार्शनिकीं दृष्टिं प्रारभ्य विचार्य च "न जायते म्रियते वा कदाचित्" इत्यादिना यथार्थत आत्मतत्त्वं सम्यक्त्वेन विज्ञाय "वेदाविनाशिनम्" नित्यम् इत्यादिना ब्रह्मविदो मुमुक्षोर्यतेर्योगिनो वा सर्वकर्मपरित्यागलक्षणलक्षितं संन्यासं साधु विविच्य, तत्रैव पुनः "प्रजहाति यदा कामान् सर्वान् पार्थ ? मनोगतान्" इत्युपक्रम्य "तद्वत् कामा यं प्रविशन्ति

१. कैवल्योपनि० १॥९॥

सर्वे स शान्तिमाप्नोति न कामकामी" इत्यन्तेन भगवताऽऽनन्दकन्देन श्रीकृष्णचन्द्रेण तस्यैव ब्रह्मविदो मुमुक्षोर्यतेर्योगिनो वा ब्रह्मनिष्ठां, तदीयञ्च मोक्षं फलं निरुच्य कामेच्छावतः पुरुषस्य मोक्षस्याऽभावो सुनिरूपितः, येन सर्वकर्मसंन्यासिनो ब्रह्मनिष्ठाद्वारा मोक्षसम्पादनं सम्यक्त्वेन भवेत् । तथा चोक्तम्—

विरक्तः प्रव्रजेद्धीमान् सरक्तस्तु गृहे वसेत् ।
सरागो नरकं याति प्रव्रजन् हि द्विजाधमः ॥
यदा मनसि संजातं वैतृष्ण्यं सर्ववस्तुषु ।
तदा संन्यासमिच्छेत् पतितः स्याद्विपर्यये ॥
प्रवृत्तिलक्षणं कर्म ज्ञानं संन्यासलक्षणम् ।
तस्माज्ज्ञानं पुरस्कृत्य संन्यसेदिह बुद्धिमान् ॥
यदा तु विदितं तत्त्वं परं ब्रह्म सनातनम् ।
तदैकदण्डं संगृह्य सोपवीतां शिखां त्यजेत् ॥
अहमेव परं ब्रह्म वासुदेवाख्यमव्ययम् ।
इति बोधो दृढ़ो यस्य तदा भवति भैक्ष्यभुक् ॥
प्राणे गते यथा देहः सुखं दुःखं न विन्दति ।
तथा चेत् प्राणयुक्तोऽपि स कैवल्याश्रमे वसेत् ॥
अनधीत्याऽखिलान् वेदाननिष्ट्वैवाखिलान् सुरान् ।
अनुत्पाद्य सुतान् विप्रो न संन्यसितुमर्हति ॥
अकुर्वन् विहितं कर्म निन्दितञ्च समाचरन् ।
प्रचरन्निन्द्रियार्थेषु नरः पतनमृच्छति ॥
परं ब्रह्म परिज्ञाय प्रव्रजेत् ब्राह्मणोत्तमः ।
अन्यथा कर्मं कुर्वीत न प्रमाद्येत कर्हिचित् ॥
स्वे स्वेऽधिकारे या निष्ठा स गुणः परिकीर्तितः ।
विपरीतस्तु दोषः स्यादुभयोरेष निश्चयः ॥

इत्येवंरूपेभ्यः श्रुतिस्मृतिवाक्येभ्यः खलु अधिकारसम्पन्नानामेव विदुषां, मुमुक्षूणां यतीनां योगिनां च संन्यासविधानं विहितवन्तोऽस्माकं प्राचीनाचार्यचरणाः, नत्वनधिकारिणामपि । अन्यथा विधाने ये संन्यासंग्रहणं प्रकुर्वन्ति ते पतन्ति पतिष्यन्ति च ।

अतो ज्ञानतः श्रेयस्करं मुक्तिकारणं सर्वथा विशुद्धान्तःकरणकारणं नोपलभ्यते किमपि । अतो नानाविधयोनिषु भ्रमभ्रमणकारणीभूतानामनेकविधजन्म, मरण, जननीजठरेशयनमहादुःखपरम्पराप्रापकाणां नानाकल्पशतार्जितानां पुण्यपापात्मकानां सर्वेषामेव कर्मणां समूलमुन्मूलनकरं केवलं ज्ञानमेव आत्मज्ञान, तत्त्वज्ञानेत्यादिशब्दैर्व्यवहृयमाणमस्तीत्येवंविधमेव पक्षं श्रुतिस्मृत्यादिषु प्रतिपादितं निराकार, निर्विकारभूतायां प्रभूतायां गीतायां "नहि ज्ञानेन सदृशं पवित्रमिह विद्यते" इत्युपदिष्टवान् आनन्दकन्दः श्रीकृष्णचन्द्रः । अतो ज्ञानतोऽतिरिक्तं पवित्रम् पवित्रतमं वा वस्तु नास्ति किमपीति मे राजेन्द्रप्रतापस्याऽप्यस्ति मतिरिति ध्येयम् ।

अयमेव च पवित्रत्वधर्मावच्छिन्नः पवित्रो ज्ञानाग्निः सर्वाण्येव कर्माणि प्रागुक्तानि भस्मासात् कुरुते। अर्थात् ज्ञानात् प्रारब्धफलानां कर्मणां निवृत्त्युपपत्तेरभावात्, अनारब्धफलानि च यानि सन्ति कर्माणि ज्ञानोदयात् प्राक् अस्मिन्नेव जन्मनि कृतानि ज्ञानेन सार्धं वर्तमानानि प्राचीनेषु च नानाविधेषु जन्मसु समुपार्जनेन सङ्गृहीतानि तानि सर्वाण्येव ज्ञानं जगत्कारणीभूताऽज्ञाननिवर्तनेन सहैव निवर्तयति।

एवं "श्रद्धावान् लभते ज्ञानम्" इत्यत्र वाक्ये घटकीभूता श्रद्धा श्रुतिरूपे वाक्ये गुरूक्ते च वाक्ये सत्यत्वप्रकाशिकाया बुद्धिस्तादृशबुद्धिस्वरूपा विज्ञेया। तादृशबुद्धिस्वरूपश्रद्धावानेव पुरुषः निश्चितरूपेण प्रागुक्तं ज्ञानं लभते।

एवं तादृशप्रागुक्तलक्षणलक्षितश्रद्धाशालित्वेऽपि बहिर्मुखान्तःकरणवृत्तिमता पुरुषेण तत् पवित्रं ज्ञानं नहि कदापि कुतोऽपि कथमपि लभ्यते, नापि लब्धुं वा पार्यतेऽतस्तत्र ज्ञानसिद्धौ प्राप्तौ वा बहिःप्रवृत्तिशून्यत्वस्वरूपस्य संयतेन्द्रियत्वस्याप्यपेक्षितत्वं विज्ञेयम्।

परन्तु तावतापि विशेषणद्वयवैशिष्ट्यावच्छिन्नत्वेऽपि––अन्तर्विषयान् ध्यायतो मुमुक्षोर्योगिनो वा पुरुषस्य तादृशं ज्ञानं नैव सिद्धयति, नापि च सेद्धुं प्रभविष्यतीत्यतस्तत्र "तत्परत्व" रूपं तृतीयं विशेषणमपि नितान्तमावश्यकम्। तेन च ब्रह्माकारवृत्तित्वरूपमर्थजातं दर्शितं भवतीति ध्येयम्।

तथा च तेन तत्परत्वरूपतृतीयविशेषणदानेनाऽनात्मवासना, विपरीतप्रत्ययाश्च स्वयमेव निराकृता भवन्ति। एवञ्च विशेषणत्रयावच्छिन्नस्यैव यतेर्योगिनो वा—"अहं ब्रह्मास्मि"[1] "अहमेवेदं सर्वम्"[2] "अहमेव जगत् सर्वम्[3] "अहमेव परं ब्रह्म"—तेजोविन्दूप०—६।४४।

"अहमेव हरिः साक्षादहमेव सदाशिवः" तत्रैव—६।६४।

"अहमेव गुणातीतः अहमेव परात्परः" तत्रैव—६।४४।

इत्याकारकं ब्रह्माकारवृत्तिस्वरूपम् अन्तःकरणवृत्तिशुद्धिकरं पवित्रम् अप्रतिबद्धं ज्ञानं जायते।

इत्थञ्च श्रद्धावत्त्व, संयतेन्द्रियवत्व, तत्परत्वादि साधनसम्पत्तिमान् दीर्घकालीननित्यनिरन्तरब्रह्मनिष्ठावान् पूर्वोक्तस्य जगतः स्वस्य च ब्रह्मात्मनैवोपलभ्यमानत्वापादकज्ञानलाभवान् ब्रह्मविद्यतिरुत्तरक्षणावच्छेदेनैव परां संशय, विपर्ययभावनाराहित्यावच्छिन्नां "सच्चिदानन्दरूपमिदं सर्वम्"—इत्येवंविधां नित्यनिरतिशयसुखात्मिकां ब्रह्मात्मनाऽवस्थानस्वरूपां चरमां शान्तिम् अविद्यातत्कार्यनिवृत्तिरूपां मुक्तिं तदव्यवहितोत्तरकालावच्छेदेनैवाऽधिगच्छतीत्यत्र नास्ति लेशतोऽपि विवादः।

नृसिंहोत्तरतापनीयोप०—७।

यथा—भगवान् भास्करः स्वाऽभ्युदयकालाऽव्यवहितोत्तरकालावच्छेदेनैव सर्वमप्यन्धकारं तमो वा निवर्तयति। यथा वा प्रदीपः स्वप्रज्वलनकालजन्यप्रकाशकालाऽव्यव-

---

१. बृ० उ० १।४।१०। २. छा० उ० ७।२५।१। ३. तेजोविन्दूप० ५।४३।

हितोत्तरकालावच्छेनैवाऽन्धकारं विनाशयति, तथैव प्रागुक्तलक्षणलक्षितं ज्ञानमपि स्वोत्पत्तिक्षणाऽन्यवहितोत्तरक्षणावच्छेदेनैवाऽज्ञानान्धकारं समूलमुन्मूलयति।

इदमेव ज्ञानानां मध्ये सर्वोत्तमं ज्ञानं कथ्यते, यतः—उत्तमस्य परमपुरुषार्थभूतस्य प्रभूतस्य मुक्तेपरपर्यायस्वरूपस्य मोक्षस्य प्रधानकारणत्वात् उत्तमं ज्ञानं गीयते। अत एवास्यैव ज्ञानस्य परत्वं श्रेष्ठत्वञ्चापि व्याह्रियते व्यह्रियते च।

इदमेव ज्ञानं सम्यग्दर्शननिष्ठायां मुमुक्षोर्यतेर्योगिनो वा स्थितिं विधाय सत्त्वादि-गुणेभ्यो मोचयित्वा विदेहमुक्तिं प्रापयति। अत एवेदं ज्ञानमात्मानात्मविवेकादिज्ञानेभ्यो-ऽपि श्रेष्ठं परमुत्तमं परिगणितं भवतीति वेदान्तघोषः।

यथा रोगज्ञानादौषधज्ञानात्, अनुपानज्ञानात्, पथ्यपदार्थसेवनज्ञानाच्च "अयमस्ति अपथ्यपदार्थः" एतस्याऽऽपथ्यपदार्थस्य सेवनम् औषधस्याऽप्यारोग्यस्य च प्रतिबन्धकं भवतीति विचारपूर्वकं विज्ञानमपथ्याचरणनिवृत्तेरारोग्यसम्पत्तेश्च परं श्रेष्ठमुत्तमं कारणं जायते। तद्वदेव हि प्रकृतेऽपि विज्ञेयम्।

अर्थात् श्रवणादिजन्यज्ञानपरिरक्षणकारणीभूतत्वेन सत्त्वादिगुणातिक्रमणं प्रति साक्षाद् हेतुत्वेन च मोक्षस्य अविद्यास्तमयस्य प्रपञ्चोपशमस्य च संसारोत्तरणरूपस्य च कारणीभूतं ज्ञानं समवाप्यैव हि मुनयो ब्रह्मविदः शुकादयोऽपि सत्त्वादिगुणत्रितयान्मुक्तिं गताः सन्तः पुनरावृत्तिशून्यत्वेन "यद्गत्वा न निवर्तन्ते" इत्यनुसरणं गतत्वेन नित्य-निरतिशयानन्दस्वरूपत्वेन च सर्वाभ्योऽपि सिद्धिभ्यः श्रेष्ठाञ्चोत्तमां विदेहमुक्तिलक्षणलक्षितां सिद्धिं प्राप्तवन्तः, पूर्णत्वं समवाप्तवन्त इत्यर्थः।

इत्थञ्च महाकवेः श्रीअश्वघोषस्य "बुद्धचरित" नामकमहाकाव्यघटकीभूते "ज्ञान-प्लवमधिष्ठाय शीघ्रं दुःखार्णवं तर" इत्यस्मिन् महावाक्ये ज्ञानात्मकेन प्लवेनैव भव-सागरसन्तरणद्वारा संसाररूपबन्धनविनाशो वर्णितः। तथाचोक्तम्—

"ज्ञानेनैव हि संसारविनाशो नैव कर्मणा"

सरस्वतींरहस्योपनि०

"अज्ञानादेव हि संसारो ज्ञानादेव विमुच्यते"

योगतत्वोपनि० १।१६।

अपि च— "परमाद्वैतविज्ञानात् संसारः प्रविणश्यति" सूतसंहिता—
विना ज्ञानेन मुक्तिस्तु न सिद्ध्यति न सिद्ध्यति" तत्रैव—
"विना ज्ञानं न कैवल्यमित्याहुर्वेदवित्तमाः" तत्रैव—
"तस्माद् विज्ञानतो मुक्तिर्नान्यथा कर्मकोटिभिः" तत्रैव—
"संसारदुःखतप्तानामात्मज्ञानामृताम्भसा।
तापशान्तिर्नचान्येन सत्यमेव न संशयः"॥ सूतसंहिता—
"नहि ज्ञानेन सदृशं पवित्रमिह विद्यते"

भगवद्गीता—४।३८।

अश्वघोषस्य मिथ्या ज्ञानचर्चा

महाकविश्रीअश्वघोषविरचितस्य प्रथमकृतिभूतस्य प्रभूतस्य महाकाव्यस्य "सौन्दरनन्द"स्य प्रतिपाद्यो विषयो बुद्धद्वारा तदीयसौतेलेभ्रातुः श्रीअनिच्छुकनन्दस्य

धर्मपरिवर्तनस्योपाख्यानस्वरूपश्चास्तीति डा० मङ्गलदेव शास्त्रिणोऽनुवादः। यस्य वर्णनमुपवर्णनं चर्चाऽऽस्पदीभूतो वा विषयो महावग्गे निदानकथायाञ्चास्तीति तत्रैव सर्वं विषयं विलोक्य तद्वेत्तारो विदन्ति।

परन्तु श्रीअश्वघोषोऽस्य प्रागुक्तस्य विषयस्य निबन्धनमुत्तरकालीनकाव्यस्य सर्वसम्मतायाः सर्वाभिमतायाः सर्वाङ्गीकृतायाः पद्धतेरनुसारं कृतवान्। श्री अश्वघोष-उत्तरकालीनस्य काव्यस्य प्रारम्भं श्री कपिलवस्तुस्थापनावर्णनपुरःसरं विदधे। तत्रैव पौराणिककथासम्बन्धमधिकृत्य स्वीयसमनुभूतब्रह्माऽद्वैतसिद्धान्तपोषकं तोषकञ्च ज्ञानमुपाश्रित्य ब्रह्मणः साधर्म्यं समागच्छन्ति यतयो, योगिनश्च येन सर्गेऽपि नोपजायन्ते, प्रलयेऽपि च कामपि व्यथां समनुभवन्ति। यच्च ज्ञानं कैवल्यसाधनत्वेन श्रुतयो ब्रुवन्ति, संसार-विनाशित्वेन प्रतिपादयन्ति, एवं प्राणिनां संसारदुःखतप्तानामनेनैवाऽऽत्मज्ञानाम्भसा ताप-शान्तिजनकत्वेनास्य पारमार्थिकतां प्रोट्टङ्कयन्ति।

"ज्ञानादेव तु कैवल्यम्" श्रुतिः।
"ऋते ज्ञानान्न मुक्तिः" "
"आत्मैवेदं सर्वम्" छां० उ० ७।२५।२
"ब्रह्मैवेदं सर्वम्" बृ० उ० २।५।१।
"अद्वैतसिद्धान्तमेव हि सत्यं शिवं सुन्दरं सिद्धान्तमस्ति"
माण्डूक्योपनिषत्--

इत्यादीन्यपि श्रुतिवाक्यानि महाकविः श्री अश्वघोषसम्मतं स्वीकृतञ्च ब्रह्माऽद्वैत-सिद्धान्तमेव प्रतिपादयन्ति समर्थयन्ति च।

महाकवेः श्रीअश्वघोषस्येदमप्यस्ति कथनं यत् सोऽयं ब्रह्माद्वैतसिद्धान्तो ज्ञान-विज्ञानमाश्रित्यैव सन्तिष्ठते। ज्ञानमन्तरा निरधिष्ठानतयाऽयं ब्रह्माऽद्वैतसिद्धान्तो नहि कदापि कथमपि संस्थातुमर्हतीति नूनं विचार्यताम्। अतएवोपरि माण्डूक्योपनिषदि--अद्वैतसिद्धान्तस्यैव सत्यरूपतायाः शिवरूपतायाः सुन्दररूपतायाश्च सैद्धान्तिकरूपता सुस्थिरीकृता। एतस्य सर्वस्याप्याधारभूतं ज्ञानमेवेति विज्ञेयम्। तथा चोक्तम्—

तद्विज्ञातुमिमं धर्मं परमं भाजनं भवान्।
ज्ञानप्लवमधिष्ठाय शीघ्रं दुःखार्णवं तर॥
बुद्धच० ११ सर्गः, ९।

अर्थात् प्लवभूतमिदं ज्ञानमाश्रित्य कामादिस्वरूपं कामादिजन्यं वा दुःखार्णवं शीघ्रमेव तर, अतएव इमं धर्मं विज्ञातुं परमभाजनभूतो भवानस्तीति मे मतिः।

अनेनैव खलु जरामरणरोगेभ्यो यथायं परिमुच्यमानो भवेत्तथा यतनीयम्। अतो भवान् यदि जागतिकजनकल्याणकामो वर्तते तदेव भवद्भिर्वक्तव्यं येन प्रागुक्तभवरोगेभ्यो निवृत्तिर्भूयात्। उक्तञ्च—

"तस्मादर्हसि तद्वक्तुं वक्तव्यं यदि मन्यसे।
जरामरणरोगेभ्यो यथायं परिमुच्यते"॥
तत्रैव, श्लोक १४।

इत्थञ्च यथा विमुक्तिर्जायतेऽस्मादसारसंसारसागरतस्तथोक्तमधस्तात् ।

अन्यत्रापि पुष्टीकृतोऽयं विषयो यथा—

"इदं रम्यमिदं नेति बीजन्ते दुःखसन्ततेः ।
तस्मिन् ज्ञानाग्निना दग्धे दुःखस्यावसरः कुतः" ॥

अन्नपूर्णोपनि०, ५।१७ ।

एवम्— "यदा सर्वे प्रमुच्यन्ते कामा येऽस्य हृदिस्थिताः ।
अथ मर्त्योऽमृतो भवति अत्र ब्रह्म समश्नुते" ॥

कठोपनि० २।३।१४ ।

श्रीमद्भागवतेऽप्यस्यैव ज्ञानस्य महत्त्वं प्रादर्शि । यथा—तपः, तीर्थः, जपः, दानम्, इतराणि च पवित्राणि यान्यपि सन्ति तानि सर्वाण्येव तां सिद्धिं नहि कर्तुं पारयिष्यन्ति या सिद्धिर्ज्ञानकलया कर्तुं शक्यते । उक्तञ्च—

"तपस्तीर्थं जपोदानं पवित्राणीतराणि च ।
नालं कुर्वन्ति तां सिद्धिं या ज्ञानकलया कृता" ॥

श्रीमद्भागवते, ११।९।४ ।

ज्ञानप्लवविपरीतमार्गोल्लेखः

आत्मज्ञानवतः कस्य पुरुषस्य सौहार्द्रविश्लेषकरेषु कामादिविषयीभूतेषु तेषु सांसारिकेषु पुत्रमित्रकलत्रप्रभृतिषु विषयेषु समासक्तिरनुरक्तिर्वा स्यादिति केवलं स्वयमात्मज्ञानवान् पुरुष एव विदाङ्कुरुते, नान्यो वेत्ति कश्चन् । इममेव विषयमधिकृत्य सुन्दोपसुन्दनामानौ द्वौ राक्षसौ परस्परं शत्रुभावमापन्नौ विनाशं गतौ समनुभूयेते, श्रूयेते च ।

येषां विषयाणां कृते वारिणि, अग्नौ वा हिंसाकर्तृत्वावच्छिन्नेषु हिंसकजीवेषु प्राणिन आत्मानमिह समुत्सृजन्ति, सर्वथा अकल्याणकारिषु सपत्नभूतेषु तेषु कामेषु आत्मज्ञानवतः पुरुषस्य कस्याऽनुरक्तिः = आसक्तिर्वा स्यात् ।

यतोऽज्ञानसम्पन्ना एव पुरुषाः कामार्थं भोगार्थं वा उभयार्थं वा कार्पण्यदोषावच्छिन्नाः सन्तः क्षुद्रतापूर्णानि सर्वाण्येव कार्याणि समाचरन्ति । शास्त्रविधानविरुद्धानि सांसारिकबधवन्धनादिकार्याण्यप्यहर्निशमनिशं सम्पादयन्ति । तादृशमेव सम्पादनं व्यवहारं वाधिकृत्य सर्वथा प्रतिकूलवेदनीयमाध्यात्मिकमाधिभौतिकमाधिदैविकं त्रैविध्यमापन्नं दुःखञ्चाऽनुभवति ।

आशापाशशतैर्बद्धास्तपस्विनोऽपि जीवाः मृत्युं श्रमञ्च प्राप्नुवन्ति । इत्थञ्च शास्त्रीयप्रामाण्यं तिरस्कृत्य सांसारिकाः सकला अपि विषभूताः प्रभूताः विषयाः फलेन सर्वथाऽऽपद्ग्रस्ता एव खलु दृष्टिगोचरीभूताः सन्तोऽसद्भावनाभाविताऽन्तःकरणजनकीभूता भवन्ति ।

यथा गीतश्रवणजन्यमाधुर्यरससमनुभवविषयतां गताः प्रियाश्च मृगाभिधेयतां गता जीवा अपि बधाय भवन्ति ह्रियन्ते च ।

अर्थात् गीतैरेव ते बधभाजनतां गताः समनुभूयन्ते । एवंरूपार्थमग्नौ शलभाः सम्पतनशीला भवन्ति । तथाऽऽमिषार्थिनो 'मत्स्य' नामपदजन्यबोधविषयतावन्तो जीव-

विशेषा मत्स्या आयसं गिरन्ति, अर्थात् मांसकी इच्छुक मछलियाँ भी लोहमयी कटियाओं को निगल जाती हैं। येनैवं भूतास्ते प्राणिनोऽनर्थाऽनिष्टभाजनभूता भवन्ति।

नैतावन्मात्रमेव पर्याप्तमस्ति, महाकविः श्रीअश्वघोषः ज्ञानप्लवतिरस्कृतानां ज्ञान मार्गबहिर्भूतानां वा जीवानां विषये इदमपि प्रोट्टङ्कितवान्—यत् कामास्तु भोगाः सन्तीति विषयो नहि सद्विचारविषयतां धत्ते। नहि केचन अपि कामा भोगा भवितुमर्हन्ति, यतो वस्त्रालङ्कारादयः सर्वेऽपि विषया लोके सन्ति दुःखस्वरूपा दुःखस्यैव वा कारणीभूता इति विज्ञेयम्। भोगानां सुखदुःखान्यतरसाक्षात्काररूपत्वादिति नहि ते कामाः कदाचित् कथञ्चित् भोगा भवितुं प्रभवन्ति।

एवमेव शय्या, निद्रात्मकविषयपरिपूर्त्यर्थं, शारीरिकश्रमदूरीकरणार्थञ्चाऽपेक्षते। यथैव मार्गश्रमं दूरीकर्तुं यानमपि सर्वथा समपेक्षमाणं भवति। एवं मार्गश्रमं निराकर्तुं नितान्तमासनं परिगृहीतं भवति। मृजारोग्यबलं समवाप्तुञ्च सर्वथा सर्वदा च निरामयकाले स्नानमेवेष्टकरं भवति।

तथाचोक्तवान् श्री अश्वघोषः—

"सुन्दोपसुन्दावसुरौ यदर्थम्—
अन्योन्यवैरप्रसृतौ विनष्टौ।
सौहार्द्र विश्लेषकरेषु तेषु,
कामेषु कस्यात्मवतो रतिः स्यात् ॥३२॥

बुद्ध च०सर्ग ११।

येषां कृते वारिणि पावके च—
क्रव्यात्सु चात्मानमिहोत्सृजन्ति।
सपत्नभूतेष्वशिवेषु तेषु—
कामेषु कस्यात्मवतो रतिः स्यात् ॥३३॥

तत्रैव

कामार्थमज्ञः कृपणं करोति—
प्राप्नोति दुःखं बधबन्धनादि।
कामार्थमाशाकृपणस्तपस्वी—
मृत्युं श्रमं चार्छति जीवलोकः ॥३४॥

गीतैर्ह्रियन्ते हि मृगा बधाय—
रूपार्थमग्नौ शलभाः पतन्ति।
मत्स्यो गिरत्यायसमामिषार्थी—
तस्मादनर्थं विषयाः फलन्ति ॥३५॥

कामास्तु भोगा इति यन्मतिः स्यात्—
भोगा न केचित् परिगण्यमानाः।
वस्त्रादयो द्रव्यगुणा हि लोके—
दुःखप्रतीकार इति प्रधार्याः ॥३६॥

निद्राविघाताय तथैव शय्या—
यानं तथाध्वश्रमनाशनाय।
तथासनं स्थानविनोदनाय—
स्नानं मृजारोप्यबलाश्रयाय ॥३८॥

बुद्धचरिते, ११ सर्गः

एवं स्थिते दुःखप्रतीकारनिमित्तभूतास्ते विषयाः प्रजानां कृते नहि कदाचित् कथञ्चित् केनचित् कुतश्चित् सुखदुःखान्यतरसाक्षात्कारस्वरूपा भोगा भवितुं प्रभवन्तीति कश्चिन्मुनिर्वा स्यान्महामुनिर्वा स्यात्, कश्चिद् ऋषिर्वा भवेत् महर्षिर्वा भवेत् कस्तावत् लोकोत्तरप्रतिभासम्पन्नो दुःखप्रतीकारविधौ प्रवृत्तिशीलः सन् "अहं भोगानश्नामि" इत्यङ्गीकुर्यात्, नहि कोऽपि तादृशः प्रागुक्तो मुनिर्महामुनिर्वा एतत् प्रागुक्तमङ्गीकर्तुं शक्नुयात्।

तथैव पित्तजन्येन दाहेन पित्तात्मकेन वा दाहेन विदह्यमानः कश्चिद् व्यक्ति विशेषः शीतोपचारं शीतक्रियात्मकं नहि भोगत्वेनाऽभ्युपगन्तुं प्रभवतीत्यन्यथा शास्त्र-विरोधः स्यादिति कस्तावत्तादृशं शास्त्रविरोधं निराकर्तुं क्षमः। इत्यतो दुःखप्रतीकार-विधाने प्रवृत्तिशीलो यतिर्वा योगी वा कामेषु = कामनाविषयीभूतेषु विषयेषु भोगसंज्ञां कथं विधास्यते शास्त्रप्रामाण्यानवगाहनात्। अतः कामनाविषयीभूतेषु विषयेषु नास्ति कथमप्यैकान्तिकताऽतोऽप्यहं तेषु कामनाविषयीभूतेषु कामेषु नहि भोगसंज्ञां प्रदातुं क्षमोऽहम्। सर्वेषामेव पदार्थानां त्रैगुण्यावच्छिन्नत्वेन ये खलु भावभूताः पदार्थाः सुखत्वेनाभि-मतं प्रयच्छन्ति, त एव पदार्थाः कालान्तरावच्छेदेन पुनर्दुःखप्रदानजनकीभूता भवन्तीति पुनर्दुःखमावहन्तीति मन्तव्यम्। तथा चोक्तम्—

दुःखप्रतीकारनिमित्तभूता—
स्तस्मात् प्रजानां विषया न भोगाः।
अश्नामि भोगानिति कोऽभ्युपेयात्—
प्राज्ञः प्रतीकारविधौ प्रवृत्तः॥

बुद्ध च० ११ सर्गः

यः पित्तदाहेन विदह्यमानः—
शीतक्रियां भोग इति व्यवस्येत्।
दुःखप्रतीकारविधौ प्रवृत्तः—
कामेषु कुर्यात् स हि भोगसंज्ञाम्॥

तत्रैव, श्लो० ४०

कामेष्वनैकान्तिकता च यस्मात्—
अतोऽपि मे तेषु न भोगसंज्ञा।
य एव भावा हि सुखं दिशन्ति—
त एव दुःखं पुनरावहन्ति॥

तत्रैव, श्लो० ४१

श्रीअश्वघोषो भगवतो बुद्धस्योक्तिमनुवदति

क्षेमं शिवं मार्गमनुप्रपन्नोऽहमत एव नहि कदापि कथमपि नरकगर्तसम्पादकान् कामान् कामये। न च राज्यं नापि च भोगान् सुखानि च मनसाऽपि कामये। इदानीन्त्वहं केवलमैकान्तिकम्, आत्यन्तिकम्, नितान्तमावश्यकञ्च वनस्थलीयं गमनं समवाप्तुं समभिलषामीति न तत्र कश्चन निरोधोऽवरोधो वा विधीयताम्।

तत्र च वनस्थलीयप्रवेशस्य नास्ति कारणं क्रोधः, नापि च शत्रुबाणानां भयमेव तत्र हेतुः, सर्वथा गतस्पृहोऽहं भवस्य शोक, मोह रोगसाधनत्वञ्च तदादिकारणत्वं वा विज्ञायैव वनस्थलीयं गमनं नितान्तमिच्छामीति नूनं विभाव्यताम् इत्यत्र नास्ति लेशतोऽपि विचिकित्सावसर इति।

यदि चाऽन्धत्वरूपाऽङ्गभङ्गवान् पुरुषोऽन्धत्वं कामयेत, तदर्थं वा प्रयतेत, एव मुक्तिमापन्नो वा जनो बन्धनमागमनाय चेष्टते, आहोस्विद् धनवान् जन आत्मनि निर्धनत्व सम्पत्तये, स्वास्थ्यसाधुत्वसम्पन्नो वा जीव उन्मत्तचित्ताय कामयेत, एवम्भूतो भ्रमान्धकारपतितो जागतिकदाढर्यविच्छिन्नभावनाभाविताऽन्तःकरण एव कामकामी जनः सर्वथा कामान् जागतिकान् भोगान् वा तदुभयत्वावच्छिन्नान् वा कामयते, नहि मादृशो जनस्तानिच्छति, अहन्तु सर्वथैव नाभिलषामि।

अहं खलु संसारशरेणाऽऽत्मानं विद्धम् विज्ञायैव सांसारिकराज्यादिसुखशान्तिपरित्यागेच्छापूर्वक एव खलु वास्तविकसुखशान्तिसमवाप्तिकामनात एव विनिःसृतोऽस्मीति नाहं स्वर्गस्यापि निष्कण्टकं राज्यं कामये किं पुनर्मर्त्यलोकराज्यमिति सर्वथा सत्यं वदामि।

तात्त्विकदृष्ट्या विचार्यमाणे धर्म, अर्थ, कामेतित्रिविधपुरुषार्थसेवा सर्वथा वर्ततेऽनर्थानिष्टभूता, यतस्तस्याः सर्वतो भावेन विनाशशालित्वात्।

यत्र च जरापि नास्ति, भयमपि नास्ति, रोगोऽपि नास्ति, जननमरणजननीजठरे शयनादयोऽपि न सन्ति, यदिच्छन्तो ब्रह्मचर्यं चरन्ति तदेव मोक्षात्मकं तुरीयं सर्वोत्तमभूतं प्रभूतं ज्योतिषां ज्योतिः स्वरूपं देहाभिमानगलितहेतुभूतं सर्वथाऽसङ्गस्वरूपं पदमहं कामये, यदनन्तरं पुनः किमपि कर्तव्यं नावशिष्यते। तथा चोक्तम् अश्वघोषेण—

"तन्नास्मि कामान् प्रति सम्प्रतार्यः—
क्षेमं शिवं मार्गमनुप्रपन्नः।
स्मृत्वा सुहृत्त्वं तु पुनः पुनर्मां—
ब्रूहि प्रतिज्ञां खलु पालयेति॥

बुद्धचरिते, ११ सर्गः, श्लोक० ५०

"अन्धाय यश्च स्पृहयेदनन्धः—
बद्धाय मुक्तो विधनाय चाढ्यः।
उन्मत्तचित्ताय च कल्यचित्तः
स्पृहां स कुर्याद्विषयात्मकाय"॥

त्रथैव-श्लो० ।५३।

अहं हि संसारशरेण विद्धो—
विनिःसृतः शान्तिमवाप्तुकामः ।
नेच्छेयमाप्तुं त्रिदिवेऽपि राज्यम्—
निरामयं किं बत मानुषेषु ॥

तत्रैव, श्लो० ॥५७॥

पदे तु यस्मिन्न जरा न भीर्न रुङ्०—
न जन्म नैवोपरमो न चाधयः ।
तमेव मन्ये पुरुषार्थमुत्तमं—
न विद्यते यत्र पुनः पुनः क्रिया ॥

तत्रैव, श्लो० ॥ ९॥

"स्वकर्मदक्षश्च यदान्तको जगद् वयःसु सर्वेष्वशं विकर्षति ।
विनाशकाले कथमव्यवस्थिते जरा प्रतीक्ष्या विदुषा शमेप्सुना" ॥

तत्रैव, श्लो०

यागक्रियाणामपि विकारहेतुत्वम्

यदप्युक्तं भवद्भिः स्वकुलोचितां सर्वथेष्टफलां यागादिक्रियां धर्माय विधीयतां तत्राप्यस्ति मदीयेयं विचारधारा, यत्तज्जन्यं विकारहेतुभूतं नश्वरं फलमपि बुद्धस्य नोचितं प्रतिभातमिति साक्षात् स्वयं श्रीअश्वघोषो बुद्धचरिते स्वीये महाकाव्ये अनुवदति स्म ।

श्रीभगवता बुद्धेनोक्तो यागजन्यफलस्य विनाशशालित्वरूपोऽयं विषयो भगवता श्रीकृष्णेनापि समर्थितः ।

"क्षीणे पुण्ये मर्त्यलोकं विशन्ति" इत्यादिना—

श्रीमद्भागतगीता—अ० ११ ।

अतस्तेभ्यो मखेभ्योऽप्यहं नमस्करोमीति भगवान् बुद्धो वदति । एवं तज्जन्येभ्यो भावभूतेभ्यः सुखेभ्योऽप्यहं नमस्करोमि । अर्थात् तादृशं यागजन्यं सुखलक्षणलक्षितं फलमपि नाऽहं कामये यत् सुखं परस्य दुःखक्रिययेष्यमाणो भवेत् ।

करुणावरुणालयभूताः प्रभूतास्ते सत्कोटिकाः पुरुषाः फलेप्सया परप्राणिहिंसां कदापि कथमपि युक्तियुक्तां नहि मन्यन्ते । शाश्वतफलमपि यदि यागानां भवेत्तदपि मे नेष्टमस्ति । तथाचोक्तम्—

'यदात्थ चापीष्टफलां कुलोचितां
कुरुष्व धर्माय मखक्रियामिति ।
नमो मखेभ्यो नहि कामये सुखं—
परस्य दुःखक्रियया यदिष्यते" ॥

बुद्धचरिते, सर्गः ११, श्लो० ६४ ।

"परं हि हन्तुं विवशं फलेप्सया—
न युक्तरूपं करुणात्मनः सतः।
क्रतोः फलं यद्यपि शाश्वतं भवे—
त्तथापि कृत्वा किमु यत् क्षयात्मकम्"॥
तत्रैव, श्लो० ६५।

अपि च तत्रैव—

"भवेच्च धर्मो यदि नापरो विधि-
र्व्रतेन शीलेन मनःशमेन वा।
तथापि नैवार्हति सेवितुं क्रतुं-
विशस्य यस्मिन् परमुच्यते फलम्" ॥
तत्रैव, सर्गः ११, श्लो० ६६।

"इहापि तावत् पुरुषस्य तिष्ठतः-
प्रवर्तते यत्परहिंसाया सुखम्।
तदप्यनिष्टं सघृणस्य धीमतो-
भवान्तरे किं बत यन्न दृश्यते" ॥
तत्रैव, श्लो० ६७।

अर्थात् यदि मनोद्वारा, शीलद्वारा, मनसःशान्तिद्वारा वा धर्मोपार्जनस्याऽपरो विधिर्नभवेत्तथापि यागो नैव विधातुं शक्यते। यतस्तावत् यत्कर्मविधाने परप्राणिहिंसा भवेत्तत् कर्म नहि कदापि कथमपि विधेयम्। यद्यपि अस्मिन् लोके सन्तिष्ठमानस्य जनस्य यागात्मककर्म विधानजन्यमवश्यं सुखात्मकं जायते। तथापि यत् परहिंसया फलं भवति तदपि दयावतः सघृणस्य धीमतः पुरुषस्य नेष्टमस्ति, यतो भवान्तरे = जन्मान्तरे यत् फलं नैव दृष्टिगोचरीभूतं भवति नहि तत् फलं सुफलं = समीचीनं फलं भवतीति भगवतोबुद्धकथनस्य रहस्यं दर्शितवानश्वघोषः।

अश्वघोषविचारः

ज्ञानप्लवेन जपदानपवित्रतीर्थानां तिरस्कृतिविचारः

'तपस्तीर्थं जपो दानं पवित्राणीतराणि च।
नालं कुर्वन्ति तां सिद्धिं या ज्ञानकलया कृता॥
श्रीमद्भागवते, ११।१९।४।

अर्थात् 'को रोग एव भव एव साधो' इत्यभियुक्तोक्त्यनुसारमस्य भवसागरस्य रोगरूपत्वाद् रोगागारत्वाद्वा सर्वथा बन्धनस्वरूपत्वाद्वा हेयत्वमङ्गीकृतवन्तः सर्वशास्त्रविशारदाः सर्वेऽपि विद्वांसः। तत् सन्तरणार्थमस्ति केवलं श्रीअश्वघोषोक्तो 'ज्ञानप्लव' एव साधनीभूतो ह्युपायः। अनेनैव ज्ञानप्लवेनाऽज्ञानान्धकारस्य सर्वदाकालीना निराकृति र्जायते।

सचोपायभूतो 'ज्ञानप्लव'श्चास्ति सर्वथा निर्विकारः, निराकारः, विशुद्धः, ब्रह्मरूपः, स्वसंवेद्यश्च। स एव च ज्ञानप्लवः सर्वथा चास्ति विश्वाधिष्ठानभूतः, विश्व-

पालनकर्ता, विश्वावभासकः, विश्वात्मभूतत्वे सति स्वयं परमानन्दरूपः, 'नित्यं विज्ञानमानन्दं ब्रह्म' इत्यादिप्रामाण्यानुरोधात् ।

'यश्च विश्वं सृजति विश्वं बिभर्ति विश्वं भुङ्क्ते स आत्मा 'ब्रह्म'

शाण्डिल्योपनि० २

यथा भगवतो भास्करस्य तमोनिवृत्त्यर्थं नान्यत् किमपि साधनान्तरमपेक्षमाणं भवति तथैवाऽज्ञानान्धकारनिवृत्तौ सर्वानुकूलतामापन्नः सर्वप्रकाशः सर्वात्मभूतो ज्ञानस्वलबोऽपि नहि किमपि स्वस्वादतिरिक्तं साधनान्तरमपेक्षते । तथा चोक्तम्—

'तमोनिवृत्तौ सूर्यस्तु यथा नान्यदपेक्षते ।
तथाऽज्ञाननिवृत्तौ तु ज्ञानं नान्यदपेक्षते' ॥ सूतसंहिता

अपि च—'ज्ञानाग्निः सर्वकर्माणि भस्मसात् कुरुते तथा । गीता—अ० ४, ३७

एवम्—'सर्वं कर्माखिलं पार्थ ? ज्ञाने परिसमाप्यते' तत्रैव, अ० ४।३३३३ ।

अर्थात् यथा लघुकाष्ठैः प्रज्वलनेन वृद्धिं गतो वन्हिः काष्ठानि क्षणेन भस्मसात् कुरुते तथैव नैरन्तर्येण ध्यानसमाधिभिः प्रवर्तितो ज्ञानाग्निः पापपुण्यमिश्रितानि सर्वाण्येव कर्माणि बहुजन्मसञ्चितानि स्वाऽव्यवहितोत्तरक्षणेनैव भस्मसाद् विधत्ते । यथा स्थाणुत्वप्रकारकं ज्ञानं स्थाणोः स्वरूपावरकाऽज्ञाननिवृत्तिमात्राऽव्यवहितोत्तरकाले एव पुरुषत्वप्रकारकमाहोस्विच्चौरत्वप्रकारकं भ्रमात्मकं ज्ञानं तत्कार्यं च निरस्यति । अथवा रज्जुत्वप्रकारकं रज्जुविशेष्यकं ज्ञानं रज्जौ भासमानसर्पत्वप्रकारकं ज्ञानं समूलमुन्मूलयति ।

तथैव निर्गुण, निष्कल, निर्विशेष, निष्क्रियब्रह्मज्ञानमपि तादृशब्रह्मावरकाऽज्ञाननिवृत्त्यव्यहितोत्तरक्षणावच्छेदेनैव विदुषोऽज्ञानोत्पादितकर्तृत्वभ्रमं सर्वथा विध्वस्य अज्ञानोत्पादितानि अन्यान्यपि सर्वाणि कर्माणि क्षणमात्रेणैव निर्मूलयति, तदनन्तरकालावच्छेदेनैव च सर्वथाऽऽनन्दरूपोऽहम्, निष्क्रियोऽहम् एवंविधं ज्ञानं तस्य जायते ।

प्रश्नः—किम् ज्ञानस्याऽज्ञाननिवृत्तिमात्रमेव कार्यमिति चेन्न ।

उत्तरम्—अज्ञाननिवर्तनेन सह भ्रमसंशयादिनिवृत्तिरपि ज्ञानेनैव जायते एकस्य कारणस्याऽनेककार्यदर्शनात् ।

यथा लक्ष्मणेन मेघनादस्योपरि पतितेन ब्रह्मास्त्रेण मेघनादस्योरश्छेदनं प्राणनिर्गमो शरीरपातादिकश्चाऽनेककार्यं व्यधायि, तदेव प्रकृते ज्ञानस्थलेऽपि विज्ञेयम् ।

ननु ब्रह्मात्मत्वज्ञानं यदि सर्वाण्येव कर्माणि भस्मसाद् विधत्ते तदा कर्ममात्रस्याऽज्ञानकार्यत्वेन प्रारब्धकर्मणोऽपि सञ्चितादिकर्मवन्निवृत्तिं कुर्यात् इति चेन्न ।

भुक्तेर्भोगस्य पूर्वकालावच्छिन्नस्य पश्चात्कालावच्छिन्नस्य चाऽन्नस्य परित्यागो विधातुं शक्यते । परन्तु भुक्तस्याऽन्नस्य न तथा कर्तुं शक्यते, प्रवृत्तफलत्वात्तस्य । तथैव प्रारब्धकर्मणोऽपि प्रवृत्तफलवत्त्वेन भोगमन्तरा निवृत्तिर्नैव भवितुमर्हति ।

अपि च—अर्जुनः श्रीकृष्णं भक्तवत्सलं भगवन्तं प्रति ब्रूते यद् भवता समुपदिष्टं समुपदेशात्मकं ज्ञानं समवाप्यापि मे मनो बिभेति यद् भीष्मद्रोणाचार्यप्रभृतिगुरूणां बधजन्यपापकर्मणः कथं मे निवृत्तिः स्यात्, अर्थात् ततो मे मुक्तिर्नैव स्यादित्यर्थः ।

बोधयति आनन्दकन्दः श्रीकृष्णचन्द्रः, यत् हे अर्जुन ? त्वं व्यर्थमेव बिभेषि यतो द्रव्यस्वरूपाद् अर्थात् द्रव्यमन्त्रतन्त्रक्रियादिपरिश्रमजन्याऽनुष्ठेयादनित्यफलवत्त्वहेतोः 'स्वर्गकामो यजेत' इत्यादिविधिप्रतिपादितात् यज्ञात् = यज्ञापेक्षया नित्यनिरन्तराऽविनाशस्तमयमोक्षैकफलदो ज्ञानयज्ञो हि श्रेयस्करः। अस्यैवाऽज्ञाननिवृत्त्युपायरूपत्वात् सर्वश्रेष्ठतमत्वं विज्ञेयम्। ततश्चानेनैव 'तत्त्वमसी' त्यादिमहावाक्यजन्यज्ञानेनाऽविद्यानिवृत्तौ सत्यां निरतिशयानन्दात्मलाभरूपस्तुरीयः परमपुरुषार्थः सेत्स्यति ! यथा चोक्तम्—

'आत्मलाभान्न परं विद्यते' इति। —आपस्तम्बस्मृतिः

अस्मिन्नेवाऽऽत्मज्ञाने अखिलं कर्म परिसमापितं भवति। यथा वेलां गतस्य किञ्चिदन्यत् गन्तव्यं न भवति। तथैव ज्ञानं प्राप्तस्य तस्य यतेर्योगिनो वा किमपि कर्तव्यमग्रे नाऽवशिष्यते। जप, यज्ञ, दान, तीर्थाटनादिकं सर्वमेव व्यर्थीभूतं भवति।

आहोस्विदत्र विषये इदमपि वक्तुं शक्यते यत् यस्मिन् ज्ञाने प्राप्ते सति ब्रह्मणः कल्पशतार्जितं संचितमागामि च सर्वमेव कर्म भगवद्भास्करप्रकाशेन तम इव निःशेषं निर्मूल्यते। तदेवोक्तम्—'ज्ञाने परिसमाप्यते' इति।

अन्यच्चापि— यथा रज्जुं परित्यज्य सर्पं गृहाति वै भ्रमात्।
तद्वत् सत्यमविज्ञाय जगत् पश्यति मूढधीः॥
रज्जुखण्डे परिज्ञाते सर्परूपं न तिष्ठति।
अधिष्ठाने तथा ज्ञाते प्रपञ्चे शून्यतां गते॥

नादबिन्दूपनि० ४०।२६-२७।

अर्थात्—यथा रज्जुपदाभिधेयस्य प्रमात्मकज्ञानाभावरूपकारणवशात् अर्थात् रज्जुरूपाऽधिष्ठानसाक्षात्काराभावात् रज्जुपदार्थस्य सर्पत्वेन भानं भवति, अर्थात् भ्रमवशात् रज्जुं रज्जुत्वेनाऽविज्ञाय सर्पत्वेन गृह्णाति, तद्वदेव हि ज्ञानप्लवरूपं सत्यमविज्ञाय भ्रमान्धकारपतितो मूढधीर्विश्वमेवेदं सत्यत्वेन विजानाति।

रज्जुपदनिरूपितवाच्यतावति रज्जुपदार्थे परिज्ञाते सर्परूपं यथा न तिष्ठति तथैव ज्ञानप्लवरूपाऽधिष्ठानसाक्षात्काराऽभावरूपकारणवशादेव चराचरात्मकं जगदिदं प्रतीयमानं भवति, जगदिदं जीवं बध्नाति। ज्ञानप्लवरूपेऽधिष्ठाने जगतोऽध्यस्तत्वेन तत्सत्तैव नास्ति अतोऽध्यस्तेनाऽवस्तुभूतेन वस्तुत्वाभिमतेन ज्ञानप्लवरूपेऽधिष्ठाने विकारो, विकारोत्पादो वा नैव सम्भाव्यते। अत एवोक्तम्—

"द्रष्टा दृश्यवशाद् बद्धो दृश्याभावे विमुच्यते" महोपनि० ४।४८।

अपि च— "यद्वन्मृदि घटभ्रान्तिः शुक्तौ हि रजतस्थितिः।
तद्ब्रह्मणि जीवत्वं वीक्ष्यमाणे रजतस्थितिः॥
यथा मृदि घटो नाम कनके कुण्डलाभिधा।
शुक्तौ हि रजतख्यातिर्जीवशब्दस्तथापरे॥
यथैव व्योम्नि नीलत्वं यथा नीरं मरुस्थले।
पुरुषत्वं यथा स्थाणौ तद्वद्विश्वं चिदात्मनि॥

—योगशिखोपनि० ३।१३ से १५

अन्यच्चापि ज्ञानप्लवस्य विशेषतमं महत्त्वं श्रूयताम् । अयमेव ज्ञानप्लवः सर्वानुभवविनिर्मुक्तः, सर्ववाच्यविवर्जितः, आदिमध्यान्तहीनश्च प्राग्वर्णिते स्वस्वरूपे प्रतिष्ठितः सन् स्वास्तित्वसम्पन्नः सन्तिष्ठते ।

ज्ञानप्लवसमारूढस्य समारोढुमिच्छतो वा यतेर्योगिनो वा मुमुक्षोर्वा सर्वथा ज्ञानप्लवाऽमृतेन सन्तृप्तस्य निष्प्रयोजनकत्वं सुनिश्चीयते । यथा अमृतेन तृप्तस्य पयसा-नास्ति किमपि प्रयोजनम्, अर्थात्तस्यापि निष्प्रयोजनकत्वं पूर्ववदेव निर्णीयते । इत्थञ्च ज्ञानप्लवामृतेन तृप्तस्य तस्य वेदैरपि नास्ति किमपि प्रयोजनम् । तथा लोकत्रयेऽपि किमपि कर्तव्यं नावशिष्यते । तथाचोक्तम्—

"अमृतेन तृप्तस्य पयसा किं प्रयोजनम् ।
एवं स्वात्मानं ज्ञात्वा वेदैः किं प्रयोजनम्" ॥

पैङ्गलोपनि० ४।९ ।

"ज्ञानामृतेन तृप्तस्य कृतकृत्यस्य योगिनः ।
नचास्ति किञ्चित् कर्तव्यमस्ति चेन्न स तत्त्ववित् ।
लोकत्रयेऽपि कर्तव्यं किञ्चिदस्य न विद्यते" ॥

श्रीजाबालदर्शनोपनि० १।२३-२४ ।

"लोकद्वयेऽपि कर्तव्यं किञ्चिदस्य न विद्यते ।
इहैव स विमुक्तः स्यात् सम्पूर्णः समदर्शनः" ॥ शिवधर्मोत्तरे ।
"न च पुनरावर्तते न च पुनरावर्तते"

छान्दोग्योपनि० ।

"भूयस्ते न निवर्तन्ते परावरविदो जनाः"

कुण्डिकोपनि० २२ ।

"ब्रह्म सम्पद्यते योगी न भूयः संसृतिं व्रजेत्"

त्रिशिखब्राह्मणोपनि० १६१ ।

एवं बुद्धचरितनामके महाकाव्ये महाकविः श्री अश्वघोषः स्वयं चराचरात्मकस्यास्य संसारस्य प्रवृत्तिनिवृत्ती अन्ततो गत्वाऽराडदर्शने दर्शितवान् । तत्त्वभूतं प्रभूतं निगूढं महत्त्वञ्चाऽस्मिन् महाकाव्ये निरूपितवान् श्रीअश्वघोषः । तथाहि—

"श्रूयतामयमस्माकं सिद्धान्तः शृण्वतां वर ?
यथा भवति संसारो यथा चैव निवर्तते" ॥

बुद्धच० १२ सर्गः, अराडदर्श० १६ ।

"प्रकृतिश्च विकारश्च जन्ममृत्युर्जरैव च ।
तत्तावत्सत्त्वमित्युक्तं स्थिरसत्त्व ? परे हि तत्" ॥

तत्रैव, श्लो० १७ ।

"तत्र तु प्रकृतिं नाम विद्धि प्रकृतिकोविद ?
पञ्च भूतान्यहंकारं बुद्धिमव्यक्तमेव च" ॥

तत्रैव श्लो० १८ ॥

विकार इति बुध्यस्व विषयानिन्द्रियाणि च ।
पाणिपादञ्च वाचं च पायूपस्थं तथा मनः ॥
तत्रैव, श्लो० १९ ।

अस्य क्षेत्रस्य विज्ञानात् क्षेत्रज्ञ इति संज्ञि च ।
क्षेत्रज्ञ इति चात्मानं कथयन्त्यात्मचिन्तकाः ॥ २० ॥

सशिष्यः कपिलश्चेह प्रतिबुद्ध इति स्मृत ।
सपुत्रः प्रतिबुद्धस्तु प्रजापतिरिहोच्यते ॥ २१ ॥

जायते जीर्यते चैव बाध्यते म्रियते च यत् ।
तद्व्यक्तमिति विज्ञेयमव्यक्तन्तु विपर्ययात् ॥ २२ ॥

अज्ञानं कर्म तृष्णा च ज्ञेयाः संसारहेतवः ।
स्थितोऽस्मिंस्त्रितये जन्तुस्तत्सत्त्वं नातिवर्तते ॥ तत्रैव—

शास्त्रप्रामाण्यविवेचनम्

अपि च द्वन्द्वनाम्नापि = द्वन्द्वोल्लेखेनापि च ज्ञानप्लववैपरीत्याबच्छिन्नमार्गो वर्तते सर्वथा दुःखकर इत्यपि दर्शयति महाकविः श्रीअश्वघोषः । तथाहि—

द्वन्द्वभूतेऽसारेऽस्मिन् खलु संसारे शीतोष्ण, सुखदुःख, गुणदोष, हानिलाभप्रभृतिभ्यः सर्वेभ्यो द्वन्द्वभूतेभ्यो विषयेभ्यो नहि कश्चिद् वञ्चितोऽस्तीत्यत्र चास्ति शास्त्रमेव प्रमाणम् । तदेव शास्त्रप्रामाण्यमाह—

द्वन्द्वानि सर्वस्य यतः प्रसक्ता-
न्यलाभलाभप्रभृतीनि लोके ।
अतोऽपि नैकान्तसुखोऽपि कश्चित्-
नैकान्तदुःखः पुरुषः पृथिव्याम् ॥
बुद्धचरिते—११ सर्गः

दृष्ट्वा बिमिश्रां सुखदुःखतां मे-
राज्यञ्च दास्यञ्च मतं समानम् ।
नित्यं हसत्येव हि नैव राजा
न चापि सन्तप्यत एव दासः ॥
तत्रैव, श्लोक ४४ ।

अन्यच्चापि ब्रूतेऽश्वघोषः—

राज्ये नृपस्त्यागिनि बव्हमित्रे-
विश्वासमागच्छति चेद्विपन्नः ।
अथापि विश्रम्भमुपैति नेह-
किं नाम सौख्यं चकितस्य राज्ञः ॥
तत्रैव, श्लोक ४६ ॥

यदा च जित्वापि महीं समग्राम्-
वासाय दृष्टं पुरमेकमेव।
तत्रापि चैकं भवनं निषेव्यं-
श्रमः परार्थे ननु राजभावः॥

तत्रैव—श्लो० ४७

नाल्पे सुखमस्ति " छां० उ० ७।२३।१।

अपि च तत्रैव— "यदल्पं तन्मर्त्यम्"—तत्रैव, ७।२४।१।

अर्थात् अल्पे=तमोगुणेन जायमाने क्षुद्रकार्ये नास्ति किमपि सुखमिति तस्य सर्वथा हेयत्वमस्ति अपितु पूर्णे सुखमस्ति इत्येव वक्तव्यम्।

पूर्णमदः पूर्णमिदं पूर्णात् पूर्णमुदच्यते।
पूर्णस्य पूर्णमादाय पूर्णमेवावशिष्यते॥

—बृहदारण्यकोप० ५।१।१

अर्थात् अल्पेषु परिवर्तनशीलेषु सर्वदा दुःखप्रदेषु भौतिकेषु वस्तुत्वेनाभिमतेषु नास्ति किमपि सुखमिति तु निष्कर्षः।

"संसार एव दुःखानां सीमान्त इति कथ्यते।
तन्मध्ये पतिते देहे सुखमासाद्यते कथम्॥

महोपनि० ६।२६।

इति श्रुतेः कथनानुसारमपि विकारसम्पन्नत्वेन दुःखप्रदेभ्यो भौतिकवस्तुभ्यो नहि कदाचित् कथञ्चित् शाश्वतं निरतिशयञ्च सुखं समवाप्तुमहमस्मि क्षमः, यतः चराऽचरात्मकस्य सर्वस्यापि संसारस्य सदैव दुःखरूपत्वात्, दुःखाक्रान्तत्वाच्च।

"मृत्योः स मृत्युमाप्नोति य इह नानेव पश्यति" कठोपनि० २।१।११।
नानेव पश्यतीत्यस्य संसारनिष्ठां द्वन्द्वरूपतां पश्यतीत्यर्थः। न तु ब्रह्मरूपताम्। "सर्वं ब्रह्ममयं जगत्"

"दृष्टिं ज्ञानमयीं कृत्वा पश्येद् ब्रह्ममयं जगत्" तेजोबिन्दूपनि० १।२९।
एतद्विपरीतगामिनां जनानां प्रवृत्तिः सर्वदा मदाय=दुःखायैव भवति न सुखायेति भावः। तथाचोक्तम्—

राज्ञोऽपि वासो युगमेकमेव—
क्षुत्सन्निरोधाय तथान्नमात्रा।
शय्या तथैकासनमेकमेव—
शेषा विशेषा नृपतेर्मदाय॥

बुद्धचरिते, ११ सर्ग

दार्शनिककृतयः

चराचरात्मकं दुःखपङ्कनिमग्नं सकलमेव जगत् दुर्भिक्ष,भय, आमयेभ्यस्तथा जरा, मरण, जननीजननेशयनप्रभृतिभ्यो मायालक्षणलक्षितेभ्यो महद्भ्यो दोषेभ्यो ग्रस्तं

व्यस्तं च सर्वथा सर्वदा च समनुभूयते। नितान्तमहर्निशमनिशञ्च 'धर्म एव हतो हन्ति" इति प्राचीनाचार्यचरणोक्तेर्दुर्भिक्ष, भयादिमायाप्रभृतिदोषसमन्वितञ्च सुनिश्चीयते।

परन्तु जन्मजन्मान्तरार्जितपुण्यपुञ्जोदयजन्यशास्त्रोक्तविधानजन्यसन्मार्गगामित्वेन धर्मतत्त्वस्य धार्मिकभावनायाः संचारः प्रसारश्च जायते। तस्य पापजालमावश्यकत्वेन विनाशमाशुतरं गच्छति। एवं परम्पराक्रमेण अव्यभिचारिण्या भक्त्या, योगेन, तीव्रतमवैराग्येण वा हृदयग्रन्थिर्भिद्यते, सर्वसंशयाश्छिद्यन्ते, सर्वाणि च स्तेय, अरिप्रदत्त, प्रभृति सर्वाण्येव दूषितभूषितकर्माणि प्रणश्यन्ति।

तस्य हृदि रत्यर्थं कामसेवनस्य, कामार्थञ्च धनोपयोगस्य, धनार्थञ्च धर्मस्य, वृत्युदयो नहि जायते। तादृशवृत्तिरूपज्ञानाभावोदये जायमाने एव एवम्भूताऽहर्निशं समनुभूयमानमायाजालस्वरूपसांसारिकबन्धनतः सर्वथा विनिर्मुक्तो भवति। आनन्दमयीभावना च जागृता भवति। तथाचोक्तम्—

मुक्तश्च दुर्भिक्षभयामयेभ्यो-
हृष्टो जनः स्वर्ग इवाभिरेमे।
पत्नीं पतिर्वा महिषी पतिं वा
परस्परं च व्यभिचेरतुश्च॥

बुद्धचरितम्—सर्ग २, श्लो० १३

अपि च— कश्चित् सिषेवे रतये न कामं-
कामार्थमर्थं न जुगोप कश्चित्।
कश्चिद्धनार्थं न चचार धर्मं-
धनाय कश्चिन्न चकार हिंसाम्।

पश्यन्तु—तत्रैव, श्लो० १४

स्तेयादिभिश्चाप्यरिभिश्च नष्टं-
स्वस्थं स्वचक्रं परचक्रमुक्तम्।
क्षेमं सुभिक्षं च बभूव तस्य-
पुरानरण्यस्य यथैव राष्ट्रम्॥

तत्रैव श्लो० १५

इत्थञ्च वृत्तिरूपज्ञानोदये जाते एवम्भूतमायाजालरूपबन्धनलक्षितमसारं खलु संसारसागरं सर्वथा दुस्तीर्णं ज्ञानवान् यतिर्वा योगी वा समुत्तरति। तथाचोक्तम्—

"ज्ञानप्लवमधिष्ठाय शीघ्रं दुःखार्णवं तर"

तत्रैव सर्ग १२—अराडदर्शन, ९

तथा गीतायामपि—

"सर्वं ज्ञानप्लवेनैव वृजिनं सन्तरिष्यति" —गीता

यतस्तावज्—ज्ञानाग्निः सर्वकर्माणि भस्मसात् कुरुते तथा। —गीता

अपि च अन्यत्रापि—

निःस्पृहं मानसं यस्य नैराश्येऽपि महात्मनः।
तस्याऽऽत्मज्ञानतृप्तस्य तुलना केन जायते॥

अन्तर्विकल्पशून्यस्य बहिः स्वच्छन्दचारिणः।
भ्रान्तस्येव दशास्तास्तास्तादृशा एव जानते॥
न जागर्ति न निद्राति नोन्मीलति मीलति।
अहो परदशा क्वापि वर्तते मुक्तचेतसः॥
स्वराज्ये भैक्ष्यवृत्तौ च लाभालाभे जने वने।
निर्विकल्पस्वभावस्य न विशेषोऽस्ति योगिनः॥

अपि च— "सर्वत्र दृश्यते स्वस्थः सर्वत्र विमलाशयः।
समस्तवासनामुक्तो मुक्तः सर्वत्र राजते॥ —अष्टाव॰ गीता

वसिष्ठेनाप्युक्तम्—

निर्वासनो निरालम्बः स्वच्छन्दो मुक्तबन्धनः।
क्षिप्तः संसारवातेन चेष्टते शुष्कपर्णवत्॥
स्वेच्छाः सकलाः शङ्काः सर्वेहाः सर्वनिश्चयाः।
धिया येन परित्यक्ता महाज्ञानी स उच्यते॥
सुप्तः प्रबुद्धो भवति प्रबुद्धोऽपि च सुप्तवान्।
सर्वकर्म करोत्यन्तर्न करोति च किञ्चन॥

—योगवासिष्ठः

तिष्ठन्नपि हि नासीनो गच्छन्नपि न गच्छति।
शान्तोऽपि व्यवहारस्थः कुर्वन्नपि न लिप्यते॥

संन्यासोपनिषत्—२।३३

अन्तर्मुखतया नित्यं सुप्तो बुद्धो ब्रजन् पठन्।
पुरं जनपदं ग्राममरण्यमिव पश्यति॥

अन्नपूर्णोपनि॰ १।३४

अपि चान्यत्रापि—

अखण्डानन्दमात्मानं विज्ञाय स्वस्वरूपतः।
बहिरन्तः सदानन्दो रसास्वादनमात्मनि॥

अध्यात्मोपनि॰ २७

स्वयं ब्रह्मा स्वयं विष्णुः स्वयमिन्द्रः स्वयं शिवः।
स्वयं विश्वमिदं सर्वं स्वस्मादन्यन्न किञ्चन॥ तत्रैव—२०

ब्रह्मैव विद्यते साक्षाद् वस्तुतोऽवस्तुतोऽपि च।
तथैव ब्रह्मविज्ज्ञानी किं गृह्णति जहाति किम्॥

पाशुपतब्रह्मोपनि॰ २७

एतावता प्रबन्धेन श्रीअश्वघोषस्याऽभिमतो ब्रह्माद्वैतवादः समर्थितः प्रबलतर-प्रमाणादिभिर्मतमतान्तरवादिभिः। श्रीअश्वघोषोऽस्वीयं तादृशं ब्रह्माद्वैतवादं प्रागेव निरूपितवान्। तथा चोक्तमश्वघोषेण—

जगति क्षयधर्मके मुमुक्षुर्मृगयेऽहं शिवमक्षयं पदं तत् ।
स्वजनेऽन्यजने च तुल्यबुद्धिर्विषयेभ्यो विनिवृत्तरागदोषः ॥

बुद्ध च० सर्ग ५, अभिनिष्क्रमणे श्लो० १८

अर्थात् ध्वंसप्रतियोगितावत्त्वे सति प्रागभावप्रतियोगितावति क्षयधर्मकेऽस्मिन्नसारे खलु संसारे मुमुक्षुर्यत् शिवम्, अक्षयं पदं मृगयते तत् पदमेव श्रीअश्वघोषस्य माण्डूक्योपनिषदि अपि निम्नोल्लिखितशब्दावल्या खलु प्रतिपादितम् । तथाहि—

अद्वैतसिद्धान्तमेव हि सत्यं शिवं सुन्दरं सिद्धान्तमस्ति ।
शान्तं शिवमद्वैतं चतुर्थं मन्यन्ते स आत्मा ॥

माण्डूक्योपदि०—७

तथैव— यस्मिन् सर्वाणि भूतान्यात्मैवाऽभूद्विजानतः ।
तत्र को मोहः कः शोक एकत्वमनुपश्यतः ॥

ईशोपनि०—७

अत्रैव भगवतो बुद्धस्योक्तिमनुवदति श्रीअश्वघोषः—

जरामरणनाशार्थं प्रविष्टोऽस्मि तपोवनम् ।
न खलु स्वर्गतर्षेण नास्नेहेन न मन्युना ॥

बुद्धचरिते, सर्ग ६, छन्दकविसर्जने—श्लो० १५

अपि च— तदेवमभिनिष्क्रान्तं न मां शोचितुमर्हसि ।
भूत्वा हि चिरंश्लेषः कालेन न भविष्यति ॥

तत्रैव—श्लो० १६

यच्च वस्तु प्रागभावनिरूपितप्रतियोगितावत्वे सति ध्वंसनिरूपितप्रतियोगितावच्च भवति, त्रिकालबाधितञ्चजायते तद् व्यक्तपदनिरूपितवाच्यतां प्रयाति । तद्विपर्ययभूतञ्चाऽव्यक्तमिति गीयते । सैवाऽव्यक्तरूपा शक्तिरहस्याधिका शक्तिर्निरुच्यते । तस्या एवाऽदृश्यशक्तेर्दर्शनात् संसारसम्पादकीभूताति अज्ञानं कर्मं, तृष्णा च समूलोन्मूलतां गच्छन्ति । एतत्त्रितयभूतसमुदाये सन्तिष्ठमानो जीवो जनन, मरण, जननीजठरेशयनरूपं प्रकृतिविकारं नातिवर्तते । तथोक्तम्—

जायते जीर्यते चैव बाध्यते म्रियते च तत् ।
तद्व्यक्तमिति विज्ञेयमव्यक्तन्तु विपर्ययात् ॥

तत्रैव, अराउदर्शने, सर्ग १२—श्लो० २२

जगद्बन्धनकारणत्वविचारः

अज्ञानं कर्म तृष्णा च ज्ञेयाः संसारहेतवः ।
स्थितोऽस्मिंस्त्रितये जन्तुस्तत् सत्त्वं नातिवर्तते ॥

तत्रैव पुनः श्लो० २३

इत्थञ्चाऽज्ञानस्यैव जगतो मूलकारणत्वं सिद्ध्यति । अत एव महाकविः श्रीअश्वघोषोऽस्यैवाऽज्ञानस्य जगतो मूलकारणत्वं व्यवस्थापितवान् । इदमेव चाऽज्ञानं माया, अविद्या, मूलाविद्याप्रभृतिशब्दावलिनिरूपितां वाच्यतां गतं समनुभूयते, शास्त्रेषु गीयते च ।

एवमिदमेव चाऽविद्यापरपर्यायभूतं प्रभूतमज्ञानं "ममेदम्" "अहमस्मी" नित्याकारिकां बन्धनलक्षणलक्षितां सांसारिकीं दोषदूषिताभज्ञानभूषितामसद्भावनां सांसारिकेषु विषयेषु दुःखपङ्कनिमग्ने जगति चोत्पादयाति, येन तादृशभावनाभावितान्तःकरणा जीवा अकल्याणभाजनभूताः सन्तः भ्रमान्धकारभूते प्रभूते नरकगर्ते पतन्ति, परिवर्तन्ते च अर्थात् "भटकते रहते हैं" इति हिन्दी ।

एतस्या जगत्कारणीभूताया महदद्भुतायाः प्रभूताया मूलाविद्यायाः पञ्चपर्वात्वेन = पञ्चग्रन्थित्वेन रूपेण विवेचनं कृतवान् बौद्धसिद्धान्ताभिमत स्वसिद्धान्ताऽभ्युपगतं वा महाकविः श्रीअश्वघोषः ।

अनया च पञ्चपर्वयाऽविद्यया ग्रस्तो व्यस्तो वा जीवो दुःखभूयिष्ठे सांसारिकसन्तापसन्तापितेऽस्मिन्नसारे खलु संसारसागरे भ्रमान्धकारस्वरूपे पौनःपुन्येन निपतितो भवति, जनन, मरण, जननीजठरेशयनरूपं महादुःखं बारम्बारञ्चानुभवतीत्यत्र नास्ति लेशतोऽपि कश्चिद् विचिकित्सावसरः ।

तथाचोक्तवानश्वघोषः—

ममेदमहममस्येति महद्दुःखमभिमन्यते ।
विज्ञेयोऽभ्यवपातः स संसारे येन पात्यते ॥
बुद्ध चरिते, १२ सर्गः, अराडदर्शने—३२

इत्यविद्यां हि विद्वान् स पञ्चपर्वा समीहते ।
तमो मोहं महामोहं तामिस्रद्वयमेव च ॥
तत्रैव श्लो० ३३

तत्रालस्यं तमो विद्धि मोहं मृत्यु च जन्म च ।
महामोहस्त्वसंमोह ? काम इत्येव गम्यताम् ॥
तत्रैव श्लो० ३४

यस्मादत्र च भूतानि प्रमुह्यन्ति महान्त्यपि ।
तस्मादेष महाबाहो ? महामोह इति स्मृतः ॥
तत्रैव, श्लो० ३५

तामिस्रमिति चाक्रोध ? क्रोधमेवाधिकुर्वते ।
विषादं चान्धतामिस्रमविषाद ? प्रचक्षते ॥
तत्रैवः, श्लो० ३६

अनयाऽविद्यया बालः संयुक्तः पञ्चपर्वया ।
संसारे दुःखभूयिष्ठे जन्मस्वभिनिषिच्यते ॥
तत्रैव, श्लो० ३७

द्रष्टा श्रोता च मन्ता च कार्यकरणमेव च ।
अहमित्येवमागम्य संसारे परिवर्तते ॥
तत्रैव, श्लो० ३८

एतावता प्रबन्धेन जगद्बन्धनहेतुत्वविचारो दर्शितः । स च सर्वथा सुस्पष्ट एवानुभूयते शास्त्रप्रामाण्यवादिभिः । जन्मस्रोतोऽविच्छिन्नरूपेणाऽनादिकालतोऽनाद्यविद्यायाः प्रभाव-

तोऽर्हनिशमनिशं सम्प्रवर्तते। "हेत्वभावात् फलाभावः" इति न्यायेन कारणनाशे कार्यनाश इति गम्यते। अर्थात् जगद्बन्धनकारणीभूताया अनाद्यविद्यायाः प्रभावतो जायमानस्य कार्यभूतस्य प्रभूतस्य जगतो विनाशोऽविद्याया विनाशादेव जायते इति विज्ञातुमर्हसि। यथोक्तम्—

इहैभिर्हेतुभिर्धीमन् ? जन्मस्रोतः प्रवर्तते।
हेत्वभावात् फलाभाव इति विज्ञातुमर्हसि॥

बुद्ध च०, सर्गः १२, अराडदर्श० ३९

अन्यत्रापि च कार्यकारणभावसूचको नियामको वा "हेत्वभावात् फलाभावः" अयमेव व्यतिरेकसहचाररूपो न्यायः सर्वत्रैवाऽनुभूयते। यथोक्तम्—

बोधात् पूर्वमपि ब्रह्म सर्वो जन्तुः स्वभावतः।
अब्रह्मत्वमविद्योत्थं विद्यया तन्निवर्तते॥

अध्यात्मोपनि० २।७०

सर्वोऽपि जन्तु = र्जीवो, बोधपूर्वकालत एव स्वभावतो ब्रह्मैवास्तीति सर्वा अपि श्रुतयो वदन्ति। "जीवो ब्रह्मैव नापरः" इत्यादिना। इयञ्च विद्यया = ब्रह्मविद्यया = ब्रह्मज्ञानेन, जगत्कारणीभूताया अविद्याया निवृत्तौ जायमानायामेव तत्कार्यभूतस्याऽविद्योत्थस्याऽब्रह्मत्वलक्षणलक्षितस्याऽनात्मस्वरूपस्य प्रपञ्चात्मकस्य जगतोऽनित्यत्वं नश्वरत्वं ध्वंसप्रतियोगित्वं च विज्ञाय विद्योदयकालाऽव्यवहितोत्तरकालावच्छेदेनैव विनाशो जायते इति तु परमार्थः। यथोक्तम्—

अनित्यमिति जानीयादनात्मानमशेषतः। सूतसंहिता—

अपि चाऽश्वघोषो वदति—

यथावदेतद् विज्ञाय क्षेत्रज्ञो हि चतुष्टयम्।
आजवं जवतां हित्वा प्राप्नोति पदमक्षरम्॥

बुद्ध च० सर्ग १२, अराडदर्शन श्लो० ४१

अक्षरमित्यस्याऽविनाशीत्यर्थः। तच्च ब्रह्मैव। "अविनाशीवाऽरेऽयमात्मा, सत्यं ज्ञानमनन्तं ब्रह्म" 'अनन्त' पदस्यापि अविनाशिरूप एवाऽर्थो विज्ञेयः। तदेव ब्रह्म 'आत्म' शब्देन = पदेनाभिधीयते। स एव च ब्रह्मस्वरूप आत्मा शुद्धो बुद्धो नित्योऽव्ययः सर्वगतश्चास्तीति सर्वे वेदास्तदतिरिक्तानि शास्त्राणि खलु आमनन्ति। यथोक्तम्—

तस्मादात्माऽक्षरः शुद्धो नित्यः सर्वगतोऽव्ययः।
उपासितव्यो मन्तव्यः श्रोतव्यश्च मुमुक्षुभिः॥

महोपनि० ४।४।७५

अतः मुमुक्षूणां जीवेश्वरयोर्द्वैतबुद्धेर्विरतो भूत्वाऽद्वैत एव सुनिश्चितो वर्तते सारभूतः सत्यसिद्धान्त इति विज्ञाय अविद्योन्मूलनहेतुभूतस्य शोकमोहविनाशकारणीभूतस्याऽक्षर, शुद्ध, सर्वगत, निरतिशयप्रेमास्पदप्रियतमस्य ब्रह्मभूतस्याऽऽत्मनः आहोस्वित् तथाविद्याऽऽत्मभूतस्य ब्रह्मणः साक्षात्कारसम्पत्तये सर्वानर्थस्वरूपस्य सर्वथा बन्धनप्रदस्याऽस्थि, मांस, मल, मूत्रयुक्तस्य असुरभिगन्धयुतस्य घृणितशरीरस्याऽहंमन्यतातः

सर्वथा विमुक्तो भूत्वा ब्रह्मादिस्तम्बपर्यन्तं समस्तमपि चराचरात्मकं विश्वमिदं दुःखं, महादुःखप्रदश्चास्तीति तस्य मिथ्यात्वञ्च सुनिश्चित्य आत्मातिरिक्तस्य सर्वस्यापि असद्-भूताज्जगतो वैराग्यं समुपजायते। तथाचोक्तम्—

देहोऽहमिति संकल्पो हृदयग्रन्थिरीरितः।
देहोऽहमिति यज्ज्ञानं तदेवाज्ञानमुच्यते॥
देहोऽहमिति या बुद्धिः सा चाऽविद्येति भण्यते।
देहोऽहमिति यज्ज्ञानं तदेव द्वैतमुच्यते॥
तेजोबिन्दूपनि० ५।९२ से ९२ तक,

स्वदेहाशुचिगन्धेन न विरज्येत यः पुमान्।
विरागकारणं तस्य किमन्यदुपदिश्यते॥
मुक्तिकोपनि० २।६६

"संसार एव दुःखानां सीमान्त इति कथ्यते"।
महोपनि० ६।२६।

अपि च— तत्रैवाऽन्यदपि प्रागुक्तेः पुष्टकृत् प्रमाणान्तरं विलोक्यताम्—
तथाहि— "संसारदोषदृष्ट्यैव विरक्तिर्जायते सदा"।
नारायणोपनि० ६।२०।

"विरक्तस्य तु संसाराज् ज्ञानं कैवल्यसाधनम्"।
श्रीजाबालदर्शनोपनि० ६।४७।

"वैराग्यहीनस्य न सत्यवेदनम्।"
न मुक्तिसिद्धिर्न च बन्धनच्छिदा॥ —सूतसंहिता

एतावताऽनेन प्रबन्धेनेदमेव सिद्धयति यत् पुत्रमित्रकलत्रप्रभृतिरूपसंसारासक्तिविरक्ति-मापन्नस्यैव पुरुषस्य यतेर्योगिनो वा ज्ञानमेव कैवल्यप्रदानपरं भवति। वैराग्यविहीनस्य तु सत्, चित्, आनन्दस्वरूपस्य ब्रह्मणोऽनुभूतिर्नैव जायते, नापि च तस्यवैराग्यविहीनस्य संसारानलसंतप्तस्य मुक्तिरेव जायते, नापि च तद्रूपावच्छिन्नस्य तस्य सांसारिकबन्धनत एव विमुक्तिर्भवति। इत्थञ्च वैराग्यसम्पन्नस्यैव तस्य प्राङ्निरूपितविषयेभ्यो निवृत्तिर्मोक्षो वा भवितुमर्हतीति तदर्थं वेदान्ताभ्यासो नितान्तमावश्यकः। उक्तञ्च—

"शान्तो दान्त उपरतस्तितिक्षुः समाहितो भूत्वा-
ऽऽत्मन्येवात्मानं पश्यति सर्वमात्मानं पश्यति"।
बृहदारण्यकोपनि० ४।५।२३।

अश्वघोषेणाऽप्ययमेव मार्गोऽतीवप्रशस्ततया वर्णितः। तथाहि—

"ततो रागाद्भयं दृष्ट्वावैराग्याच्च परं शिवम्।
निगृह्णन्निन्द्रियग्रामं यतते मनसः शमे॥ ४८
बुद्धचरितम्—सर्ग १२ अराडदर्शन।

मनसः शान्त्यर्थं मनसः परिशुद्धये मनस इन्द्रियाणां निग्रहो नियमतो नितान्त-मावश्यकः। मनसो निग्रहमन्तरा वास्तविकी सुखशान्तिर्भवबन्धनतो शाश्वतिकी

निवृत्तिश्च नैव भवितुमर्हति । अत उभयत्वावच्छिन्नस्यैवाऽऽवश्यकत्वमस्ति येन मनसा शान्तिर्जयिताम् । अत एवाऽस्माकं प्राचीनाचार्यचरणा उक्तवन्तः—

"मन एव मनुष्याणां कारणं बन्धमोक्षयोः" । दा० कृ०—

मोक्ष विचारः

रागादिज्ञानयोः परम्परास्वरूपाया वासनायाः समुच्छेदे सत्येव वासनोच्छेदरूपा अर्थात् वासनाया ध्वंसरूपाऽभावात्मिका मुक्तिर्माध्यमिक, योगाचार, सौत्रान्तिक, वैभाषिकेति चतुर्णामेव बौद्धानां सर्वथाऽभीष्टा, इष्यमाणा चास्तीत्यत्र नास्ति लेशतोऽपि कोऽपि विवादः । उक्तञ्च—

"क्षणिकाः सर्वसंस्कारा इति या वासना स्थिरा ।
स मार्ग इति विज्ञेयः स च मोक्षोऽभिधीयते" ॥

विवेक-विलासः ८।२६५-७५ ।

अर्थात् सर्वेऽपि संस्काराः सन्ति क्षणिकाः, अर्थात् स्वाऽव्यवहितोत्तरक्षणवृत्तिध्वंसप्रतियोगिनः । अन्यत्र नैयायिक, वैशेषिकप्रभृतिदार्शनिकानां मतेषु तृतीयक्षणवृत्तिध्वंसप्रतियोगित्वमेव क्षणिकत्वमङ्गीकृतमस्ति । यतोऽनुभूयते यद् आकाशात्मभूतयोर्विभुपदार्थयोः प्रत्यक्षयोग्यविशेषगुणानां स्वोत्तरवर्तिगुणनाश्यत्वत्वमित्यतः प्रथमशब्दस्य द्वितीयशब्देन नाशः । तथैव ज्ञानेच्छादीनामप्यस्ति खल्वयमेव क्रम इति । एवं संस्कारस्थलेऽप्ययमेव क्रमो विज्ञेयः । यद्यपि क्षणिकत्वेन चास्ति उभयत्रैव साम्यम् । तथापि स्वरूपलक्षणतस्तु वैषम्यस्य सर्वथा सुस्पष्टमनुभूयमानत्वमवगम्यते ।

इदन्तु बोध्यम्-क्षणस्य शपथनिर्णयत्वेनोभयत्रैव नहि क्षणमात्रस्थायित्वरूपं क्षणिकत्वमभ्युपगम्यते ।

क्षणिकत्वविचारः

घटितबुद्धौ घटकज्ञानस्य कारणत्वमनुभवसिद्धमित्यस्ति सार्वजनीयोऽयं सिद्धान्तः । अनुभवस्य च कथमप्यपलपितुमशक्यात् इति प्राचीनाचार्यचरणोक्तैरेव तादृशसिद्धान्ताभ्युपगमे प्रामाण्यदर्शनादिति न कोऽपि दोषलेशावकाशः ।

इत्थञ्च मोक्षलक्षणस्य क्षणिकत्वघटितत्वेन क्षणिकत्वस्य च तादृशलक्षणघटकत्वेन कारणत्वात् कार्यविचारतः प्राक्कालावच्छेदेन क्षणिकत्वरूपकारणत्वविचारो नितान्तमावश्यकः ।

एवं विशिष्टबुद्धौ विशेषणज्ञानस्य कारणत्वपक्षेऽपि क्षणिकत्वरूपविशेषणज्ञानस्य कारणत्वेन तावतापि क्षणिकत्वरूपकारणत्वविचारस्य नितान्तमाश्यकत्वेनाऽभ्युपगम्यताम् ।

तच्च क्षणिकत्वं माध्यमिक, योगाचार, सौत्रान्तिक, वैभाषिकेति चतुर्णामेव बौद्धानां नये स्वाऽव्यवहितोत्तरद्वितीयक्षणवृत्तिध्वंसप्रतियोगित्वरूपमेव विज्ञेयम् । बौद्धानां चतुर्णामेव नये सर्वेषामेव भावानां क्षणिकत्वेनाऽभ्युपगमात् । तच्च क्षणिकत्वं नील, पीतादिक्षणानां सत्त्वेन हेतुनाऽनुमातव्यम् । तद् यथा—"यत्र धूमस्तत्रवह्नि" रितिवत्, अथवा "यो धूमवान् स वह्निमान्" इतिवत्—"यत् सत् तत् क्षणिकम्" इत्यत्रापि धूमेन

वह्निरिव सत्त्वेन हेतुना क्षणिकत्वं सर्वत्र भावभूतेषु पदार्थेषु साधनीयम् । यथा—जलधरपटलम्, सन्तश्चेमे भावभूताः पदार्था अतस्तेषां क्षणिकत्वमनुभवसिद्धं व्याप्तिबलाच्च सिद्धं भवतीति, अत्र च सत्त्वमर्थक्रियाकारित्वरूपं बोध्यम् । तथा चोक्तम्—

"यत् सत् तत् क्षणिकं यथा
जलधरःसन्तश्च भावाअमी ।
सत्ता शक्तिरिहार्थकर्मणि मितेः
सिद्धेषु सिद्धा न सा" ॥
नाप्येकैव विधान्यथा परकृतेनापि क्रियादिर्भवेत् ।
द्वेधापि क्षणभङ्गसङ्गतिरतःसाध्ये च विश्राम्यति ॥
सर्वद० सं० पृ० ५५ ।

इत्थञ्च भावभूतानां पदार्थानां सर्वेषामेव घट-पटादीनां सत्ता क्षणिकत्वपक्षे एव व्यस्थिता भवतीत्यभ्युपगन्तव्यम् । अर्थात् यस्य सत्ता स एव क्षणिकः । अक्षणिकत्वपक्षे क्रमयौगपद्ययोरुभयोरेवाऽसिद्धिः स्यात् ।

तथा चेदमेव फलीभूतं भवति "यत् सत् तत् क्षणिकम्" उदाहरणानि च जलधरः घट-पटादिभूतानि सत्तासम्पन्नानि च वस्तूनि । इहार्थकर्मणि शक्तिः = प्रजननात्मिका शक्तिरेव 'सत्ता' कथ्यते । इयञ्च सत्ता स्वयमपि क्षणिका । इत्येवंक्रमेण सर्वेषामेव भावभूतानां घट-पटादिपदार्थानां क्षणिकत्वं सत्त्वेनापि हेतुना सिद्ध्यतीति न कोऽपि दोषः ।

इदानीं प्रसङ्गसङ्गतिवशात् न्यायवैशेषिकप्रभृतिमतेनापि क्षणिकत्वं प्रदर्श्यते । तच्च—

"अथाकाशशरीरिणाम्—अव्याप्यवृत्तिः क्षणिको विशेषगुण इष्यते" ।
भाषापरि० का० २७ ।

इत्यनेन विश्वनाथपञ्चाननः तृतीयक्षणवृत्तिध्वंसप्रतियोगित्वरूपं क्षणिकत्वं वर्णितवान् । योग्यविभुविशेषगुणानां ज्ञानादीनामपेक्षाबुद्धिस्वरूपज्ञानभिन्नानां क्षणिकत्वं साधर्म्यं प्रतिपादितम् । अत्र विश्वनाथपञ्चाननो योग्यविभुविशेषगुणानां स्वोत्तरवर्तिविशेषगुणनाश्यत्वमिति नियममङ्गीकृतवान् । यथा प्रथमशब्दस्य द्वितीयशब्देन विनाशः । प्रथमक्षणे संस्कारादिकं ज्ञानादिकञ्च समुत्पद्यते, द्वितीयक्षणे तिष्ठति, तृतीयक्षणे च नश्यति ।

अथवा स्वाधिकरणसमयप्रागभावाधिकरणक्षणानुत्पत्तिकत्वे सति कादाचित्कत्वमेव क्षणिकत्वम्, आहोस्वित् उत्पत्तिमत्त्वमेव वा क्षणिकत्वम् ।

आत्मतत्त्व शिरो०

एवं क्षणिकत्वघटकीभूतो हि क्षणः वर्तमानकालीनार्थग्राहित्वेन स्वोत्पत्त्याश्रय एवेतिमन्तव्यम् । तत्र क्षणवृत्तिक्षणत्वञ्च स्ववृत्तिध्वंसप्रतियोग्यनाधारत्वम्, अथवा स्ववृत्तिध्वंसप्रतियोगिप्रतियोगिकयावद्ध्वंसविशिष्टसमयत्वं वा, आहोस्वित् स्ववृत्तियावद्ध्वंस विशिष्टसमयत्वमेव क्षणत्वम् ।

इत्यञ्च बौद्धमतसिद्धमोक्षलक्षणघटकीभूतं क्षणिकत्वं क्षणत्वञ्च विचार्य पुनः

प्रकृतमनुसरामः—श्रीमन्माधवाचार्यः स्वीये "सर्वदर्शनसंग्रह" नामके ग्रन्थे स्वयमेव मुक्तिपदार्थं विवेचितवान्—

'रागादिज्ञानसन्तानवासनोच्छेदसंभवा ।
चतुर्णामपि बौद्धानां मुक्तिरेषा प्रकीर्तिता ॥
विवेक—विलास, ८ । २६५-७१

एतेनापि चतुर्णां नये सांसारिकरागादिपदार्थज्ञानसन्तानविषयिण्या वासनायाः समुच्छेदसंभवैव मुक्तिरिष्यमाणा वर्तते इत्यभिप्रायः ।

एवं जपस्तीर्थं, तपो, दानम्, एवमन्यान्यपि साधनानि विश्वाधिष्ठानभूतं विश्वावभासकं निजानन्दरूपं शान्तं शिवमद्वैतं सुन्दरं ज्ञानरूपमेतद्ब्रह्मसमवाप्तये नैव प्रभवन्ति प्रभविष्यन्ति वा ।

सर्वाण्येतानि साधनानि अज्ञानमूलकानि तत् स्वरूपाणि वेति सर्वथाऽनर्थमनिष्टञ्च व्यर्थपरिश्रमञ्च जनयन्तीति विज्ञेयम् । उक्तञ्च—

"तस्मादनर्थं विषयाः फलन्ति" ।
बु०च० ११ सर्गः,-३५

महाकविः श्रीअश्वघोषः एतावता प्रबन्धेन एतान् सर्वानेव जागतिकान् विषयान् सर्वानर्थानिष्टजनकीभूतान् बुद्धोक्तेन पथा श्रीशङ्कराचार्योक्तदिशा ब्रह्मणो नित्यताऽतिरिक्तिविषयेषु—एकवाक्यताञ्च विदधानो जगतः पाञ्चभौतिकस्यास्य कलेबरस्य चाऽनित्यतां क्षणभङ्गुरतां मिथ्यात्वञ्च विज्ञाय तद्रूपावच्छिन्नं तदीयं स्वरूपं तथैव वर्णयामास ।

यच्च पञ्चभूतविनिर्मितं पाञ्चभौतिकमिदं शरीरम् अज्ञान, कर्म, तृष्णानिष्ठजनकतानिरूपतजन्यतावच्च जगदिदं जायमानं, जीर्यमाणं, बाध्यमानं, म्रियमाणञ्चास्तीति व्यक्तं विज्ञेयम् । अव्यक्तन्तु सर्वथा तद्विपरीतमेवेति बोध्यम् । तथा चोक्तवानश्वघोषः—

जायते जीर्यते चैव बाध्यते म्रियते च यत् ।
तद्व्यक्तमिति विज्ञेयमव्यक्तन्तु विपर्ययात् ॥२२॥
बु० च० सर्ग १२-२२

अज्ञानं कर्म तृष्णा च ज्ञेयाः संसारहेतवः ।
स्थितोऽस्मिंस्त्रितयो जन्तुस्तत्सत्त्वं नातिवर्तते ॥
तत्रैव, श्लो०-२३

अपि च तत्रैव पुनः—

नाशीविषेभ्यो हि तथा बिभेमि—
नैवाऽशनिभ्यो गगनाच्च्युतेभ्यः ।
न पावकेभ्योऽनिलसंहितेभ्यो—
यथा भयं मे बिषयेभ्य एव ॥
सर्ग ११, तत्रैव, श्लो० ८

अर्थात् आशीविषेभ्यः सर्पेभ्योऽपि नाहं कथञ्चित् कदाचिद् बिभेमि। गगनाच्च्युतेभ्योऽशनिभ्योऽपि नैवाऽहं बिभेमि। एवम् अनिलसहितेभ्यः पावकेभ्योऽपि नाहं बिभेमि। केवलं सांसारिकेभ्यो विनाशं गतेभ्यो विषयेभ्यो भयमस्ति मे। इमे चाऽनित्या विषया मोहयन्ति विडम्बयन्ति मदयन्ति निर्भर्त्स्यंयन्ति चेति सर्वथा हेयतां गताः सन्ति। अतः को हि तत्त्वज्ञः पुमान् अनर्थाऽनिष्टचिन्तनभीरुरिमान् विषयानभिलषेत्। अभिलषितुं वा प्रयतेत।

एवमस्थिक्षुधया पीडिताः सारमेयाः अस्थि भुक्त्वापि तृप्तिं नाधिगच्छन्ति अर्थात्ते सारमेयास्तृप्ता न भवन्ति। अतो जीर्णास्थिकङ्कालनिरूपितसादृश्यं बिभ्रत्सु तेषु जागतिकेषु नश्वरतां गतेषु तेषु विषयेषु कस्याऽऽत्मज्ञानसम्पन्नस्य रतिः स्यादित्यत्र तस्य स्वानुभूतिरेव प्रमाणम्। तथा चोक्तवानश्वानश्वघोषः—

अस्थि क्षुधार्ता इव सारमेयाः—
भुक्त्वापि यान्नैव भवन्ति तृप्ताः।
जीर्णास्थिकङ्कालसमेषु तेषु—
कामेषु कस्यात्मवतो रतिः स्यात्॥

बु०च०स०-११, श्लो०२५

अत एवम्भूतसांसारिकविषयजन्यसन्तापसन्तापिता विवेकिनो जनास्ततः पराङ्मुखा भवन्तो ब्रह्मलोकमवाप्तुं वा यतमाना भवन्ति।

इत्थञ्च मनः संक्षोभकारकान् वितर्कान् विज्ञाय तादृशतर्कविरहितं प्रीतिसुखान्वितं ध्यानं ब्रह्मणि विद्यते। ततश्च प्रभोश्चरणयोर्जायमानया प्रीत्या विषयेभ्यो ह्यात्मानं ह्रियमाणः सन् विशेषं यो नानुभवति स आभास्वरभूतेषु तेषु देवेष्वपि भास्वरं स्थानमाप्नोति।

एवं यश्च सांसारिकविषयजन्यं सर्वातिशयं सांसारिकं सुखं सम्प्राप्यापि तस्मिन् सुखे नानुरक्तो भवति, उदासीनश्च जायते, उपेक्षको भवति, स एव यतिर्योगी वा सर्वथा सुखदुःखविवर्जितं स्वयमानन्दरूपं चतुर्थं तुरीयं ध्यानमाप्नोति।
तथा चोक्तम्—

"शमेनैवंविधेनाऽयं कामद्वेषविगर्हिणा—
ब्रह्मलोकमवाप्नोति परितोषेण वर्जितः॥

बु०च० सर्ग १२, ५१

अस्य कृतयः

(१) "सूत्रालङ्कारः"—अस्य ग्रन्थस्य संस्कृते मूलमिदानीन्तनकालावच्छेदेन नोपलभ्यते। ४०५ ईशवीये वर्षे कुमारजीवेन विदुषाचीनीभाषायामस्य सूत्रालङ्कारस्याऽनुवादो व्यधायि। अयञ्च ग्रन्थस्तत्कालीनपालीजातकेभ्यो गृहीतानां अनुपमसुन्दरकथानां संग्रहात्मको ग्रन्थो वर्तते। तथा बौद्धधर्मस्य प्रचार, प्रसारसाधनीभूतश्चाऽयमस्ति सूत्रालङ्कारः।

[1]चीनीतीर्थयात्रिणा—श्री इत्सिंगेनापि सप्तमशताब्द्या उत्तरार्द्धकाले लिखिते स्वीये यात्राविवरणेऽश्वघोषप्रणीतस्यास्य सूत्रालङ्कारग्रन्थस्योल्लेखोऽकारि। पुनस्ततोऽग्रिमे कालेऽयं कदा विलुप्तो जात इति नहि विज्ञायते, इति तु स एव सर्वज्ञश्चेतनः सर्वेश्वरो वेत्ति। "हूवर" महोदयेनाऽस्य ग्रन्थस्य चीनीभाषान्तरस्य फ्रेंचभाषायामनुवादः १९०८ ईशवीयेवर्षे "पेरिस" इत्याख्ये नगरे विहितस्तथापि मूलस्यानुपलभ्यमानत्वेन मूलग्रन्थस्तु विलुप्तो जातः। सूत्रालङ्कारे बुद्धचरितस्योल्लेखो मिलति, बुद्धचरित अश्वघोषस्यैव कृतिरस्तीति नात्र लेशतोऽपि विवादावसरो विचिकित्सावसरोवेति! उपजीव्योपजीवकभावमाश्रित्यैवेदं कल्प्यतेयत् "सौन्दरनन्द" महाकाव्यानन्तरकालावच्छेदेनैव अस्य "बुद्धचरित" नामकस्य ग्रन्थस्य निर्माणं जातम्। अत्रैव ग्रन्थे श्रीअश्वघोषः स्वीयं श्रीशङ्कराचार्याभिमतं ब्रह्माद्वैतसिद्धान्तमपि दर्शितवान्, यस्य सुस्पष्टीकरणमनुपदमेव विवेचयिष्यते।

२. "महायानश्रद्धोत्पादकः"[2]—अयञ्चास्ति महायानसम्प्रदायस्यैको दार्शनिको-ग्रन्थः। अयञ्चग्रन्थः केवलं चीनीसंस्करणद्वये, समुपलब्धो वर्तते। अस्य महायानश्रद्धोत्पादग्रन्थस्य निर्मातृत्वं विवादास्पदीभूतत्वेन सर्वदा संदिग्धमस्ति। "हुएनसांग" "महोदयस्य जीवनेतिहासेऽस्य ग्रन्थस्य प्रणेता दार्शनिकः प्रसिद्धः कविरश्वघोष एवाऽस्तीति। कस्यचिद् विदुष इदमस्ति कथनं यत् योस्ति कविरश्वघोषः स दार्शनिकाश्वघोषतो भिन्नो वर्तते। आहोस्वित् अस्य ग्रन्थस्य निर्माता कश्चिदपर एव तृतीयो भवेत्। परन्तु अस्य 'महायानश्रद्धोत्पाद' ग्रन्थस्य निर्माताऽस्ति कश्चिदश्वघोष एव इति तु निर्णीतो विषयः। केषाञ्चिज्जापानदेशीयविदुषां कथनानुसारन्त्वयं ग्रन्थो नास्ति संस्कृतस्य, अपि तु चीनदेशीयचीनभाषायाश्चास्त्ययं ग्रन्थः, यतो जापानीयविद्यालयेषु मठेषु चास्य प्रचारदर्शनात् तथाऽध्ययनाध्यापनानुभवाच्चेति मत्वा नाऽयं ग्रन्थः संस्कृतस्येत्यनेन ते स्वीयकथनस्यैव महत्त्वं द्योतयन्ति प्रतिपादयन्ति च।

तन्न समीचीनम्—भवतु अत्र मतमतान्तरोपस्थितिः, यतः "मुण्डे मुण्डे मतिर्भिन्ना" इत्यभियुक्तोक्तिः सर्वत्रानुभवात्।

परन्तु अहन्तु शोधकर्ता 'राजेन्द्रप्रतापः' रजोला इत्युपाह्वो निःस्वार्थं निष्पक्षञ्च ब्रवीमि-यत् क्लिष्टकल्पनापत्तिरूपदोषभयात् तथा "अक्के चेन्मधु विन्देत किमर्थं पर्वतं व्रजेत्" इत्यभियुक्तोक्तेः प्रामाण्यदर्शनाच्चेदं पौनःपुन्येन समनुभूयते यदयं महायानसम्प्रदायस्य "महायानश्रद्धोत्पाद" नामको ग्रन्थोऽस्यैव श्रीअश्वघोषस्य महाकवेः कृतिरस्तीति मे मतिः।

अपि च अश्वघोषस्य रचनायामलङ्कारापेक्षयाऽर्थस्योपरि विशेषतो ध्यानमस्तीति मया "राजेन्द्रप्रसादेन रजोला" इत्युपाह्वेन याथार्थ्येन समनुभूयते सुनिश्चीयते च। तत्र स्वार्थपरत्वविषयकभावनाविषयकेच्छायाः सम्परित्यागस्तथा सार्वभौमक्रियाशीलपरोपकारभावना, एवमनाकर्षकताराहित्यदर्शनविवेचनम्, शास्त्रसम्बन्धिज्ञानम्, शास्त्रविधानोक्तञ्च कर्मकरणमित्यादिसर्वोऽपि विशेषतः समुल्लेखो दृष्टिगोचरीभूतो भवतीति महदेव वैशिष्टयं तत्र समनुभूयते।

१. बुद्धचरितम्—   २. तत्रैव—

नैतावन्मात्रमेव पर्याप्तमस्ति रामायणस्योपमोपमेयभावकल्पनं प्रदर्शनञ्चापि सम्यग् अनुभवविषयीभूतं भवति । यथा—

"महत्या तृष्णया दुःखैर्गर्भेणास्मि यया धृतः ।
तस्या निष्फलयत्नायाः क्वाहं मातुः क्व सा मम ॥ बु० च०

अपि च— तथापि पापीयसि निर्जिते गते—
दिशः प्रसेदुः प्रबभौ दिवाकरः ।
दिवो निपेतुर्भुवि पुष्पवृष्टयो—
रराज योषेव विकल्मषा निशा ॥

अर्थात् तस्मिन् पापीयसि पराजितो भूत्वा गते सति सर्वा अपि दिश उपदिशश्च प्रसेदुः, निशाकरश्चन्द्रो महानेव बभौ । आकाशात् पृथिव्यां पुष्पवृष्टयो बभूवुः ।

अपि च पुनः—

पुनः कुमारो विनिवृत्त इत्यथो—
गवाक्षमालाः प्रतिपेदिरेऽङ्गनाः ।
विविक्तपृष्ठञ्च निशम्य वाजिनम्—
पुनर्गवाक्षाणि पिधाय चक्रुशुः ॥

अर्थात् यदा सारथिः पुनः परावृत्तो भवति तदा किं भवतीत्याह—पुनः कुमारो विनिवृत्तः" इत्यादिः । अस्यार्थः—"अरे ? कुमारस्तु पुनः विनिवृत्तः" इत्युक्तवत्यस्ता अङ्गनाः स्वीयाः स्वीया गवाक्षमालाः प्रतिपेदिरे । परन्तु वाजिनं विविक्तपृष्ठं दृष्ट्वा निशम्य च गवाक्षाणि पुनः पिधाय चक्रुशुः । यशोधरा या च खलु सुन्दरीषु योषित्सु सीतायाः सादृश्यं बिभ्राणाऽऽसीत् सा यशोधरा स्वीयपत्युर्भाग्यविपर्ययं विज्ञाय प्रविलपन्ति स्म ।

शुचौ शयित्वा शयने हिरण्मये—
प्रबोध्यमानो निशि तूर्यनिःस्वनैः ।
कथं बत स्वप्स्यति सोऽद्य मे व्रती—
पटैकदेशान्तरिते महीतले ॥

अर्थात् सुवर्णमये स्वच्छे परमपवित्रे शयने शयित्वा निशितूर्यस्वनैः प्रबोध्यमानः स व्रतधारी मदीयः पतिदेवः वद पटैकदेशान्तरिते महीतलेऽद्यकथं स्वप्स्यति । सचाश्वघोषः अकृत्रिमस्य करुणरसस्यापि सिद्धहस्तो कविरासीत् ।

महाकविः श्रीअश्वघोषः स्वकीयमेकं दार्शनिकदृष्टिसमन्वितं सौन्दरनन्दनामकं महाकाव्यं विरचितवान् । तादृशमहाकाव्यघटकीभूता तदीया चास्ति एका श्लोकस्वरूपाकृतिः । तथाहि—

खिन्नस्य सुप्तस्य च निर्वृतस्य-
बाधां यथा संजनयन्ति शब्दाः ।
अध्यात्ममैकाग्र्यमुपागतस्य-
भवन्ति बाधाय तथा वितर्काः ॥
सौन्दरनन्दे—सर्गः १७, ४६ श्लो०

अर्थात् खिन्नस्य = खेदं गतस्य, सुप्तस्य = निद्रितस्य = निद्रां प्राप्तस्य, निर्वृतस्य च यथा शब्दा बाधां संजनयन्ति। तथा वितर्काः = प्रयोक्तुः संभावनात्मकज्ञानस्वरूपा वितर्काः, ऐकाग्र्यम् = एकाग्रत्वेन सम्पद्यमानम्। अध्यात्मम् = आत्मसम्बन्धि, ज्ञानादि, विचार्यमाणम्, उपागतस्य = प्राप्तस्य, मुमुक्षोर्यतेर्योगिनो वा बाधाय = प्रतिबन्धाय, मानसिकपीडनोत्पादाय वा भवन्ति।

अयमाशयः—खिन्नस्य = खेदं गतस्य = खेदावस्थां प्राप्तस्य पुरुषस्य यथा नहि किञ्चित् मधुरं सुन्दरं वा प्रतिभाति। बालाहसन्तो वा रुदन्तो वा कमपि शब्दं प्रकुर्वन्तो वा नहि ते साधवः = समीचीनाः = प्रियकराश्च, खिन्नस्य पुरुषस्य प्रतिभान्ति।

आहोस्वित् खेदावस्थां प्राप्तस्य तस्य पुरुषस्य कोलाहलात्मको नहि कोऽपि शब्दस्तस्मै रोचते = रुचिकरो भवति। इत्थञ्चास्त्ययमनुभवगोचरीभूतो विषयो यत् यथा बुभुक्षितस्य, संसारानलसंतप्तस्य वा बुभुक्षादिकार्यनिवृत्तिकारणातिरिक्तं नैव किमपि रुचिकरं प्रतिभाति। तथैव खिन्नस्यापि पुरुषस्य बाधां जनयन्ति शब्दाः।

एवं सुप्तस्य = सुषुप्तिं गतस्य, निद्रितस्य वा पुरुषस्य शब्दाः बाधां सञ्जनयन्ति। इदमत्रावधेयमस्ति निद्रा मेध्यानाडीसंयोगः—अर्थात् मेध्यानाड्यवस्थितमनः संयोगो निद्रा। निद्रासषुप्त्योः समानार्थकत्वेन प्रदेशविशेषावस्थितमनः संयोगः सुषुप्तिः। सुषुप्तिलक्षणघटकीभूतोऽयं प्रदेशविशेषोऽपि मेध्यानामकनाडीविशेष एव। आहोस्वित् 'पुरीतत्' नामकनाडीविशेष एव। अत्रोभयोरेव नाडीविशेषयोर्नास्ति किमप्यन्तरम्। शाब्दिकभेदसत्त्वेऽपि अर्थतो नास्ति कोऽपि भेदः।

अपरे पुनः निद्रानाड्यवच्छिन्नाऽऽत्ममनः संयोगो वा सुषुप्तिः। अन्ये च पुनः "पुरीतत्" नामकनाड्या योऽस्ति मनः संयोगः सोऽपि सुषुप्ति, निद्रापदाभिधेयतां गच्छति। यथा = "पुरुषः सुप्तः स्वप्नमाचरति। तौ ह सुप्तं पुरुषमाजग्मतुः।"

कौषी० ४।१५।

इत्यत्र घटकीभूतस्य 'स्वप्' धात्वर्थस्य स्वापत्वेन सुषप्तित्वं सिद्ध्यति। इदमेव चास्ति निद्रात्वं, तदवच्छिन्ना निद्रा तादृशसंयोगरूपा। अयञ्च संयोगः—व्याप्यवृत्तिर्वाऽव्याप्यवृत्तिर्वा, अन्यतरकर्मजो वा उभयकर्मजोवेति तु विभावनीयम्।

योगविदस्तु प्रायः सूत्रात्मकमेव लक्षणं स्वतात्पर्यनिहितं समर्थयन्ति। तथाहि—"अभावप्रत्ययावलम्बनो वृत्तिविशेषो निद्रा" इति वदन्ति। अत्र पातञ्जलसू—"अभावप्रत्ययावलम्बना वृत्तिर्निद्रा" पातञ्जलसू०—१।१०।

तदर्थश्च—जाग्रत्स्वप्नावस्थागतेन्द्रियजन्यव्यापाराभावस्य कारणीभूतं यदस्ति बुद्धिसत्त्वावरकं तमस्तादृशं तमएवाऽऽलम्बनं = विषयो यस्या एवम्भूता वृत्तिः सैव निद्रा सैव च सुषुप्तिरित्युच्यते। योगजधर्मानुगृहीतस्य मनसो निरिन्द्रियप्रदेशावस्थानं निद्रा सुषुप्तिर्वा।

इदानीं निद्रापरपर्यायभूतायाः सुषुप्तेः समुत्पादप्रकारमाह तत्र १. प्रथमक्षणावच्छेदेन सुषुप्तिकारणीभूते मनसि कर्म। २. ततः पुरीतद्व्यतिरिक्तात्मप्रदेशात् मनसो विभागः। ३. ततः पूर्वसंयोगनाशः। ४. ततो मनसः पुरीतद्रूपोत्तरदेशसंयोगः। स एव संयोगः सुषुप्तिः, निद्रेति चोच्यते।

इयञ्च सुषुप्त्यवस्था योगाचारमतातिरिक्तैः सर्वैरेव दार्शनिकैर्ज्ञानशून्यावस्था कथ्यते। अनुभवतोऽपि सार्वजनीनासिद्धोऽयं विषयः। मयापि राजेन्द्रप्रतापेनापि तथात्वमेवाऽनुभूयते।

सुषुप्तेर्ज्ञानशून्यत्वे प्रमाणमाह

त्वङ्मनः संयोगस्य ज्ञानसामान्यं प्रति कारणत्वमनुभवसिद्धम्। उक्तम्—

"त्वचो योगो मनसा ज्ञानकारणम्"।

भाषापरि० कारिका—७५।

सुषुप्तौ ज्ञानसामान्यकारणीभूतस्य त्वङ्मनः संयोगस्याऽभावादेव ज्ञानसामान्याभावः सिद्ध्यति। तथाचानुमानम्—

"सुषुप्तिकाले मनो न ज्ञानजनकं त्वक्संयोगाभावादित्यनुभवबलेन त्वङ्मनः संयोगस्य ज्ञानजनकत्वात् त्वङ्मनःसंयोगो ज्ञानसामान्ये कारणमन्वयव्यतिरेकानुविधायित्वात्।" न्या० सि० मु० विलासिनीटीका. पं० ज्वालाप्रसादकृता, पृ० २१९।

सुषुप्त्यव्यवहितप्राक्कालावच्छेदेन त्वचं त्यक्त्वा मनः "पुरीतत्" नाड्यां प्रविशति, तेन किमपि ज्ञानं न सञ्जनयति मनः। तत्र सुषुप्तौ ज्ञानकारणीभूतस्य त्वङ्मनः संयोगस्याऽभावात् सुषुप्तौ न किमपि ज्ञानं समुत्पद्यते। यतः सुषुप्त्यवस्थायां पुरीतति नाड्यां त्वगिन्द्रियाभावेन ज्ञानसामान्याभावः स्वतः सिद्ध्यति।

तथा च "यत्र वन्हिर्नास्ति तत्र धूमोऽपि नास्ती" तिव्यतिरेकसहचारमादृत्य कारणाभावस्य कार्याभावप्रयोजकत्वं सुस्पष्टमेवेति जन्यज्ञानाभावत्वावच्छिन्नं प्रति त्वङ्मनःसंयोगाभावस्य प्रयोजकत्वमनुभवबलात् सिद्ध्यति। सिद्धे च तस्मिन् युक्तिबलात् अनुभवबलाद्वा जन्यज्ञानत्वावच्छिन्नं प्रति त्वङ्मनः संयोगस्य कारणत्वं निष्प्रत्यूहमेव। यदि च जन्यज्ञानत्वावच्छिन्नं प्रति चर्ममनः संयोगादीनां कारणत्वं स्वीकृत्य त्वङ्मनः संयोगस्य कारणत्वं नाङ्गीक्रियते तदा सुषुप्त्यवस्थाकालावच्छेदेनापि ज्ञानत्वावच्छिन्नस्याऽस्तित्वं सिद्ध्येत्, न च तथात्वमनुभूयतेऽतोऽनुभवबलाद् युक्तिबलाद्वा सुषुप्त्यवस्थायां जायमाना ज्ञानानुत्पत्तिरेव सुकरः पन्था इति भावः।

यदि च सुषुप्त्यवस्थानुरोधेन त्वङ्मनःसंयोगाभावस्य जन्यज्ञानत्वाच्छिन्नाभावसाधकत्वं नाङ्गीक्रियते किन्तु ज्ञानत्वावच्छिन्ननिरूपितसामग्रीविशेषाभावस्यैव तथात्वमभ्युपगम्यते तर्हि त्वङ्मनः संयोगस्य जन्यज्ञानत्वावच्छिन्नं प्रति हेतुत्वाङ्गीकारः सर्वथा निरर्थक एव स्यादिति सुषुप्तौ ज्ञानं भवेदित्याशयं मनसि निधाय शङ्कते—ननु सुषुप्तिकाले इति। अर्थात्—

"सुषुप्तिकाले किं ज्ञानं भविष्यति ?

अनुभवरूपम्, स्मरणरूपम् वा ?

नाद्यः—अनुभवसामग्र्यभावात् ।

ज्ञानादेरभावादेव न मानसं प्रत्यक्षम्।

ज्ञानाद्यभावे चात्मनोऽपि न प्रत्यक्षम्।

उद्बोधकाभावाच्च न स्मरणम्"।

न्या०सि०मु०पृ०२१९, पं० ज्वा०प्र० गौड़

इत्यकामेनापि भवता प्राग्दर्शितप्रबन्धानुसारं सुषुप्तेर्ज्ञानशून्यावस्थात्वमनुभवानुरोधात् अनन्यगतिकत्वाच्चावश्यं स्वीकार्यम् ।

ब्रह्माद्वैतसिद्धान्तावलम्बिवेदान्तिनस्तु जीवस्य ज्ञानशून्यावस्थाविशेष एव सुषुप्तिः ।

सांख्यास्तु द्विविधां सुषुप्त्यवस्थां निद्रावस्थां वा स्वीकुर्वन्ति, अर्धलयरूपाम्, समग्रलयरूपाञ्च । तत्राऽर्धलयात्मिकायां सुषुप्त्यवस्यवस्थायां विषयाकारा वृत्तिर्न जायते, किन्तु तादृशवृत्तेरजायमानत्वेऽपि स्वगतसुखदुःखमोहाकारैव बुद्धिर्जायते । एवम् समग्रलयरूपाञ्च तस्यां सुषुप्त्यवस्थायां बुद्धेर्वृत्तिसामान्याभावो मरणादाविव जायते । पश्यन्तु—

सांख्य भा० अ० १, सू० १४८

केचन ब्रह्माद्वैतसिद्धान्तावलम्बिन इत्थं समुद्गिरन्ति यत् समग्रलयात्मिकायां सुषुप्त्यवस्थायां निद्रावस्थायां वा जीवः परमात्मना सहैक्यं समवाप्नोति । पश्यन्तु—

शारीरिक भा०१।१।९।

तत्र च श्रुतिः—

"यत्रैतत् पुरुषः स्वपिति नाम सता सौम्य ?
तदा सम्पन्नो भवति । स्वमपीतो भवति ।
तस्मादेनं स्वपितीत्याचक्षते"—

छां०उ०—६।८।१।

एतावता प्रबन्धेन खिन्नस्य = खेदावस्थां प्राप्तस्य, सुप्तस्य = सुषुप्त्यवस्थां गतस्य मानवस्य शब्दा यथा बाधां सञ्जनयन्ति तन्निरूपितम् ।

इदानीं निर्वृतस्य = कार्यसम्पादने महता प्रयासेन संलग्नतापरायणस्य मानवस्यापि शब्दा बाधां सञ्जनयन्ति । यतः शीघ्रतया कार्यसम्पादनपरो हि मानवः—अविलम्बेनैव यथा स्यात्तथा कार्यमिदं पूर्णतया सम्पन्नं भवेदिति तदर्थं तादृशकार्यपूर्णतासम्पादकसाधनसामग्रीसमन्वेषणपरो भवति । तत्कालावच्छेदेन तस्य नहि तादृशकार्यसाधनसामग्र्यतिरिक्तं किमपि वस्तु कार्यं वा समीचीनं मनोऽनुकूलं प्रतिभाति । तदन्तर्गताः शब्दा अपि नहि तस्य सम्यक्त्वेन प्रतिभासमाना भवन्तिः, तेऽपि तदीये कार्ये बाधामेव जनयन्ति ।

तथा वितर्का अपि ऐकाग्र्यमध्यात्ममुपागतस्य पुरुषस्य बाधां सञ्जनयन्ति । अर्थात्ते वितर्कास्तस्य बाधायैव भवन्तीत्यर्थः । अर्थात्तादृशेऽध्यात्मे = आत्मसम्बन्धिनि ऐकाग्र्ये कार्ये विघ्नबाधां सञ्जनयन्ति । सृष्टेः सर्वाण्येव कार्याणि द्वाभ्यां द्वयोर्वा सम्पन्नानि भवन्ति । यतः सृष्टेर्युग्मरूपत्वात्, (युग्म = जोड़ा) । यथा शाङ्करमते, तर्हि मायाशक्तिरपि तदनुगामिनी चास्तीति सर्वेऽपि विदाङ्कुर्वन्ति । सांख्यमतेऽपि प्रकृतिपुरुषावादाय युग्मता बोध्या । एवं निम्बार्कप्रभृतिष्वपि सर्वत्रैवाऽयं क्रमो विज्ञेयः ।

परन्तु अध्यात्मे = आत्मसम्बन्धिनि विषये नस्त्ययं युग्मतारूपः क्रमः प्रचलति, नापि प्रचलितुं शक्ष्यति । तस्य ऐकाग्र्यावाच्छिन्नत्वेन एकाग्रताऽपेक्ष्यते । ईश्वरोपासनादिरूपं मनन, निदिध्यासनरूपम्, यम, नियमादि, अष्टाङ्गयोगात्मकं सर्वमेव ज्ञान-

विज्ञानसम्बन्धिकार्यं सर्वथा ऐकाग्र्यमपेक्षते। अत एवोक्तवान् अश्वघोषः "अध्यात्ममैकाग्र्यमुपागतस्ये"त्यादि। "सत्यं ज्ञानमनन्तं ब्रह्म" "नित्यं विज्ञानमानन्दं ब्रह्म" इत्यादिश्रुतिभिः समुपपादितस्य ज्ञान, विज्ञानस्वरूपस्य ब्रह्मणः—

"असङ्गोह्ययं पुरुषः"—बृ०उ०४।३।१५।

"असङ्गो नहि सज्जते"—बृ०उ०४।४।२२।

इत्युल्लिखितत्वं समनुभवामः—

तर्क-वितर्कयोस्तु द्वित्वमपेक्षते, त्रित्वमपेक्षते, बहुत्वमपेक्षते, द्वैतो वा भेदो वाऽपेक्ष्यते। परन्तु नाऽत्राऽध्यात्मस्वरूपे ब्रह्मविचारे द्वित्व, त्रित्वयोर्वा द्वैतभेदयोर्वा कदापि कथमपि अपेक्षाते। तथाचोक्तम्—

"सर्वोपाधिविनिर्मुक्तं स्वात्मानं भावयेत् सुधीः"॥

कठरुद्रोप० ४१।

"भेददृष्टिरविद्येयम्"—महोपनि०—५।११३।

इत्थञ्च द्वैतभेदादिस्परूपं द्वित्व, त्रित्व, बहुत्वादि लक्षणलक्षितमुपाधिं विहायैव ब्रह्माऽद्वैतसिद्धान्तमनुसृत्य सच्चिदानन्दस्वरूपलक्षणलक्षितमध्यात्मं ब्रह्म विचारणीयम्। तच्च अध्यात्मं ब्रह्म सत्यं, शिवं, सुन्दरं, शान्तं, चतुर्थम्, अद्वैतमस्ति। अयमेव चास्ति अध्यात्मब्रह्माऽद्वैतसिद्धान्तः। तथाचोक्तम्—

"अद्वैतसिद्धान्तमेव हि सत्यं शिवं सुन्दरं सिद्धान्तमस्ति"

शान्तं शिवमद्वैतं चतुर्थं मन्यते स आत्मा"

माण्डुक्योपनि०७।

"अभेददर्शनं ज्ञानम्"—स्कन्दोपनि० ११।

"ज्ञानं चैकात्म्यदर्शनम्"—श्रीमद्भा०११।१९।२७।

एवम्भूतेऽध्यात्मस्वरूपे आत्मसम्बन्धिनि ज्ञानविज्ञानलक्षणलक्षिते अभेदाऽद्वैतात्मकब्रह्मविचारावसरे तादृशविचारप्रतिबन्धकीभूततर्क-वितर्कयोर्नास्ति कथमपि कदाप्यवसरः। तथोक्तं—"नैषा मतिस्तर्केणापनेया" इति। तदेवोक्तवानश्वघोषः—"भवन्ति बाधाय तथा वितर्काः"। सौ०नं० १७ सर्गः, श्लो० ४६।

दार्शनिकदृष्टयन्तरसमुद्भावनम्

अपि चास्त्यपरा कृतिर्दार्शनिकदृष्टिसमन्विता महाकवेः श्रीअश्वघोषस्य दार्शनिकप्रवरस्य। तथाहि—

'रिरंसा यदि ते तस्मादध्यात्मे धीयतां मनः।
प्रशान्ता चानवद्या च नास्त्यध्यात्मसमा रतिः॥

सौन्दरनन्दे—सर्गः ११, ३४

अर्थात् यदि ते रिरंसा = रमणविषयिणीच्छा, वर्तते, तस्मात् = तर्हि = तस्माद्धेतोर्वा। अध्यात्मे = आत्मसम्बन्धिनि विषये। मनः। धीयताम् = दीयताम्। यतोऽध्यात्मे या चास्ति रिरंसा सा सर्वथा प्रशान्ता = प्रकर्षेण शान्तिपूर्णा। अनवद्या = निर्दोषा =

दोषरहिता = सर्वथा दोषानवच्छिन्नेति यावत् । अतः—अध्यात्मसमा = आत्मसम्बन्धि-विषयनिरूपितसादृश्यावच्छिन्ना । रतिः = प्रेमविशेषः । नास्ति ।

अयमाशयः—ब्रह्मबिन्दूपनिषदि मनसो द्वैविध्यं निरूपितम् । तत्र—

(१) एकं शुद्धं मनः,

(२) द्वितीयञ्चास्ति अशुद्धमिति,

(२) अशुद्धं मनः कामसंकल्पम् भवति,

(१) अपरञ्च शुद्धं मनः कामवर्जितं जायते ।

इदमेव च मनो मनुष्याणां बन्धमोक्षनिरूपितकारणतां निर्वहति । शास्त्रप्रामाण्यानुरोधेनोभयोरेवोपायभूतो हेतुर्मनः । यथोक्तम्—

'मनो हि द्विविधं प्रोक्तम् शुद्धं चाऽशुद्धमेव च ।
अशुद्धं कामसंकल्पं शुद्धं कामविवर्जितम् ॥ १ ॥
मन एव मनुष्याणां कारणं बन्धमोक्षयोः ।
बन्धाय विषयासक्तं मुक्त्यै निर्विषयं स्मृतम् ॥ २ ॥

ब्रह्मविन्दूपनि०—

अर्थात् शुद्धिराहित्यरूपदोषावच्छिन्नस्याऽशुद्धमनसो मायिकत्वेन = मायाकार्यत्वेन जगत् प्रयोजकत्वमुपपद्यते । अत एव तन्मनः सांसारिकं जागतिकं चोच्यमानं भवति ।

तदानीं तज्जागतिकं मन आत्मसम्बन्धि अध्यात्मभूते वस्तुनि तथा तत्सम्बन्धि-मनननिदिध्यासनादिषु, यम नियम, प्राणायामादिषु च नहि कदापि कथमपि लगति नापि लगिष्यतीति तज्जगत्सम्पादनकर्तृत्वेन जागतिकेषु भ्रमाऽन्धकारस्वरूपेषु मोहान्धकार-प्रदेषु च विषयेषु निरवच्छिन्नरूपेण व्याप्यवृत्तितया च परिभ्रमतीत्यहर्निशमविपरीत-प्रत्ययग्राहित्वेन संसारोन्मुखं सत् सर्वानर्थकारणीभूतञ्च सत् नैव कदापि कथमपि विश्रामं लभते । अत एवेदं मनः शरीरात्मकरथसञ्चालनकर्तारमात्मानं बध्नाति, अनाथनाथस्य भगवतो बाबाविश्वनाथस्याऽसन्तुष्टिमप्रसन्नतारूपां सम्पादयति ।

एतस्मादेव हेतोः सर्वाण्येव शास्त्राणि तन्निर्मातारो महर्षयो महामुनयश्च तथा तदध्ययनविधायिनो विद्वांसश्च सर्वेऽपि विश्वमिदं जगन्नाथस्य वाराणसीनाथस्य काशीपतेर्बाबाविश्वनाथस्य कारागारं घोषयन्ति । उक्तञ्च—'तुष्टेर्मोचयतः सर्वान् अतुष्टेर्बध्नतः पुनः । कारागारमिदं विश्वं यस्य तस्मै नमो नमः' । श्रुतमिदम्—अतएव प्रोट्टङ्कितवान् महाकविः श्रीअश्वघोषः—

रिरंसा यदि ते तस्मादध्यात्मे धीयतां मनः ।
प्रशान्ता चानवद्या च नास्त्यध्यात्मसमा रतिः ॥

सौन्दर नं०, ११ सर्गः, श्लो० ३४

अर्थात् रमणविषयिणीच्छास्वरूपा रिरंसा यदि ते वर्तते तदा जगद्विषयकं यदस्ति रमणं तादृशरमणविषयिणीच्छालक्षणलक्षितां बन्धनकारणीभूतां प्रभूतां तां रिरंसां सर्वथा विहाय अर्थात् पुत्र, मित्र, कलत्र, प्रभृतीनां संसर्गतो जायमानं महामोह-स्वरूपम् आवर्तशताकुलं कामक्रोधलोभमदमात्सर्याऽहङ्कारममकारादिमनोविकारभूतं

महाग्राहैर्नितान्तं विस्तृतिं प्राप्तं नैकविधमहारोगलक्षणलक्षितैरितमितिमिङ्गिलकोटिभिः प्रभावितं समुज्जृम्भितं चाऽशनायापिपासादिमहाकल्लोलैर्व्याप्यवृत्तित्वेन विराजितं आध्यात्मिक, आधिभौतिक, अधिदैविकेतितापत्रयस्वरूपघनवडवानलज्वालामालाभिः परिवेष्टितं स्वेष्टपुत्रमित्रकलत्रप्रभृतिजनविनाशप्रयोज्यप्रलापमहाध्वनिशब्दितं विषय-स्वरूपविषगर्भितं तथा नैरन्तर्येण दूषितवासनाभावनाभावितान्तःकरणशैवालपटलपरि-पूर्णविश्वमहोदधिरूपमेवं पुनरपिजननं, पुनरपिमरणं, पुनरपि जननीजठरे शयनमिति-महादुःखसङ्कीर्णं संसारार्णवं विषयीकृत्य जायमाना रमणविषयिणीच्छास्वरूपा रिरंसा सर्वतोभावेन परित्याज्या ।

अध्यात्मस्वरूपविचारः

ततश्च—'महतो महीयान्' इति श्रवणात् महत्तमत्वात् सर्वमहत्तमम् परं ब्रह्म परमेश्वरं जगदीश्वरं तं महेश्वरं सर्वेश्वरं नित्यं, निरन्तरं, निरपेक्षं, निरतिशयं, निरवधिकं, वृद्धिक्षयादिदोषराहित्यावच्छिन्नत्वेन सर्वदैकरसं, सरसं सरलञ्चाऽऽनन्दघनं सद्घनं, चिद्घनं, दुर्दर्शं, गूढमनुप्रविष्टं, गुहाहितं, गह्वरेष्ठं, पुराणमद्वितीयं निधर्मकत्वेऽपि—

निर्विशेषत्व, निःसङ्गत्व, नित्यत्व, कूटस्थत्व, सत्त्व, चित्त्व, अनन्तत्व, सर्वज्ञत्व, सर्वप्रकाशकत्व, स्वयंप्रकाशत्व, सर्वव्यापकत्वादिधर्मैरवच्छिन्नं वस्तुतश्चानवच्छिन्नं सर्वदृश्यपदार्थविलक्षणलक्षणमनाथनाथं बाबाविश्वनाथं विषयीकुर्वाणा रिरंसा विधेया, हृदयेऽपि च सैव निधेयेति येनाऽध्यात्मे मनः समाहितं भवेत् । उक्तञ्च—

'अध्यात्मे धीयतां मनः' । तत्रैव—

तदेव चोक्तं 'ज्ञानयोग' ग्रन्थे—

तृप्तोऽहं तृप्तोऽहं पूर्णोऽहं पूर्णोऽहम्-
सर्वोऽहं सर्वोऽहं शान्तोऽहं शान्तोऽहम् ।
शुद्धोऽहं शुद्धोऽहं बुद्धोऽहं बुद्धोऽहम्-
मुक्तोऽहं मुक्तोऽहमजरोऽहमजरोऽहम् ।
अमरोऽहममरोऽहमनन्तोऽहमनन्तोऽहम् ॥
अखण्डोऽहमखण्डोऽहं सच्चिदानन्दोऽहं सच्चिदानन्दोऽहम् ॥
परमानन्दोऽहं परमानन्दोऽहम् ॥

ज्ञानयोगे, पृ० ९०—

एतेषां 'ज्ञानयोग' ग्रन्थीयपद्यानामुपर्युक्तानामर्थस्तु सुस्पष्ट एव ।

अपि च—'अहं ब्रह्माऽस्म्यहं ब्रह्माऽस्म्यहं ब्रह्मेतिनिश्चयः ।
चिदहं चिदहञ्चेति स जीवन्मुक्त उच्यते ॥

तैजोबिन्दूपनि० ३।२९-३ ।

सर्वाधिष्ठानसन्मात्रे निर्विकल्पे चिदात्मनि ।
यो जीवति गतस्नेहः स जीवन्मुक्त उच्यते ॥

अन्नपूर्णोपनि० २।२७ ।

'ईशावास्यमिदं सर्वम्' 'ऐतदात्म्यमिदं सर्वम्' 'अयमात्मा सन्मात्रो नित्यः शुद्धो बुद्धः सत्यो मुक्तो निरञ्जनो विभुरद्वयानन्दः परः प्रत्यगेकरसः'—नृसिंहोत्तरतापनीयोप० ९

सर्वेषामेव वेदानामस्ति तात्पर्यविषयीभूतोऽर्थः केवलम् अध्यात्मं ब्रह्मैवेति तस्मात् सर्वेऽपि वेदविदो ब्रह्मविदो वेदार्थविदो वा श्रुत्यर्थविदो वा स्मृत्यर्थविदो वा प्राङ्निरूपितं ब्रह्माऽद्वैतसिद्धान्तेन सिद्धान्तितं वेदार्थस्वरूपमध्यात्मं तद् ब्रह्म साक्षात् स्वात्मना वीतरागा ये यतयो याज्ञवल्क्यादयः सर्वेऽपि अन्ये यदक्षरं सन्मात्रं स्वप्रकाश-चिदात्मकं नित्यकूटस्थं शान्तं शिवं चिदेकेरसमसङ्गमद्वितीयं तत् परं तत्त्वं सदुपदिशन्ति। येन ते निःशेषविशेषविनष्टभवादिरागादिदोषास्ते तत्त्वतो ज्ञानसम्पत्तिमन्तो यतयो मुनयो महामुनयो वा दृष्टाऽदृष्टसर्वविषयजन्यसुखराहित्यावच्छिन्नत्वेनाऽऽहारादि नियामकत्वेन श्रद्धया गुरुशुश्रूषया ब्रह्मचर्येण भक्त्या श्रोत्रियं ब्रह्मनिष्ठमेव गुरुमुपसृत्य वेदान्तश्रवणं कृतवन्तः, येन तेऽभ्यासयोगयुक्तेन ज्ञानबलेन तद् ब्रह्म समवाप्तवन्तः। तदध्यात्मसंज्ञितमक्षरं न क्षरति = नहि विनश्यतीति यौगिकव्युत्पत्त्या सम्पद्यमानम्, अथवाऽव्याकृतमव्याकृतजन्यञ्चाऽखिलमेव बहिराभ्यन्तरञ्च कार्यजातमग्निरयः पिण्डवत् व्याप्नोति। हे गार्गि ? सच्चिदानन्देतिस्वरूपलक्षणलक्षितं तदेवाऽध्यात्मं ब्रह्म प्रोच्यते, इत्यर्जुनं प्रत्यध्यात्मतत्वं मथुराचन्द्रो भगवान् श्रीकृष्णचन्द्रो ब्रूते। यथा—

'अक्षरं ब्रह्म परमं स्वभावोऽध्यात्ममुच्यते' इत्यादि।

श्रीमद्भगवद्गीता—अ० ८, श्लो० ३

अपि च पुनस्तत्रैव—

'यदक्षरं वेदविदो वदन्ति विशन्ति यद् यतयो वीतरागाः।
यदिच्छन्तो ब्रह्मचर्यं चरन्ति तत्ते पदं संग्रहेण प्रवक्ष्ये॥

तत्रैव—श्लो० ११

इदमेव शब्दान्तरगर्भितमभिप्रायजातं महाकविः श्रीअश्वघोषोऽपि स्वीये महाकाव्ये सौन्दरनन्दाऽभिधाने वर्णितवान्। तथापि—

संसारे वर्तमानेन यदा चाप्सरसस्त्वया।
प्राप्तास्त्यक्ताश्च शतशस्ताभ्यः किमिति ते स्पृहा॥

सौं० नं० स० ११, श्लो० ३१

विषयमिमं सर्वांशतया सच्चिदानन्दो भगवान् श्रीकृष्णचन्द्र एव समाहितवान्। तथा चोक्तम्—

सर्वद्वाराणि संयम्य मनो हृदि निरुध्य च।
मूर्ध्न्याधायाऽऽत्मनः प्राणमास्थितो योगधारणाम्॥

श्रीमद्भगवद्गीता अ० ८ श्लो० १२

अर्थात् ज्ञानेन्द्रियस्वरूपम्—श्रोत्रे, नेत्रे, घ्राणेन्द्रियं रसनेन्द्रियम्, त्वगिन्द्रियम्, एवम् सर्वाणि कर्मेन्द्रियाणि च वायोर्निर्गमनद्वारभूतानि योगबलेन सर्वथा संयम्य, बहिरन्तश्च व्यापारसमन्वितञ्च मनो हृदि निरुध्य च, तथा सर्वेषामङ्गानां प्राणवायुञ्चाप्याकृष्य, तञ्च वायुं हृदयप्रदेशपर्यन्तं समानीय, पुनस्तं वायुं सुषम्नया नाड्या संयोज्य, ततश्च विशुद्धचक्रस्य, आज्ञाचक्रस्य, अनाहतचक्रस्येति चक्रत्रयस्याऽतिक्रमणं विधाय प्राणवायुर्मूर्ध्नि द्वादशान्ते षोडशान्ते ब्रह्मरन्ध्रे च धारयित्वा, तदनन्तरकालावच्छेदेन

च योगप्रक्रियायां स्थितिमापन्नः सन् योगो 'ओम्' इत्येकाकाक्षरं त्रिमात्रकं समुच्चारयन् मामध्यात्मं परं ब्रह्म परमेश्वरं चिन्तयन् शीर्षकपालस्य भेदनं विधाय इदं पाञ्चभौतिकं स्थूलशरीरमत्रैव परित्यज्य सूक्ष्मशरीरेण = लिङ्गशरीरेण गच्छति स योगी विदेहमुक्ति प्राप्नोति। तदेवोक्तवान् महाकविः श्री अश्वघोषः—

'रिरंसा यदि ते तस्मादध्यात्मे धीयतां मनः।
प्रशान्ता चानवद्या च नास्त्यध्यात्मसमा रतिः॥
सौन्दरनन्दे, ११ सर्गः, श्लो० ३४

इत्येवंविधाऽध्यात्मविषयिणी रिरंसा सर्वथा चास्ति प्रशान्ता चानवद्या चेत्यनेन विज्ञायते यदध्यात्मसमा नास्ति कापि रतिः। तथाचोक्तवानश्वघोषः। तथाहि—

"प्रशान्ता चानवद्या च नास्त्यध्यात्मसमा रतिः"
सौन्दरनं० ११ सर्गः, श्लो० ३४

एवम्भूतायामध्यात्मविषयिण्यां रिरंसायां समुदीयमानायामैकान्तिकमात्यन्तिकञ्च सुखम्, तथाविधश्च परमः सन्तोषः, तथाऽऽत्यन्तिकसंसारोपशमात्मिका च शान्तिरुपजायते। येन सम्यक्चित्तशुद्ध्युत्तरक्षणे एव भगवान् परब्रह्मपरमेश्वरः स्वीयसमवाप्तिलक्षणं बिलक्षणं ज्ञानयोगं प्रयच्छति। तदनन्तरकालावच्छेदेन आत्मभावस्थः स एव परमात्मा भास्वता ज्ञानप्रदीपेनाऽज्ञानजं तमो नाशयति। इत्येवंरूपेण स एव भक्तवत्सलो दयालुर्भगवान् सम्यग्दर्शनलक्षणं ज्ञानयोगं प्रदाय भास्वता ज्ञानदीपेनाऽज्ञानध्वान्तविध्वंसनं विधत्ते।

प्रागुक्तलक्षणलक्षितेऽध्यात्मे मनः समाहितमन्तरा प्रागुक्ताया रिरंसाया न प्रागुक्ततादृशसुखजनकत्वम्, नापि आत्यन्तिकसंसारोपशमात्मिकायाः शान्तेर्जनकत्वम्। तदुक्तम्—

"सम्पत्तौ वा विपत्तौ वा दिवा वा नक्तमेव वा।
कामेषु हि सतृष्णस्य न शान्तिरुपपद्यते॥"
सौन्दरनन्दे, सर्गः ११—श्लो० ३७

अपि च— "कामना, प्रार्थना, दुःखा, प्राप्तौ तृप्तिर्न विद्यते।
वियोगान्नियतः शोको वियोगश्च ध्रुवो दिवि॥
एवम्— कृत्वापि दुष्करं-कर्म स्वर्गं लब्ध्वापि दुर्लभम्।
नृलोकं पुनरेवैति प्रवासात् स्वगृहं यथा॥ ३९॥
यथा भ्रष्टस्य कुशलं शिष्टं किञ्चिन्न विद्यते।
तिर्यक्षु पितृलोके वा नरके वोपपद्यते॥ ४०॥
तत्रैव पुनः— "हृदि कामाग्निना दीप्ते कायेन वहतो व्रतम्।
किमिदं ब्रह्मचर्यं ते मनसाऽब्रह्मचारिणः॥ ३०॥
संसारे वर्तमानेन यदा चाप्सरसस्त्वया।
प्राप्तास्त्यक्ताश्च शतशस्ताभ्यः किमिति ते स्पृहा॥ ३१॥
तृप्तिर्नास्तीन्धनैरग्ने र्नाम्भसा लवणाम्भसः।
नापि कामैरवतृप्तस्य तस्मात् कामा न तृप्तये॥ ३२॥

अतृप्तौ च कुतः शान्तिरशान्तौ च कुतः सुखम् ।
असुखे च कुतः प्रीतिरप्रीतौ च कुतो रतिः ॥ ३३ ॥

तत्रैव सौं० नं०—११ सर्गः,

अर्थात्—कामना प्रार्थना चास्ति सर्वथा दुःखमयी, यतः कामनां प्राप्तावपि तेभ्यस्तृप्तिर्नैव विद्यते । वियोगस्य च ध्रुवत्वात्तदा शोकोऽपि नियत एवास्ति । यतः शरीरपरित्यागानन्तरं वियोगश्च ध्रुव । अतएवाग्रे सिद्धान्तमेव प्रोक्तवान् अश्वघोषः—

"तस्मादध्यात्मे धीयतां मनः" ॥

एवम्—दुष्कर्म = दूषितं कर्म कृत्वापि तथा दुर्लभं स्वर्गं लब्ध्वापि पुनरपि जीवो नृलोकम् = मानवलोकम् = मृत्युलोकमित्यर्थः । एति = प्राप्नोति । यथा मानवः—

गृहान्तराद् देशान्तराद्व आगमनान्तरं प्रत्यावर्तनानन्तर स्वगृहमेव समागच्छति ॥३९॥

यथा आचार, विचारभ्रष्टो व्यक्ति विशेषः कश्चित् कुशलं शिष्टम् = शिष्टतापूर्णं किमपि वृत्तं न प्राप्नोति । शरीरपरित्यागानन्तरञ्च पुनः तिर्यग्योनौ, पितृलोके वा नरके वा तस्योपपत्तिर्वा = जन्म वा, जायते ॥ ४० ॥

अपि च कामाग्निना हृदि दीप्ते सति कायेन = शरीरेण, व्रतम् = व्रतोपवासादिकं, मनसाऽब्रह्मचारिणस्ते किमिदं ब्रह्मचर्यम् अर्थात्ते इदं कीदृशं ब्रह्मचर्यम् ॥ ३० ॥

तथा दुःखादीनां कार्यकारणभावभूतेऽनादौ संसारे वर्तमानेन त्वया यदा शतशश्चाप्सरसः प्राप्तास्त्यक्ताश्च ताभ्यस्ते इति = इयम्, स्पृहा = तृष्णा, शान्ता जाता ? उत्तरम्—नहि जाता, नापि शान्ता भविष्यति ॥ ३१ ॥

अन्यच्च यथा इन्धनैरग्नेस्तृप्तिर्नास्ति = न भवति कदापि । एवम् यथाऽम्भसा = जलैन, लवणाम्भसो = महोदधे = समुद्रस्येत्यर्थः, न तृप्तिर्भवति । अतः कामेषु नैव कदापि तृप्तिर्भवति तस्मात् कामा न तृप्तये भवन्ति अपि तु दुःखायैव भवन्तीत्यर्थः ॥ ३२ ॥

अपि च—अतृप्तौ सत्यां कुतः शान्तिः स्यात्, अशान्तौ च जायमानायां कुतः सुखं स्यात् न कुतोऽपीत्यर्थः असुखे च जायमाने कुतः प्रीतिः = प्रसन्नता स्यात् । अप्रीतौ च सत्यां कुतोः रतिः = रमणं स्यादिति भावः ।

अत एव प्रोक्तवान् महाकविः श्रीअश्वघोषः ।

'प्रशान्ता चानवद्या च नास्त्यध्यात्मसमा रतिः' ।

सौन्दरनन्दः, ११ सर्गः श्लो० ३४

तदर्थञ्च प्रागुक्ते प्राङ्निरूपितेऽध्यात्मे विषये 'श्रोतव्यो मन्तव्यो निदिध्यासितव्यः' इत्यादिना प्रतिपादिते एव केवलं स्वीयं मनः समाधीयताम् । यतः सैवाऽध्यात्मसमा रतिः, सा च प्रशान्ता = शान्तिपूर्णा, मोक्षस्वरूपपरमशान्तिदायिनी, अतएव सा चास्ति सर्वथाऽनवद्या = अशेषदोषराहित्यावच्छिन्नेति सर्वेऽपि वेदाः स्वस्वोपनिषद्द्वारा तदेव अध्यात्मं ज्ञानविज्ञानस्वरूपं प्रकाशैकस्वभावं निष्कलं निष्क्रियम् आनन्दस्वरूपं ब्रह्मैव प्रस्फोरयन्ति । 'सत्यं ज्ञानमनन्तं ब्रह्म' 'नित्यं विज्ञानमानन्दं ब्रह्म' 'अहं ब्रह्मास्मि' इत्याद्याः सर्वा एव श्रुतयस्तदेवाऽध्यात्मं ब्रह्म प्रतिपादयन्ति । अन्यच्चापि—

देहत्रयातिरिक्तोऽहं शुद्धचैतन्यमस्म्यहम् ।
ब्रह्माहमिति यस्यान्तः स जीवन्मुक्त उच्यते ॥

तेजोबिन्दूपनि० ३।१-२

গ্রন্থঃ ত্রিদিব
শ্রীসজনীকান্ত

तृतीयोऽध्यायः

महाकविभारविः

भवो विचार्यते

'भवो' पूर्वं भवस्य कारणीभूताया अविद्याया विचारो विधीयते विचार्यते किरातार्जुनीयमहाकाव्यस्य द्वाविंशति २२ श्लोकघटकीभूते "सम्भवन्ति मतयो भवच्छिदः" इत्यस्मिन् वाक्ये घटकीभूतस्य "भवः" इति पदस्य संसारापरपर्यायभूतजगद्रूपोऽर्थो विज्ञेयः। तस्य च जगदर्थकस्य भवस्याऽविद्याकार्यत्वेन तत्कारणीभूताया अविद्याया निरूपणं संक्षेपतः किञ्चिन्मात्रं विधीयते।

विद्याया अभावोऽविद्या ज्ञानाभाव इति तु पर्यवसितार्थः। तत्प्रतियोगिभूता प्रभूता ज्ञानरूपा चेयं विद्या सर्वथा चास्ति प्रकाशस्वरूपाऽविद्यान्धकारविध्वंसिनी।

सा च विद्या परापरभेदेन द्विविधा।

तथा चोक्तम्— "परापरभेदेन द्वे विद्ये समुदीरिते"।

बृहदारण्यकोप० भा० वा० ३।२।११७।

अपि च— "तपो विद्या च विप्रस्य निःश्रेयसकरं परम्।
तपसा कल्मषं हन्ति विद्ययाऽमृतमश्नुते"॥

तत्रैव—३।२।१७८।

इयमेवाऽऽत्मज्ञानापरपर्यायभूता विद्या सर्वथाऽमरत्वप्रापिका श्रीभारविमहाकवीनां "मतयः" इत्यस्यार्थो वर्णितः। अर्थात् विद्या, मतिः, ज्ञानञ्चेति सन्ति पर्यायभूताः।

तदभावरूपा चाऽविद्या जगत्कारणीभूता अज्ञानरूपा तत्त्वाऽग्रहणात्मिका विद्यया निवर्तमाना न सती, नाप्यसती, नापि चोभयात्मिका, नाप्यनुभयात्मिका मायापद जन्यबोधविषयतावती सती मायापदे- नाभिधीयते।

अस्या अविद्यायास्त्रिकालाबाध्यत्वरूपं सत्यत्वं, ध्वंसाप्रतियोगित्वविशिष्टप्रागभावाऽप्रतियोगित्वरूपञ्च नित्यत्वं, ब्रह्मस्वभावत्वञ्च नहि कदापि कथमपि वक्तुं शक्यते। प्रमाणादर्शनात् अपसिद्धान्तापाताच्च।

अपि च अविद्याया नित्यत्वे विद्यातोऽनिवर्त्यत्वापत्तेः। ब्रह्मणः स्वभावत्वे चाऽर्थान्तरत्वापत्तेः। अतो दोषबाहुल्यदर्शनादविद्यायाः न नित्यत्वम्, नापि च ब्रह्मणः स्वभावत्वमेव तस्याः कल्पयितुं शक्यते। अपि च—

"देहोऽहमिति या बुद्धिः सा चाऽविद्येति भण्यते।
देहोऽहमिति यज्ज्ञानं तदेव द्वैतमुच्यते"॥

तेजोबिन्दूप० ५।९२।

इयञ्च न्याय, वैशेषिकप्रभृतिदार्शनिकैरभिमता दार्शनिकी—दृष्टिर्द्वैतदृष्टिः = द्वैतबुद्धिरेवाऽविद्या = मिथ्याज्ञानशब्देनोच्यते। तथा भेददृष्टिरपि अज्ञानापरपर्यायभूतयाऽविद्ययोच्यमानाऽनुभूयते। उक्तञ्च—

"भेददृष्टिरविद्येयं तां सदा परिवर्जयेत्"।

महोपनि० ५।११३।

इत्थञ्च तात्त्विकदृष्ट्या विचार्यमाणे द्वैतव्याप्या भेददृष्टिः, भेदव्याप्या वा द्वैतदृष्टिरेव जगदर्थको भवः, स एव चाऽविद्याशब्देनोच्यते । एतन्मते मायाऽविद्ययोः समानार्थकत्वेनोभयोरेव मिथ्यात्वम् । केवलम् अद्वैतस्याऽभेदस्य वा परमार्थता स्वीक्रियते । उक्तञ्च—

मायामात्रमिदं द्वैतमद्वैतं परमार्थतः । श्रुतिः—

अपि च— "संसारबीजकणिका यैषाऽविद्या रघूद्वह ?
एषा ह्यविद्यमानेव सतीव स्फारतां गता" ॥ ३।११३।११।
मनोराज्यमिवाकारभासुरा सत्यवर्जिता ।
सहस्रशतशाखापि न किञ्चित् परमार्थतः ॥

तत्रैव—३।११३।३२।

अतश्चेयमेवाऽविद्या चास्ति जगत्कारणीभूता, चराचरात्मकस्य प्रपञ्चस्यास्य सत्यवद्भासकत्वेन चास्ति प्रभूतापि । इत्थञ्च मायापरपर्यायभूतयाऽविद्यया भवार्थकं जगदिदं सर्वथा कल्पितमस्ति न तु पारमार्थिकम् । तथा चोक्तवान् महाकविः श्रीभारविः किरातार्जुनीये महाकाव्ये—

बीतजन्मजरसं परं शुचिः-
ब्रह्मणः पदमुपैतुमिच्छताम् ।
आगमादिव तमोपहादितः-
सम्भवन्ति मतयो भवच्छिदः ॥

किरातार्जु० सर्ग० ५, श्लो० २२

अर्थात् वीते = सर्वथा विनिवृत्ते, जन्मजरसौ यस्य व्यक्तिविशेषस्य तद् वीतजन्मजरसम् । इदञ्च सर्वमेवाऽज्ञानापरपर्यायभूताऽविद्याविजृम्भितमेवास्तीति विज्ञेयम् ।

ब्रह्मणः = जगन्नियन्तुः सर्वशक्तिमतः परब्रह्मपरमेश्वरस्य परमात्मनस्तस्य सम्बन्धावच्छिन्नं सर्वथाऽविच्छिन्नं तत् परं = परमं, सर्वोत्कृष्टं निरतिशयं "यद् गत्वा न निवर्तन्ते" इत्यादिस्मृतिप्रतिपाद्यम्, पदम् = स्थानं तादात्म्यलक्षणम् मुक्त्यभिधानकम्, उपैतुम् = समवाप्तुम्, इच्छताम् = इच्छावताम् = तादृशपदविषयिणीच्छावताम् अर्थात् मोक्षविषयिणीच्छावताम्, मुमुक्षूणाम् । तमोपहात् = भ्रमान्धकारलक्षणलक्षितमज्ञानस्वरूपं तमोऽपहन्तीति तस्मात् अविद्यानिवर्तकात्, अर्थात् अविद्याया अज्ञानस्य पूर्णतया समूलोन्मूलनं कर्तुं क्षमात् । इतः = अस्मात्, गिरेर्हिमालयात् । भवच्छिदः = भवं = संसारं, छिन्दन्ति = विध्वंसयन्ति = सर्वथा समूलमुन्मूलनं प्रकुर्वन्तीति भवच्छिदः = संसारनिवर्तकाः मतयः = तत्त्वज्ञानानि = आत्मज्ञानानि । सम्भवन्ति = समुत्पद्यन्ते । क्षेत्रपदाभिधेयस्थानविशेषस्यापि ज्ञानोपायभूतसाधनत्वात् ।

यथा काशीक्षेत्रस्यापि मरणानन्तरं तत्त्वज्ञानजनकत्वं श्रूयते—"काश्यां मरणान्मुक्तिः" इत्यादिप्रमाणभूतेन प्रबलतमेन आप्तवचनेन । अतएवेदमपि काशीखण्डे आयाति श्रूयतेऽपि च यत् "मरणं मङ्गलं यत्र भस्मं यत्र लेपनम् । कौपीनं यत्र कौशेयं काशी केनोपमीयते ।। काशी खण्डे = अर्थात् यत्र = यस्मिन् क्षेत्रे, मरणमपि मङ्गलत्वेन भासमानं भवतीति मङ्गलमुच्यते इत्यस्ति काशीक्षेत्रस्य माहात्म्यं महत्त्वं, तत्त्वज्ञानजनकत्वञ्च ।

एवमेव पर्वतराजहिमालयनामकक्षेत्रविशेषादपि मतयस्तत्त्वज्ञानानि सम्भवन्ति। तत्रानुरूपं दृष्टान्तमाह—"आगमादिव" इति। अर्थात्—

"कुर्वन्नेवेह कर्माणि जिजीविषेच्छतं समाः।
एवन्त्वयि नान्यथेऽस्ति न कर्म लिप्यते नरे॥

ईशावास्योप० २—

"यावज्जीवमग्निहोत्रं जुहोति" अर्थाज्जीवनकालपर्यन्तं अग्निहोत्रनामकं हवनं कुर्यात् इति। अपि च—"सन्ध्यात्रयन्तु कर्तव्यं द्विजेनात्मविदा सदा" इति। इत्याद्यागमेभ्य निरभिमानफलाभिसन्धिरहितेन क्रियमाणानां कर्मणां प्रत्यवायपरिहारद्वाराऽन्तःकरणशुद्धिहेतुत्वेनाऽवश्यकर्तव्यत्वं निश्चीयते।

इत्थञ्च प्रागुक्तसत्कर्मानुष्ठानेन कुमार्गगामित्वाऽवरोधकत्वेन सन्मार्गगामित्वविषयकं सात्त्विकं व्यावहारिकं ज्ञानं जायते। तादृशसन्मार्गमालम्ब्य गच्छतामिह जनानां बहुकालानन्तरं नित्यनैमित्तिकैः कर्मभिः फलानिच्छया क्रियमाणैः कृतैश्चाऽन्तःकरणस्थिते रागद्वेषादिरूपे मले दग्धतां गते सति प्रतिबन्धकनिरासात् "बहूनां जन्मनामन्ते इत्यादिभगवदुक्तदिशा मुमुक्षूणां भवच्छिदो मतयस्तत्त्वज्ञानानि मोक्षकारणीभूतानि सम्भवन्तीति शास्त्रादेशः। "आगमादिव" इत्यनेनापि दृष्टान्तोल्लेखेनप्रागुक्तदिशैव मतीनां तत्त्वज्ञानानां भवच्छेदकत्वं बोध्यम्।

कविकृतहिमालयवर्णनावसरे यक्षकृतहिमालयवर्णनावसरे वा हिमालयस्य शोभां पश्यतः कौन्तेयस्याऽर्जुनस्य चास्तीयं सदुक्तिर्यदत्र हिमालयस्य शोभादर्शनेन मदीयाऽपि बुद्धिः सन्मार्गं=ज्ञानमार्गं प्रति याति यास्यति चेत्यत्र नास्ति लेशतोऽपि सन्देहानध्यवसायावसरः।

तथा चेयमेव ज्ञानप्रधाना दार्शनिकी दृष्टिः ब्रह्माद्वैतसिद्धान्तावलम्बिना श्रीभारविमहाकविना स्वीये महाकाव्ये किरातार्जुनीये सुस्पष्टीकृता।

तत्र "सम्भवन्ति मतयो भवच्छिदः "इत्यनेन "वीतजन्मे' त्यादिश्लोकघटकीभूतेन चतुर्थांशेन पद्यात्मकेन वाक्येन ज्ञानस्यैव भवच्छेदनद्वारा मोक्षसाधनत्वं दर्शितम्। अर्थात् ज्ञानप्लवेनैव भवसागरसन्तरणद्वारा मोक्षमवाप्नोति मुमुक्षुः पुरुषः। नान्यः पन्था विद्यतेऽयनाय भवसागरसन्तरणायेत्यर्थः।

विशेषतो "भव" विचारः

भवो, जगत्, संसारश्चेति त्रय एव सन्ति समानार्थकाः, मायाया अपरपर्यायभूता सर्वेऽपि भावभूताः पदार्थाः सन्ति कल्पितत्वेनाऽभ्युपगम्यमानाः। भवस्यापि तथात्वमेव विज्ञेयम्। यावदस्ति अविद्याऽज्ञानं तावत् सन्ति भवो जगत् संसारश्चेति भवस्य भानमपि अविद्यापरपर्यायभूतेनाऽज्ञानेनैव जायते इत्यतोऽविद्याया अज्ञानस्य चाऽनादित्वेन भवस्याप्यनादित्वं कल्प्यते।

श्रीशङ्कराचार्यमते भवस्य (जगतः) आविद्यकत्वेनाऽनादित्वमङ्गीकृतमस्तीति तत्र प्रमाणापेक्षायां सत्यां ब्रह्मसूत्रस्य २।१।१४। भाष्यं विलोक्यतामितिनात्र वैशद्यं विधी-

यते लेखविस्तरभयात् । मया 'रजोला' इत्युपाव्हेन राजेन्द्रप्रतापेन यदपि संलिख्यते तत्सर्वं ब्रह्माऽद्वैतसिद्धान्तमङ्गीकर्तृश्रीशङ्कराचार्यदर्शितदिशैवेति विज्ञेयम् ।

संसारापरपर्यायभूतस्य भवस्योत्पत्तिस्थितिप्रलयाश्चापि नित्यशुद्धमुक्तस्वभावात् सगुणब्रह्मणो भगवतो जगन्नियन्तुः सर्वशक्तिमतः परमेश्वरादेव जायन्ते । "एतस्मादात्मन आकाशः सम्भूतः" इत्यादि श्रुतिरूपस्य वाक्यस्यैव तत्र प्रमाणत्वात् ।

श्रीशङ्कराचार्यपादा अविद्यां, अविद्याव्याप्य, तत्कार्यस्वरूपमेव दृश्यपदार्थभूतं प्रभूतं प्रपञ्चं सर्वथाऽङ्गीकुर्वन्ति ! तादृशस्य च प्रपञ्चस्य पारमार्थिकसत्ताया अनभ्युपगमेऽपि व्यावहारिकसत्ताया अभ्युपगमस्य निष्प्रत्यूहत्वात् नास्तित्वं तदीयं भज्यमानं भवतीति भावः ।

अविद्याप्रतियोगिभूताया विद्यायाः समुदये जायमानेऽविद्यायां शान्तायां समस्तोऽपि द्वैतभेदात्मको भवः सर्वथा शान्तिमधिगच्छति, तत्रैव प्रविलीयते ।

अलातचक्रवत् द्वैतभेदात्मकः सर्वोऽपि जगदात्मको भवः सदसद्भिन्नत्वेन मिथ्याभूतोऽनिर्वचनीयश्चास्तीति वेदान्तिनः समुद्गिरन्ति ! परमार्थज्ञानभूतायां प्रभूतायां विद्यायां समुदीयमानायां जगन्निवर्तते । तथाचोक्तम्—

"सर्पादौ रज्जुसत्तव ब्रह्मसत्तैव केवलम् ।
प्रपञ्चाधाररूपेण वर्वतेऽतो जगन्नहि ॥

आत्मप्रबोधोप०—१२

तस्यास्तित्वं तदानीं विलुप्तं भवतीत्युक्तं प्राक् । अतएव भवार्थकं जगदिदमविद्याजन्यत्वेनाऽऽविद्यकमुच्यते, अविद्याकार्यं तदिति भावः ।

प्रतियोगिभूताया विद्यायाः = ज्ञानस्य = आत्मज्ञानस्य जगदर्थकभवनिवर्तकत्व मस्तीत्यत्र शास्त्रस्यैव प्रामाण्यमभ्युपेयम् । तथाहि—

यथा रज्जुं परित्यज्य सर्पं गृण्हाति वै भ्रमात् ।
तद्वत् सत्यमविज्ञाय जगत् पश्यति मूढधीः ॥
रज्जुखण्डे परिज्ञाते सर्परूपं न तिष्ठति ।
अधिष्ठाने तथा ज्ञाते प्रपञ्चे शून्यतां गते ॥

नादबिन्दूपनि० ४०।२६–२७

विद्या ज्ञानयोः समानार्थकत्वमनुभवसिद्धम्, ज्ञानञ्च ब्रह्मैव, "सत्यं ज्ञानमनन्तं ब्रह्म" इति श्रुतेः प्रामाण्यात् ब्रह्मणो ज्ञानरूपत्वं स्पष्टमेव । अपि च—

"तेषामेवानुकम्पार्थमहमज्ञानजं तमः ।
नाशयाम्यात्मभावस्थो ज्ञानदीपेन भास्वता ॥

श्रीमद्भगवद्गीता

अर्थात् ज्ञानपरिपाकसाधनभूतैः "मच्चित्ता मद्गतप्राणाः" इत्याद्युक्तैः, ये मां 'भव' मुक्त्यै भजन्ति तेषां मद्भजनपरायणानां नारायणस्वरूपाणामनुकम्पार्थमेवाऽहं सच्चिदानन्दो भगवानात्मभावस्थो बुद्धिवृत्तिविशेषेण आत्मस्वरूपप्रकाशकेन ज्ञानदीपेन

भास्वता अर्थात् नित्यनिरन्तरसमाधिनिष्ठोत्पन्नाऽप्रतिबद्धभावेन निरङ्कुशप्रकाशवता ज्ञानप्रदीपेनाऽज्ञानजमावरणात्मकं तमो नाशयामि । यथा घट-पटाद्यावरकमन्धकार-मुदयाचलारूढ़ो भगवान्भास्करः स्वप्रकाशेन विनाशयति तथैव मां सच्चिदानन्दस्वरूपं परमात्मानमेवसर्वथाऽविच्छिन्नरूपेण चिन्तयतां मुमुक्षूणां धीवृत्तिरूपपीठस्थानारूढ़ो भूत्वाऽहमपि स्वीयेन प्रकाशात्मकेनाऽन्तःकरणवृत्तिविशेषस्वरूपेण ज्ञानप्रदीपेन मत् स्वरूपावरकन्तदीयमज्ञानान्धकारं पूर्णतया विनाशयामीति भावः ।

इममेवाऽभिप्रायं मनसि निधायोक्तवान् महाकविः श्रीभारविः "सम्भवन्ति मतयो भवच्छिदः" इति । अर्थादात्मज्ञानेन भास्वता ज्ञानप्रदीपलक्षणलक्षितेनैव भवस्य जगदन्धकारस्य छेदनं = विनाशो जायते नान्यथा ।

अत एवास्य भवस्य = जगतो व्यावहारिकं सत्त्वम् = अस्तित्वम् अङ्गीक्रियते वेदान्तिभिः । इत्थञ्चाऽपारमार्थिकस्य व्यावहारिकसत्तावतो भवस्य समुत्पत्तिक्रमः पर-ब्रह्मपरमेश्वरादेव सम्पन्नो भवति । तथाचोक्तवान् श्रीशङ्कराचार्यः—

"कार्यमाकाशादिकं बहुप्रपञ्चं जगत् कारणं परं ब्रह्म, तस्मात् कारणात् परमार्थ-तोऽनयत्वं व्यतिरेकेणाऽभावः कार्यस्याऽवगम्यते इति ।"

एवञ्च "एतस्मादेवाऽऽत्मन आकाशः सम्भूतः, आकाशाद्वायुः, वायोरग्निः" इत्यादिश्रुतिरूपवाक्यतो नित्यशुद्धबुद्धमुक्तस्वभावात् तस्मात् सर्वविषयकज्ञानवतो भगवतः परमेश्वरात् 'भवस्य' जगदात्मकप्रपञ्चस्योत्पत्तिस्थितिप्रलया जायन्ते ।

ज्ञान यज्ञ विचारः

अस्मिन् महाकविश्रीभारवि विरचिते महाकाव्ये किरातार्जुनीये घटकीभूतं यदस्ति 'सम्भवन्ति मतयो भवच्छिदः' इति वाक्यं, तत्र साक्षात् घटकीभूतं यत् 'मतिः' इति पदं, तादृशमतेरपरपर्यायभूतस्याऽऽत्मज्ञानस्याऽप्यत्र निरूपणीयत्वेनाऽतो ज्ञानयज्ञ त्वेन तन्निरूप्यते । तथाहि—

'ज्ञानयज्ञोड्डयेनैव ब्राह्मणो वाऽन्त्यजोऽपि वा ।
संसारसागरं तीर्त्वा मुक्तिपारं हि गच्छति ॥ सू० सं०

अपि च सच्चिदानन्दोऽपि भगवान् आनन्दकन्दः श्रीकृष्णचन्द्रः स्वयं ज्ञानस्य महत्त्वं विशेषरूपेण निम्नोल्लिखितं दर्शितवान् । यथा—

'इदं ज्ञानमुपाश्रित्य मम साधर्म्यमागताः ।
सर्गेऽपि नोपजायन्ते प्रलये न व्यथन्ति च ॥

श्रीमद्भगवद्गीता, अ० १४, २

अयमाशयः—नित्यनिरन्तरब्रह्मनिष्ठया गुणत्रयातिक्रमणं विधाय मुमुक्षुर्यतिर्योगी वा 'सत्यं ज्ञानमनन्तं ब्रह्म' 'नित्यं विज्ञानमानन्दं ब्रह्म' इत्यादिश्रुतिभिर्ज्ञानस्य सत्यरूप-ता, ब्रह्मरूपता, अविनाशित्वञ्च प्रतिपाद्यते । एवं तस्य ज्ञानस्याऽऽनन्दरूपता, नित्यतापि च प्रतिपादिता भवति ।

एवम् 'अस्थूलमनणु अह्रस्वमदीर्घम्' इत्यादिश्रुत्वा प्रसिद्धि गतस्य तस्याऽसंगस्य निर्गुणस्य निष्कलस्य निर्विशेषस्य मम परस्य ब्रह्मणः सर्वाधिष्ठानभूतस्य साधर्म्यं पूर्णत्व-रूपमवगम्यते । यथा ऽन्यत्राप्युक्तम्—

'पूर्णमदः पूर्णमिदं पूर्णात् पूर्णं मुदच्यते ।
पूर्णस्य पूर्णमादाय पूर्णमेवावशिष्यते ।। यत्र तत्र सर्वत्र

तत्र च पूर्णत्वं नास्ति ब्रह्मणो धर्मस्तस्य सर्वथा निर्धर्मकत्वात्, अतो ह्यत्र पूर्णत्वम् अपूर्णत्वाभावरूपम् । अभावस्य वेदान्तमतेऽधिकरणरूपत्वमङ्गीक्रियते । तथा च ब्रह्मणः सर्वाधिष्ठानभूतत्वेन ब्रह्मस्वरूपमेव पूर्णत्वमस्तीत्यत्र नास्ति वेदान्तनये लेशतोऽपि विवादः ।

अत एव ब्रह्मणो निर्धर्मकत्वादेव समानजातिरूपादिमत्त्वमपि साधर्म्यं नैव वक्तुं शक्यते । यतोऽसङ्गस्य, निर्विशेषस्य, निरवयवस्य, निर्गुणस्य तस्य ब्रह्मणो जात्यादिधर्माणां संभवो नैव भवितुमर्हति । अपि च—

'अजातमभूतमप्रतिष्ठितम शब्दमस्पर्शमरूपमरसमगन्धमव्ययम्' ।

गीतायाः शङ्करान्दी अ० १४, २

इत्यनया श्रुत्वा तद् ब्रह्म अजातम्, अभूतम्, अप्रतिष्ठितम्, अशब्दम्, अस्पर्शम्, अरूपम्, अगन्धम्, व्ययरहितञ्च प्रतिपादितं भवति । एवम्—

'अप्राणममुखमश्रोत्रमवागमनोऽतेजस्कमचुष्कमगौत्रमशिरस्कमपाणिपादम्'—तत्रैव

इत्यनेन च श्रुतिवाक्येन ब्रह्मणि अप्राणत्वम्, अमुखत्वम्, अश्रोत्रत्वम्, वाग्रहितत्वम्, अमनस्त्वम्, अतेजस्कत्वम्, अचक्षुष्कत्वम्, अगोत्रत्वम्, अशिरस्कत्वम्, पाणिरहितम्, पादरहितत्वञ्चेत्येवंरूपेण सर्वधर्मनिषेध प्रतिपादनात् सर्वथा तस्य ब्रह्मणो निर्धर्मकत्वं सिद्ध्यति ।

सधर्मकत्वे च तस्य ब्रह्मणः सावयवत्व, विनाशित्व, ससङ्गत्व, साकारत्व, सविशेषत्व प्रभृतीनां धर्माणामापत्तिः स्यात् । इष्टापत्तौ च अपसिद्धान्तापत्तिः, अद्वैतव्याघातश्च स्यात् । तथा—

'आकाशवत् सर्वगतश्च नित्यः' । तत्रैव

एवम्—'साक्षी चेताः केवलो निर्गुणश्च' । तत्रैव

इत्यादिश्रुतिभिर्विरोधापत्तेर्दर्शनाच्च ब्रह्मणः सधर्मकत्वं नाङ्गीकर्तुं शक्यतेऽतः साधर्म्यं पूर्णत्वमेव न तु समानजातिरूपादिमत्त्वम् इति ध्येयम् ।

इत्थञ्च 'मम साधर्म्यम्' इत्यस्य मुमुक्षवो वा योगिनो वा, मुनयो, महामुनयो वा, ब्रह्मवेत्तारो यतयो वा सर्गेऽपि प्रकृतिकृतसृष्टावपि नोपजायन्ते नहि समुत्पद्यन्ते = नहि प्रागभावप्रतियोगिनस्ते भवन्ति, चित्स्वरूपत्वात्तेषाम् । प्रलये = महाप्रलयेऽपि न व्यथन्ति = नहि विनाशं गच्छन्ति = नहि ध्वंसप्रतियोगितां प्रयान्तीत्यर्थः ।

अयञ्च ब्रह्मस्वरूप आत्माऽज्ञानतत्कार्यभूताऽहङ्कारादिसकलप्रपञ्चसाक्षी आनन्दकन्दः सच्चिदानन्दस्वरूपश्चेति विज्ञेयम् । तथा चोक्तम्—

'एको देवः सर्वभूतेषु गूढः
सर्वव्यापी सर्वभूतान्तरात्मा ।
कर्माऽध्यक्षः सर्वभूताधिवासः
साक्षी चेता केवलो निगुर्णश्च ।।

अद्वैतमार्त्तण्डः, पृ० ३

अत्र प्रत्येकपदस्य सार्थक्यमाह—ब्रह्मशङ्करविष्णवानो भेदं निरसितुमाह—'एक' इति। भेदस्यौपाधिकत्वात्। 'भेददृष्टिरविद्येयं तां सदा परिवर्जयेत्'।

महोपनि० ५।११३

मायामात्रमिदं द्वैतमद्वैतं परमार्थतः ॥ श्रुतिः

'ब्रह्ममात्रमिदं सर्वं ब्रह्मणोऽन्यन्न किञ्चन' तेजोविं० उ० ६।३२

जाड्यं परिहर्तुमाह—देव इति, प्रकाशस्वरूपः ज्ञानस्वरूप इत्यर्थः। आदित्यादिवैषम्यमाह—सर्वभूतेषु गूढः। तर्हि कथन्न भासमानो भवति तत्राह 'गूढः'। मायया समावृतः। तथा चोक्तम्—

'एकः सन् भिद्यते भ्रान्त्या मायया न स्वरूपतः' अन्नोपनि० ५।७।

तत्तद्भूतपदार्थावच्छिन्नत्वेऽपि नास्ति परिच्छिन्नत्वं इत्यत्राह—सर्वव्यापीति। सर्वेषां भूतानामन्तः सन्तिष्ठमानत्वेऽपि नास्ति तत्तत्क्रियाकर्तृत्वमित्याशयेनब्रूते—'कर्माध्यक्ष' इति। सर्वेषामेव कर्मणामध्यक्षः = साक्षिभूत इत्यर्थः। सर्वभूताधिवासः = सर्वेषामेव भूतानामस्ति ब्रह्मरूप आत्माऽधिवासरूपः = अधिष्ठानभूतः, न तु ततोऽतिरिक्तः कश्चिदस्ति अधिष्ठानविशेष इत्यर्थः। न केवलं कर्मणामेवास्ति अध्यक्षोऽपि तु कर्मकर्त्रीणामप्यस्ति अध्यक्षः, अत एव साक्षित्व विशेषणदानमपि साधु सङ्गच्छते। तत्रापि हेतुमाह—'चेत' इति। चेतन इत्यर्थः। केवलः = अद्वितीयः = द्वितीयरहित इत्यर्थः। उक्तञ्च—

उपादानं प्रपञ्चस्य ब्रह्मणोऽन्यन्न विद्यते।
तस्मात् सर्वप्रपञ्चोऽयं ब्रह्मैवास्ति नचेतरत् ॥

योगशिखोप० ४।३।

निर्गुणः गुणादिरहितः = ज्ञानेच्छागुणादिरहितः, स्वयं ज्ञानरूपोह्यात्मा ब्रह्मरूपोऽव्ययः सर्वधर्मनिषेधानुयोगी सिद्ध्यतीत्यर्थः।

"अभेददर्शनं ज्ञानम्"—स्कन्दोपनि०—११
"ज्ञानं चैकात्म्यदर्शनम्"—श्रीमद्भा० ११।१९।२७।
एवम् "सत्यं ज्ञानमनन्तं ब्रह्म"–तैत्तिरीयोपनि० २।१।
"नित्यं विज्ञानमानन्दं ब्रह्म—छान्दोग्योपनि०

इत्यादिश्रुतौ प्रसिद्धिंगतस्य तस्य निरवयवस्य निर्गुणस्य निर्विशेषस्य मम = परस्य ब्रह्मणः, साधर्म्यम् = पूर्णत्वं ब्रह्मभावं प्राप्तवन्तस्ते यतयो योगिनो वा पुनर्नोपजायन्तेऽमृतत्वं भजन्ते "न स पुनरावर्तते" इत्यादिश्रुतिभिस्तस्य ब्रह्मभावमापन्नस्य पुनरागमननिषेधश्रवणात् इति तु परमार्थः।" तथाचोक्तम्—

इदं ज्ञानमुपाश्रित्य मम साधर्म्यमागताः"। गीताया २—अ० १४, १

इति भगवदुक्तिवाक्यघटकीभूतं यत् "साधर्म्यम्" इति पदं वर्तते, तस्य यथाश्रुते "समानो धर्मो येषान्ते सधर्माणस्तेषां भावः साधर्म्यम्, समानो धर्म इति फलितार्थः"। न तु समानजातिरूपादिमत्त्वम् अर्थात् समानजातिधर्मवत्त्वरूपोऽर्थः प्रकृते नैव गृहीतुं शक्यते, यतस्तस्य निर्धर्मकस्य चिन्मयस्याऽद्वितीयस्य निरवयवस्य निर्गुणस्य निर्विशेषस्य ब्रह्मणो जात्यादिधर्मवत्त्वाभावात्।

उक्तञ्च— "अजातमभूतमप्रतिष्ठितमशब्दमस्पर्शमरूपमरसमगन्धमव्ययम्" ।
गीता—शङ्करान्दीटीका, अ० १४ श्लो० २—

एवम्— "अप्राणममुखमगोत्रमवागमनोऽतेजस्कमचुष्कमगोत्रमशिरस्कमपाणि-पादम्" । तत्रैव—

इति श्रुतिवाक्येन तस्मिन्निर्धर्मके प्रागुक्तलक्षणलक्षिते निर्विशेषे ब्रह्मणि सर्वधर्म-जात्यादिनिषेधश्रवणेन पूर्णत्वरूप एव साधर्म्यपदार्थः प्रकृते विज्ञेयः ।

अन्यथाऽनित्यत्व, सावयवत्व, परिच्छिन्नत्वादिदोषाणां तत्राऽऽपादनं प्रसज्येत । एवम्—

"अयमात्मा सन्मात्रो नित्यः शुद्धो बुद्धो सत्यामुक्तो निरञ्जनो विभुरद्वयानन्दः परः प्रत्यगेकरसः" नृसिंहोत्तरपतापनीयोपः—९

एवम्— "आकाशवत् सर्वगतश्च नित्यः" ।—गीता, शङ्करानन्दी

तथा— "साक्षी चेता केवलो निर्गुणश्च" ।—गीता, शङ्करानन्दीटीका

इत्यादिश्रुतिवाक्यविरोधापत्तेर्दर्शनान्न हि मन्निष्ठं साधर्म्यं समानजातिधर्म-वत्त्वादिरूपं वक्तुं शक्यतेऽतो ब्रह्मनिष्ठं साधर्म्यं पूर्णत्वरूपमेव विज्ञेयम् । तथा च श्रुतिः

"आत्मा ब्रह्मैव भवति सद्रूपत्वाच्चिद्रूत्वादानन्दरूप-
त्वादविक्रियत्वादसंगतत्वात् परिपूर्णत्वाच्च" श्रुतिः—

इत्यनयापि श्रुत्वा ब्रह्मणः परिपूर्णत्वप्रतिपादनेन तदेव पूर्णत्वरूपं ब्रह्मनिष्ठं साधर्म्यं सर्वथाऽक्षुण्णत्वेन निर्धार्यते । अर्थात् मन्निष्ठं पूर्णत्वं प्राप्ता यतयो योगिनो मुमुक्षवो ब्रह्मवेत्तारो महदादिप्रकृतिविनिर्मिते सर्गेऽपि ते नोपजायन्ते इति तु निष्कर्षो वेदितव्यः ।

एवं प्रलये = महाप्रलये = हिरण्यगर्भविनाशेऽपि ते ब्रह्मत्वं प्राप्ता यतयो मुनयो वा न व्यथन्ति वा = नहि नश्यन्तीत्यर्थः । अर्थात् परमसूक्ष्मब्रह्मभावं प्राप्तानां तेषां यतीनां योगिनां वा प्रचलकालीनायाः क्रियाया अविषयत्वान्न तत्र किमपि चलनं भवतीत्यर्थः ।

इत्यभिप्रायमेव मनसि निधाय महाकविः श्रीभारविः "वीतजन्मजरसम्" इत्यादि किरातार्जुनीयोक्तश्लोकघटकीभूतं मत् "सम्भवन्ति मतयो भवच्छिदः" इति वाक्यं वर्तते, तद्घटकीभूतस्य बहुवचनान्तस्य "मतयः" इति पदस्य मल्लिनाथेन विदुषा टीकायां "मतयस्तत्त्वज्ञानि" इत्येवंरूपेणोल्लेखो व्यधायि । तत्र टीकाघटकीभूतस्य तत्त्व-ज्ञानस्येदमेवास्ति स्वरूपम् इति तु परामार्थः । अपि च भारवे : किरातार्जुनीयनामके स्वीये महाकाव्ये घटकीभूतस्य "द्विषां विधाताय विधातुमिच्छतो—

रहस्यनुज्ञामधिगम्य भूभृतः ।
स सौष्ठवौदार्यविशेषशालिनीं-
विनिश्चितार्थामिति वाचमाददे ॥

किरातार्जुनी० सर्गः १, श्लो० ३ ।

इति श्लोकस्य घटकीभूतेन "विधाताये"ति पदेन मल्लिनाथ दिशा विहन्तुमित्यर्थकेन दार्शनिकी दृष्ट्यवच्छिन्नत्वसम्पादनेन महाकाव्येऽस्मिन् पूर्णतया दार्शनिकीं दृष्टिं दर्शित-वान् श्रीभारविः ।

"द्विषां विधाताय विधातुमिच्छतो—
रहस्यनुज्ञामधिगम्य भूभृतः।

इत्यादिश्लोके ब्रह्मचारिस्वरूपे स्वस्थितिं लभमानो वनेचरः किरातो युधिष्ठिरस्य पार्श्वे गत्वा तं प्रति ब्रूते—"स वर्णिलिङ्गी विदितः समाययौ युधिष्ठिरस्य पार्श्वे वनेचरस्य किरातस्याऽऽगमनं सूचितम्। ततश्च "विनिश्चितार्थामिति वाचमाददे" इत्यनेन महत्त्वपूर्णां प्रमाणविनिर्णीतां वाचमुवाच वनेचर इति च दर्शितम्।

तामेव वाणीं श्लोकात्मकेन पद्येन प्रागुक्तेन सुस्पष्टीकृतवान् श्रीभारविः। तत्र च "विधाताय" इत्यत्र घटकीभूतस्य विघातस्य विशेषेण = निःशेषेण, घातः = ध्वंसः = विनानाश उत्पत्तिमदभाव इत्यर्थो बोध्यः। "वि" इत्युपसर्गसमभिव्याहृतघातपदस्य विलक्षणविनाशार्थकत्व बोध्यम्।

दिनकरीकृतस्तु घातपदस्यैवोत्पत्तिमदभावलक्षणलक्षितध्वंसबोधनात् 'वि' पदं सर्वथा व्यर्थमेवेत्याशङ्क्य "विशिष्टवाचकानां पदानां सति पृथग् विशेषणवाचकपदसमवधाने विशेष्यमात्रपरत्वम्" इति नियमानुरोधेन घातपदस्याऽभावमात्रपरत्वं विज्ञेयम्, 'वि' पदस्य च जन्यत्वमात्रमर्थः, एवं स्थिते उभयोर्मिलितयोरेव जन्याभाव = उत्पत्तिमदभाव, रूपोऽर्थो लभ्यते इति न कश्चिद् दोषः। इत्थञ्च द्विषां = शत्रूणां, विधाताय = विनाशाय, इत्यर्थो लभ्यते।

यदि च "विशिष्टवाचकानाम्" इत्यादिनियमस्वीकारे मानाभाव इत्युच्यते, तन्न साम्प्रतम्। "स[1] कीचकैर्मारुतपूर्णरन्ध्रैः" इत्यभियुक्तोक्तेरेव तत्र प्रणाणत्वात्। यतः कविकालिदासे ये पद्ये घटकीभूतस्य कीचकपदस्य 'वेणवः कीचकास्तेस्युर्येस्वनन्त्यनिलोद्धताः" इति कोषान्मारुतपूर्णरन्ध्रत्व, ध्वनिमत्त्वोभयविशिष्टे वेणावेव प्रयोगदर्शनेन कीचकपदेनैव तादृशार्थलाभसंभवनेन "मारूतपूर्णरन्ध्रैः" इत्यस्य पृथगुपात्तविशेषणस्य वैयर्थ्यं स्यात्, अतः "विशिष्टवाचकानां पदानाम्" इत्यादिनियमोऽवश्यमेवाऽङ्गीकार्यः। इत्थञ्च कालिदासीयपद्यघटकीभूतस्य 'कीचक' पदस्य विशेष्यीभूतवेणुमात्रपरत्वेन "मारुतपूर्णरन्ध्रैः" इति विशेषणस्य न वैयर्थ्यम्। तथैव प्रकृतेऽपि "द्विषां विधाताय" इति वाक्यघटकीभूतस्य "घात" पदस्याऽभावमात्रपरत्वं विज्ञेयम्। 'वि' पदञ्च जन्यार्थंकोत्पत्तिमदर्थपरम्।

तथा च उपसर्गस्य द्योतकत्वपक्षे विपदस्य वैयर्थ्यमिष्टमेव। वाचकत्वपक्षाश्रयणेन घातपदस्य जन्याभावरूपध्वंसार्थवाचकत्वाभावेन "विशिष्टवाचकपदानाम" इत्यादिनियमस्याऽप्रसक्तेर्न कोऽपि दोषः।

एवमन्यत्रापि 'दार्शनिकी दृष्टिः' समुद्भावनीया। यथा—'"मतिभेदतमस्तिरोहिते" इत्यादिश्लोकघटकीभूतस्य "मतिभेदतमः" इत्यस्याऽविद्यार्थकत्वेनाऽविद्यायाश्च दार्शनिकदृष्टिस्वरूपत्वात्।

---

१. रघुवंशे, सर्गः २, श्लो० १२।
२. रघु० स० २, श्लो० ३३।

एवं "शमयन्धृतेन्द्रियशमैकसुखः" इत्यादिश्लोकघटकीभूतस्य "अधमयं तमः" इत्यस्यापि तथात्वेन दार्शनिकी दृष्टिः स्वयमूहनीया।

तथैव "मायास्विदेषा मतिविभ्रमो वा" इत्यत्रापि घटकीभूतानां माया, मतिविभ्रमादिपदार्थानां विषयेऽपि तथात्वमेवोहनीयम्। एवम् स्तुतिस्थलेषु सर्वत्रैव पूर्ववदेव अहः कार्यः। यथा—

'विपदेति तावदवसादकारी न च कामसंपदभिकामयते।
न नमन्ति चैकपुरुषं पुरुषास्तव भावदीशः न नतिः क्रियते'॥

तत्रैव, १८सर्गः, श्लो० २३

इत्यत्र घटकीभूतस्य 'नमन' पदार्थस्य 'प्रणाम' पदार्थापरपर्यायभूतस्य, 'नमः' पदार्थापरपर्यायभूतस्य च 'गुणावत्तया ख्यापन' स्वरूपत्वेन, 'उत्कर्षवत्तया ज्ञानानुकूल स्वरूपत्वेन' वा स्तुतिरूपता सिद्ध्यति। इत्थञ्च स्तुतिस्वरूपनमनपदार्थस्यापि दार्शनिकदृष्ट्यन्तर्गतत्वेन तद्विषयिणी दार्शनिकी दृष्टिः स्वयमूहनीया।

महाकवेः श्री भारवेः किरातार्जुनीयेऽन्यां दार्शनिकी दृष्टिः

ब्रह्माऽद्वैतसिद्धान्तवादिनश्चास्य महाकवेः श्री भारवेः स्वीयं मतं सिद्धान्तं वा निम्नोल्लिखितरूपेण सुस्पष्टयति 'रजोला' इत्युपाव्हो राजेन्द्रः। तथाहि—"वासुदेव ? जरा कष्टं कष्टं निर्धनजोवनम्। इत्याद्यभियुक्तोक्त्यनुसारतो जरावस्थायाअपिसर्वथा दुःखदातृत्वेन प्रसिद्धिं गतत्वाद् दुःखरूपत्वाद्वा हेयत्वमस्तीति निर्विवादमेतत्। 'सर्वं दुःखं विवेकिनः' इत्यस्यापि तत्र प्रबलप्रमाणत्वमभ्युपेयम्। अत एव "दुःखत्रयाभिघाताज्जिज्ञासा तदपघातके हेतौ" इत्यादिना ईश्वरकृष्णोऽपि सर्वस्यापि दुःखस्य जिज्ञासाविषयत्वं वर्णितवान्। एवं "पुनरपि जननं पुनरपि मरणं पुनरपि जननी जठरेशयनम्" इतिश्रीशङ्कराचार्योक्तदिशाऽपिजनन, मरण, जननीजठरेशयनादीनाञ्च महादुःखानामपि तथाविधत्वेन हेयतावच्छेदकुक्षिनिक्षिप्तत्वमेवाऽभ्युपेयम्। एतच्च सर्वमविद्यापर्यायभूताऽज्ञानविजृम्भितमेवेत्यत्र नास्ति लेशतोऽपि विवादावसर इति।

सा चाऽविद्या ब्रह्मणः शक्तिर्माया प्रकृत्यादिशब्दव्यपदेश्या, अनादिभूता सती-अनिर्वचनोया। न भावरूपा, नाप्यभावरूपा, नाप्युभयात्मिका, नचाऽप्यनुभयात्मिका, इत्यतः कथमप्यस्या निर्वचनं नैव भवितुमर्हति। न भावत्वेन = सत्त्वेन, नाप्यभावत्वेन, नाप्युभयात्मकत्वेन, नचाऽप्यनुभयात्मकत्वेन, निर्वक्तुंशक्यतेऽतोऽनिर्वचनीया सा निगद्यते।

ब्रह्मणो भिन्नत्वाऽभिन्नत्वाभ्यां निरूपयितुमशक्या सा माया सत्त्वरजस्तमोगुणात्मकत्वेन त्रिगुणात्मिकाऽभ्युपेया। इयमेव जगन्मूलभूता प्रभूताऽपि कथ्यते। एतावांस्तु विशेषो यद् विशुद्धसत्त्वप्रधाना चास्तीयं माया, मालिनसत्त्वप्रधाना चाऽविद्या। परन्तु अयञ्च मायाऽविद्ययोर्विशेषात्मको भेदो नास्ति एतस्मिन्नये पारमर्थिको भेदः।

इयमेवाऽविद्या जोवेश्वरयोर्भेदं समुत्पादयति। जीवे संसारित्वम् अल्पज्ञत्वञ्च

---

१. तत्रैव सर्गः षष्ठः, श्लो० २०।

जनयति । एवमावरण, विक्षेप शक्ति सहकृताऽविद्यावशादेवाऽद्वितीयं, बोधस्वरूपं मुक्तं नित्यमानं जनाः सर्वथाऽमुक्तं बद्धमबद्धमनित्यञ्चाऽनुमन्यन्ते । तथा चोक्तम्—

"अविद्यास्तमयो मोक्षः सा संसार उदाहृता"

ब्रह्मसि० का० १०६—

अपि च— "परमेश्वराश्रया मायामयी महासुषुप्तिः, यस्यां स्वरूपप्रतिबोधरहिताः शेरते संसारिणो जीवा" ।

ब्रह्म सू० शां० भा० १।४।३।

"शशिद्वयं हि मायाया विक्षेपावृतिरूपकम् ।
विक्षेपशक्तिलिङ्गादि ब्रह्माण्डान्तं जगत् सृजेत ॥"

दृग्दृश्यविवेके १३।१५।

"अन्तर्दृग्दृश्ययोर्भेदं बहिश्च ब्रह्मसर्गयोः ।
आवृणोत्यपरा शक्तिः सा संसारस्य कारणम् ॥"

तत्रैव दृग्दृश्यविवेके—१३।१५

एतावता प्रबन्धेनेयमेवाऽविद्याऽऽत्मनः संसारित्वं सम्पादयति, अविद्यास्तमयश्च सांसारिकबन्धनतो मुक्तिं प्रापयति । इत्यञ्च

"विद्यैव शान्ता चाद्वया तदस्तमय उच्यते"

अर्थादेतन्मतेऽविद्ययैवाऽऽत्मा संसारित्वमधिगच्छतीत्यविद्यैव संसारः । विद्यया च तन्निवर्तते, अर्थादात्मा मुक्तो भवति । मुक्तत्वञ्च ब्रह्मीभावः । तथा चोक्तम्—

"ब्रह्मभावश्च मोक्षः" ब्र० सू० १।१।४।

बृहदारण्यकभाष्येऽपि मोक्षस्वरूपमित्थं दर्शितवान् श्रीशङ्कराचार्यः—यत् जीवभावमापन्नस्यैवखलु स्वाऽविद्याबलेनैव सर्वस्यापि चराचरात्मकस्य जगद्रूपस्य प्रपञ्चस्य तत्रैव कल्पकत्वेनेश्वरोऽपि सर्वशक्तिमत्त्व, जगन्नियन्तृत्वादिधर्मैः सह स्वप्नोपलब्धमन्त्रवत् तेनैव स्वप्रतियोगिकभेदवान् कल्प्यते ।

तदनन्तरकालावच्छेदेन श्रोतव्यो मन्तव्यो निदिध्यासितव्यः इति श्रुत्यनुसारतः श्रवण, मननादौ, प्रवृत्तिशीलस्य तस्य—

"तत्त्वमसि"—छां० उ० २।८।७।
"अहं ब्रह्मास्मि"—बृहदारण्यकोप०
"अयमात्मा ब्रह्म"—तत्रैव ४।५।१९।

इत्यादिमहावाक्यार्थबोधात् स्वस्वरूपज्ञानात् तदीयस्वरूप ज्ञानादेव दुःखपङ्कलङ्कस्वरूपजगद्बन्धनतो निवृत्तिर्जायते अर्थात्तादृशज्ञानजन्यां मुक्तिमवाप्नोतीति भावः । इयञ्च मोक्षपदाभिधेया मोक्षाऽपरपर्यायभूताप्रभूतामुक्तिर्नानाविधलक्षणलक्षितावर्तते इत्यपि विज्ञेयम् ।

तत् साधनञ्चैतन्मते केवलमविद्यानिवृत्तिरेव । सा च विद्यया = आत्मज्ञानेन जायते । तच्च ज्ञानं प्रागुक्तमहावाक्य "तत्त्वमस्यादीनामर्थज्ञानादेव भवति । तथा चोक्तम्—

"दृष्टिं ज्ञानमयीं कृत्वा पश्येद् ब्रह्ममयं जगत्" ।
तेजोविन्दूप०—१।२९।

एतेन ज्ञानस्यैवैतन्मते मुक्तिसाधनत्वं निश्चीयते न तु कर्मणो ज्ञानकर्मसमुच्चयस्य वा तत्साधनत्वमवगम्यते । श्रीशङ्कराचार्योऽपि ब्रह्मसूत्रस्योपरि विहिते स्वीये शाङ्कर-भाष्ये ज्ञानस्यैव सर्वतोभावेन मुक्तिसाधनत्वं वर्णितवान् ।

अपि च— "तत्त्वमस्यादिवाक्योत्थविज्ञानेन यथोदितम् ।
विज्ञाय वस्त्वसंसर्गिप्रज्ञां कुर्वीत यत्नतः ॥
बृहदारण्योपनि० भा० वा० ४।४।७९७।

एवम्— "अलब्धब्रह्मयाथात्म्यं ज्ञानं वाक्योद्भवं यतः ।
तस्मात् प्रज्ञां प्रकुर्वीत साक्षद् ब्रह्मैकगोचराम् ॥

अपास्ताशेषसंसर्गं यया ब्रह्माधिगम्यते ।
केनेति च व्यपेक्षायां विज्ञानेनेति गम्यते ॥

तस्माद् वाक्योत्थविज्ञानसाधनाभ्यासतोऽनिशम् ।
प्रज्ञां कुर्यादसंसर्गिब्रह्मयाथात्म्यबोधिनीम्" ॥

अन्यच्चापि— तत्रैव—बृहदारण्यकोपनि० भा० वा०
"निरस्ताशेषसंसर्गं तथैव ब्रह्म गम्यते ।
यतोऽशेषतमोहन्त्री प्रज्ञा सैवात इष्यते ॥
पश्यन्तु—तत्रैव

इदमेवोपर्युक्तं दार्शनिकदृष्टिसमन्वितं तयैव दृष्ट्या पवित्रीकृतञ्च परमं रहस्यं वर्णितवान् महाकविः श्रीभारविः स्वीये महाकाव्ये किरातार्जुनीये । तथाहि—

"वीतजन्मजरसं परं शुचि-
ब्रह्मणः पदमुपैतुमिच्छताम् ।
आगमादिव तमोपहादितः-
सम्भवन्ति मतयो भवच्छिदः ॥
किराता०, स० ५, श्लो० २२

अर्थात् वीते = निवृत्ते, जन्मजरसी यस्य तदित्यर्थः । इमे च सर्वथाऽज्ञानवि-जृम्भिते स्तः । ब्रह्मणः = परब्रह्मपरमेश्वरस्य परमात्मनस्तादात्म्यापन्नं यत् परं सर्वोत्कृष्टं निरतिशायि, शुचि = सर्वथा कलङ्करहितम् । पदम् = हिमालयनामकं स्थानम्, ज्ञान-लक्षणलक्षितरसस्वरूपब्रह्मतादात्म्यापन्नमित्यर्थः । मुक्तिपदाभिधेयम् इति तु निष्कर्षः । उपैतुम् = प्राप्तुम् । इच्छताम् = इच्छावताम्, मोक्षविषयिणोच्छावतामुमुक्षूणामित्यर्थः । अज्ञानस्वरूपं तमोन्धकारम्—सर्वथा निराकरोति, समाप्नोतीत्यर्थः ।

यथाऽऽगम = दर्शनशास्त्र विधानोक्तसत्कर्मानुष्ठानेनाऽज्ञानापरपर्यायभूताऽविद्याजन्य कुमार्गगामित्वरूपान्धकार स्वरूपस्य जगतो निवृत्तिर्जायते इति तु परमार्थः । एवमेव प्रागुक्ता दिगत्राऽप्यनुसन्धेया ।

इयमेव खलु 'वीतजन्मजरसं परं शुचि' इत्यादिश्लोके प्राग् दर्शिता निरूपिता च दार्शनिकी दृष्टिः 'संभवन्ति मतयो भवच्छिदः' इत्यत्रापि विज्ञेया। अत्र पद्ये घटकीभूतं 'मतयः' इति पदं तत्त्वज्ञान = आत्मज्ञानरूपार्थबोधकमिति 'मतयः' = तत्त्वज्ञानापरपर्याय-भूतान्यात्मज्ञानानि। भवं छिन्दन्तीति यौगिकयोगिकव्युत्पत्त्या भवच्छिदः = जगन्नि-वर्तकाः, 'मतय' आत्मज्ञानावरपर्थायभूताः, सम्भवन्ति = उत्पद्यन्ते।

तदेव स्फुटयति श्रीभारविः = यद् इतः = अस्मात् स्थानविशेषात्, गिरेर्हिमाल-यात् तमोपहात् = तमः = अज्ञानान्धकारम् = भ्रमान्धकारमित्यर्थः। अपहन्तीति तस्मात्, तमोपहात् = अविद्यापरपर्यायभूताऽज्ञाननिवर्तकादिति यावत्। स्थानात्मकक्षेत्रविशेष-स्यापि ज्ञानोपायभूतसाधनत्वादिति तु परमार्थः। न केवलमयं नगाधिराजो हिमालयो नाम स्थानविशेष अर्थात् क्षेत्रविशेषो नास्ति केवलं भोगभूमिरेव किन्तु मुक्तिक्षेत्रमपि।

एतावता प्रबन्धेन ज्ञानस्यैव = आत्मज्ञानस्यैव भवबन्धनिवर्तकत्वं सूचितं भव-तीति भावः। अत्रैव भारवेर्मतपुष्टिसम्पादकं श्रुतिप्रमाणमप्याह —

'अज्ञानादेव हि संसारो ज्ञानादेव विनश्यति'। योगतत्त्वोपनि० १।१६।

अपि च—संसारदुःखतप्तानामात्मज्ञानामृताम्भसा।
तापशान्तिर्नचान्येन सत्यमेव न संशयः॥ सू० सं०
'परमाद्वैतविज्ञानात् संसारः प्रविनश्यति।
विना ज्ञानेन मुक्तिस्तु न सिद्ध्यति न सिद्ध्यति॥

महाकविः श्रीमाघः

महाकविः श्रीमाघः (ई०६६०-६७५)

माघकविविनिर्मितं 'शिशुपालवध' नामकमस्ति महाकाव्यम्। तच्च 'माघ-काव्यनाम्नापि प्रसिद्धिं गतमस्ति। इदञ्च महाकाव्यं महदेवप्रशंसास्पदीभूतमस्तीति सर्वेऽपि विदाङ्कुर्वन्ति वेत्तारः। यथा चोक्तम्—

'उपमा कालिदासस्य भारवेरर्थगौरवम्।
दण्डिनः पदलालित्यं माघे सन्ति त्रयो गुणाः'॥

प्रसिद्धिगतत्वेन श्रुतमात्रम्

अपि च—'काव्येषु माघः कविकालिदासः'— श्रुतआचार्यप्रवरः

अन्यच्चापि—'तावद्भा, भारवेभाति यावन्माघस्य नोदयः'।

सर्वं श्रुतआचार्यप्रवरः

मया 'राजेन्द्रप्रतापेन 'रजोला' इत्युपाह्वेन महाकविश्रीमाघीय रचनास्वरूपे महाकाव्ये 'शिशुपालवध' नामके या दार्शनिकदृष्टिः समुद्भाव्यते साऽनुभूयताम्।

'दार्शनिकीदृष्टि' रित्येतद्वाक्यघटकीभूत 'दार्शनिकी' त्येतद्पदघटकी भूतस्य दर्शनेत्यस्य ज्ञानमर्थः। यथा—'घटमहं पश्यामि' इत्यत्र 'दृश्' धातोर्दर्शनस्य यथा ज्ञानमर्थः। घटपदोत्तरद्वितीयायाः प्रकृते विषयत्वमर्थः, तस्य च विषयितासम्बन्धेन धात्वर्थे लौकिकप्रत्यक्षात्मके ज्ञानेऽन्वयः। इत्थञ्च घटनिष्ठविषयतानिरूपितविषयितावल्लौकिकचाक्षुषप्रत्यक्षात्मकज्ञानवानहम् इति च दृष्टान्तभूतेन वाक्येन बोधो जायते। तत्र तादृशबोधघटकीभूतं ज्ञानमादाय ज्ञानत्वावच्छिन्नमेव दर्शनशब्दार्थो लभ्यते।

एवञ्च दार्ष्टान्तिकेऽपि दार्शनिकीदृष्टिरित्यत्र घटकीभूतस्य दार्शनिकीतिपदस्य "ज्ञानमयी" त्यर्थो बोध्यः। तत्र घटकीभूतां दृष्टिमादाय च ज्ञानमयी दृष्टिरित्यर्थो लभ्यते।

चिरकालपर्यन्तनित्यनिरन्तरसमनुष्ठितसम्यक्समाधिसम्पन्नज्ञानेन स्वातिरिक्तत्वाभासवद्देहादिप्रपञ्चस्य मिथ्यात्वंमन्यमानः स्वात्मरूपेऽधिष्ठानभूते प्रभूते ब्रह्मणि "इदं ब्रह्माऽहमेवास्मि" इत्याकारकाऽऽत्मत्वप्रकारकवासनादार्ढ्यादनात्मनि शरीरेन्द्रियादौ "अहम्" इति भ्रान्तिमयीं मिथ्याभूतां दृष्टिं परित्यागशीलोऽपि यतिर्योगी वा शास्त्रोयविधि विधानोक्तयज्ञ यागादिरूपसत्कर्मानुष्ठानपरायणः सन् यम-नियमादि द्वारा ज्ञाताऽऽत्मतत्त्वः सर्वाधिष्ठानभूतं प्रभूतं सच्चिदानन्दस्वरूपं नित्यं, शुद्धं, बुद्धं सर्वथा परिपूर्णं चिदेकरसं ब्रह्म स्वात्मत्वेन विज्ञाय शरीरेन्द्रियादिकमनात्मभूतं मिथ्यारूपम्" अहमित्येवं रूपेण नावलम्बते अपि तु प्रतिबिम्बवत् आभासरूपेण प्रतीयमानेऽस्मिन् शरीरेन्द्रियादौ सर्वतोभावेनाऽहन्त्वम् = अहम्भावं समुज्झित्याऽऽत्मत्वप्रकारकज्ञानहेतुभूतेन प्रभूतेनाऽज्ञानाधिष्ठानस्य याथात्म्यसन्दर्शनेन "कारणनाशात् कार्यनाशः" इति न्यायेनाऽनाद्यविद्यया मायया शरीरेन्द्रियादावनात्मनि खल्वात्मत्वप्रकारेण भ्रमेण सम्मोहितानां सांसारिकसन्तापेन

सन्तप्यमानानां जनानां विपरीतभावनाजन्यवैमत्यजन्यवैपरीत्यं सर्वथा विनाशं गच्छति। येन कर्तृत्वधर्मप्रकारिकायाः प्रतीतेरभावेन कर्तृत्वप्रकारकभ्रमविच्छित्तिरपि जायते। तादृशविच्छित्तेर्जायमानत्वेन नामरूपादिग्रहणाऽत्यन्ताभावो भवति। किन्तु तदानीं साधको यतिर्योगी वाऽऽभासलक्षणलक्षितं मिथ्याभूतं प्रपञ्चं परित्यज्य सर्वथा व्युत्थानाऽव्युत्थानोभयात्मकदशात्मककालयोर्ब्रह्मण्येव स्वस्थितिं लभमानः सर्वत्रैव स्वस्वरूपभूतं ब्रह्मैव पश्यति, अविद्याकृतभेददृष्टिं त्यजति यथोक्तम्—

"भेददृष्टिरविद्येयं तां सदा परिवर्जयेत्" ।—

महोपनि०—५।११३।

ब्रह्मविदहमस्मीत्यात्मनः कृतार्थताविकारात्मकदर्पलक्षणलक्षितां तां दृष्टिमपि विमुञ्चतीति कृत्वा तादृशस्तथाविधो दर्पः स्वमेव नश्यति। तदनन्तरकालावच्छेदेन "निमित्तापाये नैमित्तिकस्याप्यपायः" इति न्यायेन कामक्रोधादावपि विनश्यतः। पुनश्च शरीरसंरक्षणार्थं सम्प्राप्तं कौपीन, काषाय, कन्यादिरूपं परिग्रहमपि विमुञ्चति नानुशोचति च।

इत्थञ्चाऽभिमानकार्यभूतमहङ्कारम्, कामं, क्रोधञ्च सापरिग्रहं बाह्याऽऽभ्यरावच्छेदेन विकल्पहेतुभूतं सर्वमेव पदार्थजातं विषयजातं वा परित्यज्य जन्मजन्मान्तरीणेष्वनेकशतेषु विश्वासपूर्विकया श्रद्धया भक्त्या च समनुष्ठितैर्भगवत्प्रसन्नतैकप्रयोजनैः श्रौतस्मार्त्तप्रभृतियज्ञयागादिकर्मभिर्निः। शेषनिर्धूताखिलकल्मषतया यज्ञक्षपितकल्मषास्ते नितान्तनिर्मलस्वान्ताः, सन्तः सम्यगप्रतिबद्धात्मविज्ञानेन खलु—

"अहमेवेदं सर्वम्"—छान्दोग्यपः—७।२५।१।

"सच्चिदानन्दरूपमिदं सर्वम्"।

नृसिंहोत्तरतापनीयोप०—७।

"येनेदं सर्वं विजानाति तं केन विजानीयात्।"

बृहदारण्यकोप०—२।४।१४।

"अहमेव जगत्सर्वम्" ।—तेजोबिन्दू०—६।४३।

"ब्रह्मैवेदं सर्वम्" ।—बृहदारण्यकोप०—२।५।१।

"हृदयात् सम्परित्यज्य—सर्ववासनपंक्तयः"।

महोपनि०—६।८।

अपि च तत्रैव—

"ब्रह्मरूपतया ब्रह्म केवलं प्रतिभासते"।

आत्मोपनि० १—

"अखण्डैकरसं भोज्यमखण्डैकरसं हविः।
अखण्डैकरसो होम अखण्डैकरसो जपः।"

तेजोविन्दु प० २।२२-२३।

अन्यच्चापि तत्रैव—

सर्वलोकं च चिन्मात्रं त्वत्ता मत्ता च चिन्मयम्"।

तत्रैव—२।२६।

सर्वात्मभावप्राप्तः सन् ब्रह्मभावमवाप्नोतीति सुनिश्चितं शास्त्रप्रामाण्यानुरोधतः ।

इत्थञ्चाऽत्राऽऽत्मभावप्राप्तौ ब्रह्मभावप्राप्तौ चोभयत्रैव निर्धूताखिलकल्मषत्वस्य, यज्ञक्षपितकल्मषत्वस्य च हेतुत्वं बोध्यम् । तत्रापि च श्रौतस्मार्तप्रभृतियज्ञ-यागादि-कर्मणामनुष्ठानस्यैव हेतुत्वं बोध्यम् । एवञ्चाऽन्योन्याऽन्वयव्यतिरेकेण कार्यकारणभावक्रमं सम्यक्त्वेन विदाङ्कुर्वाणो धर्मराजो युधिष्ठिरः प्रमाणभूतशास्त्रानुमोदितं हर्षप्रकर्षपुरःसरं भगवता श्रीकृष्णेन स्वीयवचननिचयेन चानुमोदितं सच्चिदानन्दस्य भगवतः श्रीकृष्णचन्द्रस्य संस्तुतिं प्रकुर्वाणस्तमेवाऽभिमुखीकृत्य

'यज्ञो वै विष्णुः' ।
'यज्ञो वै रुद्रः' ।
'यज्ञो वै महारुद्रः' ।

इत्यादिरूपं यज्ञानुष्ठानविधानपरं निम्नोल्लिखितं वाक्यं ब्रवीति खलु धर्मराजो युधिष्ठिरः—

सप्ततन्तुमधिगन्तुमिच्छतः कुर्वनुग्रहमनुज्ञया मम ।
मूलतामुपगते प्रभो ! त्वयि प्रापि धर्मक्षयवृक्षता मया ॥

शिशुपालबधम् सर्गः १४, श्लो० ६ ।

अपि च—सम्भृतोपकरणेन निर्मलां कर्तुमिष्टिमभिवाञ्छता मया ।
त्वं समीरण इव प्रतीक्षितः कर्षकेण वलजान् पुपूषता ॥

तत्रैव श्लो० ७

अर्थात् सप्ततन्तुम् = क्रतुम् = यज्ञमित्यर्थः । अधिगन्तुम् = प्राप्तुम् । इच्छतः = इच्छावतः । मम = युधिष्ठिरस्य (उपरि) । अनुज्ञया = अनुदानेन । अनुग्रहम् = कृपाम् । कुरु = साहाय्यप्रदानं विधीयताम् । यतः । हे प्रभो ! त्वयि = भगवति कृष्णे । मूलताम् = प्रधानकारणताम् । उपगते = प्राप्ते सति । मया = युधिष्ठिरेण । धर्मक्षयवृक्षता = धर्मात्मकवृक्षता । प्रापि = प्राप्ता । इतः पूर्वकालावच्छेदेनापि भवत्कृपातः एव धर्ममर्जयन्नहं धर्मराजः संवृत्तोऽस्मीति भावः । मन्निष्ठस्य च धर्मराजत्वस्य = धर्मवृक्षत्वस्य, वा, भवत एव तन्मूलकारणतया निरूपणीयत्वात् । अर्थादहं धर्मराजोऽस्मीत्यत्र सर्वमपि श्रेयः श्रेयस्करत्वं वा भवन्निष्ठमेवेति नूनमन्यूनञ्च विज्ञेयम् ॥ ६ ॥

अपि च—निर्मलाम् = मलादिदोषरहिताम् । इष्टिम् = यागम् । कर्तुम् = विधातुम् । अभिवाञ्छता = इच्छता । (अत एव) सम्भृतोपकरणेन = सम्पादितसाधनेन । मया = युधिष्ठिरेण । त्वम् = भगवान् कृष्णः । वलजान् = धान्यराशीन् । पुपूषता = पवितुम् = शोधितुम्, इच्छता । कृषकेण = 'किसान' इत्याख्येन । समीरणः = वायुः । इव । प्रतीक्षितः ।

गीतायान्तु भगवान् कृष्णः स्वयमेव यज्ञस्य महत्त्वं ब्रूते

सच्चिदानन्द आनन्दकन्दः श्रीकृष्णचन्द्रः स्वयमेव यज्ञस्य महत्त्वम् इति कर्त्तव्यताञ्च ब्रूते दर्शयति च । तथाहि—

'सर्वेऽप्येते यज्ञविदो यज्ञक्षपितकल्मषाः' । गीता अ० ४ । श्लो० ३० ।

यज्ञस्याऽनुष्ठेयतारूपां दार्शनिकीं दृष्टिं दर्शयति श्रीकृष्णः

नन्दनन्दनो मथुराचन्द्रः श्रीकृष्णचन्द्रो यज्ञस्याऽनुष्ठेयतां ब्रवीति। तथाहि—अर्थात् यज्ञान् विदन्त्यनुतिष्ठन्तीति यज्ञविदः = यज्ञविधानवेत्तारः = यज्ञानुष्ठानकर्तारश्च। एते = पूर्वम् निर्दिष्टा दैवादियज्ञानुष्ठानपरा याज्ञिकाः। सर्वेऽपि। सन्ति खलु यज्ञशिष्टामृतभुजः = यज्ञस्याऽनुष्ठानस्याऽनन्तरकालावच्छेदेन जायमानत्वात् तदन्नम् यज्ञशिष्टम् इति कथयन्ति, अतएव तदमृतमिति कथ्यते, तादृशयज्ञशिष्टमृतं भुञ्जते ये ते यज्ञशिष्टमृतभुजः। आहोस्वित् "अमृते" तिशब्दजन्यबोधविषयतावन्तं कालरूपमर्थमादाय यज्ञशिष्टो योऽमृतः = कालस्तस्मिन् काले भुञ्जते इति यज्ञशिष्टामृतभुजो भवन्तिः। अत एव यज्ञक्षपितकलमषास्ते जायन्ते, केवलं सद्गुरोरुपदेशमात्रेणैव आत्मविषयकं ज्ञानं समनुप्राप्य सनातनम् = नित्यम्। ब्रह्म, यान्ति = प्राप्नुवन्ति। हे कुरुसत्तम = कुरुश्रेष्ठ अर्जुन? अयज्ञस्य = यज्ञानुष्ठानविरहितस्य भाग्यहीनस्य पुरुषस्याऽयमपि लोको नास्ति, कुतोऽन्य इति।

तथा च तदेवोक्तम्—

यज्ञशिष्टामृतभुजो यान्ति ब्रह्म सनातनम्।
नाऽयं लोकोऽस्त्ययज्ञस्य कुतोऽन्यः कुरुसत्तम? ॥

गीता—अ० ४, श्लो० ३१

अस्यैव परिष्कृतं रूपं दर्शयति श्रीशङ्करानन्दः—"यज्ञक्षपितकलमषाः यज्ञैर्नियमेनाऽनुष्ठितैः, क्षपित्तम् = नाशितं, कलमषं येषान्ते यज्ञक्षपितकलमषाः। यज्ञानुष्ठान निःशेष विनष्टज्ञानप्रतिबन्धका भूत्वा सकृदुपदेशेनैव सद्गुरोरात्मज्ञानं प्राप्य सनातनं दिव्यं ब्रह्म सच्चिदानन्दैकरसं यान्ति"। शङ्करानन्दी—

अयमभिप्रायः—"राहोः शिरः" इतिवत् औपचारिकत्वमादाय यज्ञस्यापि यज्ञसाधनत्वेन परम्परया ज्ञानप्रयोजत्वेन ज्ञानमयी दृष्टिस्वरूपत्वेन च ब्रह्मप्राप्तिजनकत्वम्—मोक्षसाधकत्वञ्च विज्ञेयम्। यथा "यज्ञविदो यान्ति ब्रह्म सनातनम्" "यज्ञो वै विष्णु" इत्यादिना प्रमाणभूतवाक्यबलेनाऽऽत्मज्ञानप्रकाशस्य यज्ञस्य यथा सनातन ब्रह्मप्रापकत्वं सुस्पष्टमेव तथोक्तमधस्तात्।

अपि च तत्रैव पुनः—"यज्ञशिष्टामृतभुजो यान्ति ब्रह्म सनातनम्। नायं लोकोस्त्ययज्ञस्य कुतोऽन्यः कुरुसत्तम?"॥

अर्थात्—यज्ञशिष्टामृतभुजो ह्यस्य यज्ञशेषामृत भोजनं प्रकुर्वाणाः = इत्यर्थः। अर्थात् यज्ञानुष्ठानद्वाराऽऽत्मानन्दमनुभवं विदधानाः खलु कर्मयोगिनः सनातनम् = नित्यम्। ब्रह्म = सच्चिदानन्दलक्षणलक्षितम्। यान्ति। ब्रह्मनिष्ठं नित्यत्वञ्च ध्वंसाऽप्रतियोगित्वे सति प्रागभावाऽप्रतियोगित्वरूपम् बोध्यम्।

अर्थात् उत्पत्तिविनाशराहित्यावच्छिन्नत्वेन प्रागुक्त सत्, चित्, आनन्देति स्वरूप लक्षणलक्षितं तद् ब्रह्म—

"अद्वैतसिद्धान्तमेव हि सत्यं शिवं सुन्दरं सिद्धान्तमस्ति"

"शान्तं शिवमद्वैतं चतुर्थम् मन्यन्ते स आत्मा"

माण्डूक्योपनि०—७

एवम्--　　"चिदेकत्वपरिज्ञाने न शोचति न मुह्यति"

रुद्रहृदयोप०—३४

इत्यादिवाक्यद्वारा प्रतिपादितं भूत, भविष्यद्, वर्तमानेति कालत्रयेऽपि स्वास्तित्वसम्पन्नं यज्ञक्षपितकल्मषाः प्राणायामादिसत्कर्मपरायणा नारायणास्ते यतयोयोगिनश्च यान्तीत्यत्र नास्ति लेशतोऽपि विवादस्तदवसरो वेति स्वयमेव सुधोभिर्विचारणीयम् ।

अयज्ञस्य = यज्ञविरोधिनः = यज्ञमकुर्वतस्तस्य दुःशीलस्य नास्ति खलु अयं लोको वा एतल्लोककृतसुखादिर्वा दुःखाभावो वा नित्यसुखाभिव्यक्तिर्वा, कुतोऽन्यः = अन्यलोककृतः सुखादिः कुतो भवितुं प्रभवति प्रभविष्यति वेति । अर्थात् अयज्ञस्य पुरुषस्याऽस्मिन् लोके परलोके च कुत्रापि देशे, काले, पात्रत्वावच्छेदेन च सुखं दुःखाभावो वा नास्तीति तु परमार्थः ।

अन्यत्रापि च--

"पृथक् प्रायन् पृथक् प्रथतेः प्रथमा देवहूतयो ये देवान् ।
आहव्यन्त अकुर्वन श्रवणीयानि यशांसि । दुरनु—
कराणि अन्यैः येऽशक्नुवन् यज्ञियां नावमारोदुम् ।
अथ ये नाऽशक्नुवन् यज्ञियां नावमारोढुम्—
ईमँव ते न्यविशन्त इहैव ते न्यविशन्त ।
ऋणेनैव ते न्यवशिन्त अस्मिन् लोके ॥

यास्कः—५।२।५।

अपि च—

"पृथक् प्रायन् प्रथमा देवहूतयोऽकृण्वत श्रवस्यानि दुष्टरा ॥
न ये शेकुर्यज्ञियां नावमारुहमीमँव ते न्यविशन्तः केपयः ॥

ऋग्वेदः—१०।४।६।

अयमर्थः—शरीरावच्छिन्नं जीवात्मानं सम्बुद्धयोच्यते हे जीवात्मन् ? ते = यज्ञशेषामृतभजो याज्ञिकाः कर्मयोगिनः । पृथक् = पृथगेव देवलोकान् । प्रायन् = प्रयान्ति । प्रथमाः = प्रथमयज्ञकर्तारः । देवदूतयः = तथा यज्ञेषु देवस्वरूपात्मन आव्हानकर्तारो जीवात्मानः सन्ति । (ते) दुष्टरा = अयाज्ञिक पुरुषेभ्यः काठिन्यतः पारं गन्तुं योग्यतावन्तः । भवन्तीति शेषः । श्रवस्यानि = श्रवणयोग्यानि यज्ञकर्माणि । अकृण्वत = कुर्वन्ति । ये च = ये च सन्ति यज्ञविरोधिनः पुरुषा । यज्ञियाम् = यज्ञसम्बन्धिनीम् । नावम् = नौकाम् । आरुहम् = आरोढुम् । न शेकुः = नहि समर्था भवन्ति सन्ति वा । ते = ते, पुरुषाः । केपयः = पापाचारिणः = दुराचारिणः । ईर्मा एव = यज्ञऋणत एव । न्यविशन्त = अधोयोनि = नीचयोनिं प्राप्नुवन्ति ।

पुनः शिशुवधनामके महाकाव्ये माघमहाकाव्ये वा वेदोक्तं तथा स्वयं भगवता श्रीकृष्णेनोक्तं यज्ञस्य महत्त्वं विज्ञायैव धर्मराजो युधिष्ठिरः पौनः पुन्येन यज्ञविधान सम्बन्धिनीं कृतिम् इति कर्तव्यताञ्च विन्दति । अकारणाच्च कीदृशं दूषितफलं प्राप्नोति इत्यपि न तिरोहितमस्ति केषामपि विदुषाम् । अत एव धर्मराजो युधिष्ठिरः पौनः पुन्येन

भवन्तं भगवन्तं श्रीकृष्णचन्द्रं प्रति ब्रूते यद् भवत् सान्निध्यमाश्रित्येदं यज्ञयागादि रूपं सत्कर्माऽवयमेव पूर्णतां गमिष्यतीति मे सुदृढो विश्वासः ।

तथाहि—'स्वापतेयमधिगम्य धर्मतः पर्यपालयमवीवृधञ्च यत् ।
तीर्थगामि करवै विधानतस्तज्जुषस्व जुह्वानि चालिने ॥'
शिशुपालवधम्—सर्गः १४, श्लो० ९

धर्मराजस्य श्री युधिष्ठिरस्येयमुक्तिरस्ति यज्ञविधानरूपा अर्थात् यत् स्वापतेयम्=धनम् । धर्मतः = शास्त्रदर्शितदिशा शास्त्रोक्तप्रकारादित्यर्थः । अधिगम्य = सम्प्राप्य । सात्त्विकेन प्रयासेन पर्यपालयम् = पालितवान् । अबीवृधम् च = वृद्धि मपि च प्रापितवान् । तत् = धनम् । तीर्थगामि = ब्राह्मणाधीनम् । करवै = करिष्यामि । 'पालितं वर्धयेन्नीत्या वृद्धं पात्रेषु निक्षिपेत्' इति याज्ञवल्कोक्त्या । विधानतः = विधानरूपया । जुषस्व । अनले = अग्नौ । जुह्वानि = जुहुयाम् ।

अर्थात् मया युधिष्ठिरेण यद् धनं धर्मपूर्वकं शास्त्रीयविधिविधानसहितं लब्ध्वा रक्षितम् । तद्धनं बृद्धिगतं व्यधायि तद्धनमहं शास्त्रोक्तविधानेनैव सत्पात्रेभ्यो याज्ञिक ब्राह्मणेभ्यो यज्ञदाननिमित्तं दास्ये । इदमत्रावधेयमस्ति दानात्मिका यज्ञात्मिका विज्ञानात्मिकाः स्तुत्यात्मिका याः काश्चन सन्ति दृष्टयस्ताः सर्वा एव खलु दार्शनिक्यो विज्ञेयः। अयञ्च नियमः सर्वत्रैवऽनुसन्धेयः ।

एतावता प्रबन्धेन महाकवेः श्री माघस्य द्वैतवादिता, भेदवादिता च सुस्पष्टमेव सिद्धयतीति प्रागुक्तानां त्रयाणां कालिदासाऽश्वघोष भारवीणां महाकवीनां नाङ्गीक्रियते ब्रह्माऽद्वैतसिद्धान्तवादः श्री माघेन महाकविना ।

अपि च पुनस्तत्रैव—'पूर्वमङ्गजुहुधित्वमेव वा स्नातवत्यवमृथे ततस्त्वयि ।
सोमपायिनि भविष्यते मया वांछितोत्तमवितानयाजिना' ॥ १० ॥
'वीतविघ्नमनघेन भाविता सन्निधेस्तव मखेन मेऽधुना ।
को विहन्तुमलमास्थितोदये वासरश्रियमशीतदीधितौ' ॥
तत्रैव श्लो० ८

'तत्सुराज्ञि भवति स्थिते पुनः कः ऋतुं यजतुराजलक्षणम् ।
उद्धृतौ भवति कस्य वा भुवः श्रीवराहमपहाय योग्यता' ॥
तत्रैव—श्लो० १४ ।

अन्यच्चापि—इत्युदीरितगिरं नृपस्त्वयि श्रेयसि स्थितवति स्थिरा मम ।
सर्वसम्पदिति शौरिमुक्तवानुद्वहन् मुदमुदस्थितक्रतौ ॥ १७ ॥
आननेन शशिनः कलां दधद्दर्शन क्षयितकामविग्रहः ।
आप्लुतः स विमलैर्जलैरभूदष्टमूर्तिधरमूर्तिरष्टमी ॥ १८ ॥
तस्य सांख्यपुरुषेण तुल्यतां बिभ्रतः स्वयम् कुर्वतः क्रियाः ।
कर्तृता तदुपलम्भतोऽभवद् वृत्तिभाजि करणे यथात्विजि ॥ १९ ॥
सप्तभेदकरकल्पितस्वरं साम सामविदसङ्गमुज्जगौ ।
तत्र सूनृतगिरश्च सूरयः पुण्यमृग्यजुषमध्यगीषत ॥ २१ ॥

इमाः सर्वा अपि धार्मिक्यो यज्ञसम्बन्धिन्यः सदुक्तयः सर्वथा दार्शनिक्य एव दृष्टयो विज्ञेयाः। तासामुक्तीनामयमर्थोबोध्यः—हे अङ्ग ! = हे कृष्ण ! पूर्वं त्वमेव जुहुधि = यज्ञं कुरु। सोमरसपायिनि त्वयि अवभृथे = यज्ञे। स्नातवति सति ततः = तदनन्तरम्। मया = युधिष्ठिरेण। वाञ्छितोत्तमवितानयाजिना। भविष्यते अर्थात् त्वयि इष्टवति पश्चादहं यक्ष्ये इति तु परमार्थः। कीदृशोऽयमस्ति महान् दार्शनिका—विचारः श्रीधर्मराजयुधिष्ठिरस्य ॥ १० ॥

अपि च—अधुना, तव = भगवतः श्रीकृष्णस्य सन्निधिरूपेण हेतुना, मे = युधिष्ठिरस्य, विघ्नरहितेनाऽनघेन मखेन भाविता। अशीतदीधितौ = उष्णांशौ। अस्थितोदये सति को हि खलु वासरश्रियम् = दिनस्यशोभां विहन्तुम् = नाशयितुम्। अलम् = शक्तिसंपन्नो भविष्यति। नहि कोऽपीत्यर्थः। एतेन यज्ञस्य पूर्णं साफल्यं दर्शितम् भगवतः श्रीकृष्णसान्निध्यतः। अत्र चास्तिदार्शनिकदृष्टिद्वयम्—एका यज्ञात्मिकांऽपरा च भगवतः श्रीकृष्णचन्द्रस्य सान्निध्यरूपेति विज्ञेयम् ॥ ८ ॥

अन्यामपि पुनर्दार्शनिकीं दृष्टिमाह

यत् पूर्वमुक्तम्—'पूर्वमङ्गजुहुधि त्वमेव वा 'इत्यादिरूपा या दार्शनिकी दृष्टिर्दर्शिता राज्ञायुधिष्ठिरेण तत्र पुनर्दार्शनिकी दृष्टिः प्रदर्श्यते भगवता श्रीकृष्णेन 'तत्सुराज्ञिभवती' त्यादिना। अर्थात् तत् = तस्मात् पूर्वोक्तप्रकारेण। सुराज्ञि = स्वीयपराक्रमतो विजयलाभप्रजासंरक्षणादिगुणगणविशिष्टत्वेन विशुद्धक्षत्रियत्वधर्मावच्छिन्ने। भवतिस्थिते = पुरः सन्तिष्ठमाने भवति युधिष्ठिरे। कः = भवदतिरिक्तः कोऽस्ति। यः। राजलक्षणं राजसूयनामकं 'राजा राजसूयेन यजेत' इत्यादिनाऽधिकारप्राप्तं यजतु, न कोऽपीत्यर्थः। तत्राऽनुरूपं दृष्टान्तमप्याह—भवः = पृथिव्याः। उद्धृतौ = समुद्धरणे, श्रीवराहरूपधारिणं भगवन्तम् अपहाय कस्य भवती पुनर्योग्यता। सामर्थ्यरूपा, नहि कस्यापि भवितुमर्हतीत्यर्थः ॥ १४ ॥

पुनस्तामेव दार्शनिकीदृष्टिमाह धर्मराजो युधिष्ठिरः—'इत्युदीरितगिरमि' त्यादिना। अर्थात्—इति = एवंप्रकारेण। उदीरितगिरम्—शौरिपदाभिधेयं श्रीकृष्णं प्रति धर्मराजो राजा युधिष्ठिरो ब्रूते यत् त्वयि श्रेयसि स्थितवति सति मम सर्वसम्पत् स्थिरा चास्ति, अर्थात् समस्तमनोरथपरिपूर्णोऽहं सर्वथा मुदमुद्वहन् क्रतौ उदस्थितः = क्रतुं = यागं, कर्तुमुद्युक्तवान् राजा युधिष्ठिरः ॥ १ ॥

अनेनाऽष्टादशात्मकेन श्लोकेन राज्ञो धर्मराजयुधिष्ठिरस्य दार्शनिकदृष्ट्यवच्छिन्नं यज्ञदीक्षितत्वमाह—'आननेन शशिनः' इत्यादिना—

अर्थात् श्रीयुधिष्ठिरः स्वीयेन मुखेन शशिनः कलामिव कान्तिस्वरूपां कलां दधत्, दार्शनिकीदृष्टिघटकीभूतेन दर्शनेन ज्ञानेन क्षपितकामविग्रहस्तथा क्षपितक्रोधविग्रहः, एवं नद्या विमलैर्जलैराप्लुतः स राजा धर्मराजो युधिष्ठिरः—अष्टमूर्तिधरस्य भगवतो महेश्वरस्य शिवस्य अष्टमोमूर्तिरभूत्, अर्थात् अष्टमूर्तेरागमे शिवमूर्तिस्वरूपत्वमस्ति प्रसिद्धमिति धर्मराजस्य श्रीयुधिष्ठिरस्यापि तथात्वेन स सोमदीक्षितोऽभूत्। अर्थात् तथाविधस्य शिवस्य या चास्त्यष्टमी मूर्तिर्यजमानरूपा तादृशमूर्त्यवच्छिन्नो युधिष्ठिरो यज्ञे दीक्षितोऽभूत इति भावः।

इदानीं शिशुपालवधनामकेमहाकाव्येसांख्यसिद्धान्तमनुसृत्यापि दार्शनिकीं दृष्टि दर्शयति—'तस्य सांख्यपुरुषेणे' त्यादिना।

अर्थात् क्रियाः = होमादिकर्माणि अन्यत्र पुण्यपापकर्माणि। स्वयमकुर्वतः = अननुतिष्ठतः अन्यत्र उदासीनस्य। अत खलु सांख्यपुरुषेण सांख्यशास्त्रोक्तेनात्मना, तुल्यताम् = सादृश्यम्। विभ्रतस्तस्य राज्ञो युधिष्ठिरस्यकरणेऽन्तःकरणे यथा बुद्धाविवेत्यर्थः। ऋतौ यजतीति ऋत्विग् याजकस्तस्मिन्नित्यर्थः। वृत्तिभाजि = होमादिव्यापारं विहितवतीत्यर्थः। अन्यत्र च पुण्यपापकारिणि सति। तदुपलम्भतः = तस्या होमात्मिकाया वृत्तेरुपलम्भात् ममेदमित्यनुसन्धानादेव कर्तृता = क्रियानुष्ठानजनकत्वम्, अभवत्। यथा स्वयं क्रियाभोगशून्योऽपि पुरुषस्वरूप आत्मा बुद्धेः संसर्गात् सन्निधानात् कर्तेव भवत्युदासीनः।

अयमाशयः—यथा सांख्यशास्त्रसिद्ध आत्मा पुरुषः स्वयं नहि किमपि पुण्य-पापादिरूपं कर्म करोति, बुद्धेरेवतत्कर्तृत्वात्। परन्तु साक्षित्वमात्रेण पुरुषस्य कर्तृत्वं स्वीक्रियते तथैव राजा युधिष्ठिरोऽपि स्वयं हवनादिकर्म नैव कुर्वन्नासीत्, ऋत्विज एव तथात्वात्। तथापि धर्मराजा युधिष्ठिरस्तेषां कर्मणां कर्तृत्वं स्वात्मनि मन्यमान आसीदिति तु परमार्थः।

इदानीं वेदोच्चारणमहत्त्वं दर्शयति—"सप्तभेदकरकल्पितस्वरम्" इत्यादिना। अयमर्थः-तत्र = क्रतौ। सामवेदज्ञाता उद्गाता। सप्तभेदकरकल्पितस्वरम् = सप्तभेद सप्तप्रकारं यथा तथा करेण कल्पिताः सम्पादिताः स्वरा निषादादयो यस्य तत्। साम=बृहद्रथन्तरादिकम्। उज्जगौ = उद्गायत्। अपि च सूनृतगिरः = प्रियसत्यभूता वाचश्च। सूरयः = विद्वांसः = होतार - आध्वर्य्यादयश्च। पुण्यम् = पुण्यजनकीभूतं श्रेयस्करम्। ऋग्यजुषम्। अध्यगीषत। अयमाशयः—यज्ञस्थले हस्तसञ्चालनद्वारा स्वरोच्चारणाभावे वेदोच्चारयिता पुरुषो वियोनौ जन्म गृह्णाति। तथा हस्तसञ्चालनद्वारा स्वराणां वर्णानां तथाऽर्थपूर्वकमन्त्राणामुच्चारणकर्ता वैदिकः पुरुषो ब्रह्मलोके पूजितो भवति।

व्याकरणस्य कर्तुर्भगवतः पाणिनेरस्तीयं दार्शनिकी दृष्टिः—

> हस्तहीनं तु योऽधीते स्वरवर्णविवर्जितम्।
> ऋग्यजुःसामभिर्दग्धो वियोनिमधिगच्छति॥
> हस्तेन वेदं योऽधीते स्वरवर्णार्थसंयुतम्।
> ऋग्यजुः सामभिः पूतो ब्रह्मलोके महीयते॥

पाणिनीयशिक्षा—५४-५५।

अपि च ऋग्वेदोऽपि पुनर्ब्रूते—

> "अग्ना यो मर्त्यो दुवो धियं जुजोष धीतिभिः।
> भसन्नु ष प्र पूर्व्यं इषं वुरीतावसे"॥

ऋग्वेदः ६।१४।१।

अर्थात् यः = यो मुमुक्षुपुरुषः। अग्ना = अग्नौ। दुवः = हविः प्रक्षेपणजन्यसेवां विद्यत्ते—धियम् = बुद्धिम्। धीतिभिः = मन्त्रोच्चारणरूपस्तुतिभिः सह। जुजोष = स्वीयाऽऽचरणे योजयति। सः = समनुष्यः। पूर्व्यः = आयुषः स्वल्पोऽपि सन् सर्वेषां मुख्यभूतः। नु—

शीघ्रम् । प्रभसत् = विशेषरूपेण प्रकाशमानो भवति । सः अवसे = स्वशरीरसंरक्षणार्थम् । इषम् = भक्षणपानादिकम् । वुरीत = ग्रह्णातीति भावः ।

अपि च तत्रैव—

"परा चिच्छीर्षा ववृजुस्त इन्द्रायज्वानो यज्वभिःस्पर्धमानाः ।
प्रयछिनो हरिवः स्थातरुग्रः निराव्रतां अधमो रोदस्योः ॥

ऋग्वेदः १।३३।५।

अयमर्थः—हे इन्द्र ? = हे परमात्मन् ? यत् = यदा । अयज्वानः = यज्ञ-दान-रहिताः पुरुषाः । यज्वभिः = यज्ञदानादिसत्कर्मसम्पन्नैः सह । स्पर्धमानाः = स्पर्धां प्रकुर्वाणाः सन्तः । शीर्षा = स्वीयशिरांसि । पराचित् = अन्यस्यां दिशि विधाय । ववृजुः = गच्छन्ति । तदा । हे उग्र ? = हे उग्रस्वरूप ?, हरिवः = पापहर्तारः । स्थातः = तथा समस्तस्यापि प्रपञ्चस्यापि संस्थापनकर्तृपरमात्मन् ? । दिवः = अन्तरिक्षलोकतः । रोदस्योः = आकाश, पृथिवीतः, अर्थात् भूर्भुवः स्वः—एतेभ्यस्त्रिभ्यो लोकेभ्यः । अव्रतान् = यज्ञ, दान, व्रतादिरहितान् पुरुषान् । अधमः = अधोयोनिषु । प्र निः = तान् दुःखात्मक-योनिषु यातय ।

अपि च शिशुपालवधमहाकाव्ये समागतां यज्ञसम्बन्धिनीं दार्शनिकीं दृष्टिं पुष्टी-करोति यजुर्वेदः—

"अग्ने ? व्रतपते व्रतं चरिष्यामि तच्छकेयं ।
तन्मेराध्यताम् । इदमहमनृतात् सत्यमुपैमि ।

यजुर्वेदः—१-५ ।

अर्थात् अग्ने ? = हे अग्निदेव ? = हे ज्योतिः स्वरूपपरमात्मन् ? व्रतपते ? = हे यज्ञ, दान, सत्यादिव्रतानां स्वामिन् ?, अहम् । इदं व्रतम् = इदं यज्ञ, दानादिरूपं व्रतम् । चरिष्यामि = करिष्यामि । तत् = तद् व्रतमहम् । शकेयम् = पूर्णं कर्तुं शक्नोमि । मे = मम । तत् = तद् यज्ञम्, तद्व्रतम् । राध्यताम् = साधयतु भवान् । येनाऽहम् । अनृतात् = मिथ्यासंसारात् । सत्यम् = सत्यस्वरूपं तद् ब्रह्म "सत्यंज्ञानमनन्तं ब्रह्म" इति श्रुतिप्रति-पादित् । उपैमि = प्राप्नोमि । एतेनापि खलु दार्शनिकदृष्टिसमन्वितस्य यज्ञ-व्रतादिरूप-सत्कर्मणां परपरया सत्यस्वरूपपरब्रह्मणः प्रापकत्वं सूच्यते निरूच्यते च ।

एवमन्यत्राप्युपनिषदि—"ब्रह्माप्येति सनातनम्" ।

नारदपरिव्राजकोपनि०—३।५१।

अर्थात्—यज्ञस्वरूपदार्शनिकदृष्टि सम्पन्नाः पुरुषाः सनातनं परं ब्रह्म परमात्मानं प्राप्नुवन्ति ।

परन्तु ये सन्ति यज्ञविरोधिनोऽयज्ञाः पुरुषाः विषयासक्ता यज्ञानुष्ठानविधानशून्या-स्तद्विधुराः सर्वथा श्रद्धा-भक्तिभावप्रभावविरहिताः सन्तस्तेषां कृते स्वल्पसुखप्रदान-कर्तृमनुष्यलोकोऽप्ययं न मिलति, तदा पुनः साधनविशेषसमन्वितस्वर्गमोक्षादीनां प्राप्तिः कथं स्यादिति तु स्वयमेव विदाङ्कुर्वन्तु भवन्तः । इत्यतस्तेऽयज्ञाः पुरुषाः पौनः पुन्येन

जननं, मरणं, जननीजठरेशयनरूपं महादुःखं प्राप्नुवन्तः खलु नीचयोनिं गच्छन्ति, आसुरीं योनिं सम्प्राप्नुवन्ति । यथोक्तम्—

"असुर्या नाम ते लोका अन्धेन तमसाऽऽवृताः" ।

ईशोपनि० ३ ।

इत्थञ्च दार्शनिकदृष्टि सम्पन्नया तुलनात्मिकया दृष्ट्या विचार्यमाणे सतीदमेवाऽत्र समागच्छति यद् वेद, गीतोपनिषदामत्र यत्रविषये सर्वथा सुतरामैकमत्यं निर्वहति । तत्र गीतायां स्वयमेवोक्तवान् नन्दनन्दनो भगवान् कृष्णः यत्—

यज्ञदानतपः कर्म न त्याज्यं कार्यमेव तत् ।
यज्ञो दान तपश्चैव पावनानि मनीषिणाम् ॥

गीता—अ० १८ श्लो० ५

अर्थात् श्रौत-स्मार्तलक्षणलक्षितयज्ञात्मकसत्कार्याणाम्, तथा स्वस्वत्वनिर्वृत्ति-पूर्वकपरस्वत्वापादनुरूपदानात्मक पवित्रकार्याणाम्, एवम्—

विधिनोक्तेन मार्गेण कृच्छ्र चान्द्रायणादिभिः ।
शरीरशोषणं प्राहुस्तपसां तप उत्तमम् ॥

सर्वदर्शनसं०—पृ० ३६७ पातं०

इत्यादिलक्षणलक्षितानाञ्च तपसां धर्मजनकीभूतानां पुण्यकर्मणां परित्यागो नैव विधेयः । केचन स्वाध्यायस्यैव 'तपः' पदजन्यबोधविषयतां वदन्ति । इदमपि स्वाध्याय-रूपं तपः सर्वथाऽत्याज्यमेवेति मन्तव्यम । यतस्तावद् यज्ञ, अध्ययन, दानेतित्रयाणां धर्म-स्कन्धत्वेन त्रय एव गृहस्थधर्माः प्रोच्यन्ते ।

एवं यज्ञदानतपोलक्षणं त्रिविधं नित्यं वैदिकं कर्म मुमुक्षोर्गृहस्थस्य तथा वैराग्यं गतस्य विरक्तस्य नहि कदापि त्याज्यमेव । परन्तु सनातनत्वात् पुरुषार्थकारणीभूत-त्वाच्चाऽवश्यमेव कार्यम्, अकरणे प्रत्यवायः सिद्ध्यति । अतः सन्ध्योपासनादिनित्यकर्मवत् श्रद्धा, विश्वासपूर्विकया भक्त्या त्रिविधान्यपि यज्ञदानतपोलक्षणानि कर्माणि सात्त्विका-न्यवश्यमेव नियमेन सेवितव्यानि । तान्यपि च निष्कामभावनयैव विधेयानीति शास्त्रं ब्रूते-यथा—

एतान्यपि तु कर्माणि सङ्गं त्यक्त्वा फलानि च ।
कर्तव्यानीति मे पार्थ ? निश्चितं मतमुत्तमम् ॥

गीता० १८।६।

अर्थादेतानि त्रीणि कर्माणि प्रागुक्तानि यज्ञदानतपोलक्षणलक्षितानि सर्वदा सर्वथा च समाचरितव्यानि, तान्यपि फलाशां फलाभिलाषां विहायैवाऽन्यथा फलाभि-सन्धियुक्तानि तानि बन्धायैव भविष्यन्ति नहि मुक्तयेऽपीति शास्त्रसिद्धान्तः । इत्थञ्च तेषां चित्तशुद्धिद्वाराऽभीष्टः मुक्तिहेतुत्वाच्च श्रेष्ठतमत्वं निर्धार्यते इति तु परमार्थः ।

वेद, गीतोपनिषत्सु, अन्यत्रापि च धार्मिकग्रन्थेषु सर्वत्रैव खल्वैकमत्येन यज्ञदानत-पोरुपाणां सत्कर्मणामनुष्ठानं, सेवनमितिकर्तव्यता च विधेयत्वेन वर्णिताचास्ति । अतएवैद्-बलमाश्रित्य ते यज्ञ, दान, व्रतादिसत्कर्मानुष्ठानपरायणाः यतयो योगिनश्च सच्चिदानन्देति-

स्वरूपलक्षणलक्षितस्य तस्य भगवतः श्रीकृष्णचन्द्रस्य चरणशरणं प्राप्नुवन्ति प्राप्नुवन्ति-स्म चेत्यत्र नास्ति लेशतोऽपि सन्देहानध्यवसायावसरः।

ये च सन्ति खलु यज्ञविरोधिनोऽयज्ञाः पापाचार, दुराचार, मिथ्याचार, व्यभि-चारपरायणाः पुरुषास्ते नात्र नापि च परत्र सुखविषयिणीमनुभूतिं प्रकुर्वाणा लक्ष्यन्ते। तदेवोक्तम्—

"नायं लोकोऽस्त्ययज्ञस्य कुतोऽन्यः कुरुसत्तम ?"

गीता—अ०४, श्लोक ३१

वेदोऽपीदमेव समर्थनं कृतवान् यद् यज्ञ, दान, व्रतादिसमनुष्ठानविधानशीलाः व्रतादिसमनुष्ठानविधानशीलाः सात्त्विका यज्ञशिष्टामृतभुज अत एव यज्ञक्षपितपापात्मनस्ते पुरुषाः सुखिनो निरामयाश्च सन्तः परत्रापि तथाविधा एव ते सर्वथा स्वीयं सुखमयं जीवनं सुजीवनतया यापयन्ति।

यथोक्तम्— "अग्निहोत्रं च श्रद्धा च वषट्कारो व्रतं तपः।
दक्षिणेष्टं पूर्तं चोच्छिष्टेऽधिसमाहिताः" ॥

अथर्ववेदः—११।७।९

अर्थात् अग्निहोत्रम् = अग्निहोत्रहवनम्। श्रद्धा = फलावश्यंभावनिश्चयात्मिका। "यथा केशवः श्रद्धया गम्यो ध्येयः पूज्यश्च सर्वदा"।

अग्निपुराणे—

'वेदादिबोधितफलावश्यम्भानिश्चयः श्रद्धा' इत्यपि केचन मनीषिणो वदन्ति। तथा चोक्तम्— "प्रत्ययो धर्मकृत्येषु तथा श्रद्धेत्युदाहृता।
नास्ति ह्यश्रद्दधानस्य धर्मकृत्ये प्रयोजनम्" ॥ वाचस्पत्यम्—

वषट्कारः=हवनीयसत्रान्ते प्रोच्चारितो वषट्कारः। यथा—"वषट्कारं गृणन् द्विजः"—भागवतस्य—९ स्कन्धे—व्रतम् = भक्षणविशेषनियमः, धर्मकारणीभूतोपवासादि-नियमविशेषे वा। सम्यक्संकल्पजनितानुष्ठेयक्रियाविशेषरूपम् व्रतम् इत्यपि व्रतलक्षणं भवितुमर्हति। अत्र व्रतशब्देन व्रतत्वावच्छिन्नस्य व्रतमात्रस्य ग्रहणञ्चास्तीति मे मतिः। तपः = प्रागुक्तम्, वेदितव्यम्। दक्षिणा = यज्ञान्ते दीयमानं धनादिरूपं द्रव्यम्। इष्टम् = इच्छाविषयत्वम् = इच्छाविषयीभूतेष्टात्मकयागादिरूपम्। पूर्तम् = पूर्तयज्ञः।

इमानि सर्वाणि विशुद्धिं गतत्वात् सर्वथा पवित्रकार्याणि सर्वदा उच्छिष्टे = पर-ब्रह्मपरमात्मनि वेदे च, अधिसमाहिताः = स्वस्थितिमापन्नानि भवन्तीतिशेषः।

त्यागसंन्यासशब्दार्थयोः सादृश्यं वदन्ति

इदानीं प्रकरणसङ्गतिवशात् संन्यासशब्दार्थो निरूप्यते। संन्यासत्यागयोश्चास्ति सादृश्यम्। तत्र चास्ति विदुषां पारस्परिको मतभेदः यथा—केचन विद्वांसो दार्शनिकाः काम्य-निषिद्धकर्मणोः परित्यागमेव संन्यासं कथयन्ति। केचिच्च विद्वांसः सर्वकर्मफल-त्याग एव चास्ति संन्यास इति च वदन्ति। अपरे च दोषावच्छिन्नकर्महानमेव संन्यासं ब्रुवन्ति। अन्ये च दार्शनिका विद्वांसो गृहे सन्तिष्ठमानस्य गृहस्थस्य काम्यकर्मपरित्याग एव संन्यास इत्यपि संन्यास लक्षणं प्रस्फोरयन्ति।

इत्थञ्च दार्शनिका विद्वांसस्त्यागसंन्यासशब्दार्थयोः सादृश्यं दर्शयन्तो ब्रुवन्तश्च नैक्यं प्रतिपादयन्ति, सादृश्यस्य भेदघटितत्वेन नैक्यं भवितुं प्रभवति नापि प्रभविष्यति च ।

सादृश्यं हि तद्भिन्नत्वेसति तद्गतभूयोधर्मवत्त्वम् । अपरे च असाधारणान्यतद्वत बहुधर्मवत्त्वमेव सादृश्यमित्यपि वदन्ति । यथा चन्द्रवन्मुखम्, गोसदृशो गवयः, इत्यादौ चन्द्रनिरूपितं सादृश्यं मुखे, तच्च सादृश्यं चन्द्रगवाऽऽल्हादकत्वादिरूपम् बोध्यम् । एवमग्रेऽपि । तथा चोक्तम्—

सामान्यान्येव भूयांसि गुणा-तुल्या-वयवकर्मणाम् ।
भिन्नप्रधानसामान्यव्यक्तं सादृश्यमिष्यते ॥

चिन्तामणिप्रकाशः—

इदादीं पुनः प्रकृतमनुसरामः—यद् यज्ञ, दान, तपसां विशुद्धिगतानां पवित्रकार्याणां परित्यागो नैव कदाचित् कथञ्चिद् विधेय इत्युक्तं प्राक् ।

एतेषामेव यागादिपवित्रकार्याणां विधेयत्वमपरित्यागित्वञ्च धर्मराजयुधिष्ठिरोक्तिमनुवदन् दर्शितवान् 'माघः' स्वीये शिशुपालवधनामके महाकाव्ये । यथा—

याज्यया यजनकर्मिणोऽत्यजन्-
द्रव्यजातमपदिश्य देवताम् ।

शिशुपालव० १४।२० ।

अतस्तेषां प्रागुक्तानां सात्त्विककर्मणां विधानमेव सम्यक्, यतः प्रागुक्तधर्मस्कन्धभूतानीमानि त्रीण्येव सन्ति खल्वनुष्ठेयत्वेन वर्णितानि । 'धर्मान्न प्रमदितव्यम्' 'स्वाध्यायान्न प्रमदिव्यम्' इत्यादिप्रमाणभूतधार्मिकवचनानुरोधात् तेषां त्रयाणां सत्कार्याणामहेयत्वं सुस्पष्टमेव सिद्ध्यति ।

तत्रापि वक्ष्यमाणद्वादशविधयज्ञानां मध्येऽयं श्रौतस्मार्तरूपो यज्ञः पारिभाषिको गीयते । दानञ्च स्वस्वत्वनिवृत्तिपूर्वकपरस्वत्वापादनम् । तपश्चास्ति प्रकृते स्वाध्यायरूपम् । तच्च तपोनिष्ठं तपस्त्वं यदि स्वाध्यायनिष्ठं स्यात्तदा तपः शब्देन शास्त्राध्ययनमपि गृहीतुं शक्यते ।

तच्च कर्म त्रैविध्यमापन्नत्वेन त्रिविधं भवति, वेदोक्तत्वात् वैराग्यमापन्नस्य विरक्तस्य, मोक्षविषयिणीच्छावतो मुमुक्षोः तथा गृहकार्ये समासक्तस्य गृहस्थस्यापि चावश्यमेवाऽनुष्ठेयमस्ति न तेन तत् कदापि त्याज्यम् । यत एवान्येन प्रागुक्तानि त्रैविध्यमापन्नानि कर्माणि सर्वथा विशुद्धिं गतानि तथाऽन्तः करणनिष्ठपावनत्वजनकी भूतानि सकलकल्मषक्षयकराणि तद्द्वारा च ज्ञानस्य ज्ञानफलस्य च जगद्बन्धननिवृत्तिरूपस्य मोक्षस्य हेतुभूतानि भवन्तीत्यत एवोक्तम् 'न त्याज्यं कार्यमेव तत्' इति ।

'यावज्जीवमग्निहोत्रं जुहोति' इति श्रुत्यनुसारतो यावज्जीवनकालपर्यन्त मग्निहोत्रहवनं विधेयम् । 'सायं प्रातरग्निहोत्रं जुहोति' इत्यनेनापि श्रुतिवाक्येन तस्य त्रैविध्यमापन्नस्य कार्यत्वमेव समागच्छति न तु त्याज्यत्वमपीति भावः ।

अपि च भगवान् मनुरपि प्राक्कथनस्यैव समर्थनं सम्पुष्टिञ्च विधत्ते । तथाहि—

'वेदोदितं स्वकं कर्म नित्यं कुर्यादतन्द्रितः' । म० स्मृ० ४।१४

अर्थात् वेदोदितम् = वेदोक्तम्, स्वकम् = स्वीयं यागादि रूपं कर्म अतन्द्रितो भूत्वा श्रद्धा, विश्वास साहित्य।वच्छिन्नया भक्त्याऽवश्यमेवाऽनुष्ठेयम् । यथा चोक्तम्—

'सायं प्रातरग्निहोत्रं जुहोति'

तदपि च निष्कामभावनया = ईश्वरार्पणबुद्धया चाऽनुष्ठेयमिति ।

त्याज्यत्वपक्षेऽपि प्रोक्तम् 'तत्त्यागी पतितो भवेत्' । अतः पतनभिया तत्त्यागो न युक्त इत्यवधेयम् ।

व्यतिरेकपक्षेऽपि स्वयं दोषमाह—'अकृत्वा वैदिकं वाक्यं प्रत्यवायी भवेन्नरः'—स्मृतिः—

कर्मणां नैष्कर्म्यकथनम्

राज्ञोधर्मराजयुधिष्ठरस्य यज्ञादिसत्कर्मानुष्ठाने केवलं प्रधानत निष्कामभावनैवाऽऽसीत । यतः—देवतोद्देशेन द्रव्यत्यागो याग इति यागलक्षणमनुसृत्य द्रव्योद्देशेन द्रव्यत्यागरूपयागविधानपरो धर्मराजो राजा युधिष्ठिरः ,सर्वेऽपि यज्ञमण्डपस्था देवताः सुप्रसन्ना भवन्तु 'इत्येवंभूतां कामनारहितां भावनामनुस्मरन् निष्कामभावनाभावितान्तः करणः सन् यागानुष्ठानपरायण आसीत् । सापि च यागानुष्ठानपरायणता केवलं सच्चिदानन्दस्याऽऽनन्दकन्दस्य भगवतः श्री कृष्णचन्द्रस्याऽऽदेशानुरतो जाता । आसीच्चयायमादेशः—

तत्सुराज्ञि भवति स्थिते पुनः कः क्रतुं यजतु राजलक्षणम् ।
उद्धृतौ भवति कस्य वा भुवः श्री वराहमपहाय योग्यता ॥

शिशु पालवधे—सर्ग १४, श्लो० १४

अर्थात् तत् = तस्मात् कारणात् । सुराज्ञि = प्रजासंरक्षणादि गुणगणावच्छिन्नत्वाद् विशुद्धे त्वयि क्षत्रियत्वधर्मावच्छिन्ने भवति पुरः स्थितेसति कोऽस्ति भवदन्यो यो राजलक्षणं क्रतुं राजसूयनामकं यजतु राजाराजसूयेन यजेत् । 'राजाधिकारतायाः श्रावणप्रत्यक्षविषयीकरणात् राजा वर्तसे त्वमेव युधिष्ठिरः । एवम्भूतं भगवतः समादेशरूपं वाक्यं शिरोधार्य राजा धर्मराजो युधिष्ठिरः फलाभिसन्धिरहितो जायमानो नित्यनिरन्तरब्रह्मनिष्ठापूर्वकः सन् सर्वथा क्षेमङ्करे चाऽभ्युदयविधायके यागात्मके पवित्रकार्ये मुदमुद्वहन् सहकारिकारणसम्पत्त्या सन्तुष्यन् क्रतुं कर्तुमुद्युक्तवान् ।

विदेहापरपर्यायभूतो यो जनकस्तदादयोऽपि अश्वपतिभगीरथप्रभृतयो राजानो हि क्षत्रियत्वधर्मावच्छिन्नाः सन्तः श्रौतस्मार्तकर्मानुष्ठानेनैव चित्तशुद्धिमन्तःकरणपावित्र्यञ्च विज्ञाय समनुप्राप्य च संसिद्धिं प्राप्तवन्तः, अर्थात् मुक्तिरूपां सिद्धिं सम्प्राप्य तेऽपि कृतार्थतां गताः श्रूयन्ते; एवमेव प्रकृतेऽपीति भावः । तथा चोक्तम्—

'कर्मणैव हि संसिद्धिमास्थिता जनकादयः'

गीता—अ० ३। श्लो० २० ।

अपि च पुनः—'ज्ञानादेव हि कैवल्यम्' इत्यनेनेतरव्यावृत्तिपूर्वकं ज्ञानमेव चास्ति साक्षान्मोक्षसाधनमिति न कर्मणो मोक्षसाधनतेति 'भक्षितेऽपि लशुने न शान्तो व्याधिः' ।

तत्र समाधीयते 'सत्त्वशुद्धौ ध्रुवा स्मृतिः' इत्यर्थकश्रुत्याऽन्तःकरणशुद्धिमन्तरा नहि ज्ञानोदयः कदाचित् कथञ्चित् संभवतोऽत्यन्तःकरणविशुद्धिर्नितान्तमावश्यकी । सा

चाऽन्तःकरणशुद्धिर्यज्ञ, दान, तपः प्रभृतिसत्कर्माऽनुष्ठानं विना नहि संभवति। तथाचोक्तम्—

'ब्राह्मणा विविदिषन्ति यज्ञेन दानेन'। —गीता शङ्करानन्दी

एतस्माद्धेतोर्मोक्षेच्छां प्राप्तवतो मुमुक्षोर्यतेर्योगिनो वाऽज्ञातात्मतत्त्वस्याऽवश्यमेवाऽन्तःकरणशुद्ध्यर्थं श्रौतस्मार्तप्रभृतिसात्त्विकं यागादिकं कर्म कर्तव्यम्। यतस्तेषां नित्यानां श्रौतस्मार्तप्रभृतिकर्मणामनाचरणात् ब्रह्मात्मनाऽवस्थानलक्षणां मुक्तिं नहि प्राप्नोति नापि प्राप्तुमर्हति साधनाभावात्, साधने सत्येव साध्यं सिद्ध्यति। अतएवोक्तम्

तस्मादात्माक्षरः शुद्धो नित्यः सर्वगतोऽव्ययः।
उपासितव्योमन्तव्यः श्रोतव्यश्च मुमुक्षुभिः॥

अद्भुतरामायणम्—

अपि च—नित्यनैमित्तिकयोरेव कुर्वाणो दुरितक्षयम्।
ज्ञानं च विमलीकुर्वन्नभ्यासेन च वासयेत्॥
अभ्यासात् पक्वविज्ञानः कैवल्यं लभते नरः। —श्रुतिः

अन्यच्चापि—'ज्ञानमुत्पद्यते पुंसां क्षयात् पापस्य कर्मणः'!

महाभारत—शान्तिपर्व २०४।८।

तत्र महापातक, उपपातक, तत्सम, सङ्करीकरण, मलिनीकरणप्रभृतीनामुक्तानामनुक्तानाञ्च सर्वेषां समस्तानां व्यस्तानां येऽनुष्ठानं कुर्वन्ति तेषां पापकुर्वाणानां पापिनामपारपापार्णवं तर्तुं केवलमस्ति साधनीभूतो ज्ञानप्लवरूप उपायस्तदतिरिक्तो नास्ति कश्चन उपायः। परन्तु तेषां पापिनां पापात्मककर्मक्षयकारणीभूतश्चास्ति श्रौतस्मार्तरूपो यज्ञयागादिः। सोऽपि सोपानक्रमेणैवाऽन्तःकरणशुद्धिद्वारा पापात्मककर्मक्षयकारणीभूतो भवितुं प्रभवति। तथा चोक्तम्—

यथाऽचिरात् सर्वपापं व्यपोह्य।
परात् परं पुरुषं याति विद्वान्॥ —कैवल्योपनि० १।१।

अर्थात् विद्वान् = ज्ञानवान् पुरुषः श्रौतस्मार्तयज्ञयागादिरूपसत्कर्मणा सत्त्वशुद्धिद्वारा सोपानक्रमेणैव प्रागुक्तदिशा शतकोटिकल्पार्जितं भूतं भवच्च भविष्यच्चाऽखिलमेव पुण्यपापादिरूपं व्यपोह्य परमपुरुषं परात्परं ब्रह्म प्राप्नोति।

अत्र मनुरपि ब्रवीति—

वेदोदितं स्वकं कर्म नित्यं कुर्यादतन्द्रितः।
तद्धि कुर्वन् यथाशक्ति प्राप्नोति परमां गतिम्॥

मनुस्मृतिः—४।१४।

भगवान् मनुरपि कैवल्यप्रभृत्युपनित्सु प्रोक्तमेव विषयं पुष्टीकरोति, स्वीकरोति च सोपानक्रमबद्धां श्रौतस्मार्तयज्ञयागादिरूप सत्कर्मपरम्पराम् इति।

अपि च— 'वेदोक्तमेव कुर्वाणो निःसङ्गोऽर्पितमीश्वरे।
नैष्कर्म्यां लभते सिद्धिम्॥

श्रीमद् भागवते—११।३।४६।

एतेनापि तपोरूपाणि दानात्मकानि प्रायश्चित्तरूपाणि वा तथा वाजपेयराजसूयाश्वमेधलक्षणलक्षितानि सन्ति यज्ञयागादि स्वरूपाणि पवित्रकर्माणि तानि सर्वाण्येव निष्कामभावनया समाचरितव्यानि । तेन ब्रह्मात्मनाऽवस्थानरूपां ज्ञानात्मिकां सिद्धिमवश्यमेव लभते इति तु परमार्थः ।

अपि च— वेदैश्च सर्वैरहमेव वेद्यो—
वेदान्तकृद्वेदविदेवचाहम् । गीता १५ । १५ ।

सर्वे वेदा यत् पद्मानन्ति तत् पद्मिद्मास्ति कठोपनि०
वेदैरनेकैरहमेवेवेद्यः कैवल्योपनि० ।१।२२।

अर्थात् निष्कामभावनाभावितान्तः करणाः सन्तः एव खलु स्वीयेतिकर्तव्यतां परिपालयन्तः, वेदोक्तं वैधम्, नित्तं; नैमित्तिकञ्च कर्म समाचरन्तः श्रद्धाभक्तिभ्यामीश्वरार्पणबुद्ध्या नित्यनिरन्तरनिष्ठावन्तः सन्तो मुमुक्षवो वा यतयो वा योगिनो वा भवेयुस्ते सर्वेऽपि वेदविहित श्रौतस्मतिकर्मानुष्टानेनैव चित्तशुद्धिं समवाप्यैव ब्रह्मनिष्ठां वेद्यतां सर्वैरेव वेदैः परिचिन्वति ।

अपि च— सर्वे वेदा यत् पद्मानन्ति तत् पद्मिद्मस्ति
"निष्कलं निष्क्रियं शान्तम्"—श्वेताश्व० ६।१९।

"नित्यं शुद्धं बुद्धं मुक्तं सत्यं सूक्ष्मम ।
परिपूर्णमद्वयं सदानन्दचिन्मात्रम् ॥ नृसिंहहोत्तरतापनी योप० ९
"नेतरे माययावृताः" ।—अन्नोपनि० ४।३६।

सर्वानर्थंकरी गुणमयी परमेश्वरशक्तिभूता प्रभूता चेयं माया सम्मोहयति, विडम्बयति, निर्भर्त्सयति, कदाचिच्च रमयति कालान्तरे विषादयति च । इयमेव चाऽविद्यापरपर्यायभूता प्रभूता त्रिगुणात्मिका मायाऽनात्मन्यात्मत्वभ्रमेण सम्मोहितान् संसारदुःखाग्निना सन्ताप्यमानान भ्रमान्धकारेऽज्ञानान्धकारे च पातयतीति किं किं न समाचरति । अतएवेयं माया चास्ति सर्वथाऽनिर्वचनीया मिथ्याभूता सनातनीचेति गीयते । अनयैव माययाऽऽवृता जना नित्यम्, शाश्वतं निर्विशेषं वरं ब्रह्म नहि प्राप्नुवन्ति । तथाचोक्तं—

"अज्ञानचक्षुर्नेक्षेत भास्वन्तं भानुमन्धवत् ।" वराहोपनि०—१।:९।

इयमेव प्रागुक्ता महत्यद्भ्रता माया चास्ति-"अज्ञानचक्षुःस्वरूपे" ति मन्तव्यम् । वेदोऽपि साक्षाद्ब्रूते—

गर्भे नु सन्नन्वेषामवेदहम् देवानां जानिमानि विश्वा ।
शतं मापुर आयसीररक्षन्नध: श्येनो जवसा निरदीयम् ॥ ऋग्वेदः ४।२७।१।

अयमर्थः—हे अल्पज्ञात्मन् ! अहम् = सर्वशक्तिन् सर्वज्ञोऽहं परमात्मा । नु = निश्चयेनैव । एषाम् = देवानां । स्वस्वकृतकर्मफलेन प्रकाशानानां जीवानां । गर्भेवसन् = हृदयेनिवसन् । विश्वाजनिमानि = सर्वाणि जन्मानि तेषां कर्माणि च । अनुअवेदिषम = सर्वजानामि यतो मम सेवाजन्य प्रसन्नतयैव ते ज्ञानं स्मृतिश्चोभयमेव प्राप्नुवन्ति । शतं आयसी:पुरः = लोहसदृशाः ब्रह्मान्तर्वर्तिनः सर्वेऽपि देहाः । मा = मां परमात्मानम् ।

अरक्षन् = स्वकीये हृदये धारयन् । अद्य = पुनरहं परमात्मनोंऽशभूतो जीवात्मा । श्येनः = प्रशंसनीयगतिमान् भूत्वा । जरसा = वेगेन । निरदीयम् = शरीरतो निर्गत्य आवरणरहितो भूत्वा मुक्तो भवामि ।

सर्वेऽपि वेदा इदमेव ब्रुवन्ति यत् सर्वेषामेव शरीरावच्छिन्नानां जीवात्मनां हृदये निवासं विधत्तोऽनाथनाथो जगन्नाथो परब्रह्मपरमेश्वरस्वरूपो बाबा विश्वनाथो जगन्नियन्ता बुद्ध्यादिसर्वजडपदार्थप्रकाशकः स्वयमपि प्रकाशस्वरूपः स्वप्रकाशश्च ।

इदानीमन्वयव्यतिरेकमुखेन कर्मविधानाऽविधानमाह

'श्रौतं चापि तथा स्मार्तं कर्मालम्ब्य वसेद् द्विजः ।
तद्विहीनः पतत्येव ह्यालम्बरहितान्धवत् ॥

स्मृति—

'यान्ति मद्याजिनोऽपि माम्'

ऋग्वेदः— १।५।५ ।

अर्थात् मद्याजिनोऽपि = मदर्थं यज्ञ-यागादिसकलसत्कर्मकुर्वाणा अपि, अर्थात्— मदुद्देशेन तादृशसकलसत्कर्मविधानपरा अपि भक्तिमन्तो जनाः । मामेव = सच्चिदानन्दैकस्वरूपलक्षणलक्षितम् आनन्दघनम्, परिपूर्णम्, वासनारूपया मायया विक्षेपशक्त्या ब्रह्मादिस्तम्बान्तानि सर्वभूतानि जगद्यन्त्रारूढानि भ्रामवन्तम् परमानन्दानुभूतिहेतुभूतम् तम् परमात्मानम् । यान्ति = प्राप्नुवन्ति ।

स्वयं दुःखपङ्कनिमग्नाः खलु जगदेव दुःखपङ्कनिमग्नमिति विज्ञाय आत्मनस्तस्माद् दुःखपङ्कनिमग्नात् संसारात् समुद्धारं कामयन्ते । स च समुद्धारो ज्ञानेनैव केवलं भवितुमर्हति नान्यथा न कर्मणा । यथोक्तम्—

'ज्ञानेनैव हि संसारविनाशो नैव कर्मणा' ।

रुद्रहृदयोपनिवत्—३५ ।

तच्च ज्ञानं श्रौतस्मार्तयज्ञयागादिसत्कर्मानुष्ठानेनैव चित्तशुद्धिद्वारा समवाप्यते । गुरूपदेशेन वा सत्त्वशुद्धिद्वारा लभ्यते । उक्तञ्च—

'यथा जात्यन्धस्य रूपज्ञानं न विद्यते तथा ।
गुरूपदेशेन विना कल्पकोटिभिस्तत्त्वज्ञानम् न विद्यते ॥
तद्विज्ञानार्थं स गुरुमेवाभिगच्छेत् समित्पाणिः
श्रोत्रियं ब्रह्मनिष्ठम्' ।' मुण्डकोप० १।२।१२।

अपि च—'बुद्धिप्रसादाच्च शिवप्रसादात् गुरुप्रसादात् पुरुषस्य मुक्तिः ।
सम्प्रसन्ने भगवति पुरुषः प्राकृतैर्गुणैः ।
विमुक्तो जीवनिर्मुक्तो ब्रह्मनिर्वाणमृच्छति ॥

एतेनापि शिवप्रसादात् गुरुप्रसादाद्वा उभयप्रसाद्वा सर्वेषामेव विक्षेपाणां निःशेषेण निवृत्तिरुपजायते । तत एव शीघ्रमेव निर्मलात्मनस्तस्य बुद्धिः = सर्वत्र ब्रह्मदर्शिनो प्रज्ञा प्रतिष्ठिता भवतीत्यर्थः ।

यागानां द्वादशविधत्वबहुत्वप्रकारको विचारः

'त्वत्कल्पिता एवैते यज्ञाः, न तु शास्त्रीयाः' इत्याशङ्कासमाधानायाऽऽह—यज्ञेषु कल्पितत्वं नहि कथञ्चित् कदाचित् स्वाकर्तुं शक्यते, यतस्तेषां यज्ञानां वेदेषु समुल्लिखितत्व दर्शनात् । अपि च श्रौतस्मार्तरूपतया च तेषां तथापि नहि ते कल्पिता व्याहर्तुं शक्यन्ते किन्तु प्राचीनकालीनपरम्परातः समागतत्वात्, प्राचीनाचार्यचरणैः समाहृतत्वात् । अस्माकं परमश्रद्धास्पदीभूतपरमर्षिभिः वशिष्ठविश्वामित्रप्रभृतिभिश्चाऽनुष्ठेयत्वात् वास्तविकास्ते इत्येव मन्तव्यम्. अत एव तेषामितिकर्तव्यतापि सिद्धयति । ते च यज्ञाः सन्ति बहुविधत्वेन कीर्तिता वर्णिताश्च । तथापि गीतासिद्धान्तानुसारेण द्वादशसंख्यावत्त्वेन तेषां द्वादशविधत्वञ्चाऽभ्युपगम्यते ।

भगवान् श्रीकृष्णोऽर्जुनं प्रति ब्रूते

एवं बहुविधा यज्ञा वितता ब्रह्मणो मुखे ।
कर्मजान् विद्धि तान् सर्वानेवं ज्ञात्वा विमोक्ष्यसे ॥

भगवद्गीता, अ० ४, श्लो० ३२

अर्थात् 'दैवमेवाऽपरे यज्ञम्' इत्यादिना बहुविधा यज्ञा ब्रह्मस्वरूपवेदस्य मुखेनैव ते प्रतिपादिताः सन्तीति ते यज्ञाः प्रामाणिकाः न तु कल्पिता इति स्वयमेव विदाङ्कुर्वन्तु भवन्तः ।

इत्थञ्च ब्रह्मस्वरूपवेदमुखेन प्रतिपादितेषु बहुविधेषु यज्ञेषु कतिपयाः प्रसिद्धिं गता यज्ञाः प्रदर्श्यन्ते । तथाहि—

(१) दैवयज्ञः,
(२) ब्रह्मयज्ञः,
(३) संयमयज्ञः,
(४) आत्मसंयमयज्ञः,
(५) द्रव्ययज्ञः,
(६) तपोयज्ञः,
(७) इन्द्रिययज्ञः,
(८) अष्टांगयोगयज्ञः,
(९) योगयज्ञः,
(१०) स्वाध्याययज्ञः,
(११) ज्ञानयज्ञः,
(१२) प्राणयज्ञः,

इत्येवंरूपेण परिगणितान् द्वादशसंख्याकान् ब्रह्मस्वरूपवेदोक्तान् तान् सर्वानेव यज्ञान् कर्मजान् कायिक, वाचिक, मानसिककर्मसमुत्पन्नान् विद्धि ।

ननु 'यज्ञविदो यान्ति ब्रह्म सनातनम्' इत्यनेन यज्ञानां साक्षान्मोक्षसाधनत्वेन काऽऽवश्यकता सत्त्वशुद्धिद्वारा ज्ञानायासस्येति चेन्न । यज्ञानामपि कर्मतया 'न कर्मणा न प्रजया न धनेन न त्यागेनैकेऽमृतत्वमाशुः' इत्यादिनानाश्रुतिविरोधावधारणदर्शनान्न ब्रह्मरूपनित्यफलाऽवाप्तिर्भवितुं प्रभवति प्रभविष्यति वा । इत्थञ्च तेषां श्रौत-स्मार्त-यज्ञ-

यागादीनां सत्कर्मणां शास्त्रीयानुष्ठानपरम्परां ज्ञात्वा चित्तशुद्धिद्वारा एव भवबन्धनादस्मात् सर्वथा विमोक्ष्यसे ।

अपि च—ऐन्द्राग्नप्रभृतयोऽपि सन्ति सत्कर्मविशेषा यज्ञयागादयस्तेऽपि–उच्छिष्टे= ब्रह्मणि = परमात्मनि, आहोस्वित् वेदे सन्तिष्ठन्ते इत्याह—

'ऐन्द्राग्नं पावमानं महानाम्नीर्महाव्रतम् ।
उच्छिष्टे यज्ञस्याङ्गान्यन्तर्गर्भं इव मातरि ॥'

अथर्ववेदः—१२।७।६।

अर्थात्—ऐन्द्राग्नम् = इन्द्रसम्बन्धी, अग्निसम्बन्धी चास्ति यो यज्ञः, अर्थात् इन्द्रोद्देशेन अग्नेरुद्देशेन च विधीयमानो यो यज्ञः, आहोस्वित् इन्द्रसम्बन्धीं चास्ति यो हि सूक्तः। एवम्—पावमानम् = पवनदेवोद्देशेन विधीयमानो यस्तदात्मको यागः, अथवा तत्सम्बन्धी यः सूक्तः । तथा—महानाम्नीर्महाव्रतम् = महानामवन्ति यानि सन्ति महान्ति व्रतानि, अथवा—महानामवन्तो महाव्रतशीलाश्च ये सन्ति मन्त्राः । यज्ञस्याङ्गानि = यज्ञाङ्गभूताः । ते सर्वेऽपि, उच्छिष्टे = ब्रह्मणि = परमात्मनि, वेदे वा । मातरि । अन्तर्गर्भं इव । निवसन्तीति शेषः । अन्यच्चापि श्रूयते—

'राजसूयं वाजपेयमग्निष्टोमस्तदध्वरः ।
अर्काश्वमेधावुच्छिष्टे जीवबर्हिर्मदिन्तमः ॥'

तत्रैव—१३।७।७।

अर्थात्--राजसूयम् = राजसूयानामको यागविशेषः । वाजपेयम् = वाजपेयनामको यागः । अग्निष्टोमः = अग्निष्टोमनामको यागः । तदध्वरः = स च हिंसाविरहितो यागः । अर्काश्वमेधौ = अर्कयज्ञः = सूर्ययज्ञः, अश्वमेधयज्ञश्च । मदिन्तमः = आनन्दप्रदानकर्ता । जीवबर्हिः = जीवानां संरक्षणविधानपरायणः, यज्ञः, इमे सर्वेऽपि यज्ञाः सन्ति, उच्छिष्टे = परब्रह्मणि = परमात्मनि, अथवा वेदे--वेदस्वरूपे वा परमात्मनि सन्ति सन्तिष्ठमानाः ।

एवं प्रागुक्तयज्ञव्यतिरिक्ता अपि सन्ति यज्ञास्तेऽपि खलु तस्मिन्नेव उच्छिष्टे= परब्रह्मपरमात्मनि तत्स्वरूपे वा वेदे अधि समाहिता भवन्ति । तथा चोक्तम्—

'अग्न्याधेयमथो दीक्षा कामप्रश्छन्दसा सह ।
उत्सन्ना यज्ञाः सत्राण्युच्छिष्टेऽधिसमाहिताः ॥'

तत्रैव द्रष्टव्यम्--११।७।८ ।

अयमस्ति अर्थः-अग्न्याधेयम् = अग्न्याधान, नाम्नी दीक्षा, यस्यां दीक्षायां भवति मन्त्रोपदेशः, स च दीक्षात्मको यज्ञः । छन्दसा सह = छन्दोभिः सार्धम् । कामप्रः = कामानां पूरको याज्ञः । उत्सन्नाः यज्ञाः = उत्सन्नवाच्यतां गता यज्ञाः । अथो = च । सत्राणि = उपरिनिर्दिष्टयज्ञव्यतिरिक्ता अपि यज्ञाः । उच्छिष्टे = तस्मिन्नेव परब्रह्मस्वरूपे परमात्मनि, तत्स्वरूपे वा वेदे । अधि समाहिताः = समाश्रिताः सन्तीत्यर्थः ।

एवमेतस्माद् व्यतिरिक्ता अपि श्रद्धा, दक्षिणा, वषट्कारप्रभृतयोऽपि ये सन्ति यज्ञाङ्गभूताः प्रभूता भावभूताः पदार्थास्तेऽपि तत्रैव परमात्मनि सन्ति समाश्रिता इत्याह—

'अग्निहोत्रश्च श्रद्धा च वषट्कारो व्रतं तपः ।
दक्षिणेष्टं पूर्वं चोच्छिष्टेऽधि समाहिताः' ॥ तत्रैव—११।७ ।

अयमर्थो बोध्यः—अग्निहोत्रम् = अग्निहोत्रनामकं हवनम् । च । श्रद्धा = फलावश्यम्भावनिश्चयः, वेदादिबोधितफलाऽवश्यम्भावनिश्चयो वा, यथा—'केशवः श्रद्धया गम्यो ध्येयः पूज्यश्च सर्वदा' —

अपि च—"प्रत्ययो धर्मकृत्येषु तथा श्रद्धेत्युदाहृता ।
नास्ति ह्यश्रद्दधानस्य धर्मकृत्ये प्रयोजनम्' ॥ —वाचस्पत्यम्
'सत्कृतिश्चानसूया च सदा श्रद्धेति कीर्तिता' —देवलस्मृतिः

वषट्कारः = 'वषट्' इत्यव्ययस्तत्करोतीति 'वषट्कारः' 'नमः स्वस्तिस्वाहा स्वधाऽलं वषड्योगाच्चे 'त्यनेन चतुर्थीविधायकेन सूत्रेण नमः, स्वस्ति, स्वाहेत्यादिवत् 'वषड्' योगेऽपि चतुर्थी जायते । यथा—'वषट्' इन्द्रायेत्यादौ । स च अग्निप्रक्षेपोपहित-देवोद्देश्यकत्यागः । यथा—इन्द्राय वषट् । एवम्—व्रतम् = भक्षणविशेषनियमः । पुण्य-साधनीभूत उपवासादिनियमविशेषो व्रतम् इत्यपि व्याहर्तुं शक्यते । इत्थञ्च व्रतस्य सम्यक् संकल्पजनितानुष्ठेयक्रियाविशेषरूपत्वात्तस्य प्रवृत्तिनिवृत्त्युभयात्मकत्वं सिद्ध्यति । विद्वत्पूजनादिरूपम् तथा निमन्त्रणभोजनादिरूपं तद् व्रतं प्रवृत्तिरूपं निगद्यते । शारीरिकशुद्धिजनकीभूतमुपवासादिकञ्च तद् व्रतं निवृत्तिरूपं कथ्यते ।

तपः = विधिनोक्तेन मार्गेण कृच्छ्रचान्द्रायणादिभिः ।
शरीरशोषणं प्राहुस्तपसां तप उत्तमम् ॥

दक्षिणा = यज्ञाद्यन्ते दानम् । तच्च दानं द्रव्यदानम्, गोदानम् इत्यादिरूपं विज्ञेयम् । इष्टम् = इष्टात्मकयज्ञरूपम् । पूर्तम् = पूर्तयज्ञरूपम् । इमेऽपि सर्वे यज्ञाङ्गभूताः । उच्छिष्टे = ब्रह्मणि = परमात्मनि = तत्स्वरूपे वेदे च । अधि समाहिताः = समाश्रिताः । सन्तीति शेषः ।

एतावता 'शिशुपालबध' नामके महाकाव्ये श्रीमाघमहाकविना विरचिते राज्ञा युधिष्ठिरेण भगवता श्रीकृष्णेन च—'तत्सुराज्ञि भवति स्थिते पुनः कः क्रतुं यजतु—
राजलक्षणम् १४।१४ ।

तथा—'इत्युदीरितगिरं नृपस्त्वयि श्रेयसि स्थितवति स्थिरा मम ।
सर्वसम्पदितिशौरिमुक्तवानुद्वहन्मुदमुदस्थित क्रतौ ॥ १७ ॥
शिशुपाल० स० १४ ।

इत्यादिना पारस्परिकेण संवादस्वरूपेण निरूपितेन श्रौतस्मार्तरूपयज्ञात्मकेन प्रबन्धेन यज्ञस्य सच्चिदानन्दैकरसस्वरूपस्य सजातीय, विजातीय, स्वगतभेदशून्यस्य नित्यशुद्धबुद्धमुक्तस्वभावस्याऽखण्डस्य ब्रह्मणः प्राप्तिरूपं प्रयोजनं विज्ञायैव यज्ञस्य महत्त्वमितिकर्तव्यता च प्रादर्शि । अर्थात् तादृशे यागात्मके सत्कर्मणि समनुष्ठिते सत्येव प्रत्यवायाभावः, प्रभोः प्रसन्नता, सत्त्वशुद्धिः, ज्ञानं, मोक्षश्च सिद्ध्यति ।

अतस्तादृशयागात्मकसत्कर्मणः फलाधिक्यलाभादवश्यमेव तत् नित्यम्, नैमित्तिकञ्च कर्म प्रभोः प्रसन्नतायै सत्त्वशुद्धये च फलाभिसन्धिरहितो भूत्वा समनुष्ठेयम् इत्येव भगवता श्रीकृष्णेन राज्ञा युधिष्ठिरेण च स्वीयः खलु हृदयङ्गमश्चाऽभिप्रायः प्रस्फुटीकृतः ।

इयमेव दार्शनिकी दृष्टिः क्त्वादिमका पञ्चत्रिंशच्छ्लोकैर्वर्णिता महाकविना श्रीमाघेनेत्यलमत्र पल्लवितेन ।

तमः पदार्थमादाय दर्शनिकदृष्टेर्विवेचनम्

इदानीं तमः पदार्थमादाय दर्शनिकी दृष्टिः समुद्भाव्यते महाकविश्रीमाघविरचिते शिशुपालवधनामके महाकाव्ये इति ।

तथाहि— ये चान्ये कालयवनशाल्वरुक्मिद्रुमादयः ।
तमः स्वभावास्तेऽप्येनं प्रदोषमनुयायिनः ॥

शिशुपालवधे—२।१।८।

अर्थात्—ये चान्ये सन्ति तमः स्वभावाः = तमोगुणप्रकृतिकाः = तमोगुणात्मकाः काल, यवन, शाल्व, रुक्मि, द्रुमादयो राजानः, तमोगुणस्वभाववत्त्वादेव तेऽपि प्रदोषम्= प्रकृष्टदोषयुक्तम्, तामसमेवैनं चैद्यम् = चेदिराजानम् = शिशुपालम् । अनुयायिनः = अनुगामिनो भविष्यन्तीति भावः । यथा तमः = ध्वान्तम् = अन्धकारम् । रजनीमुखम् = सायङ्कालम् । अनुयातीति भावः ।

अपि च तत्रैव पुनः—

प्रीत्यै यूनां व्यवहिततपनाः—
प्रौढ़ध्वान्तं दिनमिह जलदाः ।
दोषामन्यं विदधति सुरत—
क्रीडायासश्रमशमपटवः ॥

तत्रैव—सं० ४, श्लोक०६२।

अयमर्थः—इह = रैवतकनामके पर्वते । यूनाम् = युवतयश्च युवानश्च तेषामित्यर्थः । प्रीत्यै = प्रसन्नतायै । व्यवहिततपनाः = व्यवहितः = आवरणभूतेन प्रभूतेन व्यवधानेन व्यवहितस्तिरोहितस्तपनोऽर्का यैस्ते इत्यर्थः । सुरतक्रीडायासश्रमशमपटवः = सुरतस्वरूपाभिः क्रीडाभिर्जायमानो य आयासः = व्यायामरूपः, तज्जन्यो यः श्रमः = खेदः, तस्य शमे वारणे पटवः = शक्तिसम्पन्नाः । जलदाः = जलं ददति = प्रयच्छन्ति ये ते 'मेघा' इत्यर्थः । प्रौढध्वान्तम् = मेघस्वरूपावरणकारणात् गाढ़ान्धकारम् । दिनम् । दोषामन्यम् = रात्रिमानिनम् । विदधति = कुर्वन्ति । अर्थात् मेघा दिनमपि स्वशक्त्या रात्रिवत् प्रकुर्वन्तीति भावः ।

एतावता प्रबन्धेन तमसो महदेव महत्त्वं दर्शितम् । यच्च तमः समाश्रित्यैव मेघा अपि दिनं रात्रिवत् कर्तुं सन्ति शक्तिमन्तः । एवं तमसः समाश्रयणेनैव रज्जुरपि सर्पवदेव "अयं सर्पः" इत्येवं रूपेण भ्रमान्धकारकालावच्छेदेनैव दृष्टिगोचरीभूता भवतीत्यत्र नास्ति लेशतोऽपि सन्देहानध्यवसायावसरः इति च सर्वेऽप्यनुभवन्ति विदाङ्कुर्वन्वि च भ्रमान्धकारकालीनाः पुरुषाः ।

तमसो महत्त्वविषये किमधिकं वयं "श्रीराजेन्द्रप्रतापत्रिपाठिनो" ब्रूमहे, जगच्चराचरविश्वरूपं तदन्तर्गतांश्च सकलानपि पदार्थान् भगवान् भास्करोऽपि तमोनिवृत्तौ सत्यामेव तदव्यवहितोत्तरक्षणावच्छेदेनैव प्राकाश्यं नयति नान्यथा । मेघा अपि भगवतो भास्करस्य समाच्छादनं तमः साहाय्येनैव प्रकुर्वन्ति । तथोक्तम्—

"तमोनिवृत्तौ सूर्यस्तु यथा नान्यदपेक्षते।
तथाऽज्ञाननिवृत्तौ तु ज्ञानं नान्यदपेक्षते"॥

सूतसंहिता—

अर्थात् ज्ञानमवश्यमेव चास्ति स्वीयप्राप्तिकालावच्छेदेन ज्ञानप्रापकसाधनसापेक्षम्। परन्तु प्राप्तं ज्ञानं सूर्यवत् अर्थात् सूर्यापरपर्यायभूतः सूर्यपदाभिधेयतां गतो भगवान् भास्करो यथा तमोनिवृत्तौ नान्यत् किमपि साधनान्तरमपेक्षते, तथैव दार्ष्टान्तिकमज्ञाननिवृत्तौ नहि किमपि ज्ञानान्तरम्, ज्ञानान्तरभिन्नं वा साधनान्जरमपेक्षते।

अपि च—

"रज्ज्वज्ञानात् क्षणेनैव यद्वद्रज्जुर्हि सर्पिणी।
भाति तद्वच्चितिः साक्षाद् विश्वाकारेण केवला॥

योगशिखोपनि० ४।४।२।

इदमेव मिथ्याज्ञानापरपर्यायभूतमज्ञानं "विवर्त" शब्देनोच्यमानं सत् 'विवर्त' पदाभिधेयतां गच्छति। विवर्तश्च—

"वस्तुनः[1] स्वस्वरूपापरित्यागेन वस्त्वन्तरमिथ्याप्रतीतिः"।

यथा—अयं सर्पः' इत्यत्रेदन्त्वावच्छिन्नतया भासमानस्य रज्जुरूपस्य वस्तुनः स्वीयरज्ज्वात्मकस्वरूपाऽपरित्यागेन या सर्पस्वरूपवस्त्वन्तरेण मिथ्याप्रतीतिः = मिथ्या ज्ञानम्, सैव मिथ्याप्रतीतिर्विवर्तशब्देनाभिधीयते। एवम्—"इदं रजतम्" इत्यत्रेदन्त्वावच्छिन्नतया भासमानस्य शुक्तिरूपस्य वस्तुनः स्वीयशुक्त्यात्यकस्वरूपाऽपरित्यागेन वस्त्वन्तरेण रजतात्मकेन याऽज्ञानान्धकारात्मिका मिथ्याप्रतीतिः सा विवर्तशब्देनाभिधीयते। यथोक्तम्—

"यथा—रज्जावहेः शुक्तौ रजतस्य वा प्रतीतिः"।

अध्यात्मोप०—

अर्थात्—यथा "अयं सर्पः" इत्यत्र रज्जौ भासमानसर्पस्थले रज्जुपदार्थविषयकयथार्थज्ञानाऽजायमानत्वेन मिथ्याप्रतीत्यात्मकविवर्तस्वरूपभ्रान्तिरूपकारणवशादेव सर्पस्य तत्र प्रतीतिर्भवति। रज्जुस्वरूपेऽधिष्ठाने याथार्थ्ये ज्ञाते सति च तत्र सर्प रूपं न तिष्ठति। तथैव सर्वाधिष्ठानभूते ब्रह्मणि ज्ञाते सति प्रपञ्चो हि शून्यतां गच्छति, अर्थात् स्वसत्ताकत्वाभाववांस्तिष्ठतीत्यर्थः।

तथा चोक्तम्—

"यथा रज्जुं परित्यज्य सर्पं गृह्णाति वै भ्रमात्।
तद्वत् सत्यमविज्ञाय जगत् पश्यति मूढधीः॥
रज्जुखण्डे परिज्ञाते सर्परूपं न तिष्ठति।
अधिष्ठाने तथा ज्ञाते प्रपञ्चे शून्यतां गते॥

नादबिन्दूपनि० ४०।२६-२७।

---

१. अध्यात्मोप०—

एवम्—दिवान्धापरपर्यायभूतस्योलूकस्य कृते यथा भगवान् भास्करोपि = अन्धकार एव भासमानो भवति। तथैव परानन्दस्वरूपे स्वप्रकाशे ब्रह्मणि मोहान्धकारे पतितस्य मानवस्य कृते तमः स्वरूपं जगदेवाऽहर्निशं परिभासमानं भवति। तथा चोक्तम्—

'उलूकस्य यथा भानुरन्धकारः प्रतीयते।
स्वप्रकाशे परानन्दे तमो मूढस्य जायते॥'

आत्मप्रबोधोपनि० २५।

एतस्यैव तमसो विषये भगवान् विष्णुरपि चतुश्लोकसमन्वितभागवतद्वारा ब्रह्माणं सृष्टिकर्तारं समुपदिशति। तथाहि—

'अहमेवासमेवाग्रे नान्यद्यत्सदसत्परम्।
पश्चादहं यदेतच्च योऽवशिष्येत सोऽस्म्यहम्॥
ऋतेऽर्थं यत्प्रतीयेत न प्रतीयेत चात्मनि।
तद्विद्यादात्मनो मायां यथाऽऽभासो यथा तमः॥'

श्रीमद् भाग० २।९।३२-३३।

इदञ्चाऽहं राजेन्द्रप्रतापस्त्रिपाठी प्रागेव निर्दिष्टवान् यत् तमोऽज्ञानरूपम्, अन्धकारस्वरूपम्, उभयरूपं वेत्यपि व्याहर्तुं शक्यते, यतस्तस्य तमसो ज्ञानशक्तिविनाशकत्वात्। अत एव ते मायाजालजाज्वल्यमानाः, आभासायासभासितास्तामसाः कामरागजन्यं दर्पं, काम, क्रोध, लोभ, मोह, कापट्य, कठोरता, निष्ठुरताप्रभृतिदोषांश्च समाश्रयन्तः परमपितृपितामहलक्षणलक्षितं सर्वशक्तिमन्तं जगन्नियन्तारं परमात्मानं च प्रद्विषन्तः सत्कोटिकांश्च पुरुषान् निर्भर्त्सयन्तो विषादयन्तश्च तदीयधर्मादिकृत्येषु गुणेष्वपि च दोषानारोपयन्तः खलु पौनः पुन्येनाऽऽसुरीमेव योनिमापन्नाः सन्तोऽशुचिव्रतास्तेऽनेकचित्तविभ्रान्ताः कामभोगप्रसक्ताः खल्वधमां योनिं गतिञ्च लभमानाभवन्तीत्यत्र चास्ति शास्त्रस्यैव प्रामाण्यम्। आसुरी सर्वाऽपि सम्पद् बन्धायैव भवति नहि कदाचित् कथञ्चिन्मोक्षायापीति मन्तव्यमिति भावः।

एवं यथा—माया, मायापरपर्यायिभूता चाऽविद्या, तत्पर्यायभूतञ्चाऽज्ञानं समस्तमपि चराचरात्मकं विश्वं व्याप्य-समाच्छाद्य च सन्तिष्ठमानत्वेनाऽनुभूयन्ते च। तथैव नागयूथमलिनानीव च श्यामानि तमांसि अपि स्थावरजङ्गमात्मञ्चापि जगत् सर्वतो भावेनाऽऽच्छादयामासुः। तथा चोक्तवान् महाकविः श्रीमाघः—

पतिते पतङ्गमृगराजि निज-
प्रतिबिम्बरोषित इवाम्बुनिधौ।
अथ नागयूथमलिनानि जगत्-
परितस्तमांसि परितस्तरिरे॥

शिशुपालबधम्—९।१८।

अपि च तस्यैव तमसो पुनर्महत्त्वं प्रकारान्तरेण प्रकटयन् प्रकरणसङ्गत्याऽपि च दर्शयन् महाकविः श्रीमाघः स्वयं स्वीये महाकाव्ये 'शिशुपालवध' नामके तस्याऽन्यदपि रूपान्तरं दर्शयति। तथाहि—

व्यसरन्नु भूधर गुहान्तरतः-
पटलं बहिर्बहलपङ्करुचिः ।
दिवसावसानपटुनस्तमसो-
वहिरेत्य चाधिकमभक्तः गुहाः ॥

तत्रैव--श्लो० १९

अपि च पुनस्तत्रैव तथाविधत्वेन रूपान्तरेणापि च तमो वर्णयति दार्शनिकदृष्टि समन्वितो माघः--

ददृशेऽपि भास्कररुचाह्नि न यः-
स तमीं तमोभिरभिगम्य तताम् ।
द्युतिमग्रहीद् ग्रहगणो लघवः-
प्रकटी भवन्ति = मलिनाश्रयतः ॥

तत्रैव--श्लो० २३

यस्तावद् ग्रहगणो दिवसे भगवतो भास्करस्य प्रखरभूतयाऽपित्विषा न ददृशे स ग्रहगणस्तमोभिस्तताम् = व्याप्ताम्, तमीम् = रात्रिम् । अभिगम्य=प्राप्य । द्युतिम् = प्रकाशम् । अग्रहीत् = कृतवान् । यतस्तावत् लघवः = स्वल्पकोटिका जनाः । अधिकांशतः मलिनाश्रयतः = निष्कृष्टाश्रयणात् । प्रकटीभवन्ति ।

इदानीं तमसः सस्वरूपं कार्यं दर्शयति

गोकुलचन्द्रः श्रीकृष्णचन्द्रः स्वयं तमोविषये स्वानुभवसाहित्यावच्छिन्नं स्वाभिप्रायं दर्शयति--यदज्ञानजन्यं जन्यं तमः सर्वदेहिनाञ्चास्ति मोहगर्ते निपातनशीलमिति सर्वेऽपि विदाङ्कुर्वन्ति वेत्तारः । उक्तञ्च--

'तमस्त्वज्ञानजं विद्धि मोहनं सर्वदेहिनाम् ।
प्रमादालस्यनिद्राभिस्तन्निबध्नाति भारत ? ॥

गीता--अ० १४, श्लो० ८

अर्थात्--तमसः खलु दोषबाहुल्यतया दोषस्वरूपतया वा कार्यत्वावच्छिन्नं प्रति प्रतिबन्धकतया रजःसत्त्वाभ्यां विशिष्टत्वादुष्कृष्टत्वं निर्धार्यते । तच्चास्ति तमः सर्वथाऽज्ञानजम् इति तस्य स्वीयस्वतन्त्रसत्ताकत्वाभावेन ज्ञानीयसत्तामादायैव तत् 'सत्' इति व्याह्रियते व्यवह्रियते चेति नास्ति ज्ञानभावरूपन्तमः । यतः साधारणतयाऽभावस्य कस्याऽपि कार्यस्य जनकत्वात् ।

तच्च तमः सर्वदेहिनां ब्रह्मादिस्तम्बान्तानां स्वसम्बन्धद्धानां मोहनं विधत्ते, यतस्तमसोऽज्ञानजन्यत्वेन मोहकत्वं विज्ञेयम्, तथा शुनकादियोनिजनकत्वेनाऽधोगतिप्रापकत्वम् अथवा अधमगतिलाभकरत्वं वेदितव्यम् । एवं बुद्धिजाड्याधिक्यविधायकत्वं विपरीतप्रत्ययादिभावनाहेतुत्वञ्च बोध्यम् । अपि च तमः स्वरूपज्ञानमावृत्य नियमेन प्रमोद, कर्तव्यनिष्ठाया विस्मरणे प्रमादाऽऽलस्यादौ च सञ्जयतीति तदीयं स्वरूपं ावज्ञेयम् ।

अपि च--'तमो मूढं लयं जडम्'--श्रीमद्भा० ११।२५।१५।

अर्थात् सर्वेषामेव ब्रह्मादिस्तम्बान्तानां देहिनां सदसद्विवेकज्ञानस्य तिरोभाव-जनकत्वेन मोहनं जनयति, विवेकज्ञानस्य लयं प्रकरोति, बुद्धौ जाड्यं समुत्पादयति।

इदमेव च तमः क्रोध, लोभादिषु मिथ्यावाद, भयादिष्वप्यसत्कार्येषु तामसान् जनान् सञ्जयति। यथा चोक्तम्—

'क्रोधो लोभोऽनृतं हिंसा याञ्चा दम्भः क्लमः कलिः।
शोकमोहौ विषादार्ती निद्राऽऽशा भीरमुद्यमः'॥

श्रीमद्भाग० ११।२५।४।

अर्थात्--इमेऽपि सन्त्युपर्युक्ता षोडशपदार्थाः साक्षात्तमसः स्वरूपभूताः। इमेऽपि प्राणिनां मोहनं जनयन्ति, विवेकात्मिकां बुद्धिं विनाशयन्ति, शोकमोहौ कलहञ्चोत्पाद्य विषादयन्ति, एवं दैन्यादिदोषमयान्यन्यानि--अनित्यानि कृत्यानि समुत्पाद्य दुःखा-कुर्वन्ति। तमश्चापि स्वयं स्वरूपज्ञानमावृत्याऽनौचित्यानर्थजनकीभूतेषु प्रभूतेषु दूषितेषु सर्वथाऽसम्भावितेषु असम्भूतेषु च कार्येषु प्राणिनः सञ्जयति। अपि च—

'तमोगुणाज्जीवहिंसा कोपोऽहङ्कार एव च'।

ब्रह्मवैवर्त पु०--

अर्थाज्जीवहिंसा, तत्सत्त्वे च दयाभावस्याऽसत्त्वम्, कोपः, अहङ्कारश्चापि तमसा तमसाऽभिजायन्ते।

अत्र नन्दनन्दनो भगवानित्थमाह—

"अप्रकाशोऽप्रवृत्तिश्च प्रमादो मोह एव च।
तमस्येतानि जायन्ते विवृद्धे कुरुनन्दन?॥

गीता--अ० १४।श्लो० १३।

अर्थात्—अप्रकाशः—बुद्धेः प्रतिभाया अभावः, स्फूर्तेर्वाऽभावः। अप्रवृत्तिः = प्रवृत्त्यभावः = आलस्यमित्यर्थः। प्रमादः = कर्तव्यानवधानता। मोहः = मूढता। "च" शब्देनाऽत्र निद्रापारवश्यरूपोऽप्यर्थो ग्राह्यः। तथा मिथ्या, अभिनिवेशादयो दूषितार्थाः सर्वे तमः प्रवृद्धेः सन्ति लिङ्गभूता इति। तथा तमसि प्रकर्षेण वृद्धिं गते सति कालगाल-प्रवेशं प्राप्तवान् प्राणी तमः प्रवृद्धिवेगेन स्थावरपश्वादिलक्षणलक्षितमूढयोनिषु स्वीय-जनिलाभं विधत्ते।

अत्र भगवान् व्यास इत्थं ब्रूते—

"सीदच्चित्तं विलीयेत चेतसो ग्रहणेऽक्षमम्।
मनो नष्टं तमो ग्लानिस्तमस्तदुपधारय"॥

श्रीमद्भाग०—११।२५।१८॥

अयमर्थः—यदा चित्तं तत्तदिन्द्रियग्राह्यान् विषयान् ग्रहीतुं सीदेत् अपि च—विषयाणां ग्रहणेऽसमर्थं भवेत्, मनश्च खलु विनष्टवद् ग्लानिमापन्नञ्च भवेत्तदा तमस्तदुप-धारय। अपि च पुनस्तत्रैव—

"यदा जयेद् रजः सत्त्वं तमोमूढं लयं जडम्।
युज्येत शोकमोहाभ्यां निद्रया हिंसयाऽऽशया॥

श्रीमद्भाग०—११।२५।१५।

अर्थात् यदा मोहस्वरूपंलयात्मकं जडलक्षणलक्षितं तमः सत्त्वं रजो जयति तदाऽयं जीवः शोकमोहाभ्यां युक्तः सन् निद्रा, हिंसासाहित्यावच्छिन्नयाऽऽशया युज्यते । यथा—

"आशा बलवती राजन् ? शल्यो जेष्यति पाण्डवान्" ।

श्रुतमात्रम् महाभारते—

इति न्यायेन केवलं वस्तुनोऽभावे सत्याशामोदकमात्रेण प्रयुज्यमानस्य मानवस्येतस्ततो विचरणे तमसो हेतुत्वं बोध्यम् । अत एव तस्य जघन्यगुणवृत्तिस्थस्य तामसस्य पुरुषस्य कृते कीट, पतङ्ग, पश्वादिप्रभृत्यघोयोनेः समवाप्तिर्जायते ।
तथा चोक्तम्—

"तमसा भूततिर्यक्त्वं भ्रामितो याति कर्मभिः" ।

श्रीमद्भागः ११।२२।५१।

अपि च—

"तमोलयास्तु निरयं यान्ति"— तत्रैव —

अथर्ववेदे चाऽज्ञानं तम इत्थं वर्णितं वर्तते—

"यदि स्थ तमसावृता जालेनाभिहिता इव ।
सर्वाः संलुप्येतः कृत्याः पुनः कर्त्रे प्रहिण्मसि" ।।

अथर्ववेदः—१०।१।३०।

हे मानवा जीवाः ? यदि । जालेनाभिहिता इव = जालेन बन्धनतां गता इव । तमसा = अज्ञानान्धकारेण । आवृताः = आवरणं प्राप्ताः । स्था तदायुष्माकम् । सर्वाः कृत्याः = सर्वाणि । इतः = अस्याल्लोकात् । संलुप्य = लुप्ता भूत्वा । पुनः ।

कर्त्रे = कार्यकर्तारं पुरुषम् । प्रहिण्मसि = प्रकर्षेण नाशं न यन्तीत्यर्थः । अपि च पुनस्तत्रैव—

"मैनं पन्थामनुगा भीम एष—
येन पूर्वं ने यथ तं ब्रवीमि ।
तम एतत्पुरुष मा पन्था—
भयं परस्तादभयं ते अर्वाक्" ।।

अथर्ववेदः—८।१।१०।

अर्थात् हे प्राणधारिणो मानवाः ? मुमुक्षवोजनाः ? एतं पन्थाम् = एनं तमोगुण समन्वितं मार्गम् । मा अनुगाः = तमोगुणानुसरणं मा कुरुथ । एष भीमः = सतोऽयं तमोगुणानुसारी मार्गः महानेव भयङ्करः । येन पूर्वं न इयथ = येन मार्गेण पूर्वं ज्ञानशीलाजना नहि अगच्छन् । तं ब्रवीमि = तं तमोगुणयुक्तं मार्गं मा गच्छथ इत्यहं परमात्मा स्वयं ब्रवीमि । पुरुष ? = हे पुरुष ? । एतत् तमः = एतदज्ञानान्धकारभूतं तमः, । अर्थात् अस्तीदं अज्ञानान्धकारे प्रक्षेपकं तमः । तमः मा प्रपत्थ = अतस्तमोगुणं मा प्राप्नुथ । परस्ताद् भयम् = अस्मिन् तमोगुणे प्रस्तात् समुपस्थिते सति अस्ति पतनाद् भयम् । अर्वाक् ते अभयम् = तमोगुणतः पूर्वं सत्त्वगुणस्थस्य ते नासीत् किमपि भयम । तमोगुणस्तु सर्वथा चास्ति भयोत्पादकः ।

अत्र तमोविषये किमधिकं वयं ब्रूमहे—केवलं तमोगुणयुतस्याऽज्ञानान्धकार पतितस्य क्षत्रियत्वोचितलक्षणलक्षितयुद्धात्मककर्तव्यमार्गतो दूरं गतस्य किं कर्तव्यविमूढ़तां प्राप्तस्य तस्याऽर्जुनस्य स्वरूपेतिहासस्तमसस्तमोग्रणस्य वा साकारं निराकारञ्चोभयात्मकं स्वरूपं ब्रवीतीत्याह—

"सीदन्ति मम गात्राणिमुखञ्च परिशुष्यति ।
वेपथुश्च शरीरे मे रोमहर्षश्च जायते" ॥

गीता—१।२९

"गाण्डीवं स्रंसते हस्तात् त्वक् चैव परिदह्यते ।
न च शक्नोम्यवस्थातुं भ्रमतीव च मे मनः ॥

तत्रैव—३०

अर्थात्—अर्जुनसम्बन्धिगात्राणां शिथिलायितत्वम्, मुखस्य चास्ति यत् परिशोषणम्, शरीरात्मकाऽवयवविनिष्ठो यः कम्पः, तथा तन्निष्ठो भयसन्तापजन्यो रोमोद्गमः स एवाऽर्जुनस्य तमोगुणयुक्ततां बोधयति ॥

अपि च—गाण्डीवनामकं धनुरर्जुनस्य कथनानुसारतः हस्तात् पतितमिव प्रतीयमानं भवति तदीयसर्वशरीरवर्ति च त्वगिन्द्रियं चर्मसन्तापेन सकलं शरीरं दहति, मनोऽपि मदीयं भ्रमतीव च प्रतीयते, स्वयमहमपि खल्ववस्थातुं नैव शक्नोमीत्यपि न ज्ञायते नामि च ज्ञातुं पार्यते ॥

एतावन्मात्रेवास्ति तदीयं तत्कथनं तन्निष्ठायास्तमोगुणयुक्तताया बोधकमिति मन्तव्यम् ।

तमसि विप्रतिपत्तिः

तमस्त्वं भाववृत्तिनवेति विप्रतिपत्तिर्हि व्याहतमेकार्थदर्शनम्, विरुद्धवाक्यार्थविषयकं ज्ञानमित्यर्थः । इयञ्चापि विरुद्धवाक्यार्थविषयिणो विप्रतिपत्तिश्चास्ति संशयप्रयोजिका । विप्रतिपत्तिघटकीभूतञ्चास्ति विरुद्धं वाक्यं "पर्वतो वह्निमान्" इत्येकं वाक्यार्थविषयकं ज्ञानम्, दर्शनं वा । "पर्वतो वन्ह्यभाववान् इति चास्त्यपरम् परस्पर विरोधे ही" तिन्यायेन सर्वथाऽनवच्छिन्नौ भूत्वा नैकत्र स्थातुमर्हतः । न चास्ति क्वाप्येकत्राऽन्यतरसाधको हेतुः ।

एवं स्थिते तत्र "विशेषापेक्षो विमर्शः संशयः" इति च गौतमोक्तिर्लब्धावकाशा जायते । आहोस्वित् "तत्त्वानवधारणं संशयः" इति च वात्स्यायनकथनमपि साधु सङ्गच्छते इत्यपि वाचाव्यवहर्तुं शक्यते इति ।

"विरुद्धकोटिद्वयोपस्थापकः शब्दः" ।— गौ०वृत्तिः, १।१।२३।

इति चापि संशयलक्षणं व्यवस्थापितवान् विश्वनाथपञ्चाननः । अयञ्च शब्दरूपः सन् विरुद्धार्थप्रतिपादकवाक्यद्वयात्मकत्वेन "आत्मा अस्ति नवेति" आत्मधर्मिकम् अस्तित्व, अस्तित्वाभावविषयकं संशयात्मकं ज्ञानं जनयत्येव ।

एवं "विरुद्धार्थप्रतिपादकवाक्यद्वयम्" इत्यपि संशयलक्षणं तर्कसंग्रहस्य नीलकण्ठीं टीकायां समुपस्थापितवान् नीलकण्ठभट्टः । अस्यापि संशयलक्षणस्य शब्दसमहात्मक-

वाक्यरूपत्वेन प्राग्दर्शितसंशयजनकत्वं जनकतावच्छेदकत्वं वा संभवत्येवेति तस्य संशयाधायकत्वात्तथात्वमुपपद्यते ।

तथैव च "विरुद्धार्थकत्वाक्यद्वयजन्यप्रतीतिद्वयम्" इति । संशयलक्षणं वेदान्तिनः समुद्गिरन्ति प्रमाणपद्धतिनामके ग्रन्थे । संशयश्चेत्थं विचार दिशा निर्धारणीय इति । तथाहि--तच्च तादृशप्रतीतिद्वयं पर्वतो वह्निमान् वन्ह्यभाववान् वेति । तत्र च वादिना "पर्वतोवह्निमान्" इति प्रतिज्ञातम्, प्रतिवादिना च "पर्वतो वन्ह्यमान्" इति च प्रतिज्ञातम्, एवं स्थिते तत्र मध्यस्थस्य "पर्वतो वह्निमान् वन्ह्यभाववान् वेति संशयो जायते, स चास्त्यनुभवसिद्ध इति ।

"विरुद्धा प्रतिपत्तिः संशय इति शेषः ।-- गौ०वृ०१।२।१९।

सा च विरुद्धा प्रतिपत्तिः पर्वतो वह्निमान्, पर्वतोवन्ह्यभाव वेत्याकारिका बोध्या । तया च पर्वतो वह्निमान्नवेत्याकारं संशयात्मकमेकं ज्ञानं जन्यते इति भावः ।

विरोधो वा विप्रतिपत्तिः, ऊहो वा विप्रतिपत्तिः इति च यज्ञात्मकसत्कर्मपरायणा याज्ञिका वदन्ति ।

पश्यन्तु--कात्यायन श्रौ०

तमसो भावत्वखण्डनम्

तमो भावो वाऽभावो वेति विचार्यमाणे, अस्यां वा विप्रतिपत्तौ सत्यां नैयायिकवैशेषिकाभिमतं तमसो भावत्वखण्डनं विधीयते । तथाहि—गुणाश्रयत्वमेव द्रव्यसामान्यलक्षणम्, न तु क्रियाश्रयत्वमपि गगन, काल, दिगादि विभुभूतेषु द्रव्येष्वव्याप्तेः । गुणाश्रयत्वस्यापि गुणसमानाधिकरणद्रव्यत्वव्याप्यजातिमत्त्वे तात्पर्यं बोध्यम् । इत्थञ्च तमस्यपि गुणाश्रयत्वसत्त्वेन द्रव्यसामान्यलक्षणमक्षतमेव । उक्तञ्च—

'तस्य च रूपवत्त्वात् कर्मवत्त्वाच्च द्रव्यत्वम्'

न्या० सि० मु०—विलासिनी टीका युता पृ० ४०, पं० ज्वाला प्रसाद कृता,

तथाचाऽनुमानम्—'तमो द्रव्यम् रूपवत्त्वाद् 'रजौला' शरीरवत् इति घटवद्वा' । तत्रैव—

अपि च—'तमः खलु चलं नीलं परापरविभागवत् ।
प्रसिद्ध द्रव्यवैधर्म्यान्नवभ्यो भेतुमर्हति ॥

न्यायलीलावती

तमो न गन्धशून्यत्वात् पृथिवी, नीलरूपवत्त्वाच्च न जलादिकम् । तमसः प्रत्यक्षे आलोकसंयोगाऽसहकृतचक्षुषः, चक्षुः संयोगादिघटिसामान्यसामग्र्या वा हेतुत्वं बोध्यम् । तन्न समीचीनम् इति नैयायिकवैशेषिकादयो वदन्ति विवदन्ते चात्र बहवः ।

'द्रव्यगुणकर्मनिष्पत्तिवैधर्म्यादभावस्तमः' ।
'उद्भूतरूपवद् यावत्तेजः संसर्गाभाव इत्यर्थः'

वै० उ०—५।२।२० ।

---

१. प्रमाणपद्धतिटीका—

एवम्—स्वस्य परस्य च प्रकाशजनकीभूतं यत्तेजस्तादृशतेजस्त्वावच्छिन्नप्रति-योगिताकाभावरूपतेजः सामान्याभाव एव तमः । उक्तञ्च—

'यथा अदस्त्वया नुन्नमनुत्तमं तमः ।
आसादितस्य तमसा नियतेर्नियोगात्' ॥

माघ० सर्गः ४, श्लो० ३४

विश्वनाथपञ्चाननोऽपि—'आवश्यकतेजोऽभावेनैवोपपत्तौ द्रव्यान्तरकल्पनाया अन्याय्यत्वात्,—न्या० सि० मु०

अर्थात्—'प्रकृष्टमहदुद्भूताऽनभिभूतरूपवत्तेजस्त्वावच्छिन्नप्रतियोगिताकाऽभाव एव तमः' । तत्रैव—विलासिनी टीका

इत्थञ्च तेजसोऽभावस्तमः सिद्ध्यति । स च प्रौढ़प्रकाशकतेजः सामान्याभाव-रूपः । तेन तमोवत्यपि देशे तेजः परमाण्वादीनां विद्यमानत्वेऽपि तेजस्त्वावच्छिन्नप्रति-योगिताकाभावरूपतेजः सामान्याऽभावाऽसत्त्वेन न तमसो तेजोऽभावरूपता क्षतिकरीति नीलकण्ठभट्टोऽपि ब्रूते । अस्य वैशद्यं तर्कसंग्रहस्य नीलकण्ठीटोकायां विलोक्यताम् ।

उद्योतकराचार्यस्तु—नीलरूपाऽऽरोपविशिष्टतेजः संसर्गाभावस्यैव तमस्त्वं स्वी-कुर्वन्ति न तु तेजसोऽभावमात्रस्यैव तथात्वमिति न प्रागुक्तो दोषः ।

श्रीधराचार्यस्तु प्रभाया अभाव एवतम इति वदति । "द्रव्यगुणकर्मनिष्पत्ति-वैधर्म्यात्" इति ।—न्यायकन्दली—

इदमत्राऽवधेयमस्ति—यद् विरुद्धो धर्मो येषान्ते विधर्मणस्तेषां भावो वैधर्म्यम तस्मादित्यर्थः । अर्थात् तमसो द्रव्यगुणकर्मणाञ्च परस्परं वैधर्म्यदर्शनान्नहि तमसो द्रव्य-गुणकर्मसु कदापि निष्पत्तिर्भवितुमर्हतीति तस्याऽभावरूपतां स्वीकृतवान् श्रीश्रीधराचार्यो दार्शनिको विद्वान् ।

इदानीमयं प्रश्न समुदेति यत्तमः कस्याऽभावो येन तमसोऽभावरूपता स्वीकृता स्यादिति ?

इत्येवं विधे प्रश्न समुदीयमाने सति समाधत्ते श्री श्रीधराचार्यः यत् प्रभात्मकस्य तेजसोऽभाव एव तमः, न तु तेजः सामान्याभावरूपं तत् । तेजः सामान्याभावरूपता तमसः स्वीकारे नास्ति किमपि बलवत् बलवत्तरं वा प्रमाणम्, नापि च तत्र कामपि बलवतीं बलवत्तरां वा युक्तिमेव पश्यामः ।

केषाञ्चित् मायाङ्गीकर्तृवेदान्तिनामत्र विषये चास्तीदं मतं यत्तमो वर्तते खलु तमोलक्षणलक्षितम्, अज्ञानस्वरूपञ्च । अज्ञानञ्चाऽविद्यास्वरूपं सद् भावरूपम् । तथा चोक्तम्—

अनादिभावरूपं यद् विज्ञानेन विलीयते ।
तदज्ञानमिति प्राज्ञा लक्षणं संप्रचक्षते ॥

—सर्वदर्शन सं०

१. न्यायसिद्धान्तदीपः—पृ० ८

केचिदज्ञानस्य ज्ञानाभावरूपतां स्वीकुर्वन्ति । किन्तु वेदान्तिनस्तन्न क्षमन्ते । तेहि अज्ञानस्य भावत्वरूपतां ब्रुवाणास्तत्र प्रमाणत्वेनाऽनुमानं समुपस्थापयन्ति । तथाहि--

"विवादास्पदीभूतं प्रमाणज्ञानं स्वप्रागभावव्यतिरिक्तस्वविषयावरणस्वनिवर्त्य-स्वदेशगतवस्त्वन्तर पूर्वकम्--अप्रकाशितार्थप्रकाशकत्वात् अन्धकारे प्रथमोत्पन्न प्रदीप-प्रभावत्"--

सर्वदर्शन-सं०--

अनेनाऽनुज्ञानप्रमाणेन अज्ञानस्य भावरूपतां साधितवन्तो मायावादिनो वेदान्तिनः ।

केचिद ज्ञानं निग्रहस्थानम् इति वदन्ति तन्नास्ति खलु अविज्ञानरूपम् । तथा च सूत्रम्--

"अविज्ञानञ्चाऽज्ञानम्" ।

गौतम सू० ५।२।१८।

तत्रेत्थं परिष्करोति वात्स्यायनः--विज्ञातार्थस्य परिषदा प्रतिवादिना त्रिरभि-हितस्य यदविज्ञानं तदज्ञानं निग्रहस्थानमिति--

वात्स्यायनभा० ५।२।१८।

अपि च तमसोऽज्ञानरूपतापक्षे भगवान् मनुरप्याह—

"सत्वं ज्ञानं तमोऽज्ञान रागद्वेषौ रजः स्मृतम् ।"

मनुस्मृतिः—१२।२६ ।

अपि च—"प्रमादमोहौ तमसो भवतोऽज्ञानमेव च ।"

गीत—अ० १४, श्लो० १७

अर्थात् तमसः = तमोगुणाऽऽविर्भावितः, प्रमादमोहौ जायेते । एवम् तमसोऽज्ञानम् बुद्धिजाड्यम्, इदिकर्तव्यतानभिज्ञत्वञ्चापि जायते । तमसस्तमोगुणनिष्पन्नस्य तस्य शास्त्रीयविधिविधानशून्यस्य, श्रद्धानियमविहीनस्य तामसस्य तमस्त्वावच्छिन्नयुतस्याऽ-ज्ञानं भोक्तृभोग्यगुणरसज्ञानशून्यं निद्रामयं सुखमेव फलत्वेन निरूपितवन्तः ।--अपि च—

"अप्रकाशोऽप्रवृत्तिश्च प्रमादो मोह एव च ।
तमस्येतानि जायन्ते विवृद्धे कुरुनन्दन ? ॥

गीता—अ० १४ । श्लो० १३ ।

अर्थात् तमसि = तमोगुणे = अज्ञाने, निवृद्धे = वृद्धि गते सति । अप्रकाशः = बुद्धेः प्रतिभाभावभास्वरभूतायाः स्फूर्तरभावः = अज्ञानमिति यावत् । अप्रवृत्तिश्च, प्रमादो मोह च समुत्पद्यन्ते ।

"या चास्ति मोहात्मकता तत्तमः" । —सर्वद० सं० सांख्यम०

इमानि खलु प्रागुक्तानि उपर्युल्लिखितानि च सर्वाण्येव सन्ति तमोवृद्धेर्लिङ्गानि इति मन्तव्यम् ।

एतावता प्रबन्धेन तमसोऽप्रकाशस्वरूपताकथनेन प्रकाशो ज्ञानम्, अप्रकाशश्चाऽज्ञानम् अतस्तमसोऽप्रकाशत्वकथनेन अज्ञानरूपता सिद्धयति । इत्थञ्च प्रकाशस्याऽऽलोकरूपतया अप्रकाशस्व रूपस्य तमसोऽभावत्वकथनम्, तेजोऽभावत्वकथनं वा सर्वथा साधु सङ्गच्छते । तेन च तमसो नास्तिभावरूपता, किन्तु तदीयाऽभावरूपता सुस्पष्टैवेति । मे राजेन्द्रप्रतापस्य त्रिपाठिनस्तमसोऽभावरूपताविषयकाऽनुभूतिस्तेजोऽभावविषयिण्यनुभूति र्वा सर्वथा चास्ति प्रामाण्यावगाहिनी ।

अत एव—'आलोकाऽभावस्तम इति नैयायिकाः' ।

सर्वदर्शन सं० औलूक्यद० पृ० २२९

एतेन नैयायिकवैशेषिकप्रभृतिदार्शनिकानां तमसोऽभावरूपताङ्गीकर्तॄणां तमसोऽभावत्वकथनं सर्वथा श्रेयस्करत्वेन प्रतीयमानं भवतीति तमोऽभावस्तेजोऽभाव इत्यर्थः ।

'आलोकज्ञानाऽभावस्तम इति प्राभाकरैकदेशिनः' । तत्रैव

'रूपदर्शनाऽभावस्तमः इति प्राभाकराः' । तत्रैव

मयाऽत्र विषये स्वानुभूतिवलेन विचार्यते यत् यत्रास्ति देशे तेजोऽभावस्तत्रैव देशे 'तमः' इति व्याह्रियते वाचाऽपि व्यवह्रियते च । एवं स्थिते गमनक्रियाऽऽश्रयीभूतेन द्रव्येण तेजस आवरणविधानादावरणकर्तृभूतस्य द्रव्यस्यैव तत्र गमनाश्रयत्वेन प्रतीयमानतया तदनुबन्धित्वेनैव च तत्र तमसि गतिविषयिणी भ्रान्तिरवश्यमेव जायते न तु वास्तविकगमनक्रियाश्रयीभूतं तमः ।—तत्त्वावलिः—चन्द्रकान्ततर्कालङ्कारकृता—

'तेजसो द्रव्यान्तरेणाऽऽवरणाच्च' । वैशे० सू०—५।२।२० ।

अर्थात्—गमनक्रियाश्रयीभूतेन तेन द्रव्यान्तरेणाऽवच्छिन्ने तेजसि पूर्वदेशाऽनुपलम्भात्—अग्रिमदेशे चोपलम्भस्य समनुभूयमानत्वेन तादृशतेजोऽभावस्य गतिमद्द्रव्यनिरूपितसमानधर्मदर्शनात् गमनात्मकक्रियाविभ्रमः संजायते नास्ति तत्र वस्तुतो याथार्थ्येन गमनम् । कालिकसम्बन्धेन तत्र गमनक्रियायाः सत्त्वेऽपि समवायेन तदभावात् ।

इत्थञ्च 'नीलन्तमश्चलति' इत्यत्र चलनरूपगमनक्रियाया अवास्तविकत्वेन 'नीलं गगनम्' 'नीलं नभः' इत्यादिप्रतीतिवदेवाऽस्तविकत्वं सिद्धयति सेत्स्यति चेत्य तस्तमसि नीलवत्ताप्रतीतिरपिचास्तिभ्रान्तिरूपेतिविज्ञेयम् ।

तत्र शशधरः स्वविरचिते 'न्यायसिद्धान्तदीप' नामके ग्रन्थेऽयं निम्नोल्लिखितस्तर्कोऽत्र विषये समुपस्थापितवान् । तथाहि—'तमो यदि गतिमत् स्यात् तेजोऽभावविषयकचाक्षुषसाक्षात्काराविषयो न स्यात्' इति चास्ति तर्कस्वरूपः ।

आहोस्वि'त्तमो यदि गतिमत् स्यात्तदा तेजोभावाविषयक चाक्षुषसाक्षात्काराविषयो न स्यात् इति' ।

अथवा—'तमो यदि तेजोभिन्नत्वे सति गतिमत् स्यात् तदा तेजोऽभावविषयकसाक्षात्कारविषयगतिमन्न स्यात्' ।

न्यायसिद्धान्तदीपः—पृ० ८

वेदान्तमतेन तमसो द्रव्यान्तरत्वम्

नीलन्तमश्चलतीति प्रतीतेः प्रमाणत्वेन मन्यमानाः स्वीकुर्वाणाश्च वेदान्तिनो भट्टप्रभृतयश्च दार्शनिकास्तमसो गुणक्रियाश्रयत्वेनरूपवद्द्रव्यान्तरत्वमभ्युपगच्छन्तीति भावः। यथोक्तम्—

'तमालश्यामलज्ञाने निर्बाधे जाग्रति स्फुटे।
द्रव्यान्तरं तमः कस्मादकस्मादपलप्यते' ॥ चित्सुखी

भवति चेयं प्रतीतिर्यत् तमस्तमालमालाश्यामलमिति। तेन तमसो नीलरूपाश्रयतया, श्यामरूपाश्रयतया वा रूपवद् द्रव्यान्तरत्वं सिद्धमेवेति कस्मात्तदपलप्यते।

अस्मित् विषये प्राभाकरमतावलम्बिन इत्थं समुद्गिरन्ति यत् 'तमस्तमालमालाश्यामलम्' इति प्रतीतिरेव न जायते। योऽपि तादृशप्रतीतिविषयको व्यवहारो भवति सोऽपि तादृशप्रतीतियोगिका भावे तादृशप्रतीतिभ्रमोवाच्यः। तादृशप्रतीत्यात्मकव्यवहारस्य तादृशप्रतीतिं विनानोपपादयितुं शक्यते।

प्रकाशादर्शनविषयकज्ञानस्यैवेदं तमः, अथवातमश्चक्षुषा साक्षात्करोमि, इत्याकारकवाग्व्यवहारस्य कारणत्वं वाच्यं तस्याऽचाक्षुषतया 'इदं तमः' इत्यस्य व्यवहारस्योपपादकत्वाऽसंभवात्। मानमनोहरोऽपि दार्शनिको विद्वान् तमसोऽपरपर्यायभूतेऽन्धकारे प्रमाणाभावं समुल्लिखन् 'नीलं तमः' इत्यन्या एव प्रतीतेः प्रमाणत्वेन समुल्लिख्यमानत्वात् इति वदतीति तन्न युक्तम्—तमसि नीलत्वप्रकारिकाया बुद्धेः साधयितुमशक्यत्वात्। अप्रतीतौ प्रतीतिभ्रमस्तु भवत्यल्पज्ञानाम्।

न च 'तमालमालाश्यामलं तमः' इत्यस्य प्रयोगात्मकव्यवहारस्य उपचाराज्जायमानत्वेनौपचारिकत्वमेवाऽभ्युपगम्यताम् इति वाच्यम्। मुख्ये बाधकाभावात्। इदानीं पारिशेष्याद् वेदान्तमतेनेदमेव समाधीयते यत् प्रकाशप्रतिद्वन्द्विनस्तमसः प्रकाशाभावव्यञ्जनीयतया तन्निरपेक्षचक्षुर्विषयत्वोपपत्तिदर्शनान्न कोऽपि दोषः।

अन्यत्र प्रकाशसापेक्षस्य चक्षुषस्तं विना कथं तमसि सामर्थ्यमित्युच्यते चेत्तदाप्याह—सामर्थ्यस्य कार्यगम्यत्वादित्यस्य प्रागेवोक्तत्वात्। नो चेद् आलोकाभावस्यापि रूपवत् प्रकाशाभावस्वरूपतया पटाभाववद् घटाभाववद्वा प्रकाशनिरपेक्षचक्षुर्विषयत्वं न स्यात्, तत्प्रतिद्वन्द्वितया तदनपेक्षत्वन्तु प्रकृतेऽपि समानमेवेत्यत्र नास्ति लेशतोऽपि विवादावसरः। तत्सिद्धमेतत्तमो द्रव्यान्तरमिति। तुल्यवित्तिवेद्यन्यायेन तमसस्तेजोऽभाववत् तेजसस्तमोऽभावरूपताकथनं नहि साधु सङ्गच्छते। यतस्तेजसो भावत्वाऽन्यथानुपपत्त्या उष्णस्पर्श-भास्वरशुक्लरूपविषयिण्या बुद्धेः सर्वथाऽसंभवादित्यकामेनापि भवता तेजसोऽभावरूपताम् = तमोऽभावरूपतामनङ्गीकृत्य भास्वरशुक्लरूपवद्द्रव्यान्तरत्वमवश्यमेवाऽभ्युपगन्तव्यमिति तेजसो रूपवद्द्रव्यत्वमवश्यमेवाङ्गीकार्यम्।

तमसोऽतिरिक्तद्रव्यत्वानङ्गीकारः

तमसो भावत्वमङ्गीकर्तॄणां मायावादिनां वेदान्तिनां नये तमसश्चास्ति पृथिव्यामान्तर्भावः। आहोस्वित् तत्तमः 'नवभ्यो भेतुमर्हती' ति न्यायेन दशमं द्रव्यं नवभ्यो द्रव्येभ्यस्तमोऽतिरिक्तमेवाऽभ्युपेयमित्यतस्ते तमसो नाऽभावत्वं कल्पयन्ति।

तत्र समीचीनम्—यतस्तमसोऽतिरिक्तद्रव्यत्वस्वीकारे तस्य निरवयवत्वे नित्यत्वापत्तिः स्यात्, तच्च नेष्टम्–अननुभवात् अतएव आपत्तिः, इष्टापत्तिरपि न कर्तुं शक्यतेऽतः पारिशेष्यात् सावयवत्वमेव तमसो वाच्यम् । इत्थञ्च सावयवद्रव्यत्वेऽनन्ताऽवयवादिकल्पनापत्तिः स्यात्, तथा तेषामुत्पादविनाशयोरप्यापत्तिः स्यादिति महद् गौरवं प्रसज्येत ।

एवं स्थिते तत्राऽयं तर्कः प्रसज्येत यत् 'तमो = यदि द्रव्यम् = अतिरिक्तद्रव्यं स्यात्तदाऽक्लृप्ताऽनन्ताऽवयवसमवेतं स्यात्, यस्मान्नास्ति—अक्लृप्तेष्वनन्तावयवेषु समवेतं तमस्तस्मान्न तमो द्रव्यम् इत्यस्यैव तर्कस्य तमसो द्रव्यत्वनिश्चयप्रतिबन्धकत्वसंभवे न तमसो द्रव्यत्वं सिद्ध्यति । अपि च—

"इदं तमः" इत्याकारके तमोविशेष्यकतमस्त्वप्रकारके प्रत्यक्षे खल्वेकस्यैव तेजस्त्वावच्छिन्नप्रतियोगिताकस्य प्रौढ़प्रकाशकतेजःसामान्याभावस्यैव विषयत्वाऽङ्गीकारे लाघवम् । अतिरिक्तद्रव्यस्य च तादृशप्रत्यक्षविषयत्वोपगमेऽनन्तावयवकल्पनारूपं महदेव गौरवम् अस्तीत्यत्र नास्ति कोऽपि विवादावसर इति तादृशतेजःसामान्याभावस्यैवैकस्य तादृशप्रत्यक्षीयविषयता स्वीकार्येति तमो न द्रव्यम् इति तु परमार्थः । तस्मात् तेजःसामान्याभावानतिरिक्तत्वमेव तमसोऽभ्युपेतव्यम् ।

दार्शनिकी दृष्टिविषयीभूतं सादृश्यम्

'मा वेदि यदसावेको जेतव्यश्चेदिराडिति ।
राजयक्ष्मेव रोगाणां समूहः स महीभृताम्' ॥

शिशु पा० व० स०२, श्लो९६

असौ चेदिराट् = शिशुपालः, एकः = एकाकी, (अतो) जेतव्यः = जेतुं योग्यः = सुजयः, इति मा वेदि = मा ज्ञायि, यत् = यस्मात्, स = शिशुपालः, रोगाणां समूहस्वरूपराजयक्ष्मरोगनिरूपितं यत् महीभृत्निरूपितसमूहनिष्ठमिवार्थसादृश्यम्-तादृशसादृश्यावच्छिन्नो महीभृतां समूहस्वरूपः शिशुपालः सर्वथा दुर्जयश्चास्तीति भावः ।

अत्र तादृशश्लोकात्मकपद्यघटकीभूत इवार्थसादृश्यं नास्ति मीमांसकाभिमतं पदार्थान्तरम् = स्वतन्त्रः पदार्थो नास्तीत्यर्थः ।

अपि च— 'सम्पादितफलस्तेन सपक्षः परभेदनः ।
कार्मुकेणेव गुणिना बाणः सन्धानमेष्यति ॥'

तत्रैव श्लो० ९७ ।

अर्थात्—सम्पादितफलः = सम्पादितम् = उपकारादिना समवाप्तं बाणासुरस्वरूपं फलं येन = शिशुपालेन सः । सपक्षः = सुमित्रः, परभेदकः, बाणः = बाणासुरः = शरश्च, गुणिना = शौर्यादिगुणवता कार्मुकेणेव । सन्धानम् = सन्धिम् । एष्यति = प्राप्नोति । अत्रापि = अस्य पद्यात्मकश्लोकस्य 'इव' पदघटितत्वेन तदर्थश्च सादृश्यं मीमांसकाभिमतं पदार्थान्तरं नास्तीति मे मतिः । किन्तस्य स्वरूपमिति चाग्रे वक्ष्यते । अपि च तत्रैव पुनः—

'न लङ्घयामास महाजनानां-
शिरांसि नैवोद्धतिमाजगाम ।
अचेष्टताष्टापदभूमिरेणुः-
पदाहतो यत्सदृशं गरिम्णः ॥'

तत्रैव, स०३, श्लो० २८—

अयमर्थः—अष्टापदभूमिरेणुः = अष्टसु = धातुषु पदं = प्रतिष्ठा, अस्येत्यष्टापदं सुवर्णम्, तस्य भूमिस्तत्स्था रेणुरित्यर्थः । पदाहतः = पदाभ्याम् = रथाऽश्वादिचरणाभ्याम्, आहतः = ताडितोऽपि सन्नित्यर्थः । महाजनानाम् = बहुजनानाम् = श्रद्धेयचरणानाम् । शिरांसि । न लङ्घयामास । किमधिकं ब्रूमहे—उद्धतिम् = उत्पवनदर्पम् । नैवाजगाम । यद् = यस्माद्, गरिम्णः = गुरुत्वगुणस्य, महत्त्वञ्च । सदृशम् । यथा, तथाऽचेष्टत । अत्र सादृश्यं नहि-इवार्ऽर्थतया घटकीभूतं वर्तते किन्तु साक्षादेवेति ।

तच्च सादृश्यं तद्भिन्नत्वे सति तद्गतभूयोधर्मवत्त्वरूपम्, आहोस्वित्—असाधारणान्यतद्गतभूयोधर्मवत्त्वरूपम्, अथवा असाधारणान्यतद्गतबहुधर्मवत्त्वरूपम् । यथा—चन्द्र इव मुखम्, चन्द्रवन्मुखम्, चन्द्रसदृशं मुखम्, इत्यादौ सर्वत्र सादृश्यस्य प्रतीयमानत्वेन, किं स्वरूपं सादृश्यमित्युच्यमाने ? अनुपदमेव विविच्यमानं तद् ग्राह्यम् । तथा चोक्तम्—

सामान्यान्येव भूयांसि गुणावयवकर्मणाम् ।
भिन्नप्रधानसामान्यव्यक्तं सादृश्यमिष्यते ॥

चिन्तामणिः—खं० ३ ।

अत्रेयं विप्रतिपत्तिर्जायते यत् सादृश्यं सप्तपरिगणितपदार्थभिन्नं न वेति । अत्र विधिकोटिः मीमांसकानाम्, निषेधकोटिर्नैयायिक, वैशेषिकप्रभृतीनां दार्शनिकानाम् । परन्तु एवं स्थिते सति—

गगनं गगनाकारं सागरः सागरोपमः ।
रामरावणयोर्युद्धं रामरावणयोरिव ॥

न्या० सि० मु० विलासिनी टीका--पं० ज्वा० प्र० गौड़ कृता

इत्यादौ सादृश्यलक्षणस्य भवति सुतरामव्याप्तिः । यथा घटे घटभेदो न तिष्ठति, तथैव गगने गगनभेदस्य, सागरे सागरभेदस्य, इत्येवं रूपेण स्वस्मिन् स्वभेदस्याऽसत्त्वेन भेदघटितसादृश्यस्य तत्राऽसत्त्वादिति । तन्न समीचीनम्--तत्र भेदघटितलक्षणस्य नोच्यमानत्वं संभवति 'तद्गतधर्मवत्त्वस्यैव' सादृश्यलक्षणस्य वक्तव्यत्वादिति ।

आहोस्वित्—'चन्द्रवन्मुखम्' इत्यादिस्थलेषु भेदघटितमेव सादृश्यलक्षणमस्तु, 'गगनं गगनाकारम्' इत्यादिस्थलेषु च 'असाधारणान्यतद्गतबहुधर्मवत्त्वम्' इत्येव सादृश्यलक्षणं वक्तव्यम् । तत्राऽसाधारणधर्मो गगनत्वरूपो धर्मस्तदन्यश्च बहुधर्मः शब्दाश्रयत्वरूपो धर्मः, अष्टद्रव्यातिद्रव्यत्वरूपो धर्मस्तादृशधर्मवत्त्वरूपसादृश्यस्य तत्र सत्त्वेन न तत्राऽव्याप्तिरिति न कोऽपि दोष इति भावः ।

अथवा 'भवो भवतु भव्याय' इत्यादिस्थले 'भवत्वस्य जातित्वोपपत्तये भव-

शरीरस्य कल्पभेदेन यथा नानात्वमङ्गीकृतं तथैव प्रकृतेऽपि युगभेदप्रयुक्तत्वेन तत्तद्युग-विशिष्टगगनादिभेदमादायैव भेदघटितमेव सादृश्यलक्षणं सर्वत्र समन्वीयताम् इति न कोऽपि दोषः।

इदानीं सादृश्यस्य परिगणितसप्तपदार्थभिन्नत्वाऽभिन्नत्वे विचार्येते। तत्र मीमांसकाः सादृश्यस्य परिगणितसप्तपदार्थभिन्नत्वेऽनुमानमेव प्रमाणमस्तीति वदन्ति। तथाहि--

'सादृश्यं नहि षड्भावेष्वन्तर्भवति व्यतिरेकित्वे सति सामान्येतरवृत्तित्वेच सति सामान्यवृत्तित्वात् अभाववत् इति'। एतेन सादृश्यं परिगणितसप्तपदार्थभिन्नत्वं सिद्धयतीति भावः।

तत्र सादृश्यघटकीभूतो धर्मश्च क्वचिज्जातिस्वरूपः-यथा = 'पटसदृशो मठः" इत्यादौ पृथिवीत्वजातिमादाय, द्रव्यत्वजातिमादाय वा सादृश्यं नीयताम्।

इतोऽतिरिक्तस्थले क्वचिद् उपाधिरूपो धर्मः सादृश्यघटकीभूतो धर्मो विज्ञेयः। यथा—घटत्वं नित्यं तथा पटत्वमपिनित्यम् इत्यत्र नित्यत्वरूपोपाधिरूपो धर्म एव सादृश्यघटकीभूतो वर्तते इत्यतो नित्यत्वेन सादृश्यं बोध्यम्।

परन्तु 'चन्द्रवन्मुखम्' 'चन्द्रसदृशं वा मुखम्' इत्यादौ मुखाऽनुयोगिकं चन्द्रप्रतियोगिकं यत् सादृश्यं तन्नास्ति सप्तपदार्थभिन्नम् अपि तु सप्तपदार्थस्वरूपमेव।

आहोस्वित् तुल्यवित्तिवेद्यन्यायेन 'अनुयोगितासम्बन्धेन तद्गतभूयोधर्मवत्त्वमेव सादृश्यम्-वाच्यम् इति न कोऽपि दोष इति मन्तव्यम्।

अस्माभिः प्राङ्निर्दिष्टाः सोदाहरणं प्रदर्शिताः 'इव' प्रभृतिनिपात शब्दा अपि सन्ति सादृश्यरूपार्थवाचकाः। एवम्—

'पदाहतो यत्सदृशं गरिम्णः' शिव० व० स० ३, श्लो० २८

इत्यादिस्थलघटकीभूतानि 'सदृश' पदानि तु साक्षादेव सन्ति सादृश्यरूपाऽर्थ वाचकानि।

तथा तत्र तत्र स्थलघटकीभूतैः 'इव' प्रभृतिभिर्निपातैः सादृश्यरूपार्थाऽभिधाने प्रतियोग्यनुयोगिवाचकपदयोः समानविभक्तिकत्वनियमः, अतः समानविभक्तिकत्वमेव तत्राऽपेक्षितं भवतीति विज्ञेयम्। यथा—रज्जुरिव सर्पः, शुक्तिरिव रजतम्। अत्र रज्जुभूतस्य वस्तुनः प्रतियोगितयाऽपरस्य च सर्पस्य अनुयोगिता। तत्रापि भवति प्रतियोगित्वावच्छिन्नस्य प्रतियोगिभूतस्य उपमानत्वम्, अपरधर्मावच्छिन्नस्योपमेयत्वं विज्ञेयम्। एवं तत्रोपमानोपमेयभावोऽपि सङ्गच्छते। तच्च सादृश्यं साधारणाऽसाधारणविरुद्धधर्मभेदेन त्रिविधमिति च नागेशभट्टो विशदीकृतवान् स्वविरचिते लघुमञ्जूषाग्रन्थे।

तच्च सादृश्यं नास्ति पदार्थान्तरम्। किन्तु तद्भिन्नत्वे सति तद्गतभूयोधर्मवत्त्वम्। एवञ्च सादृश्यस्य धर्मरूपतया वृत्तिमत्त्वं धर्मत्वमिति न्यायेन सर्वेषामेव द्रव्य, गुण, कर्मादीनां वृत्तिमत्त्वेन धर्मतया सादृश्यस्यैतेष्वेव सप्तसु पदार्थेष्वन्तर्भावो बोध्य इति न पदार्थान्तरत्वं सादृश्यस्येति तु परमार्थः।

महाकविः श्रीरत्नाकरः

"रत्नाकररचनासु दार्शनिकतत्त्वानां तत्सन्दर्भाणाञ्च सोपपत्तिकं विवेचनम्"

महाकविः श्रीरत्नाकरोऽपि कालिदास, अश्वघोष, श्रीहर्षप्रभृतिमहाकविवत् "ब्रह्माऽद्वैतसिद्धान्तावलम्बी" चास्तीति तस्यैव महाकवेः कृतिस्वरूपेण "हरविजय" नामकेन महाकाव्येन सुस्पष्टं प्रतीयते । तथाहि—

"प्रज्ञाघनं स्थिरचतुश्चरणत्वमाप्त—
मद्वैततासमरसं परिमृष्टकूटम् ।
ज्योतिः परं यदमृतं हृदि चाकशीति—
नेदिष्ठमप्यविगलत्तमसां दविष्ठम् ॥७८॥

हरविजये, सर्गः ४७, श्लो० ७८ ।

इत्यनेन स्वीयकृतिस्वरूपेण श्लोकेन श्रीरत्नाकरः श्रीशङ्कराचार्याभिमतं ब्रह्माऽद्वैतसिद्धान्तमद्वैततासमरसघटितं प्रदर्शितवान् । तच्च प्रज्ञानघनेतिस्वरूपलक्षणलक्षितं ज्योतिः स्वरूपमद्वैतं परं ब्रह्म हृदि-अहर्निशमनिशं प्रकाशमानं श्रीशङ्कराचार्येणाभिमतं श्रीरत्नाकरस्य महाकवेरप्यभिमतमस्ति । तच्च ब्रह्म ज्योतिः प्रकाशस्वरूपम् । तस्यैव ब्रह्मणः प्रकाशेन सर्वमिदं चराचरात्मकं जगद् भासमानं भवति ।

तच्च सत्, चित्, आनन्दस्वरूपं प्रज्ञावनं प्रज्ञाघनं वा ब्रह्म विश्वाधिष्ठानभूतं सर्वप्रकाशकं सर्वात्मस्वरूपम् नित्यकूटस्थाऽसङ्गरूपम्, निष्कलम्, निष्क्रियम् अग्राह्यम्, अगोत्रम्, अशब्दम् । "अग्राह्यमगोत्रमशब्दमस्पर्शमरूपम्" इति श्रुतेः । तस्यैव भासाऽविरोधरूपेण सर्वं चराचरात्मकं जगदिदं प्रकाशमानं भवतीति तदेव ब्रह्म सर्वमपि प्रकाशयति । तथाचोक्तम्—

तस्य भासा सर्वमिदं विभाति"—कठोपनि० २।२।१५।
"सर्वस्य द्रष्टा" ।—नृसिंहोत्तरवापनीयोप०–२ ।
"ज्योतिषां ज्योतिः" ।—त्रिपाद्विभूतिमहानारायणोप०–४।१।

अपि च— "रज्ज्वज्ञानात् क्षणेनैव यद्वद्रज्जुर्हि सर्पिणी ।
भाति तद्वच्चितिः साक्षाद् विश्वाकारेण केवला" ॥

योगशिखोपनि० ४।४।२।

इत्थञ्च सर्वपदार्थविषयकदर्शनशक्तिमत्, सर्वप्रकाशकम्, चन्द्रसूर्यप्रभृतिज्योतिषां परमचैतन्यरूपं ज्योतिरपि तदेव ब्रह्म । तदेव च चितिस्वरूपं केवलं ब्रह्म साक्षाद् विश्वाकारेण भासमानं भवति ।

अपि च— "जाग्रतस्वप्नसुषुप्त्यादिप्रपञ्चं यत् प्रकाशते तद्ब्रह्म" ।

कैवल्योपनि०–१।१७।

अर्थात्–जाग्रत्, स्वप्न, सुषुप्त्यादिरूपं प्रपञ्चं तदात्मकं वा चराचरात्मकं जगदपि सदैवाऽखण्डं सर्वसाक्षिभूतमात्मस्वरूपं ब्रह्मैव प्रकाशयति । अर्थात्तेनैवाऽत्यन्तविशुद्धेन चिदेकरसेनाऽखण्डात्मना सर्वतः परिपूर्णेन सर्वदैकरसेन-एकरूपेण च प्रागुक्तरूपावच्छिन्नं

स्वयञ्चापि सावच्छिन्नं भावभूतं प्रभूतं नामरूपादिस्वरूपं सर्वमपि जगत् प्रकाशमानं भवतीत्यभिप्रायेण श्रीरत्नकरः प्रोक्तवान्—

"ज्योतिः परं यदमृतं हृदि चाकशीति" ।

हरविजये—पृष्ठ ६५३-स० ४७ श्लो० ७८

संक्षेपशारीरके सर्वज्ञात्ममुनिस्तत् स्वरूपमित्थं वर्णितवान् । तथाहि—

अन्तर्गुणा भगवतो परदेवतेति—
प्रत्यग्गुणेति भगवानपि भाष्यकारः— ।
आहस्म यत्तदिह निर्गुणवस्तुवादे—
सङ्गच्छते न तु पुनः सगुणप्रवादे—॥

संक्षेपशा० ३।२२१

अत्र घटकीभूते "अन्तर्गुणा" इति पदे गुणपदं "सत्-चित्-आनन्दे" तितदीयस्वरूपपरम् । देवतापदं देव एव देवतेति व्युत्पत्त्या स्वयं प्रकाशस्वरूपब्रह्मपरम् । यथोक्तं चित्सुखमुनिना—

"स्वप्रकाशचिदात्मने" इति । —चित्सुखी—

निर्विशेषाद्वैतवादिमतमाह

निर्विशेषाऽद्वैतवादिनो वेदान्तिनः सगुण, निर्गुणभेदभिन्नं ब्रह्म द्विविधम् अस्तीति निरूपितवन्तः । तत्र "नित्यं विज्ञानमानन्दं ब्रह्म" ति श्रुतिर्यस्य ब्रह्मण आनन्दरूपतां प्रतिपादितवान् तस्य प्रियाद्यवयत्वावच्छिन्नत्वेन सगुणत्वाम्, सकलत्वम्, सविशेषत्वम्, सविकारत्वम्, ससङ्गत्वम्, साकारत्वम्, विज्ञेयम् ।

यस्य च ब्रह्मणो न तत्र वागगछति न मनो गच्छतीत्यादिना वाङ्मनसयोरगोचरत्वाभिधानं विधीयते तन्निर्विशेषं ब्रह्म कथ्यते ।

सगुणब्रह्मविचारः

एतदुक्तं भवति यद् द्वैविध्यावच्छिन्ने ब्रह्मणि एकं यदस्ति नामरूपात्मकविकारस्वरूपभेदोपाध्यवच्छिन्नं ब्रह्म तत् सगुणम्, सविशेषं ब्रह्माभिधीयते । यथा राम, कृष्ण, बाबाविश्वनाथप्रभृतयः । यथोक्तम्—

"यश्च विश्वं सृजति विश्वं विभर्ति विश्वं भुङ्क्ते स आत्मा" ।

शाण्डिल्योपनि०—२ ।

अर्थात् यश्चास्ति ब्रह्मरूप आत्मा विश्वाधिष्ठानभूतः, विश्वस्य भर्ता, विश्वस्य सृष्टिकर्ता, विश्वावभासकः, विश्वात्मा, स एव सगुणब्रह्मपदाभिधेयतां गच्छति । एवम्—

"द्यावाभूमी जनयन् देव एकः । विश्वस्य कर्ता भुवनस्य गोप्ता" ।

न्या० सि० मु० ईश्वरसिद्धौ—

एतावता प्रबन्धेनेदमेव सिद्धयति यदनयोः सगुणब्रह्म, निर्गुणब्रह्मणोः केवलमस्त्यौपाधिको भेदः, तथा जीवेश्वरयोरप्यस्ति औपाधिक एव भेदः । तत्र सगुणनिर्गुणब्रह्मणोः

केवलमस्ति मायारूपरूपोपाधिभेदप्रयुक्तो भेदः। मायारूपोपाधेनिर्गतत्वे केवलं ब्रह्ममात्रमवशिष्यते। यथोक्तम्—

कार्योपाधिरयं जीवः कारणोपाधिरीश्वरः।
कार्यकारणतां हित्वा पूर्णबोधोऽवशिष्यते ॥

शुकरेहस्योपनि०—३।१२

अपि च— ब्रह्मा विष्णुश्च रुद्रश्च ईश्वरश्च सदाशिवः।
विराडाद्याश्च देवाश्च यन्मात्रं तं नुमःशिवम् ॥

सूतसंहिता, यज्ञवैवभवखण्डे १, अध्याय ३८, ७ श्लो

ईश्वरो जगतः कर्ता मायया स्वीयया पुरा।
अभेदेन स्थितः पूर्वं कल्पवासनयान्वितः ॥

तत्रैव, २ भागः, सूतगीता, ४ अ०, श्लो० १,

एवम्— मायाया गुणभेदेन रुद्रं विष्णुं पिताहम्।
सृष्ट्वानुप्राविशत्तेषामन्तर्यामितया हरः ॥

तत्रैव, भा० १, अ०, श्लो० ४—

तथा पुनः— रजोगुणं समास्थाय ब्रह्मा स्यात् सृष्टिकारणम्।
सत्त्वमास्थाय विष्णुः स्यात् पालनार्थं वृहस्पते ? ॥
तमसा कालरुद्राख्यः सर्वसंहारकारणम् ॥

पश्यन्तु तत्रैव—

इत्थञ्चोपहितस्योपाध्यवच्छिन्नस्य सोपाधिकस्य सगुणस्य सविकारस्य सकलस्य ब्रह्मणः सन्ति समुपासकास्तान् प्रति सच्चिदानन्दो भगवान् श्रीकृष्णचन्द्रः स्वयं ब्रूते—ये सन्ति सगुणोपासका मद्भक्तिमन्तो जनाः सर्वाण्येव कार्याणि मयि सच्चिदानन्दस्वरूपे सगुणे ब्रह्मणि संन्यस्य मत्पराः सन्तोऽनन्येनैव योगेन मां विश्वरूपं सर्वरूपं सगुणं ब्रह्मध्यायन्तः समुपासते एवम्भूतानां मामेव भजतां तेषामस्मद्भक्तानां—

तेषां सततयुक्तानां भजतां प्रीतिपूर्वकम्।
ददामि बुद्धयोगं तं येन मामुपयान्ति ते ॥

श्रीमद्भागवद्गीता, अ० १०, श्लो० १०,

तेषामेवानुकम्पार्थमहमज्ञानजं तमः।
नाशयाम्यात्मभावस्थो ज्ञानदीपेन भास्वता ॥

तत्रैव, श्लो० ११—

अर्थात्तेषामेव नित्यनिरन्तरश्रवणादिनिष्ठानां प्रीतिपूर्वकं भजतां बुद्धियोगं प्रयच्छामि, येन प्रदत्तबुद्धियोगेन सदानन्दैककरसं व्योमवन्निराकारं सगुणं मां ते प्राप्नुवन्ति, प्राप्तुं वा प्रभवन्ति।

अतस्तेषामेव ज्योतिःस्वरूपाऽद्वैततासमरसलक्षणलक्षितमद्भजनैकनिष्ठानामनुकम्पार्थमज्ञानजं तम आत्मभावस्थोऽहं भास्वता ज्ञानदीपेन नाशयामि।

अर्थात् तेषामेव प्रागुक्तस्वरूपसमन्वितानां नित्यनिरन्तरसमाधिनिष्ठया सम्भा-

विताऽप्रतिबद्धभावेन निरङ्कुशप्रकाशात्मकेन ज्ञानप्रदीपेन मायाऽपरपर्यायभूताऽविद्या-लक्षणलक्षिताऽज्ञानजमावरणात्मकं तमोऽन्धकारं सर्वथा विनाशयामि ।

यथा घट-पटादिपदार्थानां लौकिकानां स्वरूपावरकं तम उदयाचले विराजमानः समागतो वा भगवान् भास्करः स्वीयेनाऽप्रतिबद्धभावात्मकेन भास्वता प्रकाशेन अर्थात् स्वनिष्ठया प्रभया जलस्य स्वरूपं शैवालमिव नहि केवलमावरणोभूय सन्तिष्ठतेऽपि तु समूलं तद् विध्वंसयति ।

तदेवोक्तवान् महाकविः श्रीरत्नाकरः

प्रज्ञाधनं स्थिरचतुश्चरणत्वमाप्त—मद्वैततासमरसं परिमृष्टकूटम् ।
ज्योतिः परं यदमृतं हृदि चाकशीति—नेदिष्ठमप्यविगलत्तमसां दविष्ठम् ।७८।
हरवि०, ४७ सर्गः, १३८—

अनेन श्लोकात्मकेन पद्येन श्रीरत्नाकरेणेदमेव ध्वनितं यत् प्रज्ञावनम् (प्रज्ञाधनं) वाऽद्वैततासमरसं ज्योतिःस्वरूपं तदमृतं परं ब्रह्म हृदि चाकशीति । इदमेव तादृशतमो-विध्वंसने चास्ति खलु प्रधानकारणीभूतमादिकारणम् इति ।

एतावता प्रबन्धेनेदमेव प्रतीयते यत् श्रीरत्नाकरोऽद्वैतनिर्गुणनिष्कल, निरञ्जन-ब्रह्मोपासक आसीत् ।

अत एव तेनाऽस्मिन् स्वीये "हरविजय" नामके महाकाव्ये ग्रन्थे व्यापकदृष्ट्या श्रीव्यासकृतम् श्रीशङ्काराचार्यपरिष्कृतम् अद्वैतदर्शनं सन्निवेशितम् । अत एव चाऽयमपि श्रीरत्नाकरोऽपि ब्रह्माऽद्वैतसिद्धान्तस्यैव पक्षधर आसीत् इत्यलम् ।

निर्गूणब्रह्मविवेचनम्

"सर्वाधिष्ठानमद्वन्द्वं परं ब्रह्म सनातनम् ।
सच्चिदानन्दरूपं तं स्वात्मानं प्रणमाम्यहम्" ॥

श्री शङ्कराचार्येण सगुणनिर्गुणभेदेन ब्रह्म निष्ठं द्वैविध्यमङ्गीकृतम् । चोक्तम्—"सगुणनिर्गुणस्वरूपं ब्रह्म" इति ।

त्रिपाद्विभूतिमहानारायणोपनि०–१।१

तत्र सगुणनिर्गुणब्रह्मणोर्मध्ये मायाश्रितं यद् ब्रह्म तत् सगुणब्रह्मेति कथ्यते (तच्च जाग्रत्स्वप्नसुषुप्तीत्यवस्थात्रयसाक्षिभूतम् । तदेव च साक्षिस्वरूपं ब्रह्म चास्तीश्वरपदा-भिधेयम् ।

न्यायमते चास्तीश्वरो यादृशलक्षणलक्षितस्तादृशलक्षणलक्षितमेव चास्ति सगुणं ब्रह्म इति । एवं यद्धर्मावच्छिन्नं यद्रूपावच्छिन्नं वा कार्यमीश्वरो विधत्ते तथाविधमेव च कार्यं सगुणं ब्रह्म करोतीत्यनयोरीश्वरसगुणब्रह्मणोश्चास्ति सर्वथाऽभेदः इत्यत्र नास्ति लेशतोऽपि विवादः ।

निर्गुणसगुणब्रह्मणोश्चास्ति औपाधिको भेदः

निर्गुणञ्च तद् ब्रह्म मायातीतम् = मायारहितम् = मायारूपोपाध्यनवच्छिन्नम् । प्राग्वर्णितस्वप्नसुषुप्तिरूपाऽवस्थात्रयशून्यमपि तदेवास्ति निर्गूणं ब्रह्मेति । तथा चोक्तम्—

"असङ्गो ह्ययं पुरुषः" ।— वृ० उ०—४।३।१५

"असङ्गो नहि सज्जते" ।— वृ० उ०—४।४।२२

अयमात्मा ब्रह्म" — अध्यात्मोप०

"सर्वोपाधिनिनिर्मुक्तं स्वात्मानं भावयेत् सुधीः" ।

--कठोपनि०—४१

अयञ्च सर्वोपाधिविनिर्मुक्त आत्मा सर्वथा चास्ति निर्गुणब्रह्मस्वरूप एवेति मन्तव्यम् । अयमेव चास्ति नितान्तमनवच्छिन्नः, असङ्गः निर्गुणः, निर्विशेषः, अद्वयरूपः, अजरत्व, अमरत्व, धर्मावच्छिन्नोऽपि सन् सर्वथा चास्त्यनवच्छिन्नः । यतोऽजरत्वस्य जरत्वाऽभावरूपत्वेनाऽभावस्यचाऽधिकरणरूपतयेति सर्वाधिकरणं ब्रह्म । तथा च सर्वेषामेवाऽभावानामधिष्ठानभूतब्रह्मरूपतया नहि ब्रह्मणो निर्धर्मकत्वं व्याहन्येत । एवमेव ब्रह्मनिष्ठममरत्वमपि मृत्योरभावरूपम्, तादृशाभावस्यापि प्रागुक्तक्रमेण ब्रह्मरूपत्वमेव सम्पादनीयम् इति न ब्रह्मणो निर्धर्मकत्वं व्याहतं भवतीति भावः ।

अपि च ब्रह्मविद् याज्ञवल्क्यप्रभृतयोऽपि महर्षयोऽस्यैवाऽक्षरस्वरूपस्य, निर्विशेषस्य, निर्गुणस्य ब्रह्मण एवोपदेशं स्वशिष्येभ्यः प्रदत्तवन्तः । वीतरागा यतयो, योगिनो, मुमुक्षवोऽपि वा यद् ब्रह्म प्राप्नुवन्ति, तथा यद् ब्रह्म ज्ञातुमिच्छन्तस्ते ब्रह्मचर्यं चरन्ति, वेदान्तश्रवणञ्च प्रकुर्वन्ति, तन्निर्विशेषमक्षरं ब्रह्म कथयिष्यामि । तथाचोक्तम्—

यदक्षरं वेदविदो वदन्ति—

विशन्ति यद्यतयो वीतरागाः ।

यदिच्छन्तो ब्रह्मचर्यम् चरन्ति—

तत्ते पदं संग्रहेण प्रवक्ष्ये ।।

श्रीमद्भगवद्गीता, अ० ८, श्लो० ११—

वस्तुतः सर्वेऽपि वेदाः स्वस्वोन्मुखेन तदेव निर्गुणं ब्रह्म प्रतिपादयन्ति, सगुणस्य च ब्रह्मणस्तदभिन्नत्वादस्ति केवलमुपाधिकृतो भेदः ।

"एकमेवाऽद्वयं ब्रह्म नेह नानास्ति किञ्चन" ।

अध्यात्मोपनि० ६३

"अहमेवाऽक्षरं ब्रह्म वासुदेवाख्यमद्वयम्" ।

नारद परिव्राजकोप० ३।२०।

"सच्चिदानन्दरूपमिदं सर्वम्" ।

नृसिंहोत्तरतापनीयोप०—७।

अपि च—"निर्विकारे निराकारे निर्विशेषे भिदा कुतः" ।

अध्यात्मोप०—२२ ।

अयमेवास्ति ब्रह्माऽद्वैतसिद्धान्तवादः यस्याङ्गीकरणं महाकविः श्रीरत्नाकरोऽपि कृतवान् । तथा चोक्तम्—

स्थित्यर्थमस्य जगतः कथमप्युपाधि-

भेदादभिन्नमपि यत् प्रतिपन्नभेदम् ।

यच्चापि सत्यमनिशं हृदयप्रतिष्ठ-
मानन्दरूपममृतं मुनयो गृणन्ति ॥ ७९ ॥
हरविजयम्—४७।पृ० ६५३ ।

अनेन श्लोकेन श्रीरत्नाकरः स्वाभिमतब्रह्माद्वैतसिद्धान्तानुसारं तस्य ब्रह्माऽद्वैतस्य सत्यरूपताम्, आनन्दस्वरूपताम्, अमृतस्वरूपतां तथा हृदयप्रतिष्ठरूपताञ्च दर्शितवान् । अस्यैव श्रीरत्नाकरकथनस्य पुष्टिं देवकीनन्दनः श्रीकृष्णचन्द्रोऽपि कृतवान् । तथा हि—

ईश्वरः सर्वभूतानां हृद्देशेऽर्जुन ? तिष्ठति ।
भ्रामयन् सर्वभूतानि यन्त्रारूढ़ानि मायया ॥
श्रीमद्भगवद्गीता, अ० १८।६१ ।

अर्थात् सर्वलोकनियन्तृत्वेनेशनशील ईश्वरः सूत्रधारो यथा यन्त्रारूढ़ानि जनजातानि दारुमयप्रतिमाश्च भ्रामयति, तथैव परमेश्वरोऽपि सर्वभूतानि विक्षेपशक्तिसहकृतया माययाऽज्ञानरूपया सर्वभूतानि भ्रामयन् हे अर्जुन ? सर्वभूतानां हृदयरूपे प्रदेशे तिष्ठति । इत्थञ्चाऽनेन हृदयप्रतिष्ठत्वम् अर्थात् सर्वेषामेव भूतानां हृदयरूपे प्रदेशे सन्तिष्ठमानत्वं सूचितं भवतीति भावः ।

एवम्—"सच्चिदानन्दरूपमिदं सर्वम्" ।
नृसिंहोत्तरतापनीयोप—७

एतेन श्रुतिवाक्येन तस्यैवाऽद्वैतब्रह्मण "आनन्दमयता--"श्रीरत्नाकराभिमता पुष्टीक्रियते ।

"अभेददर्शनं ज्ञानम्" ।--स्कन्दोप०—११

इत्यनेनोपनिषद्वाक्येन च तस्यैवाऽद्वैतब्रह्मणो"ऽभेदरूपता" श्रीरत्नाकराभिमता प्रदर्शिता भवति ।

तथा--"सत्यं ज्ञानमनन्तं ब्रह्म" । तैत्तिरीयोप० २।१ ।

इत्यनेन चोपनिषद्वाक्येन तस्यैव खलु सत्यरूपताऽपि श्रीरत्नाकराभिता कथिता भवति ।

एवम्— यथा रज्जुं परित्यज्य सर्पं गृह्णाति वै भ्रमात् ।
तद्वत् सत्यमविज्ञाय जगत् पश्यति मूढधीः ॥
नादविन्दूपनि० ४० । २६ ।

इत्यनेनापि खलूपनिषद्वाक्येन ब्रह्मण एव सत्यस्वरूपता प्रतिपादिता भवति ।

अपि च—अस्यैव निर्विशेषस्य, निराधारस्य, निराकारस्य, निर्विकारस्य, शान्तस्याऽनवद्यस्याऽऽद्यन्तरहितस्यः शुद्धबुद्धमुक्तस्वभावस्याऽखण्डानन्दैकरसस्य निर्गुणस्य ब्रह्मणो महाकविश्रीरत्नाकरेणाऽभ्युपगतस्य स्वनिष्ठं = ब्रह्मनिष्ठममृतत्वमाह--

"ब्रह्मैवेदममृतं पुरस्ताद् ब्रह्म पश्चाद् ब्रह्म दक्षिणतश्चोत्तरेण । अधश्चोर्ध्वं प्रसृतं ब्रह्मैवेदं विश्वमिदं वरिष्ठम्" ।

इत्यनेनोपनिषद्वाक्येन तस्याऽमृतरूपता सुस्पष्टैवेति भावः ।

अपि च—महाकविः श्रीरत्नाकरः—

'आतस्थुषः षडवधिस्थितवर्त्ममातृ-
चण्डस्य चण्डिपृथुसूक्ष्मशरीरवृत्तिः ।
ख्याता त्वमेव जगति प्रतिपन्नविश्व-
रूपा किलाक्षरमयी परमेशशक्तिः ॥१००॥

हरविजयम्, सर्गः ४७ ।

इत्यनेन स्वीयकृतिस्वरूपेण पद्यात्मकेन श्लोकेन नित्य, शुद्ध, बुद्ध, मुक्त, सच्चिदानन्दैकरसस्वरूपस्य तस्य परमेशस्य दार्शनिकदृष्टिस्वरूपा शक्तिर्विचार्यते-का सा शक्तिः ! इति ।

किं सा शक्तिः कारणनिष्ठा सती कार्योत्पादनयोग्यतावती धर्मविशेषस्वरूपा ? यथा वन्हौ दाहानुकूला शक्तिः । अथवा कारणत्वरूपा सा शक्तिः, कारणत्वञ्च स्वस्वव्याप्येतरसमस्तसम्पत्तौ सत्यां कार्याभावव्यापकाभावप्रतियोगित्वरूपम् ।

पश्यन्तु-तर्कदीपिकाम्-४-पृ० १९

स्त्रीदेवतारूपा वा शक्तिः, यथा—गौरी, वैष्णवी, ब्राह्मी चेति । अत्रोच्यते—'इच्छा क्रिया तथा ज्ञानं गौरी ब्राह्मी तु वैष्णवी । त्रिधा शक्तिः स्थिता यत्र तत् परं ज्योतिरोमिति" ॥ —गोरक्षसंहिता

अन्ये तु—पीठाधिष्ठातृदेवताविशेषः शक्तिरित्यपि वदन्ति ॥

केचित्तु–इच्छैव शक्तिः । अपरे पुनः–ईश्वरेच्छैव शक्तिरिति वदन्ति । अपरे तु—अभियुक्तमात्रस्यैव शक्तित्वं वदन्तीति । एवमन्या अपि बह्व्यः सन्ति शक्तयः परन्तु ताः सर्वा एव नैवात्र निरूपयितं शक्यते, लेखविस्तरभयादिति ।

अत्र च प्रकृते सर्वासु शक्तिसु गौरी, वैष्णवी, ब्राह्मी, इत्येतास्तिस्र एव शक्तयो ग्राह्याः । गौरि त्वमेव शशिमौलिकृतप्रतिष्ठा' इत्यनेन 'गौरी' शक्तिरिति कथनं साधु सङ्गच्छते । एवं 'वैष्णवीचक्रभिन्नस्य' इत्यनेन 'वैष्णवी' शक्तिः सिद्ध्यति । तथा 'ब्राह्मी हंससमारूढ़ा" इत्यनेन च सप्तशतीवाक्येन 'ब्राह्मी' शक्तिरित्यप्यायातीति सर्वास्तिकमतसिद्धोऽयं विषयः ।

इत्थञ्चात्र एतासां तिसृणामेव शक्तीनां परमेशस्य परमेशितुश्च तत्त्वं व्याहर्तुं व्यवहर्तुं च शक्नुमः । तदन्यासाञ्च शक्तीनामन्यत्रैवोपयोगः । एतासान्त्वत्रैवेति यत एतासां शक्तीनां ज्ञानरूपवत्त्वादिति ध्येयम् । एवम्—

'आस्थाय रुद्धभुवना वसुधादिकाश्च-
सर्वादिविग्रतया नवमाः स्फुरन्तीः ।
तास्ताः क्रिया विदधतो जनताहिताय-
शक्तिः किलाऽप्रतिहताः परमेशितुस्त्वम् ॥१०१॥

तत्रैव पश्यन्तु—

भगवतः परमेशितुः कालरूपत्वम्

इत्यनेनापि रत्नाकरकृतिस्वरूपेण श्लोकेन जनताहिताय तास्ताः क्रिया विदधतः परमेशितुस्तस्याऽसङ्गस्याऽक्रियस्याऽऽत्मनोऽप्रतिहता सा ज्ञानरूपा शक्तिस्त्वमेवासीति 'पूर्वश्लोके' घटकीभूतेन 'अक्षरमयी'तिपदेन विज्ञायते।

इयञ्च नित्य, शुद्ध, बुद्ध, मुक्तस्वभावस्य तस्य भगवतः परमेशितुर्वैष्णवी शक्तिः 'काले' ति नाम्नी कथ्यते श्रीधरस्वामिना। सा च शक्तिः—यथा वैष्णवीशक्तिर्निरुच्यते तथा सा विष्णुशक्तिरित्यपि कथ्यते इत्युभयात्मकत्वेन तन्निर्देशः। अर्थात् कालस्य शक्ति-शक्तिमदुभयात्मकत्वमस्तीति भावः।

अत एवाऽऽनन्दकन्दः—यशोदानन्दवर्धनः श्रीकृष्णचन्द्रः स्वयमेवोक्तवान्, यत्—

कालोऽस्मि लोकक्षयकृत्प्रवृद्धो-
लोकान् समाहर्तुमिह प्रवृत्तः।

श्रीमद्भगवद्गीता—अ० ११; श्लो० ३२

इत्यनेन भगवद्वचनेन भगवतो ब्रह्मणो व्यक्ताव्यक्तपुरुषकालरूपत्वं सुस्पष्टमेव। तथा चोक्तम्—

'तदेव सर्वमेवैतद् व्यक्ताव्यक्तस्वरूपवत्।
तथा पुरुषरूपेण कालरूपेण च स्थितम्॥

विष्णु पुराणे प्र० अं० २।१४

अत्र श्लोकघटकीभूतं व्यक्तं महदादि, अव्यक्तं प्रकृतिरिति विज्ञेयम्।

अपि च-- "कालस्वरूपं रूपं तद् विष्णोर्मैत्रेय? वर्तते"।

इत्यनेनापि श्लोकात्मकेन वाक्येन भगवतो ब्रह्मणो व्यक्ताऽव्यक्तपुरुषकाल-रूपात्मिकां स्थितिं द्रढीकर्तुं तस्यैव ब्रह्मण एकं रूपं कालोऽप्यस्तीति प्रस्फोरितं भवति।

काल एव प्रकृतिपुरुषयोः संयोगं विधत्ते येन सृष्टिर्जायते। यथोक्तम्—"पङ्ग्वन्ध-वदुभयोरपि संयोगस्तत्कृतः सर्गः"। सांख्यकारिका,

अतः पौराणिकमतानुसारं कालपुरुष एव प्रकृतिपुरुषयोः संयोगजननद्वारा सृष्टिं प्रति चास्ति मूलं कारणम्। प्रलयेऽपि सूर्यादिगत्युपलक्षितस्थूलकालाभावस्तत्राऽनुभूयते। इत्थञ्च प्रकृतिः, पुरुषः, कालश्चेति रूपत्रयमस्ति तस्यैव जगतो मूलकारणीभूतस्य ब्रह्मण इति पौराणिका वदन्ति। प्रकृतिपुरुषयोस्तत्र नियामकत्वेन कालस्यास्तित्वं सुस्पष्टमेव। इत्थञ्च सृष्टिप्रलययोर्विद्यमानत्वप्रयुक्तमेव कालस्य नित्यत्वं सिद्ध्यति। तथा-चोक्तम्—

अनादिर्भगवान् कालो नान्तोऽस्य द्विज? विद्यते।
अव्युच्छिन्नास्ततस्त्वेते सृष्टिस्थित्यन्तसंयमाः॥

विष्णुपुराणे प्रथमांशे, २।२६।

कालाख्यायाः शक्तेर्विचारः

अपरा चास्ति तस्य परमेशितुरप्रतिहता भगवतः कालाख्या शक्तिः। सा च शक्तिः कैश्चित् वैष्णवीशक्तिः कथ्यते, कैश्चिच्च गौरीति, अपरैश्च ब्राह्मीति च गीयते।

सा च वैष्णवी, गौरी = भवानी, ब्राह्मणीत्यपरपर्यायाऽभिधाना कालाख्या शक्तिर्नित्य, शुद्ध, बुद्ध, मुक्तस्वभावस्य सच्चिदानन्दैकरसस्य तस्य निर्विशेषस्य परमेशितुः प्रलये सुप्तेव तत्रैव लीना सती सन्तिष्ठते।

भाविन्याश्च सृष्टेरुपक्रमे सा कालाख्या भवानी शक्तिर्भगवता परमेशेन पुनः प्रेरणां प्राप्ता सती प्रबोधिता भवति। इति च श्रीश्रीधरस्वामिनो वदन्ति विवदन्ते चात्र बहवः। स च विवादो नात्र प्रदर्श्यते लेखविस्तरभयात्। ताञ्च भवानीं कालाख्यां शक्तिं नित्यां स्वीकुर्वन्ति श्रीस्वामिपादाः। यथोक्तम्—

सोऽन्तः शरीरेऽर्पितभूतसूक्ष्मः—
कालात्मिकां शक्तिमुदीरयाणः।
उवास तस्मिन् सलिले पदे स्वे
यथाऽनलो दारुणिरुद्धवीर्यः॥

श्रीमद्भाग०—३।८।११।

भगवतः परमेशितुरियं श्रीरत्नाकरेण चोल्लिखिता 'भवानी' ति कालाख्या शक्तिरेव खलु कर्तुमकर्तुमन्यथाकर्तुञ्च सर्वथा विधानसभां लोकसमाञ्च पारयितुं सक्षमेति श्रीरत्नाकरस्य हृदयम्।

अपि च महाकविश्रीरत्नाकरेण शक्तिशक्तिमतोरभेदादिति सिद्धान्तानुसारं ब्रह्माऽद्वैतसिद्धान्तवादः पुनः पुष्टीक्रियते। तथाहि—

'ख्याता महेश्वरनिरञ्जनतां दधाना-
स्तारादिका जगति याः किल शक्तयोऽष्टौ।
तन्मध्यवृत्तिरमला परिदीप्यसे त्व-
मेकापवर्गसुखदा शिवशक्तिराद्या' ॥११९॥

एवं पुनरपि—'निःश्रेणिरीशितुरनुग्रहसौष्ठवेन-
विश्लेषितत्रिविधबन्धनविप्लवानां।
प्राप्त्यै सनातनपदस्य च षट्प्रकार-
सोपानपद्धतिरसि प्रथिता त्वमूर्ध्वम् ॥११३॥

हरविजयम्—सर्गः ४७।

श्रीरत्नाकरेण स्वविरचितेन हरविजयनामकेन ग्रन्थात्मकेन महाकाव्यस्वरूपेण महता प्रबन्धेन मातुर्जगज्जगन्या भवान्याः समुल्लेखः क्वचिच्छिवशक्तिरूपेण, क्वचिद् भवानीरूपेण, क्वचिच्च गौरीतिरूपेण, एवमत्रैवाऽन्यत्र परमेशशक्तिरूपेण, व्यधायीति मन्ये यन्महाकविः श्रीरत्नाकरः सच्चिदानन्दस्वरूपस्याऽऽनन्दघनस्याऽऽनन्दकन्दस्वरूपस्य भगवतोऽनाथनाथस्य जगन्नाथस्य बाबाविश्वनाथस्याऽतीव भक्तिमान् विद्वानयमासीदिति, येन विदुषा स्वीयासु सर्वासु 'हरविजय' नामकग्रन्थघटकीभूतासु श्लोकात्मिकासु कृतिषु–अयमेव शक्तिवादः अद्वैतवादश्च सन्निवेशितः। यथा—जगति याः सन्ति तारादिका अष्टौ शक्तयस्तासां शक्तीनां मध्ये विराजमाना सर्वथा निर्मला एकाऽपवर्गसुखदाऽऽद्या महेश्वरनिरूपितां निरञ्जनतां दधाना ख्यातिं गता त्वमेवैका शिवशक्तिः परिदीप्यसे।

अपि च—ईशितुरनुग्रहसौष्ठवेन निःश्रेणिः, तथा विश्लेषितत्रिविधबन्धनविप्लवानामक्षय्यपदस्य च प्राप्त्यै-ऊर्ध्वं गन्तुं षट्प्रकारसोपानपद्धतिस्त्वमेव प्रथितासीत्यस्ति मे हरविजयनामकग्रन्थकर्तुः श्रीरत्नाकरस्य सुदृढो विश्वासः ॥११२॥

'स्त्रीदेवता शक्तिः' इति पक्षधरा दार्शनिकास्तादृशीं शक्तिं कालाख्यामेव वर्णयन्ति। सा च कालाख्या शक्तिर्नित्या वा अनित्या वेति विचारान्तरम्। तां कालाख्यां शक्तिं श्रीमाध्वमतानुयायिनो दार्शनिकास्तां कालात्मिकां कालनाम्नीं शक्तिं सहकारिणीं शक्तिं वदन्ति। अर्थात् यास्ति कालाख्या ब्रह्मणः शक्तिः सा ब्रह्मण एव सहकारिणी शक्तिः कथ्यते इत्यत्र नास्ति केषामपि विदुषां विवादः। तथाचोक्तम्—

'विश्वं वै ब्रह्म तन्मात्रं संस्थितं विष्णुमायया।
ईश्वरेण परिच्छिन्नं कालेनाऽव्यक्तमूर्त्तिना॥

श्रीमद्भाग०—३।१०।२२

अर्थात् श्रीविष्णुमायया संस्थितं संहृतं ब्रह्म तन्मात्रं सद् विश्वं अव्यक्तमूर्तिना ईश्वरेण कर्त्रा कालेन न्यायवैशेषिकामितनिमित्तकारणीभूतेन परिच्छिन्नम्। वैः= निश्चयेनेत्यर्थः। स च काल एकोऽप्युपाधिभेदान्नानासंज्ञां लभते। यथा—

(१) यथा–लवात्मकः कालः, (२) निमेषात्मकः कालः,
(३) कक्षात्मकः कालः, (४) काष्ठात्मकः कालः,
(५) कलात्मकः कालः, (६) मुहूर्तरूपः कालः,
(७) दिवसात्मकः कालः, (८) पक्षात्मकः कालः,
(९) मासात्मकः काल, (१०) ऋतुस्वरूपः कालः,

इत्यादिरूपेण विश्वस्य निमित्तकारणीभूतस्य कालस्यैकस्यापि नानाभेदाः जायन्ते। कतिपयभेदा दर्शिता अवशिष्टाश्च स्वमूहनीया इति। अयञ्च कालोऽनुमानगम्यः। तथा चोक्तम्--

एवं कालोऽप्यनुमितः सौक्ष्म्ये स्थौल्ये च सत्तम ?
संस्थानभुक्त्या भगवान् अव्यक्तो व्यक्तभुग् विभुः॥

तत्रैव--३।११।३।

'संस्थितम्' इत्येतद्घटकीभूतं संस्थानमस्ति परमाण्वादीनामवस्थाविशेषः, तस्य भुक्तिर्व्याप्तिस्तया भगवानिति हरेः शक्तिः। शक्तेः स्वीकारेण द्वैतापत्तिः स्याद् भेदस्यापत्तिर्वा स्यादिति न मन्तव्यम्। तयोरभेदादित्युक्तं प्रागेव। अव्यक्तश्च व्यक्तं व्याप्य सन्तिष्ठते। तदेतद् रहस्यमाह--

'स कालः परमाणुर्वै यो भुङ्क्ते परमाणुताम्।
स्वतोऽविशेषभुग्-यस्तु स कालः परमो महान्॥

तत्रैव--३।११।४।

अस्योपर्युक्तस्य भागवतश्लोकस्याऽयमाशयः--यद् 'ग्रहर्क्षताराचक्रस्थ'

भा० ३।११।१३।

इत्यादिना ग्रन्थेन यत् सूर्यपर्यटनं निरूपितम्, तस्मिन् ग्रन्थे सूर्यो यावति काले परमाणुदेशमतिक्रामति तावान् कालः परमाणुः। यावति च काले द्वादशलक्षणलक्षितं

भुवनकोशमतिक्रामति भगवान् भास्करः स परममहान् संवत्सरात्मकः कथ्यते। पुनश्च तस्यैवाऽऽवृत्त्या युग, मन्वन्तरादिभेदप्रयुक्तो भेदो जायते।

इत्थञ्चैकस्या एव कालशक्तेर्भगवतो भास्करस्य गत्यात्मकोपाधिवशेन संवत्सरादि-कालव्यवहारः सम्पादनीयः। श्रीभर्तृहरिर्महाभाष्यसिद्धान्तमादृत्य कालस्य महात्म्यं तथा चराचरात्मकस्यास्य प्रपञ्चभूतस्य प्रभूतस्य जगतो निमित्तकारणत्वं च कालस्य ब्रूते। तथाहि--

"उत्पत्तौ च स्थितौ चापि विनाशे चापि तद्वताम्।
निमित्तं कालमेवाहुर्विभक्तेनात्मना स्थितम्॥
तमस्य लोकयन्त्रस्य सूत्रधारं प्रचक्षते।
प्रतिबन्धाभ्यनुज्ञाभ्यां तेन विश्वं विभज्यते॥
यदि न प्रतिबघ्नीयात् प्रतिबद्धं च नोत्सृजेत्।
अवस्था व्यतिकीर्येरन् पौर्वापर्यविनाकृताः॥
तस्यात्मा बहुधा भिन्नो भेदैर्धर्मान्तिराश्रयैः।
नहि भिन्नमभिन्नं वा वस्तु किञ्चन विद्यते॥
नैको नचाप्यनेकोऽस्ति न शुक्लो नापि चासितः।
द्रव्यात्मा स तु संसर्गादिवं रूपः प्रकाशते॥
संसर्गिणान्तु यो भेदो विशेषास्तस्य ते मताः।
संभिन्नस्तरवस्थानां कालो भेदाय कल्पते॥

तत्रैव—९।३-४-५-६-७-८।

अयमाशयः—पदार्थानां प्रपञ्चस्य वोत्पत्तौ स्थितौ विनाशे वा उपाधिभेदाद् भिन्नरूपेण सन्तिष्ठमान एक एव कालो भवति निमित्तकारणम्। एवमस्य जगदात्मकस्य प्रपञ्चस्य प्रतिन्धाऽभ्यनुज्ञाभ्यां स एव नियाकत्वेनाऽङ्गीकृतो वर्तते। कालस्य प्रतिबन्धा-नुज्ञानयोर्नियामकत्वाऽनङ्गीकारे सर्वषामेव पदार्थानामवस्थानाञ्च प्राग्वर्णितानां यौग-पद्यापत्त्या पौर्वापर्यभावापत्त्या च ज्येष्ठत्व (कालकृतपरत्व), कनिष्ठत्व (कालकृता-परत्व) व्यवहारो नहि कदापि कथमपि भवितुमर्हति।

अपि च सर्वस्यापि प्रपञ्चस्य तदन्तर्गतानां पदार्थानां वा स्वयमेव भेदाभेदाभ्यां शून्यत्वेऽपि संसर्गिवस्तुसम्बन्धं निमित्तीकृत्य सर्वेऽपि पदार्था भेदव्यवहारजनकीभूता भवन्ति। एवमग्रेऽपि स्वीयदृष्टिकोणदिशा स्वयमेवोह्यम् इति तु संक्षेप इति भावः।

रत्नाकरय कृतौ दार्शनिकतत्त्वानामन्वेषणम्

'हरविजय' नामकग्रन्थावलोकनेन सुस्पष्टं प्रप्रीयते यत् श्रीरत्नाकरः नहि केवलं साहित्यशास्त्रविशारद एवाऽऽसोत् अपि तु साहित्यिकमहाकविसत्त्वेऽपि महानेन दार्शनि-कोऽप्यासीत्। इत्यत इदानी पुनः शक्तिशक्तिमतोरेव दार्शनिकदृष्टिसमन्वितं विवेचनं क्रियते। तथाहि—

"आनन्दरूपममृतं निरुपाख्यामूर्मि—
पङ्कातिगं स्तिमितवारिधिवारिकल्पम्।

यन्नेति नेत्युपनिषत्स्वभिधीयते च—
विज्ञप्तिमात्रमनुपाधिनिरोहमन्यैः" ॥१२६॥

अपि च— "तस्येशितुः सकलधर्म विनाकृतत्व—
मव्याकृतेः श्रितवतोऽद्रुतवृत्तिरेका ।
व्यापारशक्तिरनघा वसुधादिषुत्व—
मेकैव तिष्ठति विभोर्जगतो नियन्त्री ॥१२७॥

हरविजयम्, सर्गः ४७, पृ० ६६१—

अर्थात्—स्तिमितवारिधिवारिकल्पम्, ऊर्मिपङ्क्तातिगं, निरुपाख्यम्, यत् "नेति नेति" इत्येवंरूपेणोपनिषत्सु-अभिधीयतेऽन्यैर्दार्शनिकैः, तदेवाऽऽनन्दरूपमनुपहितं, निरोहम्, अमृतं, ज्ञानस्वरूपम्, ब्रह्म पूर्वमासीत् । तथा चोक्तम्—

"सदेव सोम्येदमग्रे आसीदेकमेवाऽद्वितीयम्" छं०।उ०६।२।१।

"आत्मावा इदमेक एवाग्रे आसीत् नान्यत्किञ्चित्मिषत्" ऐ०उ०१।१।

एतस्यैव परब्रह्मस्वरूपस्याऽऽत्मनः श्रीरत्नाकर आनन्दरूपतां, अमृतरूपतां, निरीहरूपतां, अनुपाधितां, विज्ञप्तिमात्ररूपतां = ज्ञानरूपतां वर्णितवान् ।

पुनश्च तस्यैवेशितुर्विभोरद्रुतवृत्तिरेका वसुधादिषु त्वमेकैव, अनघा, व्यापारशक्तिः जगतो नियन्त्री तिष्ठसि इत्यहं मन्ये ।

एवञ्च "सत्यं ज्ञानमनन्तं ब्रह्म" "नित्यं विज्ञानमानन्दं ब्रह्म" इत्यादिश्रुतयः सर्वा अपि तस्याऽऽनन्दस्वरूपस्याऽमृतस्य ब्रह्मणो विज्ञप्तिमात्रत्वम् = ज्ञानविज्ञानरूपत्वम्, प्रतिपादयन्ति । महाकविः श्रीरत्नाकरो विज्ञप्तिमात्राऽपरपर्यायभूतज्ञानविज्ञानस्वरूपस्य ब्रह्मणो-अमृतरूपतां प्रस्फोरितवान् । तथोक्तम् —

"ज्ञानामृतेन तृप्तस्य कृतकृत्यस्य योगिनः ।
न चास्ति किञ्चित् कर्तव्यमस्ति चेन्न स तत्त्ववित् ॥
लोकत्रयेऽपि कर्तव्यं किञ्चिदस्य न विद्यते" ॥

श्रीजाबालिकोपनि० १।२५-२४

अपि च— "लोकद्वयेऽपि कर्तव्यं किञ्चिदस्य न विद्यते ।
इहैव स विमुखः स्यात् सम्पूर्णः समदर्शनः ॥

शिवधर्मोत्तर—

एवम्— "न स पुनरावर्तते न स पुनरावर्तते"

छान्दोग्योपनि० ८।५।१।

"भूयस्तेन निवर्तन्ते परावरविदो जनाः" ।

कुण्डिकोपनि०—२२—

तथा— "न स भूयोऽभिजायते न स भूयोऽभिजायते"

अमृतनादोपनि०—३९—

"तरति शोकमात्मवित्"

छं०।उ०, अ०७, खण्ड ३,

'तमेव विदित्वाऽतिमृत्युमेति-
नान्यः पन्था विद्यतेऽयनाय'।
श्वेताश्व० अ०६--

'तमेवं विद्वानमृत इह भवति
नान्यः पन्था विद्यतेऽयनाय'।
तत्रैव--तैत्तिरीयब्रा०

'तमेवैकं जानथ आत्मानमन्यवाचो
विमुञ्चथ अमृतस्यैष सेतुः'।
--मुण्डकस्येयम्

अयमाशयः--ब्रह्मस्वरूपज्ञानामृतेन सुखविशिष्टान्येच्छारूपतृप्तिमतः कृतकृत्यस्य योगिनः किञ्चिदपि कर्तव्यमेव नावशिष्यते। लोकत्रयेऽपि अस्य ज्ञानामृतेन तृप्तस्य किञ्चिदपि कर्तव्यमेव नहि किमप्यवशिष्टमस्ति। एवमेव लोकद्वयेऽपि नहि किमपि कर्तव्यमस्य विद्यते, तेन स इहैव मुक्ति समवाप्नोति। तस्य पुनरागमनमत्र नैव जायते इत्यतः पुनरागनाभावं द्रढ़ोकर्तुं केवलं पुनरावृत्तिविधानमस्ति। एवम्भूतो ब्रह्मस्वरूपज्ञानामृते न तृप्ति समवाप्नुवान आत्मवित् नहि कदापि कथमपि शोकमोहादिकं गच्छति अपि तु तरतीति।

एतावता प्रबन्धेनेदमेवाऽऽयाति यज्ज्ञानमन्तरा नास्ति अन्यो मार्गो मोक्षं प्राप्तुं प्रापयितुं वेति सच्चिदानन्दोऽपि स्वयं ब्रूते--

'ज्ञानविज्ञानतृप्तात्मा कूटस्थो विजितेन्द्रियः।
युक्त इत्युच्यते योगी समलोष्टाश्मकाञ्चनः॥ ८॥
श्रीभद्भगवद्गता,--अ०६,

अर्थात् सदसद्विवेकजन्यतीव्रवैराग्यमोक्षेच्छाभ्यां जायमानं यद् विषयग्रहणवैमुख्यं तद्गुणितबाह्याऽभ्यन्तरकरणवान् विजितेन्द्रियो, योगनिष्ठायां प्रवृत्तिशीलो योगाभ्यासवशात् सर्वदा सकलविषयकज्ञानवान् योगी, आहोस्विद् योगजसन्निकर्षरूपप्रत्यासत्त्या नैरन्तर्येण सकलपदार्थवस्तुविषयकज्ञानवान् योगी ब्रह्मविद् यतिरित्यर्थः।

'एकमेवाऽद्वयं ब्रह्म नेह नानास्ति किञ्चन'।
--अध्यात्मोपनि० ६३

'अहं ब्रह्मास्मि'। बृहदारण्यकोपनि० १।४।१०।

'सर्वं खल्विदं ब्रह्म नेह नानास्ति किञ्चन'। --निरालम्बोप०

'अहमेव परं ब्रह्म'। तेजोविन्दूपनि० ६।४४।

'ब्रह्मैवेदं सर्वम्'। बृहदारण्यकोप० २।५।१।

अभेददर्शनं ज्ञानम्'। स्कन्दोपनि०--११

'ज्ञानं चैकात्म्यदर्शनम्'। श्रीमद्भागव० ११।१९।२७।

इत्यादिश्रुतयः स्मृतयश्चास्य चराचरात्मकस्य प्रपञ्चभूतस्य प्रभूतस्य सर्वस्यापि जगतो नामरूपप्रत्ययनिराकरणपूर्वकत्वेन नियमतः एकमात्रं ब्रह्मण एवास्तित्वं प्रस्फोरयन्ति।

ब्रह्मणश्च ज्ञानरूपतां महाकविः श्रीरत्नाकरोऽपि स्वीकरौति । यथोक्तम्—

"यन्नेति नेत्युपाधिनिषत् स्वाभिधोयते च ।
विज्ञप्तिमात्रमनुपाधिनिरीहमन्यैः ॥ इत्यादिना ।

हरविजयम्—सर्गः ४७, १२६–

अपि च—ज्ञानमनन्तं ब्रह्म" "नित्यं विज्ञानमानन्दं ब्रह्म" इत्यादि—श्रुतयोऽपि तस्यैव ब्रह्मणो ज्ञानरूपतां प्रतिपादयन्ति । एवम्—श्रीमद्भागवतेऽपि—'ज्ञानं चैकात्म्यदर्शनम्' इत्यादिघटकीभूतं ज्ञानं ब्रह्मरूपमेवेति मन्तव्यम् ।

इत्थञ्च पूर्वोक्तश्रुतिस्मृतिबलात् सर्वस्यैव चराचरात्मकस्य जगतो ब्रह्मरूपता सिद्धयतीत्यत्र नास्ति लेशतोऽपि विवादः । इत्थञ्च प्रागुक्तश्रुतिस्मृतिबलेन याथार्थ्येन विनिश्चितस्य चिन्मात्रबुद्धिवृत्त्या—

'ब्रह्मैवेदं[1] सर्वम्' 'आत्मैवेदं[2] सर्वम्'
'अहमेव[3] जगत् सर्वम्' 'मद्व्यतिरिक्तमणु[4] मात्रं न विद्यते'

एवञ्च पूर्वोक्तप्रकारेण सर्वकर्मकलापपरित्यागपूर्वकं ज्ञानलक्षणलक्षिते ब्रह्मणि ब्रह्मनिष्ठा विधेया । पुनश्च तादृशब्रह्मनिष्ठया जगद्बन्धननिवृत्तिरूपः, नित्यसुखाभिव्यक्ति रूपो वा मोक्षः सम्पादनीय इति निर्विचिकित्सितम् ।

सचायमित्थं क्रमो व्याख्यातः । तथाहि—

विरक्तः प्रव्रजेद्धीमान् सरक्तस्तु गृहे वसेत् ।
सरागो नरकं याति प्रव्रजन् हि द्विजाधमः ॥
यदा मनसि संजातं वैतृष्ण्यं सर्ववस्तुषु ।
तदा संन्यासमिच्छेत् पतितः स्याद्विपर्यये ॥
प्रवृत्तिलक्षणं कर्म ज्ञानं संन्यासलक्षणम् ।
तस्माज्ज्ञानं पुरस्कृत्य संन्यसेदिह बुद्धिमान् ॥
यदा तु विदितं तत्त्वं परं ब्रह्म सनातनम् ।
तदैकदण्डं संगृह्य सोपवीतां शिखां त्यजेत् ॥
अहमेव परं ब्रह्म वासुदेवाख्यमव्ययम् ।
इति बोधो दृढो यस्य तदा भवति भैक्ष्यभुक् ॥
प्राणे गते यथा देहः सुखं दुःखं न विन्दति ।
तथा चेत् प्राणयुक्तोऽपि स कैवल्याश्रमे वसेत् ॥
अनधीत्याखिलान्वेदानविष्ट्वैवाऽखिलान्सुरान् ।
अनुत्पाद्य सुतान् विप्रो न संन्यसितुमर्हति ॥
अकुर्वन् विहितं कर्म निन्दितञ्च समाचरन् ।
प्रचरन्निन्द्रियार्थेषु नरः पतनमृच्छति ॥

—गीतायाः शङ्करानन्दीटीका, पृ० १५५ तृ० अ० श्लो० १

---

१. बृहदारण्यकोप० २।५।१, २. छान्दोग्योप० ७।२५।२, ३. तेजोबिन्दू प०, ५।४३। ४. त्रिपाद्विभूतिमहानारायणोप०, ८।१।

ज्ञानिन इदमस्ति नितान्तमावश्यकं यत् ज्ञानी तत्त्वं विज्ञाय सर्वथा नैष्कर्म्यमाचरेत् । शिखासहितं वपनं विधाय तत्कालावच्छेदेनैव आहोस्वित्तदनन्तरकालावच्छेदेन सूत्रमपि परित्यजेत्तदा सन्यासलक्षणं पूर्णतया साधु संगच्छते, सङ्गमिष्यति । संन्यासिनः किमिदमस्त्यौचित्यमित्यपि श्रुतिर्ब्रूते । तथाहि—

'ते ह स्म पुत्रैषणायाश्च वित्तैषणायाश्च लोकैषणायाश्च व्युत्थायाथ भिक्षाचर्यं चरन्ति' ।

—इत्यपि तत्रैव

अपि च पुनः—'परं ब्रह्म परिज्ञाय प्रव्रजेद् ब्राह्मणोत्तमः ।
अन्यथा कर्म कुर्वीत न प्रमाद्येत कर्हि चित् ॥
स्वे स्वेऽधिकारे या निष्ठा स गुणः परिकीर्तितः ।
विपरीतस्तु दोषः स्यादुभयोरेष निश्चयः ॥

—तत्रैव, पश्यन्तु

एतावता प्रबन्धेन महाकवि=श्री रत्नाकरेणाऽभिमतस्य ज्ञानस्वरूपस्य ब्रह्मणः समवाप्तये तथा जगद्बन्धननिवृत्तिरूपमोक्षप्राप्तये वा तुरीयस्य संन्यासाश्रमस्यापि कारणतावच्छेदकतया, तदवच्छेदकतया वा प्रयोजकत्वं सुस्पष्टमेव ।

परन्त्वत्रैव विषयेऽर्जुनो भक्तवत्सलं भगवन्तं नन्दनन्दनं श्रीकृष्णचन्द्रं प्रति ब्रवीति यत् प्रभुवरः—

'सर्वं कर्माखिलं पार्थ ? ज्ञाने परिसमाप्यते' ।

एवं 'पूर्वैः पूर्वतरं कृतम्' इत्यादिना कर्मयोगविधानस्य दार्ढ्यं दर्शितम् । ततश्च 'कुरु कर्मैव तस्मात्त्वम्' इत्यादिना चाऽऽदेशप्रदानमपि कर्मयोगविधानस्यैव कृतवान् भवान् । एवं स्थितेऽनयोरेकं यच्छ्रेयः स्यात्तन्मे सुनिश्चितं ब्रुवन्तु भवन्तः ?

एवं स्थिते सच्चिदानन्दो भगवान् ब्रूते—
'संन्यासः कर्मयोगश्च निःश्रेयसकरावुभौ ।
तयोस्तु कर्मसंन्यासात् कर्मयोगो विशिष्यते ॥ २ ॥

—श्रीमद्भगवद्गीता, अ० ५, पृ० २८५

अर्थाद् 'ब्रह्मणि नितरामासः=नितराम् आसः, संन्यासः' इति यौगिकव्युत्पत्त्या ब्रह्मणि नितराम् आसीनतया वर्तमानत्वमेव संन्यासः, अथवा 'सम्यङ्न्यासः=त्याग एव संन्यासः' इत्यपि तुल्यवित्तिवेद्यतया वक्तुं शक्यते । उभयथा निर्विकल्पक-सविकल्पकसमाध्योरुभयोरेव संन्यासशब्दार्थः पर्यवस्यति ।

तत्र बाह्यविषयासक्तिराहित्यावच्छिन्नत्वेन मनसो ब्रह्मणि तद्रूपावच्छिन्नतयाऽवस्थानरूपनिर्विकल्पकसमाधिरेव संन्यासः । तथा प्रत्यग्दृष्ट्याऽनात्मभूतेषु शरीरेन्द्रियादिषु-आत्मत्वप्रकारकबुद्धेर्निरासः संन्यासः स एव च सविकल्पकसमाधिः प्रोट्टङ्क्यते । इत्थञ्चोभयत्रैव संन्यासशब्दार्थः प्राधान्येन पर्यवसितो भवतीति भावः ।

इतोऽतिरिक्तोऽपरोऽप्यस्ति एक एतदङ्गभूतः संन्यासः यश्च 'सर्वकर्मसंन्यास'

शब्देनाऽभिधीयमानो भवति। सोऽपि श्रवणादिजन्यज्ञानद्वारा मोक्षकारणीभूतश्च जायते। इत्थञ्चोक्तप्रकारेण स च संन्यासशब्दार्थस्त्रेधा भिद्यमानो भवतीति।

इदमत्रावधेयमस्ति—यत् प्रागुक्तलक्षणलक्ष्यीभूतात् संन्यासात् प्राङ्निरूपितः कर्मयोगो विशिष्यते। अर्थात् एकस्तु सर्वकर्मसंन्यासः श्रवणादिजन्यज्ञानद्वारामोक्ष हेतुः, अर्थात् श्रवणादिना 'तत्त्वमसि' इत्यादिमहावाक्यार्थविषयकाद् बोधाच्च अनित्याऽशुचि-दुःखानात्सु नित्यशुचिसुखात्मख्यातिरूपाऽविद्या, तन्निवृत्तौ, अथवा अनात्मभूते शरीरेन्द्रियादौ या चास्ते आत्मत्वप्रकारिका बुद्धिर्देहिनां तादृशबुद्धयवच्छिन्नाऽविद्या तन्निराकरणे, आहोस्वित् असत्प्रकाशनशक्तिस्वरूपाऽविद्यानिवृत्तौ सत्यामात्मनः स्वस्वरूपज्ञानं मोक्षः सम्पद्यते उक्तञ्च—इदञ्चाऽऽत्मनः स्वस्वरूपज्ञानं तत् 'नेति नेति' इत्येवंरूपेणोपनिषत्स्वभिधीयमानमस्ति। तदेवाऽऽनन्दरूपममृतञ्च। यथाऽऽह—आनन्दरूपममृतं निरुपाख्य-मूर्मि-पङ्कातिगंस्तिमित वारिधिवारिकल्पम्। यन्नेति नेत्युपनिषत्स्वभिधीयते च—विज्ञप्तिमात्रमनुपाधि निरीहमन्यैः'।

हरविजयम्-सर्गः ४७-१२६

अपिचोक्तवान् आचार्यः श्रीशङ्करः—

'ब्रह्मभावश्च मोक्षः'। ब्र० सू० १।१।४

यश्चास्ति अविद्वत्कर्तृकः संन्यासः स स्वानुष्ठानेन समवाप्ता या मनसो विशुद्धिस्तज्जन्यं ज्ञानं द्वारीकृत्यैव मोक्षहेतुः। यश्चास्त्येवंभूतः कर्मयोगः स च प्रागुक्तौ च तावुभौ निःश्रेयसरूपमोक्षकारणीभूतौ भवतः।

तथापि संन्यासापेक्षया कर्मयोगः परमविश्वासपूर्विकया फलावश्यंभावनिश्चयरूपया, यथा—'केशवः श्रद्धया गम्यो ध्येयः पूज्यश्च सर्वदा' इत्यादिप्रमाणप्रमितया तया श्रद्धया समनुष्ठीयमानः सन् विशेषतां धत्ते। इत्थञ्च श्रुतिस्मृतिषु प्रतिपादितं कर्मैव श्रीबाबाविश्वनाथप्रीत्यर्थं श्रद्धया परमविश्वासेन भक्तिभावनया च समनुतिष्ठोऽविद्याशालिनोऽप्यविदुष ऋणत्रयनिवृत्तिर्जायते। पुनश्च ऋणत्रयनिवृत्तिजन्या बाबाविश्वनाथस्य परमा प्रीतिस्तस्मिन्नविदुषि भवति। तदनन्तरकालावच्छेदेन च बाबा विश्वनाथप्रसादे जायमाने मनसो विशुद्धिः सम्पद्यते। ततश्चेन्द्रियाणां सर्वथा संशोधनात्मिका विशुद्धिर्जायते। इत्येवंरूपेण मोक्षसाधनप्रयोजिका सम्पत्तिः समुपतिष्ठते। अत एव सच्चिदानन्दो भगवान् श्रीकृष्णचन्द्र उक्तवान् यत्—

'तयोस्तु कर्मसंन्यासात् कर्मयोगो विशिष्यते'। अतस्तस्मात् संन्यासात् कर्मयोगः सर्वथा वैशिष्ट्यमापन्नो वर्तते इति स विशिष्टतरः। तथा चाऽविदुषा नहि कदापि कथमपि संन्यासो ग्राह्यः। किन्तु केवलं कर्मैव श्रीबाबाविश्वनाथार्पणबुद्धया विधेयम्।

अत एवाऽग्रे भगवता श्रीकृष्णेनोक्तम्—'यत् योगिनः कर्म कुर्वन्ति सङ्गं त्यक्त्वात्मशुद्धये'। स एव शुद्धिमापन्न आत्मा आनन्दरूपोऽमृतस्वरूपः। तदेवोक्तवान्—महाकविः श्रीरत्नाकरः—सप्तचत्वारिंशत् सर्गे—१२६ संख्याके श्लोके।

एवंरूपेण निष्कामभावनाभावितान्तःकरणास्ते यतयो योगिनो वा कर्मफलं त्यक्त्वा केवलमात्मशुद्धये बाबाविश्वनाथप्रीतये च श्रौतस्मार्तादिलक्षणं कर्म कुर्वाणाः

सन्तः कर्मनिष्ठया समुत्पन्नचित्तशुद्धिसंभावितज्ञानप्रकाशितां नैष्ठिकीं शान्तिम् = मुक्ति, समवाप्नोति ।

ततश्च नित्यनिरन्तरसमाधिनिष्ठया दूषितभावनानां समुदायस्य सर्वथा समूलं निर्मूलितत्वेन वशीकृतसर्वेन्द्रियग्रामो विशुद्धात्मा ब्रह्मवित् यतिः नित्य, नैमित्तिकानि, काम्य, निषिद्धानि च सकलान्येव कर्माणि सकलदृश्यवस्तुनिष्ठमिथ्यात्वप्रकारकज्ञानवान् यतिः सकलान्येव च तत्कर्मसाधनानि तत्फलानि च मिथ्यैवेति विज्ञानेन विधत्ते ।

अपि च 'मायामात्रमिदं द्वैतमद्वैतं परमार्थतः'--श्रुतिः

'एकः सन् भिद्यते भ्रान्त्या मायया न स्वरूपतः'

अन्नोपनि०—५।७।

'तस्मादद्वैतमेवाऽहुर्मुनयः परमार्थतः' । अद्भुतरामायणम्–

इत्येवंरूपेण सर्वस्यापि चराचरात्मकस्य प्रपञ्चस्य मिथ्यात्वदर्शिनो यतेर्योगिनो वा विध्यनुपपत्तेरनुभवात् ।

यथा मरुभूमिस्वरूपदर्शिनं पुरुषं प्रति जलपानं विधेयमिति कथनं सर्वथा जलवत् मिथ्या जायते । तथा सर्वाधिष्ठानभूतब्रह्मदर्शिनो यतेर्योगिनो वा ब्रह्मातिरिक्तं सर्वमेवास्ति सर्वथा मिथ्याभूतमिति कर्मविधिरपि कर्मवत् कारकवच्च मिथ्यैवेति नूनमनुभूयताम् ।

इत्थञ्चाऽन्ततो गत्वा महाकवेः श्रीरत्नाकरस्य कथनं साधु शोभते इति न किञ्चिदनुपपन्नमिति ब्रह्माऽद्वैतसिद्धान्तस्तदीयः सर्वथा समीचीन एवेति कृतं पल्लवितेन ।

चतुर्थोऽध्यायः

महाकविश्रीविल्हणकृतौ दार्शनिकतत्त्वानामन्वेषणम्

तात ? विल्हण ? किं कुर्मो ब्रह्मणो गतिरीदृशी ।
दुष् धातोरिवास्माकं गुणो दोषाय कल्पते ॥

निम्नोद्धृतेन श्लोकेन महाकविः श्रीविल्हणो विवेकदीपापरपर्यायभूतज्ञानप्रदीपात्मकमार्गस्य श्रेयस्करत्वं मन्यमानो ब्रूते—

"साक्रन्दमिति चान्यच्च स संचिन्त्य पुनः पुनः ।
शनैर्विवेकदीपेन पन्थानं प्रत्यपद्यत" ॥

विक्रमाङ्कदेवचरि० सर्गः ४, श्लो० ८७ ।

इत्थञ्च शनैः शनैर्ज्ञानप्रदीपस्वरूपेण विवेकदीपेन भवबन्धनतो निवृत्तिरूपं ज्ञानमार्गं प्राप्नोति मानवः ।

सर्वेऽपि विवेकेन दीपेन दर्शनशास्त्रानुशीलनशालिनो जनाः शान्तिपूर्णं तमेव विवेकदीपजन्यं ज्ञानमार्गं समन्वेषयन्ति, समन्वेषयन्तो वा दृष्टिगोचरीभूता भवन्तीत्यहं राजेन्द्रप्रतापस्त्रिपाठी मन्ये ।

स एव चास्ति सर्वथा शान्तिपूर्णो मार्गो ज्ञानमार्ग इत्यत्र नास्ति लेशतोऽपि सन्देहानध्यवसायावसरः । स एव ज्ञानमार्गः सत्यस्वरूपो मार्गः, शिवस्वरूपो मार्गश्चायं "प्रमाणादीनां तत्त्वज्ञानान्निः श्रेयसाधिगमः" इतिवद् द्वैतं भेदञ्चाऽऽश्रित्यैव प्रवर्तमानो भवति ।

एनं विवेकदीपात्मकं ज्ञानमार्गं महर्षिर्गोतमो वा महर्षिरक्षपादो वा तथाऽन्ये यतयो वा योगिनो वा महात्मानो वा मुमुक्षवो वा प्राप्नुवन्ति ।

सर्वेऽपि प्रेक्षावन्तोऽसारस्यास्य संसारस्याऽसारतां विज्ञाय स्वभावतः प्रतिकूलवेदनीयतया समस्तात्मसंवेदनसिद्धं दुःखं परित्यक्तुकामा एव तद्धानकारणीभूतमुपायं जिज्ञासवः सन्तस्तस्य परमात्मनः परमेश्वरस्य साक्षात्कारभूतं विवेकदीपात्मकं प्रभूतं निगूढमुपायमाकलयन्ति ।

ब्रह्माऽद्वैतसिद्धान्तमनङ्गीकुर्वाणास्तेऽक्षपादा महर्षयो गोतमाः खलु न्यायशास्त्रप्रवर्तका विवेकदीपात्मकस्यैव तत्त्वज्ञानस्यैकविंशतिदुःखध्वंसलक्षणं निःश्रेयसं प्रति कारणतामङ्गीकुर्वन्ति । यथाह—प्रमाणप्रमेयसंशयप्रयोजनेत्यादिगोतमीयसूत्रप्रतिपादिततत्त्वज्ञानात् विवेकाऽपरपर्यायभूतात् निःश्रेयसभूतस्य भवबन्धनिवृत्तिरूपाऽपरपर्यायभूतस्यैकविंशतिदुःखध्वंसरूपस्य मोक्षस्याधिगमो जायते । तथा चोक्तम्—

निःश्रेयसाधिगतिरत्र तु षोडशानां-
ज्ञानात् प्रमाणमिह वेत्ति चतुष्टयं यः ।
ईशा जगत् सृजति यस्य मते स्वतन्त्रो-
न्यायप्रवर्तकमहामुनये नमोऽस्मै ॥

सर्वदर्शनसं० प्रथम पृष्ठ

अस्मिन् श्लोके घटकीभूतं ज्ञानपदं विवेकदीपात्मकज्ञानपरम् ।

"शनैर्विवेकदीपेन पन्थानं प्रत्यपद्यत" ।

वि० दे० च० (विक्रमदेव च०)

इति च महाकवेः श्रीविल्हणस्योक्तिः सर्वथा द्वैतपक्षं भेदपक्षमाश्रित्यैव साधुत्वेन संगच्छते। अस्य महानुभावस्य महाकवेर्नास्ति ब्रह्माद्वैतसिद्धान्तपक्षः। अस्याऽस्मिन् महाकाव्ये "विक्रमाङ्कदेवचरित" नामके या काप्यस्ति दार्शनिकी दृष्टिः सा न्यायवैशेषिकमतमनुसृत्यैव विज्ञेया।

श्रुतशास्त्रत्वेन तत्त्वज्ञानस्य श्रवणाद्यात्मकसाधनसम्पन्नोऽपि शान्तो वा दान्तो वो परतो वा तितिक्षुर्वा सन्नपि अप्रतिहताऽध्यात्मज्ञानसमवाप्तये यः खलु मोक्षेच्छया विषयेषु तीव्रवैराग्यं वा समाधिं वा सदसद्विचारपरम्परां वा नैवाऽऽकलयति तस्याऽयुक्तस्य भावनारहितस्य कथमध्यात्मज्ञानविज्ञानसमवाप्तिः स्यात्। तादृशज्ञानमन्तरा च कुतः शान्तिः स्यात्, अशान्तस्य च कुतः सुखमिति पुत्रमित्रकलत्रप्रभृतिजन्यमहामोहाऽऽवर्तशताकुले कामक्रोधलोभमदमोहेर्ष्याऽभिमानप्रभृतिमनोविकारलक्षणलक्षितमहाग्राहसमन्विते विषविज्ञानपरिपूर्णेऽसारे खलु संसारे सर्वतो भावेन हा कष्टं कष्टतरं वेति सञ्चिन्त्य रोदनविधानपरायण एव मानवः सदा दृष्टिगोचरतां गतोऽनुभूयते, तादृशगोचरतां गता वा समनुभूयन्ते।

इत्थञ्च ज्ञानरसानुभूतिमलभमानास्ते "विपरीतानान्तु विपरीता" इति नियममनुसृत्य विपरीतदर्शिनः खलु कथं ज्ञानात्मिकां विवेकदीपरूपां सिद्धिं समवाप्स्यन्ति।

नित्यनिरन्तरदुर्वासना, दुर्भावनाभाविताऽन्तःकरणास्ते विषयविषपरिपूर्णतां गते संसारार्णवे जननमरणजरादिस्वरूपमहादुःखेन दुःखिताः सन्तः, "को रोग एव साधो ?" इति प्राचीनाचार्यचरणोक्तिमनुसृत्य भवस्वरूपज्वर, महाज्वरादिप्रचण्डरोगमहारोगनिमग्नमात्मानं स्वयमेव समनुभवन्ति। तथा अनाद्यविद्यावासनावशवर्तित्वेन बहिर्मुखा भवन्तस्ते नहि कदापि कथमपि स्वात्मन्यानन्दानुभूतिं प्रकुर्वन्तीति तेऽहर्निशमनिशं स्वात्मानमवसादयन्ति, इत्यतस्ते नहि कदाचित् कथञ्चित् केनचिद् विश्रमसुखशय्यां लभन्ते, इति ते स्वयमेवाऽमार्गेण गन्तुं कामयमाना जिह्वालोल्यदोषवेगगतरोगिवत् स्वं विनाशयन्ति, महादुःखपङ्कनिमग्नञ्च स्वात्मानं स्वयमेव पातयन्ति।

अत एव महाकविः श्रीविल्हणो विवेकदीपस्याऽऽवश्यकतां दर्शितवान्। येन श्रोत्रियब्रह्मनिष्ठगुरोः सान्निध्यं समवाप्य कृतश्रवणादिना समुद्भूतविवेकदीपेन ज्ञानमार्गं आहोस्वित् ज्ञानसिद्धिं समनुप्राप्य विज्ञातात्मतत्त्वेन रागद्वेषमोहादिदोषान् सर्वथा चाऽभिभूय समत्वयोगेन धैर्येण च प्राणायामप्रवृत्तिः कार्या। प्राणायामेन क्षान्त्या चेन्द्रियप्रवृत्तिर्विधेयासद्विषयेषु, ततश्च वैराग्येण, शान्त्या च मनसोऽन्तर्मुखी वृत्तिः सम्पादनीया।

इत्थञ्च प्राग्दर्शितदिशा निरूपिता सम्यङ्निर्धारिता सा वृत्तिश्चिदेकवृत्तौ परिणता सती तादृशवृत्त्यवच्छिन्नं सर्वथाऽविच्छिन्नं तं यतिम्, योगिनम् तीव्रमोक्षविषयकेच्छावन्तं वा मुमुक्षुं ततः परं सर्वदाकालीनविकल्पान्तराऽवकाशरहितत्वेन सुखविशिष्टान्येच्छारूपलक्षणक्षितां तां तृप्तिं सर्वतोभावेन तन्निष्ठाञ्च पूर्णताञ्च सम्पादयति।

येन ज्ञानविज्ञानजन्यां पूर्णतां बाह्यपदार्थवस्तुविवेकराहित्यम्, सांसारिकव्यावहारिकहेयोपादेयबुद्धिशून्यत्वम्, विपरीतप्रत्ययैः सर्वथा निष्कम्पितत्वम्, समारोपितत्वञ्च तस्य यतेर्योगिनो वा स्वत एव पुनः सम्पद्यते ।

येन ते मोक्षविषयकेच्छावन्तो यति, योगिप्रभृतयो जनास्तच्छरीरावच्छिन्ना वा जीवात्मानो द्वन्द्वाऽद्वन्द्वभूतेषु प्रभूतेषु विषयेषु शीतोष्णेषु, सुखदुःख-मानापमानस्वरूपेषु, एवं तथाविधेषु हिंसकव्याघ्रसर्पवृश्चिकादिषु, तथाऽग्न्यादिषु, वृष्टिवज्रपातप्रभृतिषु भयङ्करतां गतेषु रोगेषु च सुन्दरमनोनीतजलपानादिषु समुपस्थितेषु अपि विवेकदीपसमन्वितोऽयं यतिः यत्र तत्रैव केवलं नहि अपि तु सर्वत्रैव विवेकदीपजन्यामाहोस्वित् विवेकदीपप्रज्वालितां तां समदर्शितां समाश्रित्यैव सन्तिष्ठमानो भवतीत्यस्ति शास्त्रीयः सिद्धान्तोऽतो नहि कदापि कथमपि समदर्शितां तां विमुञ्चति प्राङ्निरूपितगुणगणनिरूपितो योगी वा यतिर्वेति ।

नापि चाऽऽरोपितनाम-रूप-क्रिया-तत्फलानुसन्धानपरो भवति अपि तु तत्रैव स्थिरो भवति नहि किञ्चिदपि ततः प्रचलति । यथोक्तम्—

"महत् पदं ज्ञात्वा वृक्षमूले वसेत्, कुचैलोऽसहाय, एकाकी, समाधिस्थ, आत्मकाम, अकामो, निष्कामो, जीर्णकामो, व्याघ्रे, हस्तिनि, सिंहे, दंशे, मशके, नकुले; सर्पे, यक्षे, राक्षसे, गन्धर्वे, मृत्योः स्वरूपाणि लक्षणानि वा विदित्वा न बिभेति कुतश्चनेति वृक्ष इव तिष्ठतासेच्छिद्यमानो नहि कुप्यते, न कम्पेत्, उपल इव तिष्ठासेच्छिद्यमानो न कुप्येत, न कम्पेत, आकाशमिव तिष्ठासेच्छिद्यमानो न कुप्येत न कम्पेत सत्येन तिष्ठासेदिति" । —श्रीमद्भगवद्गीतायाः शङ्करानन्दी टीका० पृ० ३५१-अ०६, श्लो०८

इत्थञ्च विपर्ययभूतानां प्रत्ययानां कारणेषु समस्तेषु समुपस्थितेष्वपि स्वीयामचलतां न जहाति प्राक्-वर्णितो गुणगणविशिष्टो यतिर्योगी वेति सर्वथा विपर्ययभूतैः प्रत्ययैर्निष्कम्प्यो भवतीति शास्त्राणि वदन्ति, विवदन्ते चात्र बहवः ।

तदेवास्य प्राग्रूपं वर्णितवान् महाकविः श्रीविल्हणः—

"साक्रन्दमिति चान्यच्च स सञ्चित्य पुनः पुनः ।
शनैर्विवेकदीपेन पन्थानं प्रत्यपद्यत ॥८७॥॥

विक्रमां० सर्गः ४, पृ० ३२।

एवञ्च श्रवण-मननादिना शनैः शनैर्जायमानेन विवेकदीपेन प्राग्वर्णितो यतिर्योगी वा मोक्षपन्थानम् = मोक्षमार्गम्, अवश्यमेव प्रत्यपद्यत । अत एवाऽग्रेऽपि श्रीविल्हणस्तमेव विवेकदीपात्मकं मार्गं पुष्टीकृतवान् । यथा—

"ज्येष्ठं गुणैर्गरिष्ठोऽपि पितुस्तुल्यममंस्त सः ।
महात्मनाममार्गेण न भवन्ति प्रवृत्तयः ॥९५॥

पश्यन्तु-तत्रैव श्लो० ९५, पृ० ३३

अनेन श्लोकेन श्रीविल्हण इदमेव व्याहृतवान्-यन्महात्मानो यतयो योगिनो वाऽमार्गेण = विवेकदीपाऽतिरिक्तेन अमार्गस्वरूपेण मार्गेण अर्थात् भ्रमान्धकारावच्छिन्नेन दूषितेन मार्गेण नहि गच्छन्ति । अतो महात्मनां प्रवृत्तयोऽमार्गेण प्रागुक्तेन नहि भवन्ति ।

स च 'विवेकदीपः' पार्थक्येन ज्ञानरूपो मार्गः। यथा चास्ति नीरक्षीरविवेकः नीरक्षीरविवेकदीपो वा विशिष्टं ज्ञानं वा, विशेषरूपेण विशिष्टवैशिष्ट्यावगाहि ज्ञानं वा।

आहोस्वित् अन्योन्यधर्मव्यावृत्त्या परमार्थतो वस्तुतत्त्वावधारणं वा यथा—सांख्य-दार्शनिकानां नये प्रधानपुरुषोर्भेदज्ञानम्।

तत्रेदमाशङ्कितं "ननु पुरुषार्थनिबन्धना भवतु प्रधानस्य प्रवृत्तिः, परन्तु निवृत्तिस्तु कथमुपपन्ना भविष्यतीत्युच्यतामिति चेदुच्यते। यथा—भर्त्रा दृष्टदोषा स्वैरिणी पुनर्भर्तारं प्रति नैव गच्छति, यथा वा नर्तकी रङ्गस्थान् पुरुषान् नृत्यं दर्शयित्वा नृत्यात् निवर्तमाना सती पुनारङ्गस्थलं नैव समायाति। तथैव तदेव स्वरूपं प्रकृतेरपि विज्ञेयम् इति। उक्तञ्च—

"रङ्गस्य दर्शयित्वा निवर्तते नर्तकी यथा नृत्यात्।
पुरुषस्य तथात्मानं प्रकाश्य विनिवर्तते प्रकृतिः॥

सांख्य का० ५९—

श्रीहर्षस्य ब्रह्माद्वैतसिद्धान्तविचारः

इदानीमस्माभिः श्रीहर्षरचनासु दार्शनिकतत्त्वानां तत्सन्दर्भाणाञ्च सोपपत्तिकं विवेचनं विधीयते। तथा हि—

ब्रह्माऽद्वैतसिद्धान्तोऽप्यस्ति एका दार्शनिकी दृष्टिः। तस्या एव ब्रह्माऽद्वैतरूपाया दार्शनिक्या दृष्टेरत्र विचारो विधीयते मया श्री राजेन्द्रप्रतापेन त्रिपाठिना।

तत्र परमात्मरूपो जगन्नियन्ता परमपिता परमेश्वर एव चास्ति परब्रह्म। तत्रापि च सोपाधिकं प्रपञ्चसमन्वितं ब्रह्मैव प्रागुक्तशब्दैर्व्याह्रियते। तदेव च ब्रह्म भगवता व्यासेनापि कथितमस्ति। तथाहि—

"वदन्ति तत्तत्वविदस्तत्त्वं यज्ज्ञानमद्वयम्।
ब्रह्मेति परमात्मेति भगवानिति शब्द्यते॥

भागवते—१।२।११।

इदमेव भागवतोक्तं ब्रह्म साकारम्, सविकारम्, सगुणम्, सकलम्, इत्यादिशब्दाभिधेयतां गतमस्ति, तस्य च नवधा रूपं निरूपितम्। तथाहि—

"तर्काणामेव षण्णां यत् षड्विधं रूपमैश्वरम्।
वैष्णवानामेकरूपं वेदानामेकमेव च॥
पुराणानामेकरूपं तस्मान्नवविधं स्मृतम्।
न्यायो निर्वर्णनीयञ्च यन्मतं शङ्करोऽब्रवीत्॥
नित्यं वैशेषिकास्त्वन्यं वदन्ति च विचक्षणाः।
सांख्यो वदति तं देवं ज्योतीरूपं सनातनम्॥

ब्रह्मवैवर्त प्र० अ० १०८

मीमांसा सर्वरूपं च वेदान्तः सर्वकारणम्॥
पाताञ्जलोऽप्यनन्तं च वेदाः सत्यस्वरूपकम्॥
स्वेच्छामयं पुराणं च भक्ताश्च नित्यविग्रहम्॥ तत्रैव—

यच्चास्ति सर्वथा प्रपञ्चविनिर्मुक्तं परब्रह्म तत् निराकारम्, निर्विकारम्, निर्गुणम्, निष्कलम्, सर्वथोपाध्यनवच्छिन्नम्, देश-कालभेदाद्यनवच्छिन्नं, सजातीय विजातीय, स्वगतभेदत्रयशून्यञ्च तथा नित्य, शुद्ध, बुद्ध, मुक्त, स्वभावञ्च वर्तते । अपि च—

"आत्मैवेदं सर्वम्" ।—छान्दोग्योप०० ७।२५।१ ।

"ब्रह्मैवेदं सर्वम्" ।—वृहदारण्यकोप०—२।५।१ ।

"सच्चिदानन्दरूपमिदं सर्वम्" । नृसिंहोत्तरतापनीयोप०—७ ।

एवम्—"निविकारे निराकारे निर्विशेषे भिदा कुतः" ।

अध्यात्मोप०—२२

"अद्वैतसिद्धान्तमेव हि सत्यं शिवं सुन्दरं सिद्धान्तमस्ति" ।

माण्डूक्योप०—७ ।

शान्तं शिवमद्वैतं चतुर्थं मन्यन्ते स आत्मा" । तत्रैव—

"सत्यं ज्ञानमनन्तं ब्रह्म" ।—तैत्तिरोयोप० २।१ ।

"अहं ब्रह्मास्मि" ।—वृहदारण्यकोप० १।४।१० ।

"तत्त्वमसि" ।—छान्दोग्योपनि०—२।८।७ ।

"अयमात्मा ब्रह्म" । —बृहदारण्यकोप०—४।५।१९ ।

इत्यादिश्रुत्यात्मकवेदेन प्रतिपादितं ब्रह्मैव तत् परं ब्रह्मवर्तते इत्यत्र नास्ति लेशतोऽपि वादाङ्कुरमिति नूनं विज्ञायताम् । सर्वेऽपि वेदाः स्वस्वोपनिषन्मुखेन तदेव ब्रह्म प्रतिपादयन्ति । उक्तञ्च—

"आत्मा वा इदमग्रे एक एवाऽऽसीत्" ।

—छान्दोग्योप नि०

इत्थञ्चेदमेवाऽद्वैततत्त्वलक्षणलक्षितं तद् अद्वैतं ब्रह्म श्रीश्रीहर्षोऽपि स्वीयमहाकाव्ये 'नैषध' नामकेऽन्वयमुखेन दृष्टान्तविधया समुल्लिखितवान् । तथाहि—

"साप्तुं प्रयच्छति न पक्षचतुष्टये तां-
तल्लाभशंसिनि न पञ्चमकोटिमात्रे ।
श्रद्धां दधे निषधराड्विमतौ मताना-
मद्वैततत्त्व इव सत्यतरेऽपि लोकः ॥

नैषधे—स० १३, श्लो० ३६ ।

अर्थात् "एकमेवाऽद्वितीयम्"—छान्दोग्योप०—६।२।१ ।

"नेह नानास्ति किञ्चन"—वृहदारण्यकोप०—४।४।१९ ।

इत्यादिश्रुतिभिः सत्यतरे = पारमार्थिकेऽद्वैततत्त्वे, ब्रह्मैक्यबोधे वानाद्यविद्याभूतया प्रभूतया माययाऽनात्मन्येवाऽऽत्मत्वभ्रमेण संमोहितोऽविद्यावान् लोको युक्तात्वाऽयुक्तत्वप्रकारकविचारशून्यः सन् यथा तस्मिन् श्रद्धां विश्वासं वा न प्रकुरुते । यतः—

"सांख्या हि प्रतिशरीरं पुरुषबहुत्वमङ्गीकुर्वन्ति । नैयायिक-वैशेषिकाश्च "नानात्मानो व्यवस्थिताः" इति वचनादात्मनां नानात्वमङ्गीकुर्वन्ति । आर्हताश्च देहप्रमाणात्मस्वीकारमङ्गीकुर्वन्ति । बौद्धाश्च स्वसिद्धान्तसिद्धाऽनेकयुक्तिभिरनेकात्मनामेव चित्त ततिबाहुल्यमङ्गीकुर्वन्ति"—नैषधीयप्रकाशव्याख्यायाम्—

तत्रैव तथा चैतेषां सांख्य, नैयायिकप्रभृतीनां दार्शनिकानां विदुषां नास्ति तस्मिन्नद्वैततत्त्वे श्रद्धा, विश्वासोवेति दृष्टान्तविधया नैषधीयसर्गस्य १३ त्रयोदशसर्गस्य, श्लोक ३६ तो दर्शितवान् श्रीहर्षः।

परन्तु तस्मिन्नद्वैततत्त्वे ब्रह्मणि विश्वासशून्यः श्रद्धारहितश्चास्ति-अविद्यावान् मायाऽऽवृतो लोकः, सचास्ति स्वयं स्वीयव्यक्तित्वशून्यः।

तात्त्विकदृष्ट्या विचार्यमाणे सैद्धान्तिकेऽप्यध्वनि सत्यतरमद्वैततत्त्वमेव सम्यक्त्वे नाऽऽयाति, समवतरति च। तस्यैव च परमार्थतो विद्यमानस्याऽद्वैततत्त्वस्य विवेचनं श्रीहर्षो नैषधमहाकाव्यस्य पञ्चमसर्गस्यैकोनचत्वारिंशत्तमे श्लोकेऽपि कृतवान्। तथाहि—

"विश्वरूपकलनादुपपन्नं तस्य जैमिनिमुनित्वमुदीये"।

नैषधे, सर्ग० ५, श्लो० ३९।

इत्यादिना परमार्थतो विद्यमानं तदेव पारमार्थिकमद्वैततत्त्वं सुदृढ़ीकर्तुं श्रीहर्षः "विश्वरूपकलनात्" इत्युक्तवान्। 'विश्वरूपकलनात्' इत्यस्य "सर्वं विष्णुमयं जगत्" इति श्रुत्यनुसारतो विश्वेषां = सर्वेषाम्, रूपस्य = स्वरूपस्य, कलनात् = स्वीकारात्। सर्वात्मकत्वादित्यर्थः। अर्थात् पुराणपुरुषोत्तमस्य भगवतो विष्णुरूपस्य नारम् = ज्ञानम्, अयनम् = चक्षुर्यस्याऽसौ नारायणस्तदात्मकस्येत्यर्थः। सर्वात्मकस्येति यावत्। तथा चोक्तम्—

"वासुदेवः सर्वमिति स महात्मा सुदुर्लभः"।

गीता—अ०७।श्लो०१९।

आशङ्कते—न च नाम, रूप, तदवच्छिन्नव्यक्तिविशेषैः पृथिव्यप्तेजोवाय्वादि-द्रव्याणां तथा तत्कार्याणां च भेदप्रयोज्यया पार्थक्येन प्रतीयमानसत्तावत्तया प्रत्यक्षप्रमाणेन समुपलब्धिं गतस्य स्थावरजङ्गमात्मकस्य सर्वस्यापि जगतः कथं वासुदेवात्मकत्वम्, कथं वा वासुदेव एव सर्वम् इति च कथनं साधु सङ्गच्छते, यतो जगतो वैधर्म्यमापन्नेन वासुदेवेनाऽभेदस्तादात्म्यं वा नहि सेत्स्यतीति वाच्यम्। तात्त्विकदृष्ट्या विचार्यमाणे नाम-रूपादीनां तदवच्छिन्नस्य च चराचरात्मकस्य जगतो ब्रह्मसत्तातिरिक्तसत्ताकत्वाभावेन सत्ताया असिद्धेरिति सुतरां वासुदेवात्मकत्वं सिद्ध्यतीत्यत्र श्रुतेरपि प्रामाण्यमाह—

"अहमेवाक्षरं ब्रह्म वासुदेवाख्यमव्ययम्"

नारदपरिब्राजकोप—०३।२०।

"अहमेव जगत् सर्वम्"। तेजोविन्दूप०—६।४३।

" न तु तद्द्वितीयमस्ति"। बृहदारण्यकोप०—४।४।२३

यथा केनापि प्रमाणेन मृत्तिकासत्ताव्यतिरेकेण घटस्य सत्ता नहि साधयितुं निरूपयितुं वा शक्यते। एवं नहि केनापि प्रमाणेन तन्तुसत्तातिरिक्ता काचित् पटसत्ताऽनुभूयतेऽपितु मृदेव यथा घटाकारेण भासमाना भवति, तन्तुरेव च पटाकाराकारितो जायते, तद्वदेव हि जगज्जन्मादिविकारशून्यं लोकमेहश्वरं निरतिशयैश्वर्यसम्पन्नं तच्चिदाकाशं वासुदेवाख्यमद्वयं तच्चिदाकाशं ब्रह्मैव जगदाकारेण भासमानं भवति। तथा चोक्तम्—

"घटनाम्ना यथा पृथ्वी पटनाम्नाहि तन्तवः।
जगन्नाम्ना चिदाभाति सर्वं ब्रह्मैव केवलम्" ॥

योगशिखोप०—४।१८

"ब्रह्मैवेदं विश्वमिदं वरिष्ठम्"। मुण्डकोपनि०—२।२।११।

"जगद्रूपतयाप्येतद् ब्रह्मैव प्रतिभासते"। आत्मोपनि०—२—

'सच्चिदानन्दरूपमिदं सर्वम्'।

नृसिंहोत्तरतापनीयोपनि०—७।

तद्वदेव हि जगतोऽपि मृत्तिकायां घटवत् ब्रह्मणि कल्प्यमानस्याऽस्य चराचरात्मकस्य केनापि प्रमाणेन नहि पार्थक्येन सत्ता साधयितुं सम्पादयितुं वा शक्यते। कल्प्यमानत्वस्योभयत्रैव समानत्वेन तत एव सत्ताशून्यस्य जगतो प्रागुक्तनारायणलक्षणलक्षित वासुदेवस्वरूपब्रह्माऽभिन्नत्वं सिद्धयति।

इत्थञ्च यथा वासुदेवस्वरूपस्य नारायणस्य, नारायणस्वरूपस्य वा वासुदेवस्य जगतोऽभिन्नत्वमस्ति तथैव तस्य—

'सर्वं खल्विदं ब्रह्म नेह नानास्ति किञ्चन'।

--निरालम्बोपनि०

इति श्रुत्यनुसारतः सर्वात्मकत्वेन ब्रह्मात्मकत्वम्, शिवात्मकत्वम्, सिद्धयति। तथाहि—

'ब्रह्मा नारायणः, शिवश्च नारायणः, शक्रश्च नारायणः, दिशश्च नारायणः, कालश्च नारायणः, कर्माखिलं नारायणः, मूर्तामूर्तञ्च नारायणः, कारणात्मकं सर्वं, कार्यात्मकं सकलं नारायणः, तदुभयविलक्षणो नारायणः'।

त्रिपाद्विभूतिमहानारायणोप०-२।१।

तथा च ब्रह्मैव नारायणः, शिवोऽपि नारायणः, दिशोऽपि नारायणः, विदिशश्च नारायणः, कालश्चापि नारायणः, एवं कारणात्मकं तथा कार्यात्मकं यच्चाप्यस्ति तत् सर्वमेव नारायणः।

अपि च—नैषधीयपञ्चमसर्गीयैकोनचत्वारिंशत्तमश्लोघटकीभूतेन 'विश्वरूपकलनात्' इति पदेन श्रीश्रीहर्षोऽपि नारायणस्वरूपस्य तस्य वासुदेवस्य विश्वरूपतां दर्शितवान्। तेन च तस्य सर्वात्मकत्वं प्रस्फोरितं भवति। अपि च—

'स ब्रह्मा स शिवः सेन्द्रः सोऽक्षरः परमः स्वराट्।
स एव विष्णुः स प्राणः स कालोऽग्निः सः चन्द्रमाः ॥
स एव सर्वं यद् भूतं यच्च भव्यं सनातनम्।'

कैवल्योपनि० १।८-९।

अर्थात् स एव ब्रह्मा, स एव शिवः, स एव चेन्द्रः, स एव खलु अक्षरः = अविनाशी परमात्मा, स एव च विष्णुः, स एव प्राणोऽपि, स एव लोकक्षयकृत् प्रवृद्धः कालः, स एव चाऽग्निः, स एव खलु चन्द्रमाः, एवं यत् किञ्चिदप्यस्ति भूतम्, भविष्यत्, वर्तमानञ्चः, तत् सर्वमस्ति केवलमद्वयं वासुदेवः। इदमेव च 'सर्वं विष्णुमयं जगत्' इत्यादिना नैषधे-

महाकाव्ये महाकविः श्रीश्रीहर्षो दार्शनिकीदृष्टिरूपावच्छिन्नं ब्रह्माऽद्वैतसिद्धान्तभूतं स्वरूपं दर्शितवान् ।

इदानीं पुनस्तमेव सिद्धान्तं पुष्टीकृतवान् श्रुतिरूपो वेदः । तथाहि—

'भोक्ता भोग्यं प्रेरितारं च मत्वा ।
सर्वं प्रोक्तं त्रिविधं ब्रह्म चैतत् ॥'

श्वेताश्वतरोप०--१।१२ ।

एतेनापि तस्य नित्यानन्दैकरसस्य नित्य, शुद्ध, बुद्ध, मुक्तस्वभावस्य ब्रह्मणो वासुदेवस्य सर्वात्मकत्वेन भोक्तृ, भोग्य, प्रेरितरूपतापि दर्शिता भवति । 'येन यद् व्याप्तं तत्तन्मात्रमेवे'ति न्यायेन वासुदेवेन व्याप्तमिदं सर्वं केवलं भवत्स्वरूपमेवाऽतः सर्वं त्वमेवाऽत एव त्वमनन्तरूपोऽसि ।--

'चिदेव पञ्चभूतानि चिदेव भुवनत्रयम्' । —योगवासिष्ठ

एवम्-- 'सर्वं खल्विदं ब्रह्म' । छान्दोग्योप० ३।१४।१

'ब्रह्मैवेदं सर्वम्' । बृहदारण्यः २।५।१।

'आत्मैवेदं सर्वम्' । छा० उ० ७।२५।२।

'ब्रह्मैवेदं विश्वमिदं वरिष्ठम्' ।

मुण्डकोपनि० २।२।११।

एतावतोपनिषद्वाक्यप्रबन्धेनापि खल्विदं जगत् तदन्तर्गतानि च पञ्चभूतानि, भुवनत्रयंञ्च सत्, चित्, आनन्देति स्वरूपलक्षणलक्षितेन वासुदेवेन भगवता भ्रमकल्पितं सर्वं व्याप्तम् इत्येव सिद्धयति ।--अपि च पुनः—

'अन्वयव्यतिरेकाभ्यां यत् स्यात् सर्वत्र सर्वदा' ।

श्रीमद्भाग०--२।९।३५।

अर्थात् अन्वयव्यतिरेकमुखेनापि प्रमाणभूतेनेदमेव विज्ञायते यद् यस्यास्ति सत्ता अर्थात् यस्यास्तित्वं त्रिकालाऽबाध्यत्वेन रूपेण निर्धार्यते स एव सर्वत्र वर्तते सर्वदा च वर्तते इति च वर्णितवान् प्रागेव श्रीहर्षः ।

अपि च— 'सर्वमिदमहं च वासुदेवः' ।

मुण्डकोपनि० २।२।८।

अर्थात्—'एकमेवाऽद्वितीयं नेह नानास्ति किञ्चन' अयमात्मा ब्रह्म 'अहमेव जगत्-सर्वम्' इत्यादिश्रुतिवाक्यार्थविचारोत्पन्नज्ञानबलेन योगानुष्ठानस्वानुभूतिबलेन च सर्वात्मकत्वमास्थितः सन् सर्वभूतस्थं महदादिस्थूलपर्यन्तं सर्वाण्येव च भूतानि बाह्याभ्यन्तराऽवच्छेदेन सर्वदैकरूपेण सर्वतो व्याप्य सन्तिष्ठते ।

अयमेव भावो विचारो वाऽथर्ववेदेनापि स्फुटीक्रियते । यथा—

नूनं तदस्य काव्यो हिनोति-
महो देवस्य पूर्व्यस्य धाम ।
एष जज्ञे बहुभिः साकमित्था-
पूर्वे अर्धे विषिते ससन्नु ।

अथर्ववेदः—४।१।६।

अर्थात्—काव्यः = परमात्मनः सर्वव्यापकतां जानानो ज्ञानी पुरुषः, नूनम् = निश्चयेनैव, अस्य = अस्य, पूर्व्यस्य = सर्वतः पूर्वस्य, देवस्य = प्रकाशस्वरूपस्य परमात्मनः, तत् = तत्। महः = महत्, धाम = स्थानम्, हिनोति = प्राप्नोति। इत्यतः। एषः = अयं ज्ञानी पुरुषः, इत्था = एवं प्रकारेण, बहुभिः साकम् = बहुभिर्जीवैः सह। जज्ञे = संसारे समुत्पन्नो बभूव। परन्तु। पूर्वे अर्धे विसिते = पूर्वे अर्धे अर्थात् अपूर्णे ज्ञानमये जन्मनि विशेषरूपेण बन्धनमागते सति तस्य सहवासिनो जीवाः। ससन्नु = चिन्तासन्तानविरहिताः सन्तः अज्ञानान्धकारे शयाना आसन्।

अस्मिन्नेव भ्रान्तिसाधनीभूत, मिथ्याप्रतिपत्तिलक्षणदोषात्मकमोहस्वरूपाऽज्ञानाऽन्धकारे शयानानां पञ्चभौतिकशरीरावच्छिन्नजीवात्मनां विषये दार्शनिकशिरोमणिर्महाकविः श्रीश्रीहर्षोऽपि स्वयमेवाऽब्रवीत्। तथाहि—

पथ्यां तथ्यामगृण्हन्तमन्धं बन्धुप्रबोधनाम्।
शून्यमाश्लिष्य नोज्झन्तं मोहमैक्षन्त हन्त ते॥

नैषधे, सर्गः १७, श्लो० २९।

अर्थात् पथ्याम् = हिताम्, तथ्याम् = सत्याम्, बन्धुप्रबोधनाम् = बन्धुना = मातापित्रादिना, (कृताम्) प्रबोधनाम् = सदुपदेशात्मिकाम् अर्थात् सत्कर्म विधीयताम् असच्च कर्म मा क्रियतामित्येवंरूपां प्रवर्तनामित्यर्थः। अगृण्हन्तम्=असत्कर्मनिषेधविषयिणीं प्रबोधनाम् अस्वीकुर्वाणम्। अशृण्वन्तमिति यावत्। अन्धम् = अज्ञानलक्षणलक्षितम्। एवम् शून्यम् = अप्रामाणिकम् अर्थात् अनात्मभूतानि जडस्वरूपाणि शरीरेन्द्रियाणि मायापरपर्यायभूताया अविद्याया विलासमात्रेणाऽऽत्मत्वेन। आश्लिष्य = निश्चित्य। सहस्रशो नानाविधप्रकारेण बोध्यमानमपि मूर्खतावशात् नोज्झन्तम् = नहि परित्यजन्तम्, प्राङ्निर्दिष्टं मोहम्, ते देवाः। जनसमुदाये। ऐक्षन्त = अपश्यन्। हन्त = खेदः, महदाश्चर्यमिदम्।

एतावता पद्यस्वरूपेण श्लोकात्मकेन प्रबन्धेन श्रीश्रीहर्षः खल्वज्ञानस्य महतीं पराकाष्ठां प्रदर्शितवान्।

अपि च पुनस्तत्रैव—

"श्वः श्वः प्राणप्रयाणेऽपि न स्मरन्ति स्मरद्विषम्।
मग्नाः कुटुम्बजम्बाले बालिशा यदुपासिनः॥

तत्रैव, श्लो० ३०

अयमर्थः—यदुपासिनः = यस्य = मोहस्य, उपासिनः = सेवकाः। अत एव कुटुम्बजम्बाले = पुत्रमित्रकलत्रप्रभृतिस्वरूपे पङ्के। मग्नाः। बालिशा = मूर्खाः। मृतोऽहम् पुत्रः किं करिष्यति, इदं कलत्रं किं विधास्यते, अस्य गृहस्य क्षेत्रस्य वा किं भविष्यति, इत्यादिना नानाविधसंकल्पविकल्पादिना पुत्रकलत्रप्रभृतियोगक्षेमविषयकचिन्तासन्तानविचारणामात्रपरास्ते शिश्नोदराऽऽराधनतत्पराः श्वः, परश्वो वा प्राणप्रयाणकालेऽपि। स्मरद्विषम् = संसारसागरतारकं भगवन्तं शङ्करं महादेवम्। न स्मरन्ति = नहि ध्यायन्ति।

पुनस्तस्यैवाऽज्ञानस्वरूपमोहान्धकारस्य दूषितत्वमाह—

"पुंसामलब्धनिर्वाणज्ञानदीपमयात्मनाम् ।
अन्तर्म्लापयति व्यक्तं यः कज्जलवदुज्ज्वलम् ॥

नैषधे, सर्गः १७०, ३१,

इदानीं पुनस्तस्यैव तमोगुणप्रयोज्याऽन्तः करणपरिणामविशेषस्वरूपाऽज्ञानात्मकमोहान्धकारस्य सर्वथा दूषितत्वेनाऽग्राह्यत्वमाह श्रीश्रीहर्षः । अत एव "मिताक्षरा" टीकायान्तु टीकाकारः स्वयं स्वानुभूतिबलेनापि "चित्तवैकल्यं मोहः" इत्युक्तवान् । अयञ्च मोहो नूनमेव चित्ते विकलतां जनयति ।

चित्तवैकल्यरूपकारणवशादेव मानवः सर्वदा कलिप्रदर्शितं शास्त्रीयविधिविधानोक्तमार्गविरुद्धमेव मार्गमेवानुसरति, सर्वथा विपरीतमेव पन्थानमनुगच्छति, येनाऽवश्यमेव तस्य भ्रमान्धकारे भ्रमान्धकारलक्षणलक्षिते वाऽज्ञानान्धकारे नूनमेव भवति पतनम् । अयम्भावः—

यः = मोहः । अलब्धनिर्वाणदीपमयात्मनाम् = अलब्धः = न लब्धः = प्राप्तः, निर्वाणज्ञानदीपमयः = निर्वाणः = मोक्षः, तत्साधकं यज्ज्ञानम्, तदेव दीपः प्रकाशकत्वात् प्रदीपः, तद्रूपावच्छिन्न आत्मा येषां ज्ञानसम्पन्नानां वसिष्ठप्रभृतीनामित्यर्थः । पुंसाम् = विषयासक्तानां "मनुष्यरूपेण मृगाश्चरन्ति" इत्युक्तिगम्यानामित्यर्थः । उज्ज्वलम् = स्वभावतः स्वरूपतश्चापि निर्मलम् । अन्तः = अन्तःकरणम् । व्यक्तम् = प्रस्फुटम् । म्लापयति = मलसहितं विधत्ते । अर्थात् रागद्वेषादिमलावच्छिन्नं करोतीति भावः । श्रूयते यत् मोहगर्ते = मोहात्मकाऽज्ञानान्धकारे निपतनशीलाः, मोहमोहिता वा कामाधीना अत एव पराधीनाः सन्तस्ते महात्मनो विश्वामित्रप्रभृतयोऽपि मेनकाप्रभृतीनां देवाङ्गनानां परमसौन्दर्य-युवतीत्वधर्मावच्छिन्नानां खलु मोहजम्बाले निपतिताः सन्तः किंकर्तव्यविमूढतां गता इति । अतो मेनकाप्रभृतिदेवाङ्गनाभिः सह सङ्गमकालपूर्वकालावच्छेदेन समुज्ज्वलतां गतस्य मनसो मालिन्यं जायते तदनन्तरकालावच्छेदेन । तथा चोक्तम्—

"ज्ञानिनामपि चेतांसि देवी भगवती हि सा ।
बलादाकृष्य मोहाय महामाया प्रयच्छति" ॥

दुर्गासप्तशती = मा० १।५५।

इत्यत्र केवलं मार्कण्डेयवचसः प्रामाण्यं विज्ञेयम् । अपि च काम, क्रोध, लोभात्मका अपि दोषा मोहादेव जायन्ते इत्यपि स्फुटीकरोति श्रीहर्षः—

"ब्रह्मचारिव्रतस्थायियतयो गृहिणं यथा ।
त्रयो यमुपजीवन्ति क्रोधलोभमनोभवाः" ॥

नैषधे—१७ सर्गः, श्लो० ३२—

अर्थात्—ब्रह्मचारिव्रतस्थायियतयः = ब्रह्मचारिवानप्रस्थभिक्षु[१]—रूपाः । इमे त्रयोऽप्याश्रमाः यथा, गृहिणम् = गृहस्थाश्रमम् । आश्रयन्ते । अर्थात् इमे प्रागुक्तास्त्रय

१. संन्यासाश्रमः ।

आश्रमाः यथाऽशनाच्छादनार्थं गृहस्थाश्रममुपजीवन्ति। यथोक्तम्—भगवता मनुनापि—

"यस्मात्त्रयोऽप्याश्रमिणो ज्ञानेनान्नेन चान्वहम्।
गृहस्थैरपि धार्यन्ते तस्माज्ज्येष्ठो गृहाश्रमी"॥

मनुस्मृतिः—३।७८।

तत्रैव प्रकृतेऽपि क्रोधलोभमनोभवाः=क्रोधलोभकामाः, इमे त्रयोऽपि यं=मोहम्। उपजीवन्ति=आश्रित्य वर्तन्ते। स मोहः कीदृशः, अर्थात् तस्य मोहस्य यत् स्वरूपं वर्णितं दर्शितञ्चोपरि तादृशस्वरूपक एवास्ति, आहोस्वित्तस्य मोहस्य रूपान्तरमप्यस्ति किमपीत्यत्राह—श्रीहर्षः—

जाग्रतामपि निद्रा यः पश्यतामपि योऽन्धता।
श्रुते सत्यपि जाड्यं यः प्रकाशेऽपि च यस्तमः॥

नैषधे, सर्गः १७, श्लो० ३३।

अर्थात्—यः=मोहः, जाग्रतामपि=सावधानानामपि=प्रबोधवतामपि। निद्रा=निद्रास्वरूपः=निद्राया ज्ञानशून्यावस्थारूपत्वेनाऽज्ञानस्वरूप इत्यर्थः। एवम्—यः मोहः, पश्यतामपि=चक्षुर्जन्यचाक्षुषप्रत्यक्षात्मकज्ञानवतामपि। अन्धता=अन्धत्वप्रयोजकः, अर्थात् सुपथं कुपथं वा निर्णेतुमशक्यत्वेन द्रष्टव्यदर्शनाभावरूपः, सद्वस्त्वग्रहणरूपो वा। अर्थात् दुःखपङ्कनिमग्नस्य क्षणभङ्गुरताञ्च गतस्य विश्वस्यानित्यतां "सर्वं दुखं विवेकिनः" इति न्यायेन च तदीयां दुःखरूपतां च विजानतामपि तदपरित्यागेनाऽज्ञानरूपोऽज्ञानान्धकाररूपो वा मोहः—इत्येव प्रमात्वेनाऽवधार्यते इति तु निष्कर्षः। तथा यः=मोहः, श्रुते=शास्त्रज्ञाने सत्यपि। जाड्यम्=जडतामेव। जनयतीति शेषः। अर्थात् स्वयं स च मोहः खल्वस्ति विधिनिषेधाद्यग्रहणरूपः। एवम्—प्रकाशे सत्यपि द्रष्टव्यघट-पटादि-पदार्थाऽऽच्छाकत्वेनाऽन्धकाररूपः। अत एवोक्तम्—

'प्रकाशेऽपि च यस्तमः'। नैष० १७।३३।

अस्मिन्नेव विषये भगवता श्रीकृष्णेनाऽपि पापाचार, दुराचारप्रभृतीनां दूषितकर्मणां मोहस्यैव मूलकारणत्वेन कारणतावच्छेदकत्वेन वा निर्धारितत्वेऽपि साक्षान्मोहजन्याः कामक्रोधादिदोषा एव तथात्वेनोपवर्णिता इति।

भगवन्निरूपितवात्सल्यमापन्नोऽर्जुनो यदा पृच्छति—

अथ केन प्रयुक्तोऽयं पापं चरति पूरुषः।
अनिच्छन्नपि वार्ष्णेय! बलादिव नियोजितः॥

गीता—अ० ३, श्लो० ३६।

अर्थात् हे वार्ष्णेय! सात्त्विकबलशालिना, तत्रत्याऽधिकारसम्पन्नेन राज्ञा वा, अन्येन वा केनचित्तामसिकेन बलवता पुरुषेण बलान्नियोजितः भृत्य इव कार्याऽकार्यज्ञोऽप्ययं पुरुषो मादृशः स्वयं तादृशपापाचारप्रभृतिदूषितकर्मसाध्यं फलमनिच्छन्नपि पुनरपि पापकर्म समाचरतीति भवन्तो ब्रुवन्तु केन प्रेरितोऽयं जनोऽयुक्तं पापकर्म करोति। अपि च—

'अकामस्य क्रिया काचिद् दृश्यते नेह कर्हिचित् ।
यद्यद्धि कुरुते जन्तुस्तत्तत्कामस्य चेष्टितम् ॥'

—गीता: शङ्करानन्दी

इति न्यायेन पुरुषस्य सकलकर्माचरणकारणीभूतः सर्वानर्थसाधननिदानस्वरूपश्चायमस्ति काम इति अवबोधयितुं समाधत्ते—नन्दनन्दनो भगवान् गोकुलचन्द्रः—

'काम एष क्रोध एष रजोगुणसमुद्भवः ।
महाशनो महापाप्मा विद्ध्येनमिह वैरिणम् ॥'

—तत्रैव श्लो० ३७

कामः = इच्छा, स चाऽऽत्मगुणः । इदं मे जायताम् इत्येवंविधः कामो मानवान् ऋषि-महर्षि, मुनिमहामुनिप्रभृतींश्चापि जीवान् तथा इन्द्रादिदेवांश्चापि जीवात्मनः सन्तापयति, ग्लापयति, सम्मोहयति चेत्यस्य कृतित्वावच्छिन्नं प्रति कारणत्वं समुदीरितम् । तथा चोक्तम्—

'आत्मजन्या भवेदिच्छा इच्छाजन्या भवेत् कृतिः ।
कृतिजन्या भवेच्चेष्टा चेष्टाजन्या भवेत् क्रिया ॥'

—तत्त्वावलिः—चन्द्रकान्ततर्कालङ्कारकृता

कामः संकल्पो विचिकित्सा श्रद्धा, अश्रद्धा, धृतिः, अधृतिः ह्रीः, धीर्भीरित्येतत् सर्वं मन एव' इति श्रुतेः कामश्चास्ति मनोधर्मः इति सांख्यशास्त्रवेत्तारो मायावादिनश्च वेदान्तिनो वदन्ति ।

अयञ्च कामः, क्रोधो वा भवति रजोगुणाज्जायमानजनिसम्पन्नः । अयञ्च रजसो गुणो रागो रञ्जनात्मिका वैषयिको या सामान्येच्छा तद्रूपः, स एव च देवाङ्गनादिविषयसन्निधाने कामं समुद्भावयति इत्यतः कामश्चास्ति रजोगुणसमुद्भवः । अनयोश्च कामक्रोधयोः रजोगुणसमुद्भवत्वेन महाशनरूपता विज्ञेया । कामश्च स्वयं तृप्तिरहितः । तृप्तिरहितत्वेन महान् पाप्मा दोषो यस्मात् पुरुषस्याऽऽयाति स भवति महापाप्मा । कामोद्वेगपीडितः सन्नेव पुरुषः स्वसारमप्यारोढुमिच्छति, निकृष्टकोटिकेभ्योऽपि चाण्डालप्रभृतिभ्यो धनं गृहीतुं कामयन्ते । कामयमाना एव ते नहि किमपि औचित्याऽनौचित्यं परिगणयन्ति ।

एवं क्रोधाविष्टास्ते गुरुमाचार्यपदाभिधेयतां गतमप्याक्रोशन्ति, निर्भर्त्संयन्ति, विडम्बयन्ति चेति किं किं न समाचरन्ति । इत्येतस्माद्धेतोः—हे अर्जुन ? त्वमस्मिन्नसारे संसारेऽमुमेव कामं मुमुक्षोरपि वैरिणं विद्धि = विजानीहि, इति तु निष्कर्षः ।

अयञ्च कामो रजोगुणसमुद्भूतत्वे सति मिथ्याप्रतिपत्तिलक्षणमोहसमुद्भूतोऽपि बोध्यः । इमे च क्रोधलोभकामा मोहमेवाऽऽश्रित्य प्रवर्तमाना भवन्ति । अतएव मोहमूलास्ते मोहनिवृत्तौ सत्यां तेऽपि निवर्तन्ते । मूढ़ एव खलु क्रुद्धो लुब्धः कामी च भवति । अपि च—

'न जातु कामः कामानामुपभोगेन शाम्यति ।
हविषा कृष्णवर्त्मेव भूय एवाभिवर्धते ॥'

नारदपरिव्राजकोप०—३।३७ ।

अर्थात् कामनावतां प्राणिनां मानवप्रभृतीनां नहि कदाचित् कथञ्चित् कुतश्चित् उपभोगतस्तृप्तिर्जायतेऽग्निवत्, सदैव ते प्राणिनः क्षुधार्ता एव जायन्ते सन्तिष्ठन्ते च ।

अपि च—'इच्छामात्रमविद्येयम्' । महोपनि०४।११६।

कार्यकारणयोरभेदपक्षमाश्रित्यैवेच्छामात्रमस्त्यविद्यायाः स्वरूपम् । अविद्या च—'अनित्याऽशुचिदुःखाऽनात्मसु नित्यशुचिसुखात्मख्यातिरविद्या' । पातं० यो० सू०—२।५।

वैशेषिकमते—'दूरत्वपित्तदोषेत्यादीन्द्रियदोषजन्योबुद्धिविशेषोऽविद्या' ।

—प्रशस्त०गु

'असत्प्रकाशनमविद्या' । सर्वद० सं०--शाङ्क०

अपि च—'अनात्मनि च देहादौ-आत्मबुद्धिस्तु देहिनाम्' अविद्या—

—सर्वद० सं०--पातञ्जल०

इयमेवाऽविद्याऽज्ञानशब्देनाप्युच्यते । अज्ञानलक्षणञ्च—

'अनादि भावरूपं यद् विज्ञानेन विलीयते ।
तदज्ञानमिति प्राज्ञा लक्षणं सम्प्रचक्षते ॥'

मायावादिवेदान्तिनः, सर्वं० सं०—

अपि च—कामक्रोधौ महाशत्रू देहिनां सहजावुभौ' ।

अध्या० उ०—

मोहगर्ते मोहान्धकारे वा निपतितो हि मूढ़पुरुषः स्वल्पबुद्धित्वात् यादृग्कर्मकलापविधानेन कापि सिद्धिर्न भवेत् तादृशान्येवाऽसिद्धिसमन्वितानि जालस्वरूपाणि कर्माणि प्रकुरुते । निरिच्छोः परिपूर्णस्य सोपाधिकस्य निरुपाधिकस्य वा परब्रह्मपरमेश्वरस्य परमात्मन इच्छा नहि क्वचित् कदाचिज्जायते । तथा चोक्तम्—

'यस्तु मूढोऽल्पबुद्धिर्वाऽसिद्धिजालानि वाञ्छति ।
निरिच्छोः परिपूर्णस्य नेच्छा संभवति क्वचित् ॥'

अन्नोपनि०—४।५७।

एतावता सारसौष्ठवगर्मितेन प्रबन्धेन नैषधीयसप्तदशसर्गीयत्रयस्त्रिंशत्तमश्लोकेन मोहस्याऽज्ञानान्धकाररूपता सुस्पष्टैवेति वैशद्यं तत्रानुभूयताम् ।

इत्थञ्चाऽज्ञानान्धकारपतिता अत एवाऽऽत्मज्ञानप्रभृतिसत्कर्मविमुखास्ते विपरीतभावनाभाविताऽन्तः करणाः क्षणिकतुच्छजिव्होपस्थसुखैकप्रयोजनका अहर्निशमनिशमनर्थकाऽसद्गोचरज्ञानसाधनाऽन्वेषणपरायणाः बहुकालिकसकलवेदादिशास्त्राध्ययनतदर्थविचारजनितं सर्वमेव ज्ञानं बन्धायैव भवति न तु भवबन्धनतो विमुक्तये इति ते सद्धर्मशून्यां तथा सर्वथा तामसिकशौर्यक्रौर्यहिंसा, पापाचार, दुराचारदर्पदम्भादिदुर्गुणैकप्रधानां राक्षसीं योनिमापन्नास्ते राक्षसा उपर्युपरि मूढ़त्वातिशयसम्पादिनीं मोहिनीं योनिमाप्तवन्तस्ते भवन्ति ।

प्रत्यग्लक्षणं तं परमात्मानं खलु-अवमानन्ति, पराभवन्ति, तिरस्कुर्वन्ति चेतिमोघाशामोघकर्माणो विपरीतबुद्धयः पौनः पुन्येन जन्मनि जन्मनि स्वभावप्रचुरामासुरीं योनिं गताः सन्तस्ते नरके नानायोनिषु च जायन्ते म्रियन्तेऽपारदुःखञ्च सहन्ते, नहि कदाचित् कथञ्चित् विश्रमसुखशय्यान्ते लभन्ते ।

इमामेव भगवता शङ्कराचार्येण प्रोट्टङ्कितां वाचं भगवता श्रीकृष्णचन्द्रेण च समर्थितां तां वाचं वेदो द्रढ़ीकरोति । तथाहि—

मया सोऽन्नमत्ति यो विपश्यति—
यः प्राणति य ईं शृणोत्युक्तम् ।
अवमन्तो मां त उप क्षियन्ति—
श्रुधि श्रुत श्रद्धेयं ते वदामि ॥

अथर्व० ४।३०।४।

अर्थात्—हे श्रुत = हे श्रवणकर्तृत्वावच्छिन्न जीवात्मन् ? श्रुधि = मया प्रोट्टङ्कितं वचनं शृणु । ते = तव । श्रद्धेयम् = श्रद्धानिरूपितयोग्यतावद् वचनम् । वदामि = कथयामि । यः = यः प्राणी । विपश्यति = सांसारिकान् पदार्थान् विशेषरूपेण पश्यति । एवम् यः = प्राणी । प्राणति = प्राणशक्तिमाश्रित्य श्वास-प्रश्वासादिकं गृह्णाति । तथा यः = प्राणी । ईम् = इमं वैदिकम् । उक्तम् = वचनम् = वैदिकं वाक्यं वा । शृणोति = श्रोत्राभ्यां शृणोति । मया = इदं सर्वं जीवः सर्वथा मदीयां शक्तिमाश्रित्यैव विधत्ते । सः = स प्राणी । अन्नम् । अत्ति = भक्षयति । मया = सोऽपि मया प्रदत्तां कृतां वा मदीयां शक्ति कृपां वाऽऽश्रित्यैव प्रकरोति जीवः । माम् = मां सहच्छक्तिसम्पन्नं भगवन्तं परमात्मानम् । अमन्तवः = अनङ्गीकुर्वाणाः सन्ति । ते = मोहजालपतितामूढाः पुरुषाः । उपक्षियन्ति = सर्वदा कालेषु = त्रिषु कालेषु, सर्वकार्येषु च वास्तविकीं सिद्धिमलभमानाः सन्तश्चान्ते महद् दुःखं समनुभवन्ति पतन्ति नरकेषु च ।

अपि च मोहान्धकारजन्ययाऽश्रद्धया सम्पादितं सर्वमेव कर्म तामसं परिकथ्यते । तत्र च श्रौते स्मार्ते वा यागादिकर्मणि-अग्नौ याऽऽहुतिर्दीयते, एवन्तत्र ब्राह्मणेभ्यो दीयमानमन्नवस्त्रादिकमपि तत् सर्वम् असन्निष्फलमेव भवति । अतः शरीरेन्द्रियादिना बहुप्रयासायासेन सम्पादितमपि श्रद्धाभक्तिविरहितं विधीयमानं सर्वमेव कर्म न तु परलोकसुखदुःखाभावहेतुभूतं भवति, नापि च ऐहिकसुखायैव तज्जायते ।

श्रद्धावैधुर्यरूपहेतुवशात् तथा मोहान्धकारपतितपुरुषोच्चरितमन्त्रादिविलोपाच्च सम्पाद्यमानञ्च सर्वमेव तत् कर्म विपरीतफलजनकत्वेन "असत्" इत्युच्यते, निष्फलमित्यर्थः । देवा अपि तत्कर्म नानुमन्यन्ते शास्त्रज्ञाः शास्त्राणि तथात्वेनैव मन्यन्तेऽतः श्रद्धाऽत्यन्ताभाववत् कर्मणः किमप्यस्तित्वमेव नास्तीति तन्निष्फलमेवेति भावः । तथाचोक्तम्—

"अश्रद्धया हुतं दत्तं तपस्तप्तं कृतं च यत् ।
असदित्युच्यते पार्थ ? न च तत् प्रेत्य नो इह ॥

गीता—१७।२८।

एतावता प्रबन्धेनेदमेवाऽऽयातं सिद्ध्यति च यत् काम-क्रोधोद्भवोवेग एव चास्ति सांसारिकसर्वोपद्रव, सर्वानर्थमूलभूतं प्रभूतन्त्वादिकारणम् । तस्यापि च कारणतास्तित्वमुद्वहन्–अज्ञानान्धकारलक्षणलक्षितो मोहः सौराग्नेयचाक्षुषादिप्रकाशे सत्यपि विद्यमाने द्रष्टव्यानां सांसारिकघट-पटादिपदार्थानामाच्छादत्वेन चास्ति पूर्णान्धकाररूपः । तथाहि—

"हतं येन जयन् कामस्तमोगुणजुषा जगत्"

नैषधे, सं० १७—श्लो० ३४-

"तमोगुणजुषाऽज्ञानरूपतमो गुणसेविना येन मोहेन हतं जगत् जयन् कामो नालज्जत" ।

नैषधीयप्राशव्याख्या

तथा महामहोपाध्यायमल्लिनाथीय "जीवातु"—व्याख्या

अपि च तत्रैव—"पथ्यां तथ्यामगृण्हन्तमन्धं बन्धुप्रबोधनाम् ।
शून्यमाश्लिष्य नोज्झन्तं मोहमैक्षन्त हन्त ते" ॥

—तत्रैव—श्लो० २९

अन्यच्चापि तत्रैव—"अन्धमज्ञानबहुलमज्ञानस्वरूपं तथा शून्यम् अलीकमप्रामाणिकमपि ···· ···· ···· रजतत्वेन, अनात्मभूतानि जडान्यपि देहेन्द्रियादीन्यविद्याविलासवशादात्मत्वेन, आश्लिष्य = प्रतिपाद्य सहस्रशो बोध्यमानमपि न त्यजन्तमेवम्भूतं मोहं ते देवास्तत्र जनौघे ददृशुः" ।

पश्यन्तु तत्रैव—म०म०मल्लिनाः "जीवातु" व्याख्याम् ।

विशिष्टज्ञानात्मकविज्ञानस्वरूपमाह

इदमत्रावधेयमस्ति—यत् सर्वानर्थकारणीभूतस्य कामक्रोधोद्भवस्यापि वेगस्य परम्परया हेतुतावच्छेदकीभूतस्य तदवच्छेदकीभूतस्य वा प्राक् समुपवर्णितस्य मोहाऽज्ञानाऽन्धकारस्य स्वरूपविध्वंसनपटुत्वेनाऽभिधीयमानं सम्यज्ञानम् = तत्त्वज्ञानम् = आत्मज्ञानम्-स्वाभिमतं सत्यतरेऽद्वैततत्त्वे ब्रह्मात्मैक्यबोधे वा पर्यवसितं ब्रह्माऽद्वैतसिद्धान्तं निरुच्यमानं महाकाव्ये नैषधे खण्डनखण्डखाद्ये च ग्रन्थे पुनः प्राकाश्यं नयति—श्रीहर्षः-

श्रद्धां दधे निषधराड् विमतौ मताना-
मद्वैततत्त्व इव सत्यतरेऽपि लोकः ।

नैषधे—स० १७, श्लो० ३६

अपि च तत्रैव—'एकमेवाद्वितीयं ब्रह्म' छान्दोग्योप० ६।२।१
'नेह नानास्ति किञ्चन' बृहदारण्यकोप०४।४।१९।

इत्यादिश्रुतिभिः सत्यतरे परमार्थतो विद्यमानेऽप्यद्वैतरूपे तत्त्वे स्वरूपे ब्रह्मात्मैक्यबोधे वा विषये लोकोऽविद्यावान् युक्तायुक्तविचारशून्यो जनो यथा श्रद्धां न धत्ते' ।—

—नैषधीय'प्रकाश' व्याख्या तत्रैव

अन्यत्राऽप्युक्तम्—ईश्वरानुग्रहादेषा पुंसामद्वैतवासना ।
महाभयकृतत्राणा द्वित्राणां यदि जायते ॥

खण्डनखण्डखाद्यप्रथमपरिच्छेदे शां० टी० पृ० १३५

अर्थात् यस्माद्धेतोरियमद्वैतस्वरूपा दार्शनिकी दृष्टिर्दृष्टाऽदृष्टफला सती बहुविध्ना च सती—

"बहूनां जन्मनामन्ते ज्ञानवान् मां प्रपद्यते"

श्रीमद्भगवद्गीता—६।१९ ।

इति गीतोक्तन्यायेन बहुकालसाध्या बहुतरकालसाध्याचेयमद्वैतात्मिका दार्शनिकी दृष्टिः कैश्चिदेव द्वित्रैः साधकैर्यतिभिर्योगिभिर्वा लभ्यते वाऽनुभूयते इति। तस्मादेव कारणात् येषाऽद्वैतदृष्टिर्वासना वा जायते। तत्र केवलमस्तीश्वरानुग्रह एव कारणं नान्यत् किमपि कारणान्तरमिति विज्ञेयम्।

इत्थञ्च तत्त्वज्ञानोत्पत्तिप्रतिबन्धककलमषभूतमोहाऽज्ञानान्धकारविनाशायेश्वरानुग्रहोऽपेक्ष्यते। तदर्थमेव चेश्वराराधने मोक्षविषयिणीच्छावन्तो महान्तो यतयो योगिनो वा सम्प्रवर्तन्ते स्म, येन महतश्चराचरात्मकस्यास्य विश्वस्य भयात् महाभयाद्वाऽवश्यमेव त्राणं भवेत् इति सात्त्विक्या दार्शनिक्या दृष्ट्याऽद्वैतदृष्टिलक्षणलक्षितो ब्रह्माऽद्वैतसिद्धान्तो नितान्तमावश्यकः श्रीहर्षस्य। सर्वतो बलवती चेयं श्रुतिर्लक्ष्यमाणा पारमार्थिकमद्वैतं ब्रह्म समाश्रित्याऽद्वैतदृष्टिस्वरूपं ब्रह्माऽद्वैतसिद्धान्तं प्रमाणयति समर्थयति च। तथाहि—

"पारमार्थिकमद्वैतं प्रविश्य शरणं श्रुतिः।
बाधनादुपजीव्येन विभेति न मनागपि" ॥

खण्डनखं० प्रथमपरि० पृ० १३३ शांकरी टीका

'सदेव सोम्येदमग्र आसीदेकमेवाऽद्वितीयम्'।

छान्दोग्यो प० ६।२१।

'आत्मा वा इदमेक एवाग्रे आसीत्'।
'नान्यत् किञ्चित् मिषत्'।

ऐतरयौपनि० १।१।

'अयमात्मा सन्मात्रो नित्यः शुद्धो बुद्धः सत्यो-
मुक्तो निरञ्जनो विभुरद्वयानन्दः परः प्रत्यगेकरसः'॥

—नृसिंहोत्तरतापनीयोप० ९

एवम्—'अहमेव हरिः साक्षादहमेव सदाशिवः'।

तेजोबिन्दूपनि०—६।६४।

'द्वितीयाद्वै भयं भवति'। बृ० उ०—१।४।१।
'न तु तद् द्वितीयमस्ति'। तत्रैव—४।३।२३
'आत्मनोऽन्यन्नहि क्वचित्'। अध्यात्मोप० ५।५९।

अपि च—'उपादानं प्रपञ्चस्य ब्रह्मणोऽन्यन्न विद्यते।
तस्मात् सर्वप्रपञ्चोऽयं ब्रह्मैवास्ति न चेतरत् ॥'

योगशिखोपनि०—४।३।

तात्त्विकदृष्ट्या विचार्यमाणे 'ईक्षतेर्नाशब्दम्' इत्यादि अधिकरणैरिदमेव निर्णीयते यत्—जगत्कारणीभूतस्य तत्त्वस्य चेतनत्वादिधर्मवत्त्वकथनेन प्रकृति, परमाण्वादेर चेतनत्वादिधर्मवत्त्वशून्यत्वेन जगत्कारणत्वाऽसंभवात्। 'यः सर्वज्ञः स सर्ववित्' 'यस्य ज्ञानमयं तपः' इत्यादिश्रुतिप्रसिद्धत्वाद् ब्रह्मण एव चेतनत्वम्, सर्वविषयकज्ञानवत्त्वम्, जगत्कारणत्वञ्च सिद्ध्यति। तदेव पारमार्थिकमद्वैतं ब्रह्म सिद्ध्यति। तदितरच्च सर्वमेव दृश्यमानं स्थावरजङ्गमलक्षणलक्षितं जगत् सर्वथाऽतात्त्विकं नश्वरञ्चेत्यत एव तस्य जगतोऽसत्त्वं मिथ्यात्वञ्च निर्णीयते। यथोक्तम्—

"सर्पादौ रज्जुसत्तैव ब्रह्मसत्तैव केवलम् ।
प्रपञ्चाधाररूपेण वर्ततेऽतो जगन्न हि" ॥

—आत्मप्रबोधोपनि० १२

अपि च पुनः—"एकः सन् भिद्यते भ्रान्त्या मायया न स्वरूपतः"

अन्नोपनि० ५।७ ।

"योगान्तरायश्चित्तविक्षेपो भ्रान्तिः" ।

पातं० पाद १, सू० ३० ।

यथा—"व्यवहारविषये षाण्मासिके तु सम्प्राते
भ्रान्ति संजायते नृणाम् ।
धात्राक्षराणि सृष्टानि पत्रारूढ़ान्यतः पुरा"

वाचस्पत्यम् ज्यो० त०

एवम्—"मिथ्याबुद्धिहेतुभूतमज्ञानं माया, तच्चाज्ञानमीश्वरोपाधिः ।

—सर्वद० सं० शैवप्रकरणे

इत्थञ्च द्वैतस्य द्वैतजन्यस्य वा भेदस्य, भेदात्मकस्य द्वैतरूपस्य सर्वस्यापि चराचरात्मकस्यास्य जगतः सर्वथा भ्रान्तिभूतायाः प्रभूताया अविद्यापरपर्यायस्वरूपाया मायाया एव कार्यत्वेन तस्य मिथ्यात्वम्, तत्ताशून्यत्वरूपमसत्त्वम् वा निर्णीयतेऽतो नास्ति प्रमितो भेदो द्वैतो वा प्रमाज्ञानविषयीभूतस्त्रिकालाबाध्यो यो भवेत्, अद्वैतश्रुत्या तस्य बाधितत्वात् ।

अत एकं ब्रह्मस्वरूपमद्वैतमस्त्रमेव ब्रह्माऽद्वैतसिद्धान्तभूतं सर्वथाऽभयङ्करं श्रेयस्करञ्चातस्तदेवैकं ब्रह्माऽद्वैतसिद्धान्तभूतमद्वैतमस्त्रमादाय सर्वेऽपि अप्रामाण्यज्ञानास्कन्दिताः खलु भ्रान्तिभूता द्वैत, भेदगर्भितास्तत्सिद्धान्तावलम्बिनश्च आहोस्वित् अद्वैतदर्शनेतरदर्शनमतानुयायिनो दार्शनिकाः पराभवं प्राप्ता विज्ञेया इति ।—यथोक्तं श्रीहर्षेणापि—

"एकं ब्रह्मास्त्रमादाय नान्यं गणयतः क्वचित् ।
आस्ते न धीरवीरस्य भङ्गः सङ्गरकेलिषु" ॥

खं०खं०खा०प्रथमप० पृ० १०९

अर्थात् "सत्यं ज्ञानमनन्तं ब्रम्ह" तैत्तिरीयोप० २।१।१।
एवम्—"निर्गुणं निष्कलं शान्तं निरवद्यं निरञ्जनम्" ॥

श्वेताश्वतरीयोप०—६।१९।

तथा—सजातीयविजातीय, स्वगतनानात्वशून्यलक्षणलक्षितब्रह्मास्त्रमादाय धीरवीरस्य सङ्गरकेलिषु भङ्ग एव न भवितुं प्रभवति नापि प्रभविष्यति, यतोऽन्यस्य कस्यचित् खल्वस्तित्वाभावात् ।

अतोऽद्वैतब्रह्मप्रतिपादकश्रुतिपरिपन्थिनाऽपि प्रमाणाभासेन यदि भेदसाहित्यावच्छिन्नं द्वैतं समुपस्थाप्येत तदा संशयस्तत्राऽवश्यमेव स्यात् परन्तु पारमार्थिकदृष्ट्या-विचार्यमाणे तस्य भेदसाहित्यावच्छिन्नस्य द्वैतस्याऽस्तित्वमेव नास्ति यतो द्वैतभेदयोः समर्थकस्य पोषकस्य च प्रत्यक्षप्रमाणस्य सर्वतो बलवत्या श्रुत्या निरस्तत्वाद् बाध्य-

त्वाच्चेत्यन्ततो भेदद्वैतयोः सत्ताया अभावेन तद्घटितविरोधाभावेन च विरुद्धनाना· कोटिकस्य संशयस्याप्यद्वैतवादिनं प्रत्यनवकाशीकरणमेव स्यादिति ब्रह्माऽद्वैतसिद्धान्तस्य नितान्तमबाध्यमानत्वेनाऽङ्गीकरणं सर्वथाऽऽवश्यकं श्रेयस्करञ्च स्यात्। "अभेददर्शनं ज्ञानम्"।—स्कन्दो पनि० ११।

"सच्चिदानन्दरूपमिदं सर्वम्"। नृसिंहोत्तरतापनीयोप० ७।

"भेददृष्टिरविद्येयं तां सदा परिवर्जयेत्"।

महोपनि०—५।११३।

"द्वितीयाद्वै भयं भवति"—बृ० उ० १।४।२।

इत्युक्तमस्माभिः प्रागेवाऽतो द्वैतस्य भेदस्य च भीतिजनकतावच्छेदकतया हेयत्वं सिद्धयति। तथा चोक्तम्—

द्वैतविज्ञानमासाद्य मुक्ति वाञ्छन्ति ये नराः।
ते महाघोरसंसारसर्पदंष्ट्रा न संशयः॥

सूतसंहिता—

अपि च—'मृत्योः स मृत्युमाप्नोति य इह नानेव पश्यति'।

बृहदारण्यकोप० ४।४।१९।

तथा च द्वैत-भेदाऽज्ञानाऽन्धकारदुःखपङ्कनिमग्नाः खल्वात्मनः शरीरेन्द्रियादिभ्यो भिन्नत्व, अविक्रियत्व, चेतनत्व, परिपूर्णत्व, अखण्डानन्दैकरसत्ववेदनलक्षणलक्षित-ज्ञानविलक्षणाऽज्ञानेनोक्तसच्चिदानन्देतिस्वरूपलक्षणं ज्ञानमावृतं राहुणा कठिनतरेण ग्रहेण समावृतसूर्यबिम्बवत् तिरोहितं तेनैव परमात्मतत्त्वरूपब्रह्मविषयकाऽज्ञानेन सर्वेऽपि प्राणिनः 'अहं ममे'ति मन्यमानाः, अनेन कर्मणाऽऽशुतोषोऽनाथनाथो बाबाविश्वनाथोऽवश्यमेव प्रीयते, मह्यञ्चेदं समभीप्सितं प्रदास्यति, तच्च सानन्दमहं भोक्ष्ये भाजयिष्यामीति मुह्यन्ति। इत्थञ्च ब्रह्मस्वरूपं तत् परमतत्त्वमजानन्तः सन्तः पुनरपि जननं पुनरपि मरणं पुनरपि जननीजठरे शयनम्' इत्यादिलक्षणलक्षितं संसारं पौनः पुन्येन प्राप्नुवन्ति, संसरन्तीत्यर्थः। तथा चोक्तम्—

भेददर्शनमासाद्य मुक्ति वाञ्छन्ति ये नराः।
ते महाघोरनरके चैव पतन्त्येव न संशयः॥

—सूतसंहिता

इत्थञ्चाऽविद्यामूलकम्, दुष्कृतदूषितमार्गप्रवर्तकम्, ऐकान्तिकाऽऽत्यन्तिकदुःख-निवृत्तिरूपकैवल्यनिवर्तकम्, जन्ममृत्युजरादुःखैर्जायमानदेहसम्बन्धसम्बद्धबन्धनकारकम्, भीतिप्रदानपरम्, जनन-मरणरूपत्वे सति जननीजठरेशयनरूपम्, परतन्त्रम्, पराजय-पराभवकारकम् क्षयशीलम्, स्वात्मातिरिक्तसकलजडसमूहात्मकम्, विकृतिप्रभृतिदोष-युतम्। सर्वथा 'सर्वं दुःखं विवेकिनः' इति न्यायेन दुःखरूपम्, किलेदं भेददर्शनं द्वैत-दर्शनञ्च सर्वदाऽनादरणीयमेवेति विज्ञेयम्। यथोक्तं विष्णुपुराणे—

'सोऽहं स च त्वं स च सर्वमेत-
दात्मस्वरूपं त्यज भेदमोहम्॥

विष्णुपुराणे—२।१६।२३।

अपि च--'परात्मनो मनुष्येन्द्र ? विभागोऽज्ञानकल्पितः ।'

विष्णुधर्मोत्तरे—

अपि च पुनः—'यथा रज्जुं परित्यज्य सर्पं गृह्णाति वै भ्रमात् ।
तद्वत् सत्यमविज्ञाय जगत् पश्यति मूढ़ धीः ॥

नादबिन्दूपनिः—४०।२६।

'रज्जुखण्डे परिज्ञाते सर्परूपं न तिष्ठति ।
अधिष्ठाने तथा ज्ञाते प्रपञ्चे शून्यतां गते ॥'

तत्रैव—२७

अज्ञानञ्च यथा--देहोऽहमिति संकल्पो हृदयग्रन्थिरीरितः ।
देहोऽहमिति यज्ज्ञानं तदेवाऽज्ञानमुच्यते ॥

तेजोबिन्दूपनि०—५।९२।

एवम्--देहोऽहमिति या बुद्धिः सा चाऽविद्यति भण्यते ।
देहोऽहमिति यज्ज्ञानं तदेव द्वैतमुच्यते ॥

तत्रैव--५।९४

अतः सर्वानर्थं—सर्वानिष्ट कारकं बन्धनद्वारोद्‌घाटकं तदत्यन्तविमोक्षरूपाऽपवर्ग-द्वारबाधकं ब्रह्मादिस्तम्बपर्यन्त समस्तस्यापि ब्रह्माण्डस्य मिथ्यात्वप्रकारकनिर्णयप्रच्छन्नताकं तदीयदुःखरूपतां दुःखकारकताञ्चाऽनुभावकम् आत्मातिरिक्तं समस्तमपि चराचरात्मकं जगत् स्वास्तित्वशून्यं सन् मिथ्याभूतञ्चास्तीति शास्त्रीयविधिविधानोक्तज्ञापकता-समन्विताऽभेद प्रतियोगिभेदसामानाधिकरण्यावच्छिन्नं द्वैतदर्शनं सर्वथाऽनङ्गीकरणीय-मेवेति मन्तव्यमभ्युपगन्तव्यञ्चेति दिक् । तथोक्तम्—

'तस्माद्द्वैतभेवाहुर्मुनयः परमार्थतः ।'

अद्‌भुत रामा०—

अपि च भेदजन्यं द्वैतजन्यो वा भेदः केवलं व्यावहारिकमात्रमेवास्ति न तु पारमार्थिक इति परमार्थतो विचार्यमाणे द्वैतभेदयोरस्तित्वमङ्गीकारो वा नैव सिद्ध्यति ।

अपि च द्वतभेदयोरङ्गीकारः प्रमाणसिद्धो वा युक्तिसिद्धो वेति निरुच्यताम् ? नाद्यः—सर्वतो बलवती चेयं श्रुतिरद्वैताऽभेदपक्षभेव साधयति । यथा—

"अभेददर्शनं ज्ञानम्" । मैत्रेयोपनि० २।२२ ।
"तस्माद‌द्वैतमेयाहुर्मुनयः परमार्थतः" ।

अद्‌भुतरामायण--

"भेददृष्टिरविद्येयं तां सदा परिवर्जयेत्" ।

महोपनि०—५।११३ ।

अतः सर्वस्यापि भेदस्याऽविद्याकृतत्वेनाऽप्रामाणिकत्वात् सर्वथा मिथ्यात्वाच्च स्वास्तित्वशून्यत्वं तस्य निर्धार्यतेऽर्थात्तस्य किमप्यस्तित्वमेव नास्तीति भावः ।

प्राङ्निरूपितमेकमेवास्ति केवलं तत्त्वं तदेव निर्विशेषम्, चिदेकरसम्, निरवयवम्, निरवद्यम्, निरञ्जनं, द्रष्ट्रत्वेनैव स्वस्थितिमापन्नं ननु स्रष्ट्रत्वेनपि—इति तस्यैवास्ति

विवर्तभूतं प्रभूतं स्थावरजङ्गमरूपं सर्वमेव जगदिति। अतस्तदेव ब्रह्मतत्त्वम् अधस्तात्तदेवोपरिष्टात्तदेव, पश्चात्तदेव पुरस्तात्तदेव दक्षिणत उत्तरतश्चेति तदेव तत्त्वं सर्वं जगद् व्याप्य सन्तिष्ठ मानमस्तीति सर्वेऽपि वेदा गायन्ति, साधयन्ति, समर्थयन्ति, केवलं व्यवहार भङ्गप्रसङ्गभयेनैव अर्थाद् व्यावहारिकत्वेनैव जगतोऽस्तित्वमभ्युपगम्यमानमस्तीति विज्ञेयम्। तथा चोक्तम्—

"अहमेवाऽधस्तादहमुपरिष्टादहं पश्चादहं-
पुरस्तादहं दक्षिणेताऽहमुत्तरतोऽहमेवेदं सर्वम्॥

तथैतद्विषयकमन्यदपि प्रमाणमेष्टव्यम्—

"अन्तर्बहिश्च तत् सर्वं व्याप्य नारायणः स्थितः"।

छान्दोग्योपनि०—७।२५।१।

विवाहसमयेऽपि चैकताबोधको मन्त्रो व्याह्रियते वाचा व्यवश्रियते च वेदपारायणपरैर्वेदपाठिभिः तथाहि—

"कोऽदात् कस्मै अदात् कामोऽदात्--
कामायाऽदात् कामो दाता कामः प्रतिगृहीता
कामैतत्ते"।—एवम्--
"कामस्तदग्रे समवर्तत"। ऋग्वेदः--

प्रागुक्तेन मन्त्रेण चैकतां प्रदर्श्येदानीं तस्यैव परमतत्त्वस्य निरवयवस्यैकस्यैव ब्रह्मणोऽविद्योपाधिकृतांऽशांशिभावभावितोऽयं संसारः अतः सर्वेऽपि पदार्था विषयाश्च सन्त्येतस्यैव परब्रह्मणो विवर्तभूताः, संसारोऽपि चास्ति तथाविध एवेति। तथाहि—

"सच्चिदानन्दरूपमिदं सर्वम्"।

नृसिंहोत्तरतापनीयोप०—१।

"सर्वं विष्णुमयं जगत्"।--विष्णु पु० ५।१।२०।

"सर्वं कृष्णमयं जगत्"।— ब्रह्मवै०प्र०

अपि च—अस्मत् स्वरूपतांविष्णुमयतां कृष्णमयताञ्च समवाप्तुं मयि चानन्योगेन सर्वबन्धनविनिर्मुक्ते मयि आहोस्वित् सर्वज्ञे सर्वस्वरूपे सर्वात्मके मत्स्वरूपे सर्वलोकशरण्यात्मके सजातीयप्रत्ययप्रवाहावृत्तिलक्षणेन निर्विशेषं परं ब्रह्म विषयीकृत्य "ब्रम्हैवाहम्" अहमेव परब्रम्ह "इत्याकारिकयाऽव्यभिचारिण्या निश्चलया भक्त्या मयि सर्वथा सर्वबन्धनविनिर्मुक्त मनः सम्यगावेश्य अर्थात् दृष्टं, मतं, श्रुतं, स्पृष्टञ्च सर्वं सर्वेश्वरं परमेश्वरं परब्रम्ह-परमात्मानं मां वेत्ति प्रागुक्तां च मदीयां विभूतिञ्च यो वेत्ति,

अथ च सर्वा नेव संशयान् सर्वांश्च विपरीतभावनाभाविताऽन्तः करणजन्यान् संकल्प-विकल्पान् सर्वथा समुज्झित्य आस्तिक्यबुद्ध्या समुपेताः सन्तो निश्चलया भक्त्या विश्वस्वरूपं सवज्ञं सर्वात्मकं सर्वात्मना मामेव भावयन्ति सूत्रे मणिगणा इव मत्तः परतरं नहि किमपि परिगणयन्ति, अर्थात् तन्तुषु पटवत्, सूत्रे मणिगणवत् मदीयां सत्तामेव सर्वथाऽनुवृत्य सन्तिष्ठते, चराचरात्मकं सर्वमेव जगदिदंमव्याकृतादि स्थूलान्तं सर्वाधिष्ठानभूते ब्रम्हणि-ओतं प्रोतञ्च मन्यन्ते, तथाऽनन्येनैव योगेन सर्वस्वरूपं सर्वेश्वरं परमेश्वरं

सर्वंभूतान्तरात्मनि सन्तिष्ठानं त्वां ध्यायन्ते एवम्भूता एव निश्चलभावानाभाविताऽन्तः करणाः श्रद्धया परयोपेतास्ते मामेव प्राप्नुवन्ति । तथा चोक्तवान् भगवान् वेदव्यासः—

"मयि समाधत्स्व मनो मद्भभावगभावितम्"

श्रीमद्भभाग० ११।१४।२८।

अपि च— "सर्वोपायान् परित्यज्य भक्तिमाश्रय"

"मामेकं शरणं व्रज"

"मद्भक्तिनिष्ठो भव"

"मदीयोपासनां कुरु"

त्रिपाद्विभूतिमहानारायणोप० ८।१।

"भूतानि विष्णुर्भुवनानि विष्णुः"— वि०पुराणम्—

इत्यनेन भूतानां भुवनानाञ्च समुल्लेखं विधाय ब्रह्मणः सर्वस्वरूपता दर्शिता भवति । इतः पूर्वं शास्त्रलक्षणानुसारं सर्वदा सच्चिदानन्दैकलक्षणलक्षितं परं ब्रह्म समनुसन्दधानः सर्वञ्चेदं चराचरात्मकं जगदद्ञ्च ब्रह्मैवेत्यखण्डब्रम्हाकाराकारितया वृत्त्या सकलमेव स्थावरजङ्गमात्मकं जगद् ब्रह्मैवेति पश्यन् विगतकल्मषो यतिर्योगी वा जीवन्नेव मुक्तिसुखमश्नुते इति भावः ।

इदानीमवधूतोपनिषदि वर्णितां ब्रह्मणः सर्वस्वरूपतामाह

"परोक्षरूपेण सुसंस्थितोऽहं तथाऽपरोक्षरूपेण सुसंस्थितोहम् ।
अनात्मरूपेण सुसंस्थितोऽहं सदात्मरूपेण सुसंस्थितोहम्" ॥

अवधूतोपनि० २७—

जैनैन रूपेण सुसंस्थितोऽहं तथेशरूपेण सुसंस्थितोऽहम् ।
अज्ञानरूयेण सुसंस्थितोऽहं विज्ञानरूपेण सुसंस्थितोऽहम् ॥

तत्रैव—२८

संसाररूपेण सुसंस्थितोऽहं कैवल्यरूपेण सुसंस्थितोऽहम् ।
शिष्यादिरूपेण सुसंस्थितोऽहं गुर्वादिरूपेण सुसंस्थितोऽहम् ॥ २९ ॥
वेदादिरूपेण सुसंस्थितोऽहम् स्मृत्यादिरूपेण सुसंस्थितोऽहम् ।
पुराणरूपेण सुसंस्थितोऽहं कल्पादिरूपेण सुसंस्थितोऽहम् ॥ ३० ॥
कर्तृत्वरूपेण सुसंस्थितोऽहं मोगस्वरूपेण सुसंस्थितोऽहम् ।
अहं स्वरूपेण सुसंस्थितोऽहं चित्तस्वरूपेण सुसंस्थितोऽहम् ॥ ३१ ॥
रुद्रप्रभेदेन सुसंस्थितोऽहं विष्णुप्रभेदेन सुसंस्थितोऽहम् ।
देवप्रभेदेन सुसंस्थितोऽहं ब्रह्मप्रभेदेन सुसंस्थितोऽहम् ॥ ३२ ॥

इत्यादिरूपेण सर्वस्य ब्रह्मस्वरूपतां प्रदर्श्यदानीं कस्यापि पदार्थस्य विषयस्य जगतो वा नास्ति ब्रह्मणो व्यतिरिक्तत्वं पार्थक्यं वेति निरूपयति श्री राजेन्द्रप्रतापत्रिपाठी ।

सर्वस्यापि ब्रह्मणोरूपत्वात् "सर्वं खल्विदं ब्रह्म" इत्यादिना प्रदर्शितत्वात् कस्यापि पदार्थस्य, प्रमेयस्य, जगतो वा चास्ति ब्रह्मणोऽभिन्नत्वम । जाति, वर्ण, तद्धर्म, तत्कर्म, सम्बन्धशून्यात् सच्चिदानन्देतिस्वरूपलक्षणलक्षितात् तस्मात् परमेश्वरात आकाशवदतोव

निर्मलात् नित्य, शुद्ध, मुक्तस्वभावात् भिन्नं कारणं सांख्यपरिकल्पित प्रधानापरपर्याय-भूतप्रकृतिशब्दवाच्यम् ? आहोस्वित् नैयायिक, वैशेषिक, परिगृहीत परमाणुलक्षणं, तदन्यद्वा किमपि वास्तीति प्रकृत्यादीनां जडादीनां हेतुत्वे मानाभावः ।

ननु 'यतो वा इमानि भूतानि जायन्ते येनजातानि जीवन्ति यत् प्रयन्त्यभिसं-विशन्ति तद् ब्रह्म' ॥ तैत्तिरीयो० ३।१।

इत्यादि श्रुतीनामेव जडस्वरूपाणां चैतन्यशून्यानां प्रकृत्यादीनां हेतुत्वे भानमिति प्रकृतेरेव हेतुत्वमास्ताम् इति किं प्रकृत्युपाधिकस्य सच्चिदानन्देति लक्षणस्य परमेश्वरस्य जगत्कारणत्वेन । तन्न समीचीनम् ।

'ईक्षतेर्नाशब्दम्' इत्यधिकरणप्रकरणमाश्रित्य सत्त्व, चित्त्व = चेतनत्व, आनन्द-त्वादिधर्मवत एव जगत्कारणत्वं निश्चीयते, जडानां प्रकृत्यादीनां प्रागुक्तधर्मवत्त्वाभावेन जगत्कारणत्वं नैव भवितुं प्रभवति, तथैवाऽनुभवस्यापि जायमानत्वेन तेनापि सत्यादि-लक्षणस्य परमेश्वरस्यैव जगत्कारणत्वं सिद्ध्यतीत्यत्र नास्ति लेशतोऽपि विवादः ।

अपि च 'एष सर्वेश्वर एष सर्वज्ञ एषोऽन्तर्याम्येष योनिः सर्वस्य' इत्यादि-श्रुतयोऽपि तस्यैव सर्वज्ञस्य चेतनस्य सर्वेश्वरस्य सच्चिदानन्दैकरसस्य प्रकृत्युपाधिकस्य तस्यैव परमेश्वरस्य जगत्कारणत्वं सिद्ध्यति नान्यस्य प्रकृति परमाण्वादेरिति यतः प्रकृति, परमाण्वादेः साक्षित्वाभावात्, सर्वस्वरूपत्वाभावात्, स्वातन्त्र्याभावात्, सर्वा-त्मत्वाभावाच्च नैव कदाचित् कथञ्चित् जगत्कारणत्वमिष्यतेऽपितु तथाविधस्यतस्यैव सर्वधर्मावच्छिन्न प्रागुक्तस्य । तथा चोक्तम्—

"साक्षिस्वरूपेण सुसंस्थितोऽहम्-
सर्वस्वरूपेण सुसंस्थितोऽहम् ।
स्वतन्त्ररूपेण सुसंस्थितोऽहम्-
सर्वात्मरूपेण सुसंस्थितोऽहम् ॥"

अवधूतोपनि०—३१

अपि च— "घटनाम्ना यथा पृथ्वी पटनाम्ना हि तन्तवः-
जगन्नाम्ना चिदाभाति सर्वं ब्रह्मैव केवलम् ॥"

योगशिखोपनि०—४।१८

अन्यच्चापि—"कस्मिन् सर्वे प्रतिष्ठिताः" । इत्यारभ्य—
"सर्वलोका आत्मनि ब्रह्मणि मणय इवौताः प्रोताश्च" ।

इत्यनया श्रुत्याऽधोवर्तिलोकादि ब्रह्माण्डान्तानां सर्वेषामेव लोकानां सर्वात्मके सत्यस्वरूपे ब्रह्मण्येवौतत्वप्रोतत्वरूपेण सन्तिष्ठमानत्वं प्रतिपाद्यते न तु जडस्वरूपाणां प्रकृत्यादीनाम् ।

तथैव—"एतस्मादात्मन आकाशः सम्भूतः, आकाशाद्वायुः, वायोरग्निः, अग्ने-रापः, अद्भ्यः पृथिवीचोत्पद्यते" ॥

परमेश्वरस्य जगत्कारणत्वतद्दूशित्वविचारः

इतः पूर्वं "एतस्मादात्मन आकाशः सम्भूतः" इत्यादिश्रुत्या जगन्नियन्तुः सत्यादि लक्षणस्य परमेश्वरस्य जगत्कारणत्वं निरूपितम् । यतः "कार्याऽव्यवहितप्राक्क्षणावच्छे-

देन वर्तमानत्वम्" इतिलक्षणन्यायदिशा पूर्वपूर्वस्य कारणत्वमुत्तरोत्तरस्य च प्रागभावप्रयोगित्वरूपं कार्यत्वं निर्धार्यते, इत्यतः कार्यत्वावच्छिन्नकार्यतानिरूपिता कारणता तत्रैव सच्चिदानन्देतिस्वरूपलक्षणलक्षिते सत्यात्मके परब्रह्मणि केवलं निश्चीयते श्रुत्याद्यनुरोधात् ।

"कार्यत्वावच्छिन्नकार्यतानिरूपितकारणता" इति न्यायेन कार्यमात्रं स्वकारणे सन्तिष्ठते—यथा घट स्वावयवभूते कारणे, पटश्च स्वावयवतन्तुरूपे कारणे इति । एवमेवाऽनन्यया भक्त्या लभ्यो भवति जगत्कारणोभूतो भूतभावनो भगवान् । तत्रैव चाऽन्तः स्थानि सन्ति सर्वाण्येव भूतानीति तेनैव परमात्मना व्याप्तमिदमस्ति सर्वं चराचरात्मकं जगदिति । यथोक्तवान् नन्दनन्दनो भगवान्—

"पुरुषः स परः पार्थ ? भक्त्या लभ्यस्त्वनन्यया ।
यस्याऽन्तः स्थानि भूतानि येन सर्वमिदं ततम् ॥''

गीता, अ० ८, श्लो० २२

आचार्यप्रसादरूपिण्या आहोस्वित् परमात्मप्रसादात्मिकया भक्त्या भवति लभ्यो वश्यो वा भगवान् इति । इमानि सर्वाण्येवाऽऽभासरूपेण प्रतीयमानानि भूतानि तस्म ब्रह्मणोऽन्तर्देशे सन्तिष्ठन्ते = सन्तिष्ठमानत्वेन प्रतीयन्ते ।

भगवान् व्यासोऽप्याह--"यस्मिन् प्रोतमिदं विश्वम्" ।

श्रीमद्भाग० ११।९।२०।

अर्थात् यस्मिन् सच्चिदानन्दैकरसे मायातत्कार्यलेशसम्बन्धशून्ये सद्घने, चिद्घने, आनन्दघने परब्रह्मणि सकलमेत्र जडचैतन्यं भूतवर्गात्मकं कार्यं विश्वरूपं प्रोतमस्ति ।

"यतो वा इमानि भूतानि जायन्ते" तैत्तिरीयोप० ३।१।

यस्माच्चतुर्मुखाद्ब्रह्मण इमानि सर्वाण्येव भूतानि जायन्ते तस्मात् कारणात् सर्वेषामेव भूतानामादिकारणं तदेव चतुर्मुखलक्षणलक्षितं ब्रह्म विज्ञेयम् इति ।

अपि च पुनः—"येनेदं सततं व्याप्तम्" । तेजोबिन्दूप० १।२३।

"येनावृतं नित्यमिदं हि सर्वम्" ।

श्वेताश्वतरोप०--६।२।

"ईशा वास्यमिदं सर्वम्" । ईशोपनि ९

"एकस्तेनेदं पूर्णं पुरुषेण सर्वम्" । श्वेताश्वतरोप०३॥०

येने नित्याऽखण्डानन्दैकरसाऽद्वितीयेन ब्रह्मणा नीचजन्मानः नीचकर्माणः पापयोनयः स्त्रियो वैश्याः शूद्राश्चेत्यादिसर्वाण्येव भूतानि व्याप्तानि सन्ति तेऽपि सोपाधिकं निरूपाधिकं वा तं परमात्मानमाचार्योपदेशजनितेन ज्ञानेन सम्यगुपास्य साक्षात् परम्परया वा तुरीयं पुरुषार्थं कैवल्यमवश्यमेव प्राप्नुवन्ति ।

अपि च—"साक्षिभूते समे स्वच्छे निर्विकल्पे चिदात्मनि ।
निरिच्छं प्रतिबिम्बन्ति जगन्ति मुकुरे यथा" ॥

महोपनिषत्—५।५५।

अर्थात् साक्षिभूते, समे, स्वच्छे, निर्विकल्पे, चिदात्मनि, इच्छां विनैव यथा त्रैलोक्यं प्रतिबिम्बितं भवति तथैव प्रतिबिम्बवत् केवलमाभासरूपेण सन्तिष्ठमानमिदं

मिथ्याभूतं नामरूपात्मकं जगदुपेक्षितं भवति । तदानीं ब्रह्माकारवृत्त्या विजातीयब्रह्माकारात्मिकीं वृत्तिं निरस्य विधिरूपेण सर्पादौ रज्जुसत्तावत् प्रपञ्चाधाररूपेण केवलं ब्रह्मसत्तामेव समनुभवति ब्रह्मवित् साधको यतिर्योगी वेति । तथा चोक्तम्--

"सजातीयप्रवाहश्च विजातीयतिरस्कृतिः" ।

तेजोविन्दूपनि० १।१८।

अपि च तत्रैव पुनः--

सर्पादौ रज्जुसत्तेव ब्रह्मसत्तैव केवलम् ।
प्रपञ्चाधाररूपेण वर्ततेऽतो जगन्नहि ।।

आत्मप्रबोधोपनि०--१२।

अत्र 'सत्ता' शब्दे न पारमार्थिक्याः सत्ताया एव ग्रहणमस्तीति बोध्यम् । सा चास्ति ब्रह्मण एवेति न तु जगत इति ।

भेदस्य द्वैतस्य च व्यावहारिकमात्रत्वम्

ननु नाऽद्वैतश्रुतीनां वाच्यार्थे विनियोगस्तात्पर्यं वा विज्ञेयम्, येन श्रुतीनां तत्र प्रामाण्यं स्वक्रियेत, प्रत्यक्षादिप्रमाणबाधात् स्वानुभवविरोधाच्च ततश्चाऽन्यत्रैवेश्वरोपासनादौ क्वचित्तात्पर्यं श्रुतीनां परिकल्पनीयमिति चेन्न । अद्वैतश्रुतीनामृजावर्थे एव प्रामाण्याङ्गीकारात् भेदस्य भेदव्याप्यस्य द्वैतस्य च केवलं व्यावहारिकमात्रत्वमेव न तु पारमार्थिकत्वमपि । पारमार्थिकदृष्ट्यानास्तिभेदद्वैतयोरङ्गीकारः प्रमाणसिद्धो युक्ति वेति पारमार्थिकश्रुतिबलसहकृततात्त्विकदृष्ट्या विचार्यमाणेऽभेदोऽद्वैतश्चोभयत्वावच्छिन्न एव चास्ति खलु प्रामाण्यनिश्चयविषयीभूतः ।

"घटपटौ भिन्नौ" "घटो न पटः" "घटाद् भेदः पटस्य" एतावानेवाऽर्थः पटादेः स्वरूपकुक्षिनिक्षिप्तं यदि स्यात्तदा घटस्यापि तादृशस्वरूपकुक्षिनिक्षिप्तत्वेन पटस्वरूपतया पटात्मन्येव सन्निविष्टत्वेन घटपटयोरप्यैक्यं स्यादिति किम्पुनर्विश्वविश्वम्भरयोवेति स्वयमूहनीयम् ।

ननु प्रागुक्तेयं प्रतीतिर्यथाऽभेदोल्लेखितया प्रागुक्तदिशा व्याख्यायते तथा तस्या एव प्रतीतेर्भेदोल्लेखित्वेऽपि दीयतां दृष्टिः । अभेदे हि 'घटः पटः' इत्येव वा बुद्धेराकारः स्यात् न तु "घटाद्भिन्नः पटः" इति । सत्यमेतत् जागतिकाः सर्वेऽपि विषयाः पदार्थाः प्रमेया भेदाश्च सन्ति सर्वथाऽविद्याविद्यमानभावभावितास्तादृशञ्चेदं भेदजातं पारमार्थिकमभेदमभिलषन्तो वयं खण्डयाम इति । तथा चोक्तवान् श्रीश्रीहर्षो महान् दार्शनिकः—

"अभेदं नोल्लिखन्ती धीर्नं भेदोल्लेखनक्षमा ।
तथा चाद्ये प्रभा सा स्यान्नान्त्ये स्वापेक्ष्यवैशसात् ।।"

—खण्डनखं० प्रथमपरि०

अर्थात् घट-पटयोः स्वरूपोल्लेखमन्तरा तदुभयोल्लेखोऽपि न भवितुमर्हति । घटपटोभयप्रतियोगिकं भेदमनुल्लिख्यापि घट पटोभयस्वरूपोल्लेखोऽवश्यमेव भवितुं प्रभवति । इत्थञ्चानेनाऽभेदग्रहस्योपजीव्यत्वेन तद्विषयीभूतस्याऽभेदस्यैव पारमार्थिकत्वं निश्चीयते न तु भेदस्य भेदव्याप्यस्य द्वैतस्येति । यत उपजीवकस्योपजीव्याद् दुर्बलात्वात् ।

अपि च —"घटः पटश्च" एवम् "घटाद् भिन्नोऽयं पटः" इत्यनयोः प्रतीत्योर्नहि-समानार्थकत्वं कश्चित् प्रत्येति, यतः पञ्चम्याः प्रथमायाश्च विभक्तेर्विभिन्नार्थकत्वात्। विषयभेदाज्ज्ञानं भिद्यते इति नियमानुसारतो यथा "अयघटः" "अयं पटः" इत्युत्रोभयत्र घट-पटादिरूपार्थवैलक्षण्यदर्शनात् प्रतीतिवैलक्षण्यमनुभूयते तथैव प्रकृतेऽपि विज्ञेयम्। तत्रापि पञ्चम्याः प्रथमायाश्चार्थवैलक्ष्यदर्शनात्।

"ऐकमेवाऽद्वितीयम्"[1] —"अहमेवेदं सर्वं"[2] "अहमेव जगत् सर्वं"[3] —इत्यत्र सर्वत्राऽद्वैतार्थाभिः श्रुतिभिश्च पारमार्थिकमद्वैतं प्रस्फार्यते न तु व्यावहारिकमन्यद् वेति। नचाऽपारमार्थिकधिया पारमार्थिकबुद्धिः शक्यते वाधितुम्। यथा नहि कदापि—अपारमार्थिक शुक्तिरजतधिया 'इदं रजतम्" इदन्त्वावच्छिन्नशुक्ति विशेष्यिकया रजतत्वप्रकारिकया खलु पारमार्थिकशुक्तिमतिः बाध्यते।

एवं "सर्वं भिन्नम्" इत्येवंरूपेण सर्वं पक्षकानुमानेन सर्वत्वावच्छेदेन भेदसाधने पक्षैकदेशस्य हेतुत्वे स्वस्मिन् स्वावृत्तेर्भागासिद्धिः स्यात्।

तथा साध्यदृष्टान्तयोरपि पक्षैक्यात् बाधो दृष्टान्तासिद्धिश्च स्यात्। भेदप्रतियोग्य-नुयोगिनोरपि विशिष्यैव तत्तद्रूपेण पक्षसाध्यकुक्षिनिक्षेप्यवात् सार्वज्ञ्यापत्तिरपि स्यात्। अन्यथा 'पटस्य घटेन द्रव्यत्वादिना भेदाभावात्तेन रूपेण भेदसिद्धावनिष्टप्रसङ्गोऽर्थान्तरञ्च स्यात्।

एतदापत्तिभिया कस्यचित् पक्षबहिर्भावे तु तत्र भेदासिद्धया सर्वथाऽबाध्यमाना-श्रुतिरुक्तरीत्या सर्वाभेदे प्रामाण्यमासाद्याऽद्वैतं साधयिष्यतीति नाऽत्र लेशतोऽपि चास्ति सन्देहानध्यवसायावसरः।

अयमेव च ब्रह्माऽद्वैतपक्षोऽभेदपक्षो वा श्रीहर्षेणापि स्वीकृतः सुस्पष्टीकृतश्च। तथाहि—

"हेत्वाद्यभाव सार्वज्ञ्ये सर्वं पक्षयताऽऽस्थिते।
किञ्चितु त्यजता दत्ता सैव द्वारद्वयश्रुतेः" ॥

खण्डनखं० प्रत्यक्षवाधो० प्रत्यक्षपरिच्छेदः—पृ० ८७। शारदाटी०

अनेनापि प्रमाणेनाऽद्वैतश्रुतेः सर्वथाऽबाध्यत्वम् सूच्यते।

अत एव च—"प्राद्यधीवेद्यभेदोयाऽप्यन्यथानुपपन्नता।
स्वज्ञानापेक्षणादत्ते बाधते नाद्वयश्रुतिम्" ॥ पृ० ८८

तत्रैव पश्यन्तु—१०॥

इयमेवाऽबाध्यमाना श्रुतिर्ब्रह्माऽद्वैतसिद्धान्तं बोधयति, संस्थापयति, प्रस्फोरयति च।

एवं "घटभिन्नः पटः" इत्येवम् विध भेदावगाहि ज्ञानजन्यसंस्कारविषयीभूत-दृढ़ाऽन्वयव्यतिरेकस्य प्रयोजकीभूतौ यौ स्तः—अन्वयव्यतिरेकौ अर्थात् घटत्वं पटादिभेद-व्याप्यम्, एवं घटत्वम् पटादिभेदाभावव्यापकीभूताभावप्रतियोगीति ज्ञानजन्याया अद्वैत-

---

१. अध्यात्मोप० ६३। २. छान्दोग्योप० ७।२५।१। ३. तेजोबिन्दू प०, ६।४३।

विषयिण्याः शाब्दबोधात्मिकाया अन्वयप्रतिपत्तेरप्रामाण्यग्रहानास्कन्दितत्वादद्वैतविषयकस्य सविकल्पकबोधस्योत्पत्ति प्रतिबन्धो नैव कदापि शङ्कनीयः यतः—

'अत्यन्तासत्यपि ज्ञानमर्थे शब्दः करोति हि ।
अबाधात्तु प्रमामत्र स्वतः प्रामाण्यनिश्चलाम् ॥" —तत्रैव द्रष्टव्यम्

अर्थात् "अङ्गुल्यग्रे करिशतं विहरति", एवम्—"मम कर्णकुहरं प्रवेशं लभमानः सिंहः क्रीडति" इत्यादिशब्दसमुदायात्मकवाक्याज्जायमानस्य शाब्दबोधात्मकस्य ज्ञानस्याऽऽनुभविकतया तादृशशाब्दबोधात्मकज्ञानं प्रति योग्यताज्ञानम् अयोग्यताज्ञानविरहो वा नास्ति हेतुः किन्तु तादृशं जायमानं ज्ञानं विषयबाधाच्चास्ति सर्वथाऽप्रमाणम् ।

एवम् "मे माता वन्ध्या" इत्यत्रापि तादृश्येव गतिश्चिन्तनीया, ऊहनीयेत्यर्थः । इत्यत्रापि विषयमाधेनाऽप्रामाणिकत्वम् सुस्पष्टमेव, यतः खलु मातृत्व, वन्ध्यात्वयोः परस्परं विरुद्धधर्मत्वात् ।

एवम् "विवाहिता वेश्या" इत्यत्रापि प्रागुक्तैव रीतिर्नीतिश्चोहनीया । अत्रापि मातृत्व, वन्ध्यात्ववत्, विवाहितात्व वेश्यात्वयोरपि विषयबाधप्रयुक्तप्रमाणिकत्वम् विज्ञेयम् । यतः विवाहितात्ववेश्यात्वयोरपि परस्परं विरुद्धधर्मत्वेनैकत्राऽसमावेशादिति तु निष्कर्षः ॥

ननु अयोग्यतास्थले सम्बन्धज्ञानमेव नोत्पत्तुमर्हतीति कथं तत्र व्यवहारः स्यात् ? समाधत्ते—व्यवहारस्य यते इत्यत्र नास्ति कोऽप्यवरोधः । तथा चोक्तम्—

असंसर्गग्रहस्यापि मन्ता शंसत्यबाधिते ।
अत्यन्ताऽसदसंसर्गाग्रहं संसर्ग लग्नकम् ॥

तत्रैव—शाङ्करीटीका पृ० ९६

अर्थात्—असंसर्गाग्रहः = बाधनिश्चयाभावस्तयाऽभ्युपगन्ता मीमांसकः । स च मीमांसकोऽसंसर्गाग्रहस्यैव पदार्थोपस्थितौ शाब्दबोधे हेतुत्वमङ्गीकुर्वन्ति । क्वचित्तु केचित्तु संसर्गप्रमामेव कारणत्वेनाङ्गीकुर्वन्ति ।

इदानीं वेदान्तो दार्शनिकीं दृष्टिमधिकृत्य द्वैतवादिनं नैयायिकं प्रति ब्रूते यत् श्रुतिरूपवेदप्रतिपादितमद्वैतं सर्वथा चास्ति पारमार्थिकम्, यतस्तावज्ज्ञानचक्षुषा वीक्षमाणे सर्वस्यापि चराचरात्मकस्य जगतस्तस्यैव ब्रह्मणो विवर्तभूतत्वात् ब्रह्मसत्तातिरिक्तसत्ताकत्वाभावेन ब्रह्मरूपतैव भासमाना भवति । यथा रज्जौ भासमानसर्पवत् रज्जुं विहाय भ्रान्त्यवच्छिन्नः पुरुषः सर्पास्तित्वशन्यं सर्पमेव गृह्णाति तथैवाऽज्ञानावच्छिन्नो मूढधीरपि पुरुषस्तत्र यत् सिद्धया ज्ञानं सिद्धयति ज्ञानसिद्धयैव च मोक्षो यतस्तथाविधं स्वयंप्रकाशस्वरूपं स्वयञ्च सर्वप्रकाशकं नित्यशुद्धबुद्धमुक्तस्वभावं केवलसच्चिदानन्दैकरसं परमात्मानमविज्ञाय जगत् पश्यति । तथाचोक्तम्—

यथा रज्जुं परित्यच्य सर्पं ग्रह्णाति वै भ्रमात् ।
तद्वत् सत्यमविज्ञाय जगत् पश्यति मूढधीः ॥
रज्जुखण्डे परिजाते सर्परूपं न तिष्ठति ।
अधिष्ठाने तथा ज्ञाते प्रपञ्चे शून्यतां गते ॥

नादविन्दूपनि०—४०।२६-२७ ।

इत्थश्चाऽद्वैतं सर्वथा त्रिकालाबाध्यत्वेन सत्यस्वरूपं तद् ब्रह्मैव खल्वस्ति पारमार्थिकम्, अस्य च पारमार्थिकेनैव द्वैतेन भेदेन च बाधो भवितुं प्रभवति न तु अविद्याविद्यमानेन भेदेन द्वैतेन चेति तु सर्वथा सुनिश्चितम्, भिन्नविषयत्वात् ।

न च मोक्षावस्थायां स्वस्थितिमापन्नेन मया = मोक्षं प्राप्तेनापि तदेव शुद्ध-बुद्ध-मुक्तस्वभावम्, नित्य-निष्कल-निर्गुणस्वरूपम्, स्वयमविक्रियमद्वैतं ब्रह्मैवध्येयमस्तीति किमनेन प्राक् प्रदत्तेन वागुपदेशेनेत्यतोऽदृष्टात्मकतुरीयमोक्षस्वरूपपुरुषार्थफलातिरिक्तं दृष्टमपि फलमाह —

"नेहाभिक्रमनाशोऽस्ति प्रत्यवायो न विद्यते ।
स्वल्पमप्यस्य धर्मस्य त्रायते महतो भयात् ॥

गीता, अ० २, श्लो० ४०

अर्थात् प्राङ्निरूपिते निष्काम कर्मयोगे मोक्षैकप्रयोजनके कर्मणां प्रारम्भस्वरूपाऽभिक्रमस्य विनाशो नैव विद्यते भोजनात्मकर्मणः प्रारब्धे सति क्षुधानिवृत्तिरूपं फलमवश्यमेव जायते, एवं भोजनान्तरं जलपानात्मककर्मणः प्रारम्भे जायमाने पिपासानिवृत्तिरूपं फलमवश्यमेव भवतीत्यत्र नास्ति लेशतोऽपि विचारचर्चाऽवकाशः ।

एवं प्रत्यवायस्याऽत्यन्ताभावोऽपि विद्यते, ज्ञानेनाऽज्ञानेन वा विहितस्य कर्मनियमादेर्लोपजनितो दोषो राजाज्ञावत् नहि अनर्थादिवैगुण्योत्पादको भवति ।

तत्रापि निश्चलयाऽनन्यया भक्त्या विधीयमानस्येश्वरोपासनात्मकस्य वेदोक्तस्य धर्मस्य किञ्चिन्मात्रमप्यंशं केवलमग्निहोत्ररूपं वा श्रुतिविहितमौपासनात्मकं वा स्मृत्यादिषु समुपदिष्टं वा श्रद्धया परयोपेतं तदाराधनं क्रियमाणं कर्म चित्तशुद्धिसमुत्पादनद्वारा ज्ञानजनकीभूतं सत् कर्तृत्वावच्छिन्नं जननमरणादिस्वरूपात् महतो भयात् त्रायतेऽतः श्रद्धाभक्तिभ्यां निष्कामभावनाभाविताऽन्तः करणैः साधकैर्यतिभिर्योगिभिर्वा परमेश्वरप्रीतिनिमित्तमवश्यमेव यथाशक्त्यनुष्ठेयम् । यतो भगवत् प्रीतिनिमित्तं कृतमेव कर्म पुमांसंतारयतीति संमज्जतो मानवस्य विश्वेशपादाम्बुजदोर्घनौकैव चास्ति सन्तरणसाधनम् इति ।

अतस्तत्र सर्वथा वा भेदाऽसिद्धया सर्वथाऽबाध्यमाना श्रुतिरुक्तयुक्त्या सर्वाऽभेदे सर्वाऽद्वैते वा प्रामाण्यमासाद्याऽद्वैतमेव साधयिष्यतीति सर्वं ब्रह्मातिरिक्तं मिथ्याभूतं तद् विज्ञाय केवलमेकं ब्रह्मरूपं ब्रह्मास्त्रमादाय क्वचिदपि नान्यं गणयतो धीरवीरस्य सङ्गरकेलिषु पराभावो नैव भवति नापि भवितुं वा प्रभवति ।

यथैकं ब्रह्मास्त्रमादायैव खलु धनुर्धरस्य धनुर्धरेष्वपि वीरवरस्य तत्रापि चाग्रगण्यस्यार्जुनस्य नहि कदापि भङ्गोबभूव तथैवेयं लब्धपदाऽद्वैतश्रुतिः सर्वाऽभेदं बोधयन्ती विश्वाद्वैते च पर्यवस्यन्ती त्वया नैयायिकेन केनापि प्रमाणेन कथं शक्यबाधा स्यात् । तथाचोक्तम्—

"एकं ब्रह्मास्त्रमादाय नान्यं गणयतः क्वचित ।
आस्ते न धीरवीरस्य भङ्गः सङ्गरकेलिषु ॥

हनुमानदास—रवं० रवं० रवा० पृ० १०१—शाङ्करीटीका

अपि च पुनस्तत्रैव—

"कथं सामान्यतो ज्ञाते नैव ज्ञाते विशेषतः ।
पदरोघस्त्वया कर्तुं शक्यः स्यादद्वयश्रुतेः ॥

—शां० टी० हनुमान्० तत्रैव

अन्यच्चापि—"पारमार्थिकमद्वैतं प्रविश्य शरणं श्रुतिः ।
बाधनादुपजीव्येन बिभेति न मनागपि ॥

--तत्रैव, पृ० १२२

अयमाशयः—"द्वितीयाद्वै भयं भवति" ।—बृहदारण्यकोप० १।४।२ ।

"मृत्योः स मृत्युमाप्नोति य इह नानेव पश्यति" ।

बृ० उ०—४।४।१९ ।

अभेदश्रुत्या, अद्वैतश्रुत्या चाऽवबोधितं तदद्वैतं ब्रह्म—"ब्रह्मैवेदं सर्वम्"

बृ० उ० २।५।१ ।

"आत्मैवेदं सर्वम्" ।—छान्दोग्योप०—७।२५।२ ।

"सच्चिदानन्दरूपमिदं सर्वम्" ।—नृसिंहोत्तरतापनीयोप०—७

"अहमेव परं ब्रह्म" ।—तेजोबिन्दू पनि०—६।४४ ।

इत्यादिश्रुतिभिः प्रतिपाद्यार्थेन सहैक्यमापन्नं ब्रह्मैव भवति, तच्च ब्रह्म उपर्युक्तश्रुत्यनुसारतः सत्, चित्, आनन्देतिस्वरूपलक्षणलक्षितञ्चास्ति । तत्र तस्याः श्रुतेः क्वचिद् ज्ञानानन्दात्मतया व्यवस्था भवति, क्वचिच्च श्रुत्या जनितं तदद्वैतज्ञानं तद्विज्ञानात्मन्येव सम्यग् निविशमानं भवतीत्यतोऽद्वैतज्ञानेन द्वैतज्ञानस्य भ्रमात्मकत्वे सिद्धेऽपि प्रारब्धकर्मजन्यभोगजनकतावच्छेदकतया तज्जनकतावच्छेदकतया वा तस्याऽनिवृत्तेर्व्यवहारसंभवः । व्यवहारस्य चाऽविद्याविद्यमानेन द्वैतज्ञानेन भेदज्ञानेनैवोपपद्यते ।

सैयमद्वैतबुद्धिः = ब्रह्माऽद्वैतबुद्धिर्न तर्कशतमवतार्यापिप्राज्ञैरपनेया । यदाह—श्रुतिः—"नैषा मतिस्तर्केणापनेया" । तस्मात्—

"धोधनाः ? बाधनायाऽस्यास्तदा प्रज्ञां प्रयच्छथ ।
क्षेप्तुं चिन्तामणिं पाणिलब्धमब्धौ यदीच्छथ ॥

रवं०रवं०रवा०प्रत्यक्ष० प्र०परि० पृ० १२३शाङ्करी टी०हनुमान्०

अयमेवाऽद्वैतसिद्धान्तः = ब्रह्माऽद्वैतसिद्धान्तो, महाकवि दार्शनिक चक्रचूडामणिश्रीहर्षेणापि—

श्रद्धां दधे निषधराड् विमतौ मतानाम्-
अद्वैततत्त्व इव सत्यतरेऽपि लोकः । —नैषधे

इत्यादिना नैषधे समुल्लिखितोऽद्वैततत्त्ववादात्मकः सिद्धान्तः = ब्रह्माद्वैतसिद्धान्तः सर्वतोभावेन समाहृतो व्यवस्थापितश्च ।

अपि च नैषधीयपञ्चमसर्गीयैकोनचत्वारिंशत्तमश्लोकघटकीभूतेन "विश्वरूपकलनात्" इति पदेनापि श्रीहर्षः श्री नारायणस्वरूपस्य तस्य वासुदेवस्य विश्वरूपतां दर्शितवान् व्यवस्थितवांश्च । तेन च तस्य सर्वात्मकत्वं प्रस्फोरितं भवति । अयमपि च

सर्वात्मकत्ववादस्तत्रैवाऽद्वैततत्त्ववादात्मकसिद्धान्तस्वरूपे ब्रह्माऽद्वैतसिद्धान्ते पर्यवस्यति। इयञ्चाऽद्वैतवासना मानवानां साधकानां यतीनां योगिनाञ्च ईश्वरानुग्रहादेव जायते। सा च महाबलवती चेयमद्वैतवासना महतो भयाद् = राज, चौर, व्याघ्रादिभयादपि-- त्रायते। यथोक्तम्--

"ईश्वरानुग्रहादेषा पुंसामद्वैतवासना।
महाभयकृतत्राणा द्वित्राणां यदि जायते"॥

—खं० खं० खा० प्रत्यक्षवा० प्र० प० पृ० १२४ शां टी० हनुमानदास

श्रुत्यादीनां बलेनैव भवन्तो मायावादिनोवेदान्तिनोऽद्वैतं साधयन्ति, एतावताऽद्वैतज्ञानस्य श्रुतिजन्यत्वं सिद्धयति। तत्रेदं पृच्छयतेऽस्माभिर्नैयायिकैर्ये खलु बौद्धप्रभृतयो दार्शनिकाः शब्दस्य प्रामाण्यमेव नाङ्गीकुर्वन्ति, कथयन्ति च "शब्दोपमानयोर्नैव पृथक् प्रामाण्यमिष्यते" इत्यनुसरन्ति च। भाषापरिच्छेदः, गुणनि०

ते शब्दस्वरूपाया श्रुतेरपि प्रामाण्यंकथमभ्युपगमिष्यन्तीति तेषां नयेऽद्वैतज्ञानं कथं श्रुतिजन्यं स्यादिति।

समाधत्ते—तथापि स्वकीयतादृशाऽनुभवचमत्काराऽऽविर्भाव एव तत्राऽद्वैत ज्ञाने प्रमाणं मन्तव्यम्। अयमस्ति चमत्काराऽऽविर्भावः—यद् स्वाप्निकी सृष्टिरपि तथैवानुभूयते यथा व्यावहारिकी सृष्टिरनुभवगोचरीभूता भवति। एतावांस्तु विशेषः तदियं स्वाप्निकी सृष्टिश्चास्ति किञ्चित्कालस्थायिनी। व्यावहारिकी सृष्टिश्च तदपेक्षयाऽधिककालस्थायिनीत्यनुभवसिद्धमेतत्।

एवमस्याः स्वाप्निक्याः सृष्टेश्चर्मचक्षुषः समुद्घाटनकालानन्तरकालाऽव्यवहितोत्तरकालावच्छेदेनैव जायते बाधः। परन्तु व्यावहारिक्याः सृष्टेस्तु न तथात्वम्—तस्या अधिककालस्थायित्वेन चर्मचक्षुषो विनाशकत्वाऽसंभवात्, अपि तु ज्ञानचक्षुष एव तथात्वं वाच्यम्। यथोक्तम्—

"कृत्वा ज्ञानमयीं दृष्टिं पश्येद् ब्रह्ममयं जगत्"।

तेजोबिन्दूप०—१।२९।

अस्या ज्ञानमय्या दृष्टेः सम्प्राप्तिरपि तादृशविलक्षणाऽनुभवचमत्काराऽऽविर्भावान्तर्गतमेवेति विज्ञेयम्।

तस्मादिदमपि कथनं सर्वथा समीचीनमेव—

आपाततो यदिदमद्वयवादिनीनाम्-
अद्वैतमाकलितमर्थतया श्रुतीनाम्।
तत्स्वप्रकाशपरमार्थचिदेव भूत्वा-
निष्पीडितादहह निर्गहते विचारात्॥

खं० खं० खा० प्रत्यक्ष बा० प्र० परि० शा० टी० हनु० पृ० १२६

अनेनापि प्रमाणेन दार्शनिको महाकविः श्रीहर्षः स्वीयं ब्रह्माऽद्वैतसिद्धान्तम्, अद्वैततत्त्वसिद्धान्तं स्वाभिमतं स्वाभीष्टञ्च पुनः समर्थयति—

"सुदूरधावनश्रान्ता बाधबुद्धिपरम्परा।
निवृत्तावद्वयाम्नायैः पाष्णिग्राहैर्विजीयते"॥ —तत्रैव—पृ० ८९

ज्ञानालोकप्रकाशः

अयमेव चास्ति प्राङ् निरूपितः श्रीहर्षाऽभिमतो ब्रह्माऽद्वैतसिद्धान्तो ज्ञानाऽऽलोकप्रकाशस्वरूपः । अयञ्च ज्ञानलोकप्रकाशश्चास्ति मोहापरपर्यायभूततमोरूपाऽज्ञानान्धकारविरोधित्वेन तद्विनाशकः ।

मोहरूपतमोऽज्ञानान्धकारपतितानां मानवानां ज्ञानियामपि समुज्ज्वलमपि सर्वथाऽन्तःकरणं तादृशमालिन्यादिदोषावच्छिन्नं संजायते । प्राक्कालावच्छेदेन समुत्कृष्टं समुज्जलञ्चाऽप्यन्तःकरणं वसिष्ठादीनां ज्ञानिनां मोहेन मालिन्यादिदोषावच्छिन्नं समजोजनदिति श्रूयते । तथाचोक्तवान् श्रीहर्षः—

"पुंसामलब्धनिर्वाणज्ञानदीपमयात्मयात्मनाम् ।
अन्तर्म्लापयति व्यक्तं यः कज्जलवदुज्ज्वलम्" ॥

नैषधे, स० १२ (श्लो० ३१ ।

अर्थात् अलब्धनिर्वाणज्ञानदीपमयात्मनां ज्ञानसम्पत्तिशालिनां वसिष्ठप्रभृतीनामप्यन्तःकरणंम्लापयति यौ मोहस्ताहशमोहाऽज्ञानान्धकारपतितास्तथा मोहमोहिताः कामाधोना सन्तोज्ञानिनोऽपि तथाचोक्तक्त—

"विश्वामित्र परामर्शप्रभृतयौ वाताम्बुपर्णाशिना-
स्तेऽपि स्त्रीमुखपङ्कजं सुललितं दृष्ट्वैव मोहं गताः" ॥

कर्णाकर्णिकया श्रुतमात्रम्—

विश्वामित्रप्रभृतयः स्वीयं मनो मेनकादिदेवाङ्गनाप्रवणं विहितवन्त इति च श्री हर्षातिरिक्तस्तेषामितिहासोऽपि श्री हर्षकथनमेव पुष्टीकरोति समर्थयति च ।

अपि च— श्रीमार्कण्डेयवचोऽपदिमेव कथनं प्रमाणयति । तथाहि—

"ज्ञानिनामपि चेतांसि देवी भगवती हि सा ।
बलादाकृष्य मोहाय महामाया प्रयच्छति ॥

दुर्गासप्तशती—देवोमहा० १।५५।

इत्यनेन प्रमाणभूतेन श्रीमार्कण्डेयवचसा सुस्पष्टमिदं प्रतीयते यत् मोक्षलक्षणलक्षितस्य निर्वाणस्य साधनीभूतात्मकताक्षात्कारविघातकोऽयं मोहाऽज्ञानान्धकारो महतामपि ज्ञानसम्पत्तिमतामद्वैतज्ञानविरहितानामन्तः करणानि बलादाकृष्ण पुत्र, कलत्रप्रभृतिकुटुम्बरूपे जम्बाले = कर्दमे, पातयति तानद्वैतज्ञानशून्यान् ।

यत्र पतितास्ते क्रोशन्ति मृतोऽहम्, अस्य मर्दस्य च पुत्रस्य किं भविष्यति, किं वाऽयं करिष्यति । एवं मदीयं कलत्रमिदं किं विधास्यते । अनयोर्गृहयिर्माणादिरूपं कार्यमपि कथं भविष्यति कदा भविष्यतीत्येवम् रूपेण पुत्र, कलत्रादिचिन्तासन्तानविचारणापरायणास्ते शिश्नोदरप्रश्नसमाधानं कर्तुकामाः कदाचित् पशुवद् व्यवहरन्ति, कदाचित् षट् पदवद् भ्रमन्ति, विलक्षणं वैजात्यावच्छिन्नं शब्दं प्रकुर्वन्तस्ते, इतस्ततश्चरन्ति विचरन्ति च । एवम् कदाचित् समयविशेषमाश्रित्य मकरीक्रिमिवदेव महति जम्बाले पतनशीलास्ते शिश्नोदरदरीं दुरन्तपूरामपूरान्ते पूरयन्ति, पूरयितुं वेतस्ततः परिभ्रमन्ति, अहर्निशमनिशमविच्छिन्न प्रयासायासभारमुद्वहन्तीति नहि किमपि रात्रिन्दिनं परियन्तीति सार्वजनीनोऽयं विषयः ।

अपि च पुनस्तत्रैव—"ब्रह्मचारिवनस्थायियतयो गृहिणं यथा।
त्रयो यमुपजीवन्ति क्रोधलोभमनोभवाः"

तत्रैव, श्लो० ३२—

अर्थात्—ब्रह्मचर्यधर्मकर्मपालनपरोऽयं ब्रह्मचारी सदाचारी, अरण्ये = वने, प्रान्तरे वा स्वस्थितिमापन्नो वानप्रस्थो वनस्थायी, सम्यङ्न्यासरोऽयं यतिर्वा योगी वा त्रयोऽप्येते स्वस्वाश्रममापन्नाः सन्तोगृहिणम् = गृहस्थं, यथाऽशनाच्छादनार्थमुपजीवन्ति = सेवन्ते।

यथोक्तवान् मनुः—"यस्मात्त्रयोऽप्याश्रमिणो ज्ञानेनान्नेन चान्वहम्।
गृहस्थथैरेवधार्यन्ते तस्माज्ज्येष्ठो गृहाश्रमी॥"

—मनुस्मृतिः ३।७८

यथा—एतेषां प्रागुक्तानां ब्रह्मचारिवनस्थायियतीनां त्रयाणां भोजनाच्छादिना खल्लिमे ग्रहाश्रमिण एव निर्वाहं प्रकुर्वन्ति। तथैव काम, क्रोध, लोभा, अपि केवलमेकेनैव मोहनैव निर्वहन्ति। अर्थात्ते त्रयोऽपि सन्ति मोहाऽज्ञानान्धकारमाश्रयन्तस्तन्मूला एवेति नूनं विभावयन्तु।

अपि च तमेव विषयं पुनर्द्रढीकरोति श्रीहर्षः—

जाग्रतामपि निद्रा यः पश्यतामपि योऽन्धता।
श्रुते सत्यपि जाड्यं यः प्रकाशेऽपि च यस्तमः" ॥

नैषधे, स० १७, श्लो० ३३—

अर्थात—यः = मोहः। जाग्रताम् = सावधानाम्। अपि निद्रा = ज्ञानशून्यत्वरूपः = चैतन्यरहितत्वरूपः। एवम्—यः = मोहः। पश्यताम् = चाक्षुषप्रत्यक्षात्मकज्ञानवताम्। अपि। अन्धतादर्शनाऽभावरूपः तथा—यः = मोहः। श्रुते = शास्त्रज्ञाने। सत्यपि = विद्यमानेऽपि। जाड्यम् = जडताम्। यः = मोहः। प्रकाशे सत्यपि। तमः = घट = पटाद्याच्छादकत्वेनाऽन्धकाररूपः।

इत्थञ्चाऽनेन नैषधीयसप्तदशसर्गीयत्रयस्त्रिंशत्तमश्लोकेन मोहस्याज्ञानान्धकाररूपता सुस्पष्टैवेत्यत आत्मज्ञानादिसत्कार्यविमुखास्ते मोहकलिलापरपर्यायभूतविवेकाभावमापन्नाः सन्तो विपरीतभावनाभावितान्तः करणास्ते मोघाशामोघकर्माणः पुरुषाः मोहिनीं राक्षसीं तथाऽऽसुरीं योनिमाप्नुवन्ति पौनः पुन्येन। यतो मोहस्याऽज्ञानरूपस्य तेषां विवेकस्वरूपज्ञानशक्तेराच्छादकत्वात् कर्तव्याऽकर्तव्यविचारहीनतां नीयमानत्वात्ते पतन्ति नरकेषु च।

अस्यैव मोहान्धकारस्य निराकरणार्थमेव सर्वाण्येव शास्त्राणि प्रवृत्तानि। शास्त्रज्ञा अपि तथैव वदन्ति व्यवहरन्ति च किमधिकं वयं ब्रूमहे—सच्चिदानन्दोऽपि—आनन्दकन्दो भगवान् गीतायां मोहस्य कालिमारूपताम् = कालुष्यरूपताम्, व्याख्यातवान् महान् पुरुषो गोकुलचन्द्रः श्रीकृष्णचन्द्रः। अर्थात् यथा मुखस्याऽऽवरकत्वेन कालिमा मुखमावृणोति, तथैव मोहतादात्म्यापन्नतां गतायाः कालिमाया अपि बुद्धेरावरकत्वेन बुद्धिमावृणोतीति मोहश्चाऽप्यस्ति कालिमा = कालुष्य, तादात्म्यापन्नः कश्चित् अज्ञानान्धकारलक्षणक्षितो धर्मविशेषः पदार्थविशेषो वेति स्वयमेवोहनीयम्।

अतोऽस्याऽज्ञानान्धकारलक्षणलक्षितस्य मोहस्य बुद्धेरावरणभूतस्य प्रभूतस्य तस्य "कालिमा" इति पदाभिधेयतां गतस्य निवृत्त्यनन्तरकालावच्छेदेन चित्तशुद्धिसमुत्पन्नम् आहोस्वित् सर्वत्राऽलंबुद्धिस्वरूपं वैराग्यम् एवं "योगश्चित्तवृत्तिनिरोधः" इति सूत्रानुसारं प्रज्ञास्थैर्यलक्षणं योगञ्च समवाप्यैवाऽस्माद् दुःखपङ्कनिमग्नतां गताद् भवसागरात् पारं गन्तुं प्रभवन्ति सांसारिणो जना इति। उक्तञ्च—

"यदा ते मोहकलिलं बुद्धिर्व्यतितरिष्यति।
तदा गन्तासि निर्वेदं श्रोतव्यस्य श्रुतस्य च"॥

गीता, अ० २। श्लो० ५२।—

नन्दनन्दनो भगवान् स्वयमर्जुनं प्रति ब्रूते यद् हे अर्जुन ? बुद्धिकालुष्यनिवृत्त्यनन्तरकालावच्छेदेनैव प्रज्ञाया निर्विकल्पाया जायमानत्वे साधको मुमुक्षुर्यतिर्वा वैराग्यसाहित्यावच्छिन्नं योगं समवाप्नोतीत्यस्ति शास्त्रसिद्धान्त इति च सर्वेऽपि शास्त्रज्ञा विदन्ति वदन्ति च।

अयमाशयः—सत्यासत्यविषयकविवेकज्ञानशून्यत्वेनाऽन्तः करणस्य मिथ्याभूत सांसारिकसत्ताशून्यविषयविशेष्यक रम्याऽरम्यत्वेष्टाऽनिष्टत्व, ग्राह्यत्वाऽग्राह्यत्व प्रकारकं ज्ञानं येन रागद्वेषौ विषयीकुर्वाणं सत् सर्वदा प्रवर्तमानं जायते तदेव मोहकलिलपदाभिधेयतां गच्छति। तच्च मोहकलिलं सर्वदाऽसन्मायिकमत एव तुच्छमिति विवेकाऽभावापर, पर्यायभूतपदार्थाऽज्ञानरूपत्वेनाऽज्ञाने एव पर्यवस्यतीति साधु विज्ञेयम् इति च सार्वजनीनो विषयः।

इत्थञ्चाऽप्रकाशस्वरूपेण धूमेन यथा प्रकाशस्वरूपोऽग्निराव्रियते, एवं सर्वथा जडस्वरूपेणोल्वेन चर्मस्वरूपेण यथा चेतनो गर्भस्वरूपः शिशुः समाव्रियते तथैव विवेकाऽभावरूपेण मोहकलिलेन विवेकात्मिका बुद्धिः समाव्रियते।

एवं स्थिते तादृशमोहकलिलस्वरूपावरणे मूलतो निराकृते सत्येव खलु जागतिकान् सर्वानेव पदार्थान् तत्तदिन्द्रियग्राह्यान् मायाकल्पितान् मनोमयांश्च विज्ञाय तत्र च नूनं मिथ्यात्वप्रकारिका बुद्धिर्विधेया। तथा चोक्तम्—

"यदिदं मनसा वाचा चक्षुर्भ्यां श्रवणादिभिः।
नश्वरं गृह्यमाणञ्च विद्धि मायामनोमयम्॥

श्रीमद्भाग० ११।७।७।

इत्यादिवचनानुसारतो सर्वमेव दृश्यमानं जगच्चास्ति मिथ्याभूतमिति निश्चित्य सर्वथाऽस्यमोहकलिलस्य परित्यागं विधास्यते बुद्धिस्तदा गृहीतस्य ग्राह्यस्य च, श्रोतव्यस्य श्रुतस्येत्य।देर्विषयस्य मिथ्यात्वं सत्ताशून्यत्वञ्च विज्ञाय वैराग्यसचवाप्त्यनन्तरं जगतो जागतिकेभ्यश्च पदार्थेभ्यः सर्वेभ्यः खलूपरतो भूयात्।

एवंक्रमेण मुमुक्षोर्बाह्येन्द्रियग्राह्येभ्यो विषयेभ्यः सर्वथा मनसः उपरमणं विधाय तदनन्तरं ज्ञानयोगप्रकारः समाश्रयणीयः। तमेव प्रकारमाह—

"श्रुतिविप्रतिपन्नाये यथा स्थास्यति निश्चला।
समाधावचला बुद्धिस्तदा योगमवाप्स्यसि"॥

गीता—अ० २, श्लो० ५३—

अथर्ववेदादिश्रुतिद्वारा क्वचित् कर्मविशेषाणाम्, क्वचित्तदीयफलविशेषाणाम्, अन्यत्र च तन्माहात्म्यविशेषाणां समुल्लेखः प्रतिपादनञ्च मिलति। क्वचिच्चोपासना-विशेषाणां तदीयफलविशेषाणां महत्त्वञ्च श्रूयतेऽनुभूयते च। एवं क्वचित् सगुणं ब्रह्म, तन्महत्त्वम्, तत्फलप्राशस्त्यञ्च प्रतिपादितमस्ति। तथैवाऽन्यत्र निर्गुणस्य ब्रह्मणः साङ्गं निरूपणमस्ति।

एवंस्थिते विप्रतिपत्तिरियं जायते किं प्राक् समुल्लिखितातां सर्वेषामेव विषयाणा-ञ्चास्ति प्राधान्यम्? अथवा सगुणस्य ब्रह्मण एव प्राधान्यम्, आहोस्विन्निर्गुणस्य ब्रह्मण एवेति, उभयेषामेव वा, इत्येवं रूतेण विप्रतिपद्य "सर्वे वेदा यत् पदमामनन्ति" इति परब्रह्मणि तात्पर्यं निर्धार्यते।

"सत्यज्ञानमनन्तं ब्रह्म"। तैत्तिरीयोप०—२।१।
"ब्रह्मैवेदं सर्वम्"। बृहदारण्यकोप० २।५।१।
"तत्त्वमसि"। छान्दाग्योप० २।८।७।
"अयमात्मा ब्रह्म"। बृहदारण्यको० ४।५।१९।
"अहं ब्रह्माऽस्मि"। बृ० उ० १।४।१०।

इत्यादिश्रुतिभिः सर्वाभिः सर्वस्यैव ब्रह्ममात्रत्वप्रतिपादनात्तत्रैव निगुणे ब्रह्मणि तात्पर्यावधारणं विधीयते। तस्यैव श्रवणेन मननेन च सम्पन्ना बुद्धिरसम्प्रज्ञातसमाधौ निर्वातस्थदीपवन्निश्चला सती यस्मिन् काले चित्तस्य परिपाकावस्थायां सन्तिष्ठमाना भविष्यति तस्मिन् कालेऽअप्रतिबद्धस्य ज्ञानयोगस्य प्राप्तिर्जायते। तदानीं मोहकलिलस्य, कामक्रोधादीनां वाऽवसर एव नास्ति। तदानीन्तनकालावच्छेदेन ब्रह्ममात्रश्रवणमेवाभि-जायते नान्यत् किमपीति भावः।

मोहकलिलस्य व्याख्यान्तरम्

नन्दनन्दनो भगवान् स्वयमर्जुनं प्रति ब्रूते हे अर्जुन? यदा ते विशुद्धि गतेयं बुद्धिः फलासक्तिं विहाय मोहकलिलम् = देहाभिमानस्वरूपपङ्कात्मकं कलिलमित्यर्थः। तत्र चेन्द्रियाणां या विषयासक्तिरूपा बहिर्मुखता सा चाऽस्ति जन्म-मृत्यु स्वरूपभयहेतुभूता। इयमेव खलु विषयासक्तिरूपेन्द्रियबर्हिर्मुखता 'मोहकलिल' शब्दे नोच्यमाना भवति। एवं या चास्तीन्द्रियाणामन्तर्मुखता सैव निर्भयता सती भवति अमृतत्वस्य कारणभूता, सैव-चाऽप्रतिबद्ध ज्ञानयोगप्राप्त्युपायस्वरूपेन्द्रियाणामन्तर्मुखताऽस्मादसारसंसारसागरात् पारं गमयतीत्यत्राह—

"इन्द्रियाणां प्रसङ्गेन दोषमृच्छत्यसंशयः।
संनियम्य तु तान्येव ततः सिद्धिं निगच्छति"॥
नारदपरिव्राजकोप०—३।३६।

अयञ्चेन्द्रियाणामन्तर्मुखतां प्राप्तः साधको मुमुक्षुर्यतिर्वा सर्वथा निर्भयतां गतः सार्वत्रिकं ब्रह्मानन्दं समवाप्नोति। तथाचोक्तम्—

"आनन्दं ब्रह्मणो विद्वान्, न विभेति कुतश्चन"।
तैत्तिरीयोपनि०—२।९।

इयञ्च स्थितिरानन्दं जनयति, निर्भयतां समुत्पादयति, मोहकलिलम् = मोहकालुष्यं, विनाशयति।

तच्च पङ्कात्मकं तादृशकलिलं किं लक्षणकमित्यत्राहदेहाभिमानस्वरूपं मोहकालुष्य = मोहकालिमाऽपरपर्यायभूतं पङ्कात्मकं तत् मोहकलिलं साकारस्वरूपकमाह—

देहोऽहमिति संकल्पो महत् संसार उच्यते।
देहोऽहमिति संकल्पस्तद्बन्धमिति चोच्यते॥

तेजोबिन्दूप०—५।९०।

"देहोऽहमिति यद् भानं तदेव नरकं स्मृतम्"।

तत्रैव—५।९१।

"देहोऽहमिति संकल्पो हृदयग्रन्थिरीरितः"।

तत्रैव—५।९२।

"देहोऽहमिति यज्ज्ञानं तदेवाऽज्ञानमुच्यते"।

तत्रैव—५।९३।

"देहोऽहमिति या बुद्धिः सा चाऽविद्येति भण्यते"।

तत्रैव—५।९४।

गौरोऽहम्, श्यामोऽहम्, स्थूलोऽहम्, कृशोऽहम्, इत्याद्यात्मिकाः शरीरस्य चैतन्यसम्पादिका देहविशेष्यकाऽऽत्मत्वप्रकारिका उपर्युक्ताः सर्वा एव प्रतीतयः संकल्प, भान, ज्ञान, बुद्धीः समाश्रित्य मोहकलिलस्य संसार, बन्ध, नरक, हृदयग्रन्थि, अज्ञानाऽविद्येत्यादिरूपावच्छिन्नत्वेन समुदीरयन्ति।

इदमेव चास्ति पङ्कात्मकस्य मोहकलिलस्य साकारस्वरूपम्। अस्याऽसाधारणकारणमस्ति विषयासक्तिस्वरूपा बहिर्मुखता, तां प्रदर्श्यदानीं तन्निराकरणोपायभूतं ज्ञानयोगप्राप्तिप्रकारमाह गोकुलचन्द्रः श्रीकृष्णचन्द्रः—"समाधावचला बुद्धिस्तदा योगमवाप्स्यसि"।

गीता—अ० २, श्लो० ५३

अर्थात् असंप्रज्ञातसमाधौ सर्वथा निर्वातस्थप्रदीपवन्निश्चला बुद्धिः स्वाऽव्यवहितोत्तरकालावच्छेदेनैवाऽप्रतिबद्धं ज्ञानयोगं साधकानां मुमुक्षूणां यतीनां वा कृते प्रापयति। अयमेव चास्ति ब्रह्माद्वैतसिद्धान्तो महाकवि दार्शनिकप्रवर श्रीहर्षाभितः ईति। यथोक्तम्-

"पुंसामलब्धनिर्वाणज्ञानदीपमयात्मनाम्"।

अयमेव चास्ति ब्रह्माद्वैतसिद्धान्तो ज्ञानलोकप्रकाशस्वरूपः। तथा चोक्तम्—

"यस्मिन् सर्वाणि भूतान्यात्मैवाऽभूद्विजानतः।
तत्र को मोहः कः शोक एकत्वमनुपश्यतः"॥

—माण्डूक्योप०—७

अपि तु—"यस्तु सर्वाणि भूतानि आत्मन्येवानुपश्यति"।

—ईशोपनि० ६

अन्यच्चापि—"चिदेकत्वपरिज्ञाते न शोचति न मुह्यति"।

—रुद्रहृदयोपनि०—३४

"सर्वं खल्विदं ब्रह्म नेह नानास्ति किञ्चन"।

निरञ्जनोपनि०

"एकमेवाऽद्वयं ब्रह्म नेह नास्ति किञ्चन"।

अध्यात्मोपनि०—६३—

एभिर्वेदस्वरूपैरुपनिषद्वाक्यैः श्रीहर्षोक्तो ब्रह्माऽद्वैतसिद्धान्तः सुस्थिरीकृतोजातयः सुदृढ़ीकृतोजातश्च।

अपि च पुनस्तत्र साक्षाद् वेदस्यापि प्रामाण्यमाह—

"यदि स्थ तमसावृता जालेनाभिहिता इव।
सर्वाः संलुप्येतः कृत्याः पुनः कर्त्रे प्रहिण्मसि॥

अथर्ववेदः—१०।१।३०।

अर्थात्—हे जीवात्मानः ? यदि = यदि त्वम्। तमसा = मोहाऽज्ञानाऽन्धकारेण। आवृताः = मोहाऽज्ञानान्धकारस्वरूपाऽऽवरणयुक्ताः। जालेन = मोहकलिलरूपजालेन। अभिहिता इव = अभिहता इव = बन्धनग्रस्ता इव। स्थ = हो, ईति हिन्दी। अर्थात् यदि त्वम् अज्ञातरूपमोह कलिलरूपजालेन समावृतोऽसि। तदा सर्वाः = सम्पूर्णाः। कृत्याः = जन्ममरणस्वरूपफलप्रदसकामकर्माणि। संलुप्य = सम्यक्त्वेन विनाश्य। इतः = अस्मात् मनुष्यलोकात्। पुनः। कर्त्रे = जगत्कर्तुः परमात्मनः सकाशे। प्रहिण्मसि = अहन्त्वां प्रेषयामि।

अयञ्चाऽथर्ववेद इदमेव ब्रूते यदि यूयं सकामकर्मणां मोहसलिलात्मकेन जालेन बद्धाः सन्तो चेष्टाविहीनतां गताः स्थ तदा सकामकर्माणि परित्यज्यैव विश्वेशपादाम्बुज-दीर्घनौकां प्राप्तं शक्नुथ नान्यथा। तयैव नौकया पुनः संसारसागरं तीर्त्वा ब्रह्माऽद्वैत-सिद्धान्तं प्राप्स्यथ। अपि च ऋग्वेदेनापि ब्रह्माऽद्वैतसिद्धान्तं प्रस्फोर्यते। तथाहि—

"इदं त एकं पर ऊ त एकं-
तृतीयेन ज्योतिषा सं विशस्व।
संवेशने तन्वश्चारुरेधि-
प्रियो देवानां परमे जनित्रे॥

ऋग्वेदः—१०।५६।१।

हे जीवात्मन् ? ते = तव। इदम् = सकामकर्मयोगात्मकम्। एकम् = एकत्वसंख्या-विशिष्टम् एकं कार्यं जगति विद्यते। (ऊ) = च। परः = सकामकर्मयोगस्य पुरः। ते = तव। एकम् = एकं निष्काम कर्म अर्थात् ब्रह्मज्ञानं विद्यते। तेन ब्रह्मज्ञानेन। तृतीयेन = तृतीयेन। ज्योतिषा = अखण्डब्रह्माकाराकारितयाऽचलया ज्ञानमय्या ज्योतिषा। यथोक्तम्—"कृत्वा ज्ञानमयीं दृष्टिं पश्येद् ब्रह्ममयं जगत्" १।२९। संविशस्व = ज्योतिः स्वरूपे परब्रह्मणि लीनो भव। तन्वः = स्वीयसमस्तकर्माणि। संवेशने = परब्रह्मणि समर्प्य। (योऽहं सोऽसौ, योऽसौ सोऽहम्)। एवम् (योऽसावादित्ये पुरुषः सोऽसावहम्, ओं खंब्रह्म) यजुर्वेदः—४०।१७। इत्येवं रूपेण, चारुः = परमसौन्दर्यसम्पन्नः, शम् = कल्याणं करोतीति यौगिकव्युत्पत्त्या शङ्करोबाबाविश्वनाथः। देवानाम् = ज्ञानसम्पन्न-

ब्रह्मविदां यतीनाम् । प्रियः । परमे = अतीवोत्कृष्टे । जनित्रे = जगदुत्पादके परमात्मनि । एधि = वृद्धिं गतो भव अर्थात् मुक्तो भव ।

अथवा देवानाम् = प्राकाश्यं गतानाम् = दृष्टिगोचरीभूतानाम् समस्तपदार्थानाम् । जनयित्रे = जन्मदातरि परमात्मनि । प्रियः = प्रेम प्रकुर्वाणः । एधि = वृद्धिं प्राप्तो भव = मुक्तोभव = तस्मिन् लीनो भवे, त्यर्थः ।

अत्र च—सामवेदे "संवेदनस्तन्वे" (पू० १।२।७।३।) एवं विधः पाठो मिलति । अयमर्थः—तृतीयया ऽऽदित्यज्योतिषा स्वीयमात्मानम् । सं विशस्व = संयोगं कुरु=संयुक्तो भव = सम्मेलये, त्यर्थः । यतस्तावद् भगवतो भास्करस्याऽस्ति यच्चैतन्यं तत्र, आत्मचैतन्ये च नास्ति कोऽपि भेदः । अत एव, तन्वे = अनेनैव शरीरेण परब्रह्मविषयकतत्वज्ञानाऽभ्यासानन्तरम्, "बहूनां जन्मनामन्ते ज्ञानवान्मां प्रपद्यते" गीता—इत्युक्तया पुनरुमशरीरग्रहणनिमित्तम् । चारुः = देवतास्वपि । परमे = अत्युत्कृष्टे । जनित्रे = जगदुत्पादके परब्रह्मणि । संवेशनः = सम्यक्त्वेन प्रवेशयोग्यतासम्पन्नः । एधि = भव ।

अथर्ववेदे चापि—"संवेशने तन्वा चारुरेधिप्रियो देवानां परमे सघस्थे" एवं विधः पाठो मिलति, तदनुसारमर्थोऽस्ति—यत्तत्र तृतीयपरब्रह्मज्योतिषि । संवेशने = सम्यक्त्वेन प्रविष्टे सति । परमे = प्रत्युत्तमे । सघस्थे = मुक्तपुरुषाणां निवासस्थानभूते मुक्तिधाम्नि । देवानां प्रियः = बुद्धिमतां ज्ञानिपुरुषाणां प्रियो भूत्वा । तन्वा = निष्कामकर्मणा । अनेन वर्तमान शरीरेणैव । एधि = समुन्नतिशीलो भव = मुक्तो भव = सांसारिकजन्ममरणादिबन्धनतो निनिर्मुक्तो भवे,—त्यर्थः ।

अपि च पुनः—"यथा नद्यः स्यन्दमानाः समुद्रे—
ऽस्तं गच्छन्ति नामरूपे विहाय ।
तथाविद्वान् नामरूपाद्विमुक्तः—
परात्परं पुरुषमुपैति दिव्यम् ॥

मुण्डकोप० ३।२।८

अर्थात् यथा विभिन्ना नद्यः स्वस्वमार्गेण समुद्रं गच्छन्त्यो नामरूपाद्विमुक्ताः सन्त्यस्तत्रैवाऽस्तयां गच्छन्ति । समुद्रेऽस्ततां गतासु तासु नदीषु तासां पुनर्नामापि न ज्ञायते । तथैव ज्ञानी अपि तत्त्वज्ञानसम्पन्नोऽपि मुमुक्षुर्वा यतिर्योगी वा पूर्वकालावच्छेदेनाऽज्ञानेन कृताभ्यां नामरूपाभ्यां विमुक्तो भूत्वा परात्परं तं दिव्यं बाह्मणः, अहमस्मि क्षत्रियः, इत्यादिकं सर्वमेव विषयजातं नामरूपादिकं योगस्थमात्रत्वेन तस्मिन्नेव परब्रह्मणि लयङ्गच्छति समाप्तिञ्च गच्छति । तदानीं खलु—

"स्वपूर्णात्मातिरेकेण जगज्जीवेश्वरादयः ।
न सन्ति नास्ति माया च तेभ्यश्चाहं विलक्षणः ॥"

वराहोपनि०—२।११

तदानीं ब्रह्माऽद्वैताऽवस्थां प्राप्तो, ब्रह्मात्मैक्यावस्थां गतो वा यतिर्योगी वा चिरमनुष्ठितयोगः सन् रागद्वेषादिदोषैः सर्वथा निःशेषवियुक्तोविशुद्धात्मा—"अहमेवेदं सर्वम्" ।—छान्दोग्योप० ७।२५।१।

"अहमेव हरिः साक्षादहमेव सदाशिवः"

तेजोबिन्दूप०—६।६४।

अपि च— "अहमेव गुणातीतः अहमेव परात्परः"।

तत्रैव—६।४४।

इत्यादिभिः सर्वाभिरेव श्रुतिभिः श्रीहर्षानुमतः "सर्वं खल्विदं ब्रह्म नेह नानास्ति किञ्चन" इत्यादिना समनुमोदितश्चाऽद्वैतसिद्धान्तः, ब्रह्माऽद्वैत सिद्धान्तः, ब्रह्मात्मैक्य-सिद्धान्तो वा संस्थापितो व्यवस्थापितश्च भवतीति विज्ञेयम्।

एवम्— "यस्मात् परं नापरमस्ति किञ्चित्" ॥

श्वेताश्वरोप०—३।९।

अन्यच्चापि— "मदव्यतिरिक्तं सर्वं बाधितम्"।

त्रिपाद्विभूतिमहाना०—८।१।

"यत्परं ब्रह्म सर्वात्मा विश्वस्यायतनं महत्।
सूक्ष्मात् सूक्ष्मतरं नित्यं स त्वमेव त्वमेव तत्" ॥

कैवल्योपनि० १।१६।

इत्यादिप्रमाणभूतेनापि वचसा श्रीहर्षाभिमतोऽद्वैतापरपर्यायभूतो ब्रह्माऽद्वैत-सिद्धान्तव्यवस्थापनं सुस्पष्टमेवेति विज्ञेयम्।

ज्ञानस्य सर्वश्रेष्ठत्वविचारः

साकल्यादिद्रव्यसाध्यात् तथा यज्ञपुरुषोयप्रसन्नताऽऽधायकमन्त्रप्रयोज्यात् एवं यज्ञप्रयोजकीभूतक्रिया, श्रमसाध्याऽनित्यस्वल्पकालिक स्वर्गादिफलहेतोः कथितसमस्तय-ज्ञात् सर्वथा नित्यनिरन्तरसांसारिकविषयत्वावच्छिन्नजनकतानिरूपितजन्यतावद् दुःख-निवृत्तिस्वरूपस्य आहोस्वित् आनन्दलक्षणमोक्षैकमुख्यफलस्य जनकीभूतोऽयं ज्ञानयज्ञः साक्षादतीवदुःसाध्य चतुर्थतुरीयमोक्षरूप परमपुरुषार्थ साधकत्वेन प्रापकत्वेन वा श्रेष्ठतमो मन्यते परिगण्यते चेति सर्वाणि शास्त्राणि सर्वेऽपि च शास्त्रज्ञा गायन्ति भणन्ति च।

अपरञ्च यादृशज्ञानमार्गाऽवलम्बिनो मानवस्य साधकस्य यतेर्योगिनो वा मुमुक्षोर्वा कर्तव्यतावच्छेदककुक्षिनिक्षिप्तं श्रौतं वा स्मार्तं वा लौकिकाऽलौकिकं वा तदन्यद् वा यच्च यावच्चाऽस्त्यखिलं कर्म तत् कर्माखिलं यस्मिन् ज्ञाने परिसमापितं भवति तत् ज्ञानं प्राप्तवतस्तस्य मुमुक्षोर्वा यतेर्योगिनो वा नहि किमपि ततः परं कर्तव्यमवशिष्टमस्ति।

यथा सीमां प्राप्तवतः कस्यापि मानवस्य ततः परं नहि किमपि गन्तव्यमव-शिष्यते।

आहोस्विन् यस्य ज्ञानस्य सम्प्राप्तौ सत्यां ब्रह्मणः कल्पशतार्जितं सर्वमेव कर्म तच्च सञ्चितं भवेदागामि वा भवेत् प्रवृत्तमप्रवृत्तं वा भवेत् तन्निरवशेषं परिसमाप्तं भवति ज्ञानमहिम्ना इत्यत्र चास्तिशास्त्रस्यैव प्रामाण्यम्, यथा भगवतो भास्करस्य प्रकाशेन तमोनिर्मूलं नश्यति। तथा चोक्तम्—

"श्रेयान् द्रव्यमयाद्यज्ञाज्ज्ञानयज्ञः परन्तप!
सर्वं कर्माऽखिलं पार्थ ? ज्ञाने परिसमाप्यते" ॥

गीता—अ० ४।श्लो० ३३।

हे परन्तप = हे अर्जुन ! ज्ञानयज्ञः सर्वेषु यज्ञेषु शर्वथोत्तमत्वेन सर्वोत्तमो गीयते । यतस्तावद् द्रव्ययज्ञप्रभृतयो यज्ञाः अनित्याः स्वल्पकालिका अत एव ते स्वर्गादिलोकाना-मेव सम्प्राप्तिविधाने सन्ति सामार्थ्यं सम्पन्ना इति । परन्त्वयं चास्ति ज्ञानयज्ञः साक्षान्मोक्षहेतुः, अत एव स सर्वश्रेष्ठ इति नूनं विज्ञायताम् । उक्तञ्च—

"ज्ञानयज्ञः स विज्ञेयः सर्वयज्ञोत्तमोत्तमः"

शाट्यायनीयोप०—१६—

ज्ञानयज्ञस्य सर्वश्रेष्ठत्वं ब्रूते—

"ज्ञानादेव हि कैवल्यम्" ।—श्रुतिः—

"ज्ञानादृते न मुक्तिः"—श्रुतिः—

अपि च—"सर्वेषामेव कैवल्यमुक्तिर्ज्ञानमात्रेणोक्ता ।
न कर्म, सांख्य, योगोपासनादिभिः" ॥

मुक्तिकोपनि० १।५६ ।

अधिकांशतो जना ज्ञानेनैव मुक्तिर्जायते इत्येव वदन्ति । एवकारेण कर्मणा, ज्ञान-कर्मसमुच्चयेन वा मुक्तेर्जायमानत्वव्यवच्छेदः सिद्ध्यति । एवमेव सांख्य, योगोपासनादीनामपि मुक्तिहेतुत्वं निराकृतम् ।

अन्यच्चापि प्रामाण्यन्तत्राह—

"यथा कृताय विजितायाधरेयाः संयन्त्येवमेनं सर्वं तदभिसमैति, यत्किञ्च प्रजाः साधु कुर्वन्ति, यस्तद्वेद यत्स वेद" ॥

छान्दोग्योपनि०—४।१।६।

इत्यनेनापि वचनप्रामाण्यनिचयेनेदमेव सिद्ध्यति यथा सर्वा एव नद्य आहोस्वित् नदीनां मोघास्तस्मिन्नेव महार्णवे निपतन्ति, अर्थात्तासां नदीनां तत्रैवाऽन्तर्भावोभवति, ततोऽनतिरिक्तत्वं तत्र सुसम्पन्नं भवति । तथैव सर्वेषामेव द्रव्यमययज्ञानां ज्ञानयज्ञे एवाऽन्तर्भवन्ति ।

अथर्ववेदोऽपि ज्ञानयज्ञस्यैव प्रामाण्यं, श्रेष्ठत्वम्, प्राबल्यं वा ब्रूते । तथाहि—

"यत् पुरुषेण हविषा यज्ञं देवा अतन्वत ।
अस्ति नु तस्मादोनीयो यद्विहव्येने जिरे" ॥

अथर्ववेदः—७।५।४।

अर्थात्—देवाः = ज्ञानिनः । पुरुषेण हविषा = आतमनो हविषा = आत्मज्ञाने-नेत्यर्थः । यत् । यज्ञम् = यागम् । अतन्वत = विस्तृतवान् स । तस्मात् = तस्माद् द्रव्ययज्ञात् । नु = निश्चितमेव । ओजीयः = बलवान् श्रेष्ठः । अस्ति । यत् । देवाः = विद्वांसः । विहव्येन = विविधद्रव्यादिहवनेन । ईजिरे = यज्ञं कृतवन्तः ।

अत्रायऽमेवास्ति निष्कर्षः—यद् गीतायां यथा द्रव्ययज्ञापेक्षया ज्ञानयज्ञस्याऽधिकं महत्त्वं वर्णितमस्ति तथैव वेदेऽपि दर्श, पौर्णमासादिनानाविधद्रव्ययज्ञापेक्षया ज्ञानयज्ञ-स्यैव सर्वथा श्रेष्ठत्वं महत्त्वञ्चास्तीति विज्ञायताम् ।

इदञ्च ज्ञानयज्ञलक्षणलक्षितं ज्ञानम् = आत्मज्ञानम्, कथं प्राप्यते ? इत्येवंविधायां कथम्भावाकाङ्क्षायां जायमानायां नन्दनन्दनो भगवान् समाधत्ते—

'तद्विद्धि प्रणिपातेन परिप्रश्नेन सेवया।
उपदेक्ष्यन्ति ते ज्ञानं ज्ञानिनस्तत्त्वदर्शिनः ॥'

—गीता—अ० ४। श्लो० ३९

अर्थात् श्रौत, स्मार्तादि, दर्श, पौर्णमासा = प्रभृति द्रव्ययज्ञादिभ्योऽपि विशिष्टमतीव श्रेष्ठं साक्षात्तुरीयपरमपुरुषार्थमोक्षैकफलद तद् ज्ञानलक्षणलक्षितं ज्ञानम् = आत्मज्ञानम्, गुरुप्रसादेन सेवाजन्येन, आहोस्वित् प्रणिपातेन = साष्टाङ्गप्रणामेव = साष्टाङ्गनमस्कारेण, अथवा परिप्रश्नेन = विवेकपूर्णेन प्रश्नेन, अर्थात् हे गुरुवर ? बन्धः कथं भवति ? तस्माद्वा मोक्षोऽपि कथं जायते ? एवम्—विद्याविद्ये उभे च के ? इत्युपदिशन्तु भवन्तः। तथा आत्मा कोऽस्ति ? परात्माऽपि कोऽस्तीति ब्रुवन्तु श्रीमन्तः ?, एवमनयोर्द्वित्वविनाशानन्तरं कथमैक्यमभेदो जायते इत्यपि समुद्गिरन्तु भवन्तः ? ।

इत्येवंविधप्रणिपात, परिप्रश्न, सेवाभावप्रभावभूषितैः प्रश्नैस्त्वयि श्रद्धां भक्तिं पाण्डित्योपदेशग्रहणयोग्यताञ्च समनुभूयप्रसन्ना भूत्वा शास्त्रजन्यज्ञानसम्पत्तिमन्तो ज्ञानिनः, तथा आत्मसाक्षात्कारजन्यवस्तुयाथात्म्यज्ञानवन्तश्च तत्त्वदर्शिनश्चेत्येतद्विशेषणद्वयावच्छिन्नैर्विशिष्टैः पुरुषैः साधकैर्यतिभिर्योगिभिर्वासमुपदिष्टं तदात्मज्ञानं संसारनिवर्तकं जायते।

एवंविधविशेषणद्वय (ज्ञानित्व, तत्त्वदर्शित्व) लक्षलक्षितो गुरुस्ते शम, दमादिसाधनसम्पत्तिमते ब्रह्मात्मैक्य स्वरूपब्रह्माद्वैतसिद्धान्तं सकलसांसारिकबन्धनकारणीभूत भ्रमापनोदकं समुपदेक्ष्यति। तत्रापि केवलं ब्रह्मवित्तमोगुरुरेवोपदेशं करिष्यते, यतः "श्रोत्रियं ब्रह्मनिष्ठम्" इति प्रमाणभूतवचनश्रवणात् शास्त्रज्ञस्तत्त्वज्ञश्च गुरुरेव समाश्रयणीयः, तस्माच्चोपदेशमात्मज्ञानरूपं श्रोतव्यम्। तदेवात्मज्ञानं पुनः संसार भ्रमनाशकं भवतिभविष्यति च। तथा चोक्तम्—

'भिद्यते हृदयग्रन्थिश्छिद्यन्ते सर्वसंशयाः।
क्षीयन्ते चास्य कर्माणि तस्मिन् दृष्टेपरावरे ॥'

मुण्डकोपनि० २।२।८।

अपि च—'ब्राह्मणेभ्यो ऋषभं दत्वा वरीयः कृणुते मनः।
पुष्टिं सो अघ्न्मानां स्वे गोष्ठेऽव पश्यते ॥'

अथर्ववेदः—९।४।९।

अर्थात्—तत्त्वज्ञानेच्छुर्मुमुक्षुर्यति वा पुरुषः-ब्राह्मणेभ्यः = ब्रह्मवेत्तृमहापुरुषेभ्यः। ऋषभम् = सर्वश्रेष्ठम्। मनः = चित्तं करणमान्तरम्। दत्वा = स्वीयं सावधानं मनोगुरुपदेशे संनियोज्य। वरीयः = सर्वश्रेष्ठम् अथवा वरणयोग्यम्। कृणुते = करोति। सः = सः साधकोमुमुक्षुर्वा यतिर्वा पुरुषः, गुरुतो ज्ञानं लब्ध्वा। अघ्न्यानाम् = सर्वथाविनाशायोग्यभगवत्प्रापकमनोवृत्तीनाम्। पुष्टिम् = पुष्टताम्। स्वे = निजे। गोष्ठे = इन्द्रियवृत्तीनां स्थानभूते मनसि। अव पश्यते = पश्यति = समवलोकयति। अर्थात्—

गीता वदति यत्तत्त्वदर्शिनं गुरुं प्रणम्य तथा गुरोः सेवां विधाय तदीयप्रश्नैः सदुपदेशो ग्राह्यः। वेदेऽपि उपदेशसमये ब्रह्मजिज्ञासूनां कृते—इदमस्ति कथनं यत्तैः

सावहितचेतोभिः सदुपदेशो ग्राह्यः, यतः सावहितचित्तवृत्तीनां मानवानामेव वृत्तेः स्थिरत्वेन ग्रहण-धारणपटुत्वं समनुभूयते ।

अन्यच्चाप्यत्रैव—"ज्ञानाऽमृतेन तृप्तस्य कृतकृत्यस्य योगिनः ।
नचास्ति किञ्चित् कर्तव्यमस्ति चेन्न स तत्त्ववित् ॥
लोकत्रयेऽपि कर्तव्यं किञ्चिदस्य न विद्यते" ॥
श्रीजाबालदर्शनोप०—१।२३-२४।

अपि च— "अमृतेन तृप्तस्य पयसा किं प्रयोजनम् ।
एवं स्वात्मानं ज्ञात्वा वेदैः किं प्रयोजनम् ॥"
"लोकद्वयेऽपि कर्तव्यं किञ्चिदस्य न विद्यते ।
इहैव स विनिर्मुक्तः स्यात् सम्पूर्णः समदर्शनः ॥"
—शिवधर्मोत्त०

"ज्ञानं चैकात्म्यदर्शनम्" ॥ श्रीमद्भाग० ११।१९।२७

"पुंसामलब्धनिर्वाण ज्ञानदीपमयात्मनाम्" ॥ नैषधे—स० १७, श्लो० ३१—

इत्यादिना ज्ञानस्य महत्त्वं वर्णयतां महाकवीनां दार्शनिकशिरोमणि श्रीहर्षाणामुक्तिमेव पुष्टीकरोति नन्दनन्दनो भगवान् चन्द्रः ।

तथाहि— "अपि चेदसि पापेभ्यः सर्वेभ्यः पापकृत्तमः ।
सर्वं ज्ञानप्लवेनैव वृजिनं सन्तरिष्यसि" ॥३६॥
यथैधांसि समिद्धोऽग्निर्भस्मसात् कुरुतेऽर्जुन ?
ज्ञानाग्निः सर्वं कर्माणि भस्मसात् कुरुते तथा" ॥
—गीता—अ०४, श्लो० ३७

अर्थात् इदमेव ज्ञानाग्निरूपं ज्ञानामृतं महापातकोपपातकप्रभृतीनिसर्वाण्येव कर्माणि पापात्मकानि समस्तानि व्यस्तानि वा ये प्रकुर्वन्ति पापात्मानः पापकारिणो वा पापकृत्तमा अपि सन्ति चेत् सन्तिष्ठमानाः केचन जीवास्तेऽपि सर्वञ्च तेषां पापार्णवं ज्ञानप्लवेनैव सन्तरणं गमिष्यन्ति ।

यथा महामेरुं लङ्घयतो लङ्घनशीलस्य पुरुषस्य बालुकाकणलङ्घनमकिञ्चित्करं प्रतिभाति । तथैव "मृष्यन्ते हि पुण्यसंभारोपनीतस्वर्गसुधामहाह्रदावगाहिनः कुशलाः पापमात्रोपसादितां दुःखवह्निकणिकाम्" इति वाचस्पतिमिश्रोक्तन्यायेनाऽपारपापसागरं समुत्तरतस्तेऽर्जुनस्य द्रोणप्रभृतिबधजन्यपापपल्वलसन्तरणं सर्वथा नहि विचार्यतावच्छेदकुकुक्षिनिक्षिप्तं भासमानं भवति । "अर्जुनस्ये" त्युपलक्षणं "सर्वस्ये" तिविज्ञेयम् अस्य सार्वजनीनविषयत्वात् ।

अतो धर्माऽधर्मतत्कार्यभूताऽपारमहासागरं तर्तुमिच्छतो नितान्तमेव ज्ञानमार्गः समाश्रयणीयः । तेनैव ज्ञानी शत, सहस्र, कोटि, कल्पार्जितंसकलमेव पापजालं छेदन, भेदनपुरः सरं तरतीति नान्यः पन्था विद्यते सन्तरणाय । तत्र श्रुतेरपि प्रामाण्यमाह—

"नैनं पाप्मा तरति सर्वं पाप्मानं तरति"

गीतायाः शङ्करानन्दी टीका, पृ० २७१

समुद्रसन्तरणे यथा नौका अधिकं समयं प्रतीक्षते तथा ज्ञानं पापविध्वंसने नहि बहुकालमपेक्षते किन्तु स्वकीयजनैः साक्षादव्यवहितोत्तरकालाऽवच्छेदेनैव सर्वं पापं समूलतो विनाशयति। यथा समिद्धोऽग्निः--काष्ठानि क्षणेनैव भस्मसात् कुरुते।

तथैव नित्यनिरन्तरध्यानसमाधिभिः प्रवर्तितोऽग्निः स्वोत्पत्तेः पूर्वभावनि पश्चाद्भावीनि च बहुजन्मसञ्चितानि च पुण्यपापमिश्रितानि सर्वाण्येव कर्माणि क्षणेनैव भस्मीकरोति।

यथा स्थाणुत्वप्रकारकं ज्ञानम् 'अयं स्थाणुः' इत्याकारकं स्थाणु-स्थाणुत्व, स्वभपावरकाऽज्ञाननिवर्तनेन सार्धमेव पुरुषत्वप्रकारकं भ्रमं निरस्य तादृशभ्रमकार्यमपि निराकरोति।

तथैव निष्कल, निष्क्रिय, निर्विशेष व्रह्मात्मत्वज्ञानमपि तत्स्वरूपावरकाऽज्ञाननिवर्तनेन सहैव ज्ञानशीलस्य ताधकस्य यतेर्वा सर्वथा सर्वाण्यज्ञानकर्माणि निर्मूलयति। तादृशनिर्विशेषव्रह्मात्मत्वज्ञानञ्च "अहं व्रह्मास्मि" इत्याकारकं विज्ञेयम्।

"अयमात्मा व्रह्म"।—वृहदारण्यकोप० ४।५।१९।
"अहमेव जगत् सर्वम्"। तेजो बि० ६।४३।
"अहमेवेदं सर्वम्"। छन्दोग्योप० ७।२५।१।
"सच्चिदानन्दरूपमिदं सर्वम्"।

नृसिंहोत्तरतापनीयोप०—७।

तथा— "मायामात्रमिदं सर्वमद्वैतं परमार्थतः"।—श्रुतिः—
"सर्वमिदमहञ्च व्रह्मैव"।—स्मृतिः—

इत्येवंविध लक्षणकं तद् विज्ञेयम्। अपि च—
"तद्विज्ञानार्थं स गुरुमेवाभिगच्छेत्"।
समित् प्राणिः श्रोत्रियं व्रह्मनिष्ठम्"।

मुण्डकोपनि० १।२।१२।

"महत् सेवां द्वारमाहुर्विमुक्तेः"।—मण्डल व्राह्मणो० ५।१।
"तत् सेवापरोऽज्ञोऽपि मुक्तो भवति"। तत्रैव—
"उत्तिष्ठत जाग्रत"।—कठोपनि० १।२।१४।
"मुक्तौ न सन्देहो यदि तुष्टः स्वयं गुरुः"।

योगशिखोपनि०—६।२६।

अपि च—"यथा जात्यन्धस्य रूपज्ञानं न विद्यते तथा।
गुरूपदेशेन विना कल्पकोटिभिस्तत्त्वज्ञानं न विद्यते"॥

त्रिपाद्विभूतिमहानारायणोप०—५।१।

"दुर्लभा सहजावस्था सद्गुरोः करुणां विना"।

महोपनि०—४।७७।

वेदस्याप्यत्र प्रामाण्यमाह—

त्वं पुरूण्या भरा स्वश्व्या येभिः-
मंसै निवचनानि शंसन् ।
सुगेभिर्विश्वा दुरिता तरेम विदो-
षु ण उर्विया गाध मद्य ॥

ऋग्वेदः ।१०।११३।१० ।

त्वम् = गुरुपदेशस्येच्छावांस्त्वम् । निर्वचनानि = गुरुदत्तोमदेशवाक्यानि । शंसन= स्तुतिं कुर्वन । पुरूणि = बहून । स्वश्व्या = आत्मज्ञान सम्बन्धिनो विषयान् । आ भर = गुरुभ्यो गृह्णीष्व । येभिः = यैस्तात्त्विकविषयैः । मंसै = अहं त्वां योग्यं स्वीकरोमि । सुगेभिः = सम्यक्त्वेन प्राप्तव्यज्ञानैः । विश्वा = सर्वान् । दुरिता = पापान् । तरेम । अद्य = अद्य अस्मिन् ज्ञानमार्गे । णः न = मां प्रति कथितम् । गाधम् = ग्रथितवचनम् । उर्विया = बहुसम्यानेन सह । सुवित्ः = सुचारुतया जानीहि ।

एतावता प्रबन्धेनेदमेव सूचितं भवति यत्–

"पुंसामलब्धनिर्वाण ज्ञानदीपमयात्मनाम्" ।

इत्यनेन श्रीहर्ष आत्मनो ब्राह्मणो ज्ञानदीपमयत्व = ज्ञानदीपरूपता = स्वप्रकाश-रूपता, कथिता भवति । यत्रात्मनि ज्ञानदीपात्मकः प्रकाशो न जातः तथाविधात्मानः सन्ति मोहादिमालिन्यदोषावच्छिन्ना इति तत्रास्ति सर्वथाऽन्धकारे एव । तस्य चाऽऽत्मनो ज्ञानदीपतायाः = स्वप्रकाशरूपतायाः प्राप्तिः श्रोत्रियब्रह्मनिष्ठगुरुशरणगमनेनैव भवितुमर्हतीति प्रागुक्तानि वाक्यानि प्रमाणभूतानि प्रमाणयन्ति । स्वानुभवस्यापि तत्रास्ति प्रामाण्यमिति ।

परिशिष्टः

अश्वत्थनामकभववृक्ष = संसारवृक्षविचारः

महाकविः श्रीभारविः 'सम्भवन्ति मतयो भवच्छिदः' इत्यादिना मतीनाम् = आत्मज्ञानानाम् – भवच्छिदत्वं विवेचितवान् ।

तत्र तादृशवाक्यघटकीभूतस्य 'भवस्य' 'अश्वत्थ' नामकभववृक्ष = संसारवृक्षेति नामकरणं कृतवान् सच्चिदानन्दो मथुराचन्द्रः श्रो कृष्णचन्द्रः श्रीमद्‌भगवद् गोतायाम् ।

अस्यापि अश्वत्थनामकस्य भववृक्षस्य मायाकार्यत्वेन श्वो न तिष्ठतीति यौगिकव्युत्पत्त्या अश्वत्थस्य क्षणभङ्गुरस्य विनाशित्वेनाऽनित्यस्य 'ऊर्ध्वम्' उत्कृष्टतमं = सर्वोत्कृष्टं परं ब्रह्मैव मायाशबलं मूलं = बीजं यस्य स ऊर्ध्वमूलो भववृक्षः = संसारवृक्षः श्रीभारविमहाकविना स्वीये महाकाव्ये किरातार्जुनीये वर्णितः ।

तस्य वृक्षस्य 'अश्वत्थ' नामकस्य क्षणभङ्गुरस्य अत एव नश्वरतां गतस्य तस्य 'ऊर्ध्वं' यद् ब्रह्म तदेव मूलम् = बीजम्, अस्ति । तत्र मूलनिष्ठं मूलत्वम् अभिन्ननिमित्तोपादानत्वरूपम् आत्मनो ब्रह्मण ईश्वरस्य विज्ञेयम् ।

यथा फेनतरङ्गबुद्‌बुदादीनां समुद्रे एवोत्पत्तिस्थितिलया जायन्ते, तद्वदेव हि जगदर्थकस्य संसारापरपर्यायभूतस्य प्रभूतस्य भवस्यापि समुत्पत्तिस्थितिप्रलयास्तस्मिन्नेवोर्ध्वेऽभिन्ननिमित्तोपादानकारणीभूते ब्रह्मणि भवन्तीत्यत्रास्ति वेदान्तस्यैव प्रामाण्यम् ।

तत्र ब्रह्मणः स्वाधिष्ठितप्रकृतिविकारं प्रति सन्निधिमात्रेण निमित्तकारणत्वमस्ति । तच्च ब्रह्मनिष्ठं निमित्तकारणत्वं जगत्कर्तृत्वरूपं बोध्यम् ।

एव मुपादानत्वञ्च विवर्ताधिष्ठानत्वरूपम् । तच्च भवाकारेण = जगदाकारेण परिणममानमायाधिष्ठानत्वरूपं विज्ञेयम् ।

एवं महदादिविकाराः शाखास्थानोयाः सर्वेऽपि ते प्रकृतेरधोवर्तित्वादत्र 'अधः' शब्देनोच्यमाना भवन्ति, अतोऽयं भववृक्षः = संसारवृक्षः, ऊर्ध्वमूलत्वेन प्रसिद्धिं गतो वर्तते, ब्रह्मणः प्रकृतेरप्युपरि सन्तिष्ठमानत्वात् ।

तथैवाऽयं भववृक्षोऽधः शाखत्वेनापि प्रसिद्धिगतत्वेन 'अधः शाखो'ऽप्युच्यमानो भवति । एवमेव महत्तत्त्वस्य साक्षात् कार्यभूनोऽहङ्कारो वर्तते सचास्ति स्कन्धरूपः । शब्दादिपञ्चतन्मात्राणि अपि शाखास्थानीयाः सन्ति भववृक्षस्य । अत एव शब्दादिपञ्चतन्मात्राणां कार्यभूतानि आकाशादि पञ्चभूतानि चोपशाखा भवन्ति तस्यैव भववृक्षस्य ।

एवं भवत्वेन कल्पितस्यास्य भववृक्षस्य छन्दांसि अनिष्टकारित्व, अनर्थसम्पादकत्व, अनित्यत्व, दुःखप्रदानभूतत्व, भ्रान्ति = संशयविपर्ययादिमिथ्याज्ञाने प्रवृत्तिशीलत्वादिदोषांश्छादयन्ति । अत एव स्वयञ्चापोमानि ऋग्. यजुः, सामादीनि छन्दांसि मायामयस्यास्य भववृक्षस्य पर्णस्थानीयत्वेन पर्णानि जायन्ते । यथा वृक्षपर्णानि वृक्षदोषान् सर्वतोभावेनाऽऽवृत्य तं वृक्षं सर्वथा सुरक्षितं प्रकुर्वन्ति ।

अपि च पुराणेतिहासधर्मशास्त्र नीतिशास्त्रादिनिरूपितसाहित्यावच्छिन्नाश्चत्वारो वेदाः कर्म, उपासना, योगादिक्रियाविषये आदेशप्रदानपरा अत एव ते कर्म, तदनुष्ठान,

तत्साधनं, तत्फलबोधकत्वेन ध्वंसप्रतियोगित्व, प्रागभावप्रतियोगित्व, दुःखरूपत्व, दुःखजनकत्वादिदोषांश्छादयन्तस्तं संसारवृक्षं सर्वतोभावेन परिवर्धयन्ति क्लेदयन्ति च।

इत्थञ्च प्रागुक्तलक्षणलक्षितं ऋगादिवेदपर्णं पुण्यपापप्रसूतिजनकीभूतं प्रभूतं गृहादिस्वरूपनिवासस्थानविधानरूपं, पुनरपि जननं, पुनरपि, मरणं, पुनरपि जननोजठरे शयनमित्यादिदुःखैकफलं समूलं भववृक्षं (संसारवृक्षं) यो याथार्थ्येन, विदाङ्कुरुते स एव वेदार्थविषयकज्ञानवान्। तथोक्तम्—

ऊर्ध्वमूलमधः शाखमश्वत्थं प्राहुरव्ययम्।
छन्दांसि यस्य पर्णानि यस्तं वेद स वेदवित्॥

श्रीमद्भगवद्गीता—अ० १५।१।

अपि च प्राग्वर्णितलक्षणलक्षितस्य भववृक्षस्य (संसारवृक्षस्य) शाखोपशाखास्थानीयानि सदसत्कर्मजन्यधर्माऽधर्मफलानि शरीराणि खलूर्ध्वमधश्च सन्ति प्रसृतानि।

तत्र मानवलोकमारभ्य स्थावरलोकपर्यन्तं सर्वेऽपि लोका 'अधः' शब्देनोच्यन्ते। तथैव मनुष्यलोकमारभ्य ब्रह्मलोकपर्यन्तं सकला लोका 'ऊर्ध्व' शब्देन अर्थात् 'ऊर्ध्वलोक' शब्देन कथ्यन्ते। इत्थञ्चोर्ध्वलोकपर्यन्तमधोलोकपर्यन्तञ्च सर्वत्र सन्ति व्याप्तानि शाखोपशाखास्थानीयानि पूर्वोक्तशरीराणि।

प्रश्नः—क्षणभङ्गुरस्यास्य शरीरस्य विनाशं गते सति पुरुषस्य भवबन्धनतो निवृत्तिरूपा मुक्तिः स्वयमेव सेत्स्यति किं पुनस्तदर्थं पुरुषप्रयत्नविधानेन ?

उत्त० तन्न समीचीनम् पुण्यपापजनकीभूतानि बहूनि सन्ति सञ्चितकर्माणि विचित्राणि विचित्रफलकानि च, तानि च कर्माणि 'नाऽभुक्तं क्षीयते कर्म' इति न्यायेन वर्तमानकालीने शरीरे नाशं गतेऽपि स्थावरादिब्रह्मलोकपर्यन्तं तेषु तेषु स्थानेषु पुरुषस्य योनिजादिशरीराणि समुत्पाद्यन्ते इति नात्र कश्चन विचिकित्सावसरः। एवं च सति पुरुषप्रयत्नमन्तरा नहि कालत्रयेऽपि स्वयमेव सेत्स्यति मोक्षः।

प्रश्नः—उन उन कर्मों के उपभोग के अन्त में तो शरीर स्वयं ही क्षीण हो जाते हैं फिर उसके बाद स्वयं ही मुक्ति हो जायगी तब क्या आवश्यकता है फिर पुरुष प्रयत्न की ?

उत्तरम्—'न' अर्थात् पूर्वोक्तकथनं समीचीनं नास्ति, यतः सत्वगुण, रजोगुणप्रभृतीमां गुणानां विकारभूतैः रागद्वेषादिभिः कामक्रोधादिभिश्च तथा तथा रागद्वेषादिकार्यभूतैः पुण्यपापैश्च शरीरेन्द्रियादयो वृद्धिं गता भवन्ति, अर्थात् कामादिभिः कर्मादिभिश्च पौनः पुन्येन समुत्पत्ति, विनाशशालिनो जायन्ते। अर्थात् पुनः पुनः समुत्पद्यन्ते विनश्यन्ति चेति मुक्त्यै पुरुषप्रयत्नोऽवश्यमेवाऽपेक्षमाणो भवतीत्यत्र नास्ति लेशतोऽपि कश्चन विवादाऽवसरः।

इत्थञ्च शरीरेन्द्रियादीनां पुनः पुनः समुत्पद्यमानत्वेन 'भवबृक्षस्य' (संसारवृक्षस्य) अक्षुण्णत्वेन तादृशभवरूपबन्धनोच्छेदनार्थं मतिरूपमात्मज्ञानं नितान्तमावश्यकम्। तदर्थञ्च श्रवणमननादिरूपः पुरुषप्रयत्नोऽप्यवश्यमेवापेक्षणीयो भवति। एवम्भूतमेवाभिप्रायं मनसि निधाय प्रोक्तवान् महाकविः श्रीभारविः स्वोये महाकाव्ये कितातार्जनीये 'सम्भवन्ति मतयो भवच्छिदः' इत्यैवास्ति तदीया दार्शनिकी दृष्टिः।

अश्वघोषस्यब्रह्माऽद्वैतवादखण्डनम्

इह खलु प्रचञ्चूर्यमाणे शब्दादिविषयलक्षणलक्षिते आपातपतोऽतिरमणीयेऽस्मिन् वैरिञ्चे प्रपञ्चे प्रकृत्या = अदृष्टेन = धर्माऽधर्मलक्षणलक्षितेन भाग्येन विविधवैचित्र्यावच्छिन्ने सर्वथा व्याप्यवृत्तित्वानवच्छिन्ने सर्वदाकालावच्छेदेन सावच्छिन्नत्वेनाऽभूयमानेऽयं प्रश्नः समुदीयमानो भवति यद् भेदव्याप्योभूतोऽयं द्वैतपक्षः एव श्रेयस्करः, अभेद निरूपितां व्याप्यतां गतो वाऽद्वैतपक्षो वेति विचार्यताम् ।

तत्र सर्वथा द्वैतं भेदञ्चाङ्गीकुर्वाणा नैयायिक-वैशेषिक प्रभृतयो विद्वांसो द्वैतपक्षस्यैव श्रेयकस्करत्वं याथार्थ्यंञ्च प्रमिण्वन्तो जन्मजन्मान्तरार्जितधर्मलक्षणलक्षितसुकृतापरपर्यायभूत प्रभूतपुण्यपरिपाकप्रसरसमासादितस्यास्य पाञ्चभौतिककलेवरस्य भस्म पुरीषरसान्ततामपरिकलयन्तस्तर्कैकचक्षुष्का वदन्ति विवदन्ते चात्र बहवः । प्रमाणयन्ति च—

> प्रत्यक्षादिप्रमाणसिद्धविरुद्धार्थं प्रबोधकः—
> वेदान्तो यदि शास्त्रं स्याद् बौद्धैःकिमपराध्यते ॥

—द्रष्टव्या श्रीज्वालाप्रसादीया न्या० सि० मु० टी० विलासिनीभूमिका

इत्यत्र सर्वत्र भासर्वज्ञप्रभृतयो विद्वांसः स्वीयां सम्मतिं प्रयच्छन्ति ।

अर्थाद् प्रत्यक्षाऽनुमानादिप्रमाणसिद्धो योद्वैतरूपो भेदरूपो वाऽर्थस्तद्विरुद्धो योऽर्थः= अद्वैतरूपोऽभेदरूपो वाऽर्थस्तत्प्रतिपादको वेदान्तोऽपि यदि शास्त्रं स्यात्तदा बौद्धैः किमपराध्यते ।

एवं स्थिते यदि वेदान्तो भवति भवतां शास्त्रं श्रद्धास्पदीभूतं शास्त्रं तदा बौद्धशास्त्रस्यापि अर्थात् बौद्धदर्शनस्यापि तद्रूपावच्छिन्नत्वेनैव भावनीयम्, तत्रापि तथैव श्रद्धा विधेया प्रामाण्यञ्च सम्पादयनीयम् ।

नास्तिकदर्शनमिदम्, नास्तिकशास्त्रमिदम् । अतएव हेयदर्शनमिदम् इति च पुनः कथमुच्यते । बौद्धमतानुप्रवेशः स्यादिति चाऽऽपत्तिः कथं दीयते, तत्रापीष्टापत्तिरेव कथं न विधीयते इत्यादि ।

अपि च जगतो मिथ्यात्वं ब्रुवन्ति वेदान्तिनः । "ब्रह्म सत्यं जगन्मिथ्या" इति च प्रमाणयन्तिः । तदपि नहि कदापि भवितुमर्हति । यतः पुरोवर्तिनो वस्तुनः सम्यक् प्रमात्वेनानुभूतस्य नहि कदापि मिथ्येति वदितुं शक्यते "अनुभवस्य कथमपि अपलपितुमशक्यत्वात्"

अपि चास्ति प्राचीनाचार्यचरणानामुक्तिर्यत् "तस्माद् यन्नास्ति नास्त्येव यत्त्वस्ति परमार्थतः" इत्यादिप्राचीनाचार्यचरणोक्त्यापि इदमेव सिद्ध्यति यज्जगतो नास्ति कदापि कथमपि मिथ्यात्वम्, अपि तु पारमार्थिकत्वमेवास्ति सर्वस्यापि जगतस्तदन्तर्गतानाञ्च सर्वेषामेव पदार्थानामिति । यतस्तेषां घटपटादिस्वरूपाणां पदार्थानां सर्वथा दोषानवच्छिन्नत्वेन अतिभासमानानां साक्षात् पुरोवर्तित्वेन स्वयं वयं समनुभवाम इति जगन्निरूपितसाहित्यावच्छिन्नानां तेषां पदानां तेषां पदार्थानामस्तित्वं नहि कथमपि विलोपयितुं शक्यते ।

एवं स्थिते प्रमात्वेनानुभूतस्य घटपटादिस्वरूपस्य वस्तुनः सर्वथा प्रमाणसिद्धस्य एवं प्रमाणभूतस्य कथं मिथ्यात्वं निर्वक्तुं शक्यते ब्रह्माद्वैतसिद्धान्तिभिः ।

यस्य चाऽद्वैतब्रह्मणो नास्ति काप्यनुभूतिः, सर्वथाऽननुभूतस्य प्रमाणागम्यस्य तस्य ब्रह्मणः सर्वेऽपि ब्रह्माऽद्वैतदार्शनिकातिरिक्ता दार्शनिकाः महान्तं खेदं समनुभवतन्तीति सर्वथाऽप्रामाणिकस्य प्रामाणिकत्वं प्रामाणिकस्य चाऽप्रामाणिकत्वमिति च ब्रह्माऽद्वैतवादिनो वेदान्तिनः कथनं कथं न व्याहन्येत । अतोऽद्वैते ब्रह्मणि प्रामाण्यानुभवस्य सर्वथाऽभावदर्शनात् तस्याऽद्वैतस्य ब्रह्मणः कथमङ्गीकारः स्यात् । अतः—"सर्वेषां वाचि न मनसि पुनः कस्यापि पुण्यात्मनः"

इति च प्राचीनाचार्योक्तिरपि साधुत्वेन सम्यक् संगच्छते । अर्थात् अद्वैतब्रह्मणः स्थितिरस्तित्वं वा केवलं सर्वेषां वाचि एवास्ति सन्तिष्ठमानम् ।

अत्र वेदान्तिनः समादधते—यत् सत्तात्रयाङ्गीकारेणैव सर्वसामञ्जस्ये ब्रह्माद्वैतसिद्धान्तः सर्वथा समीचीनः, नितान्तमावश्यकश्च । यथा—सत्तात्रयान्तर्गत प्रातिभासिक सत्तावतां पदार्थानां जाग्रदवस्थाकाले बाधोऽनुभूयते, अर्थात् प्रतिभासकालीनानां प्रातिभासिकपदार्थानां साक्षाद् दृष्टानां चर्मचक्षुषः समुन्मीलनाऽनन्तराऽव्यवहितप्राककालाऽवच्छेदेनैव बाधो जायतेऽनुभूयते चापि, अतस्तेषां पदार्थानां यथा मिथ्यात्वं सुस्पष्टमेव, तेषां मिथ्यात्वसाधनार्थं नहि किमपि प्रमाणान्तरमपेक्षते ।

तथैव व्यावहारिकपदार्थानां प्रातिभासिकपदार्थापेक्षया किञ्चिदधिककालस्थायित्वेन तेषामपि दिव्यदृष्टेः = ज्ञानचक्षुषः, समुन्मीलनानन्तरं बाधो जायते, अर्थात्तदानीं सर्वेऽपि जागतिकाः पदार्थाः सर्वथा बाधिता भवन्तीति भावः ।

सैव च दिव्यदृष्ट्यवस्था पारमार्थिकावस्था कथ्यते । इयमेव च दिव्यदृष्ट्यवस्था ज्ञानावस्था निगद्यते, तथा इयमेव चाऽसंगावस्था, निर्विकारावस्था, निर्विशेषावस्थाऽपि प्रोट्टङ्क्यते । तथा चोक्तम्—

"कृत्वा ज्ञानमयीं दृष्टिं पश्येद् ब्रह्ममयं जगत्"

अध्यात्मोप० २।२४।

जन्मतोऽन्तकालपर्यन्तम् अर्थात् जननकालमारभ्य प्राणप्रमाणकालपर्यन्तं वयं सर्वेऽपि द्वैतं भेदञ्चानुभवामः । द्वैतव्याप्यं भेदं भेदव्याप्यं वा द्वैतञ्चानुभवामः । तस्यैकमेवास्ति कारणं केवलं युग्मता । युग्मताः जोड़ा, इति हिन्दी ।

अर्थात् इतोऽस्ति आत्मभूतं चेतनतत्त्वं ब्रह्म, तत्रास्ति तदाश्रिता मायाऽविद्यापरपर्यायभूता । मायाञ्च सर्वेऽपि शङ्कराचार्य, वल्लभाचार्य, निम्बार्क, रामानुजाचार्यप्रभृतयो विद्वांसो विदाङ्कुर्वन्ति, स्वीकुर्वन्ति च ।

इतश्च सांख्यप्रभृतिदर्शनदृष्ट्या विचार्यमाणे चास्ति तत्रापि चेतनतत्त्वभूत आत्मा-पुरुषः । एवं तत्राप्यस्ति तदनुगामिनी प्रकृतिः । सैव तन्मते जगत्कर्त्री, अर्थात् संसारं रचयति । संसारश्च भेदरूपो द्वैतात्मकश्च ।

स च दुःखपङ्कनिमग्नः संसारश्चर्मचक्षुषा परिलक्ष्यते न तु ज्ञानचक्षुषापीति । भौतिकाः पदार्थाः तादृशपदार्थविनिर्मितश्चाय संसारश्चर्मचक्षुषैव दर्शनविषयीभूता भवन्ति ।

एवमस्य चर्मचक्षुर्जन्यदर्शनविषयीभूतस्य प्रभूतस्य जगतोऽपि समुत्पत्तिर्ब्रह्मणैव खलु जायते ।

अत्राऽऽचार्यब्रह्मदत्तो ब्रूते—

"एकं ब्रह्मैव नित्यं वस्तु तदितरदखिलं तत्र जन्मादिभाक्" । तत्र घटकीभूतेन "इतरत्" इति पदेन जगतोऽपि ग्रहणम् । एतन्मते जगदाविद्यकं मायिकम् = मायाकल्पितमित्यर्थः ।

"परमाद्वैतविज्ञानात् संसारः प्रविणश्यति" तत्रैव २६

"एकमेवाऽद्वितीयं नेह नानास्ति किञ्चन" तत्रैव ।

इत्याद्यवस्थैव पारमार्थिकी अवस्थोच्यते । तदपि न साम्प्रतम् । यतस्तस्यामेवाऽवस्थायां मानाभावः ।

वयन्तु ब्रूमः-इयं व्यावहारिकी अवस्थैव चास्ति परमार्थिकी अवस्था । नातः परा काचिदस्ति पारमार्थिकी अवस्था । अस्यामेवाऽवस्थायामितोऽवस्थातः पूर्वकालावच्छेदेन भासमानाः सर्वेऽपि पदार्था बाधिता भवन्ति, इत्याशयं मनसि निधायैव ब्रह्माद्वैतसिद्धान्तवादिनो वदन्ति यत् परमार्थिक्यामवस्थायामेव ब्रह्मातिरिक्ताः सर्वेऽपि पदार्था बाधिता जायन्ते ।

तन्न समीचीनम्—व्यावहारिकाऽवस्थातोऽतिरिक्ता का सा पारमार्थिकी, सा च केनानुभूता ? कश्च वर्तमाने ऽपि तामवस्थां समनुभवतीत्युच्यताम् । किञ्च तत्र प्रमाणमित्यपि निर्दिश्यताम्, लक्षणमपि चोच्यताम्, सा सती असती वेत्यपि निरूप्यताम् ।

ननू 'एकमेवाद्वितीयम्' इत्यादिश्रुतयः एव तत्र ब्रह्माद्वैते प्रमाणमिति चेन्न । एकमेवाद्वितीयम्'—इत्यस्य यथा "अस्मिन् ग्रामेऽयमेक एवऽद्वितीयो भूपतिर्निवसति इतिवत् अर्थो बोध्यः । अर्थात् अस्मिन् ग्रामे एतद्भूपतिसजातीयोऽन्यो भूपतिर्नास्तीत्यर्थः । एतेन नाऽद्वैतो व्यवस्थाप्यते, नापि व्यवस्थापयितुं शक्यते । द्वैतो भेदश्च सुस्पष्ट एवेति भावः । अपि च सर्वा एव श्रुतयो द्वैतपरा भेदपराश्च बोध्याः । एतदर्थं शंकरमिश्रपादाः स्वीये "द्वैतरत्न" नामके ग्रन्थे सर्वा अपि श्रुतीः द्वैतपरत्वेन च व्यवस्थापितवान् एवमेवाऽद्वैतवादखण्डनम भेदखण्डनञ्च सर्वत्रैव विज्ञेयम् ।

अपिचाद्वैतवादस्य जन्मदाता व्यासोऽपि यदा—उच्चस्वरेण "शुकदेव" "शुकदेव" इत्येवंरूपेण क्रोशन् तत् पृष्ठं प्रति गच्छति किमयं द्वैतपक्षो ऽद्वैतपक्षो वेति भवन्त एव वेदान्तिनो ब्रुवन्तु ।

अपि च बाधज्ञानानन्तरं मिथ्यात्वप्रकारको निश्चयो जायते इत्यत्र सर्वेषामेव शास्त्राणां शास्त्रकाराणाञ्चास्ति ऐकमत्यमिति । तच्च बाधज्ञानं अधिष्ठानसाक्षात्कारानन्तरकालावच्छेदेन जायमानमस्तीत्यत्रास्ति सर्वत्र शास्त्रस्यैव प्रमाण्यम्, स्वानुभवस्य चेत्यत्र नास्ति कस्यचिद् लेशतो ऽपि वादो विवादो वेति ।

यथा—"अयं सर्पः" इत्याकारकेदन्त्वावच्छिन्नविशेष्यकसर्पत्वप्रकारक मिथ्याज्ञानस्थले इदन्त्वावच्छिन्नत्वेन भासमानरज्जुरूपा धिष्ठानसाक्षात्कारानन्तरकालावच्छेदेन जायमानस्य "नाऽयं सर्पः" इत्याकारकबाधज्ञानस्यऽनन्तरकालावच्छेदेनैव "अयं सर्पः" इति ज्ञानं मिथ्या इत्येवंरूपेण मिथ्यात्वप्रकारको निश्चयो जायते ।

इत्थञ्चाऽश्वघोषोऽपि श्रीशङ्कराचार्यवत् जगतो मिथ्यात्वं ब्रूते तावदेव ब्रह्माद्वैत-सिद्धान्तः साधुः संगच्छते। परन्तु तादृशसिद्धान्तसंगत्यर्थं जगतो मिथ्यात्वकथनं नहि कथमपि रोचते यावत्तस्याऽनुभवगोचरता न सिद्धयेत्। अनुभवबलेन च तस्य प्रामाण्यं सिद्धयतीत्येवंस्थिते कथं तस्य मिथ्यात्वं वयं स्वयं ब्रूमः।

यथा दृष्टान्ते "नाऽयं सर्पः" इति बाधज्ञानानन्तरमेवेदन्त्वावच्छिन्नत्वेन भासमानरज्जुविशेष्यक सर्पत्वप्रकारकज्ञानस्य मिथ्यात्वं निर्धार्यते! तदनन्तरञ्च रज्जौ भासमानसर्पस्य स्वत एव मिथ्यात्वं सिद्धयति, नाऽऽयासविशेषः कर्तुं शक्यते।

परन्तु दार्ष्टान्ते नैवं युक्तमुत्पश्यामः। केवलं पारमार्थिक्यामवस्थायां चराचरात्मकस्यास्य जगतो बाधो जायते एतावन्मात्रकथनेन जगतो न बाधो नापि च मिथ्यात्वं सिद्धयति सेत्स्यति वा। श्रुतयश्च सर्वा एव सन्ति द्वैतपरा भेदपराश्चेति विज्ञेयम्।

अपि च ब्रह्मभूतात्मनो ज्ञानरूपतास्वीकारे ऽनुभवानुरोधात् सविषयकत्वं तस्य वाच्यम्। तथात्वे च तस्य जगद्विषयकत्वे सर्वज्ञत्वापत्तिः स्यात्। यत्किञ्चिद्विषयकत्वे विनिगमनाविरहः स्यादिति चिन्तनीयम्।

सुषुप्तौ निर्विषयिणी ज्ञानसन्ततिरस्तीत्युच्यमाने तस्याः स्वप्रकाशत्वे नास्ति किमपि प्रमाणम्, अन्यथा तु घट-पटादिवज् ज्ञानस्यापि जडत्वं स्वीकार्यम्। अत आत्मा स्वीकार्यः।

जीवेश्वरयोरैक्यमभेदो वा नैव कदापि कथमपि स्वीकार्यो येनाऽश्वघोषाभिमतब्रह्माऽद्वैतसिद्धान्तः सम्पुष्टो भवेत्। ज्ञानाऽज्ञानसुखित्व दुःखित्वादिभिः परस्परं जीवानां भेदसिद्धौ सुतरामन्ततः परमात्मभूतेश्वरभेदः सिद्धयति।

अयम्भावः—कश्चिज्जीवो ज्ञानवान् कश्चिच्चास्ति तदभाववान्। एवं कश्चिज्जीवो दुःखो (दुःखवान्) कश्चिच्चास्ति दुःखाभाववान्, एवं क्रमेण जीवानां पारस्परिको भेदः सुस्पष्ट एव।

जीवानां सत्यभेदे प्रागुक्तो विषयः सर्वथा विलुप्येत। एवं जीवात्मनामैक्ये बाल्यावस्थायामनुभूतस्य पदार्थस्याऽनुसन्धानं युवाऽवस्थायाम् वृद्धावस्थास्यां वा ऽवश्यं जायते। परन्तु जीवैकात्मताऽङ्गीक्रियमाणे शरीरान्तरावच्छेदेन अर्थात् चैत्रशरीरावच्छेदेनाऽनुभूतस्य पदार्थस्याऽनुसन्धानं मैत्रस्यापि स्यादित्यापत्तिर्बोध्या। यतोऽनुभवाऽनुसन्धानकर्त्रोरैकत्वात् अतो जीवानां पारस्परिको भेदो वाच्यः।

एवमेव सुखित्व, दुःखित्वादिहेतुभिरेव जीवानां परमेश्वरतोऽपि भेदो वाच्यः। अन्यथा कश्चित् संसारी जीवो बद्धः, कश्चिच्च मुक्त इति व्यवस्था न स्यात्, बद्धमुक्तजीवेश्वरयोरभेदात्। अतोऽकामेनापि भवताऽश्वघोषेण परस्परं जीवानाम्, जावेश्वरयोश्चाऽवश्यं भेदो वाच्यः।

अनुमानस्यापि तत्र प्रामाण्यमाह—जोव ईश्वरभिन्नः सुखित्वात् जीवान्तरवत्। ईश्वरो वा जीवभिन्न एकत्वात् आकाशवत्, इत्यमनुमानद्वयं जोवेश्वरयोर्भेदसाधकं

१. पश्यन्तु—पं० ज्वालाप्रसाद गौड़ कृतन्या० सि० मु० विलासिनीं टीकाम्—पृ० १८० आत्म निरूपणम्।

मन्तव्यम् । इत्थञ्च जीवानां नानात्वसिद्धौ सदैकरसस्य परमेश्वरस्य नानाजोवस्वरूपत्वाऽसंभवात्, एकत्वाऽनेकत्वयोः परस्परं भिन्नत्वात् । एवं स्थिते जीवेश्वरयोर्भेदे सिद्धे श्रीअश्वघोषाऽभिमत ब्रह्माऽद्वैतसिद्धान्तो नहि कथमपि कदापि साधुत्वेन सङ्गच्छते इति भावः ।

इत्यश्वघोषस्य ब्रह्माऽद्वैतसिद्धान्तखण्डनम् । एवमेवाऽन्येषामपि कालिदासभारविप्रभृतीनां महाकवीनां ब्रह्माऽद्वैतवादखण्डनमनयैवरीत्या विज्ञेयम् ।

अप्राकृतरसस्वरूपविचारः

अप्राकृतरसस्तु केवलं भक्तिरसो वर्णितः, अयमेव च अप्राकृतो रसः शान्तरसोऽपि गीयते । शब्दावलिमाश्रित्य भेदप्रतिसन्धानेऽपि अर्थानुपूर्व्यनुसारतो नहि भवति कोऽपि भेदो भेदावगाहो वा प्रत्ययऽ ।

अस्मिश्चाऽप्राकृतरसाऽऽत्मके भक्तिरसे सर्वतोभावेन शान्तेरनुभवात्तस्यैव च प्राधान्यदर्शनात् तज्जन्येन चिरकालनित्यनिरन्तरसमनुष्ठितसमाधिनिष्पन्नपरिपक्व सम्यग्ज्ञानेन शरीरादिद्वैतप्रपञ्चे स्वभिन्नत्वाभावदर्शनात् सर्वाधिष्ठानभूते स्वात्मरूपे ब्रह्मणि स्वत्वबुद्धिपूर्वकं 'सर्वमिदमहञ्च ब्रह्मैवे' ति स्वात्मना ज्ञाते ब्रह्मण्येवाऽऽत्मत्वप्रकारिकाया भावनाया दार्ढ्यात् अनात्मनि शरीरादावहमितिधीः स्वयमेव निराकृता भवति भक्तिरसावच्छिन्नस्य शान्तस्य ब्रह्मविद्यतेः ।

भगवद्भक्तिरसस्वरूपेऽप्राकृतरसे सर्वथा विषयानवच्छिन्नचिदानन्दघनस्य भगवतः परमेष्ठिन एव प्रस्फुरणादानन्दस्याऽत्यन्ताधिक्यं नियतञ्चाऽनुभूयते । इतः परा सर्वानन्दातिशायिन्यनुभूतिरानन्दस्य शान्तेर्वा नहि कुत्राप्युपलभ्यते, यतः सर्वतोभावेन वासनाक्षयः सञ्जायते ।

किन्तु विकाररहिता रज्जुरेवाऽऽरोपितसर्पशिरःपुच्छाद्याकारेण यथा ग्रहणदोषावच्छिन्नस्य ग्रहीतुःपुरुषस्य भासमाना भवति, यथा वा चाकचिक्यसादृश्यसन्दर्शनसमुद्बोधितसंस्कारमध्रोचोना मरुरेव भूमिस्तत्राऽऽरोपितजलप्रवाहतरङ्गादिरूपेण प्रतीयमाना भवति । तथैव भगवद्भक्तिरसस्वरूपाऽप्राकृतरसानवच्छिन्नस्यापि पुरुषस्य अर्थात्तादृशरसविरहितस्य नरस्य सर्वाधिष्ठानभूतं सर्वथा विकाररहितं सद्घनम्, चिद्घनम्, आनन्दघनं खलु परं ब्रह्म परमेश्वरोऽप्यारोपितनामरूपाणि चाऽनुकुर्वन्नेव नानेव प्रतीयते ।

तत्र नानात्वदर्शी पुरुषस्त्रिगुणात्मिकयाऽनाद्यविद्यया शरीरे खल्वात्मत्वप्रकारिकां बुद्धिं प्रकुर्वाणः रजोगुण, तमोगुणयोः प्रभावाक्रान्तः सन् काम-क्रोध-लोभ-मोह-अहङ्कार-ममकारादीनां भाजनभूतो भवति । एवं तमोगुणाविर्भूतेः प्रमादमोहौ जायेते । तथा बुद्धिजाड्यमितिकर्तव्यतानभिज्ञत्वञ्चापि जायते । इत्थञ्चैवंभूताः सदसद्विवेकशून्यास्तत्तत्कर्मसु प्रवृत्तिमापन्नाः जघन्यगुणवृत्तिस्थास्तामसाः पुरुषाः कार्याऽकार्यविवेकवर्जिताः सन्तस्तिर्यक्प्रभृतिषु अधोयोनिषु गच्छन्ति, अहर्निशमनिशमविच्छिन्नप्रयासायास-

---

१. गीता, पृ अ० १४, श्लो० १८ । शंकरानन्दी टीका

२. गीता, तत्रैव मूलश्लोकः ।

भारमुद्वहन्ति, नैकमपि क्षणं सुखं शान्तिञ्च प्राप्नुवन्ति । 'पुनरपि अननं पुनरपि मरणं पुनरपि जननीजठरे शयनम्' इति च भगवच्छङ्कराचार्यचरणोक्ति चरितार्थयन्ति । एवञ्च रसस्वरूपब्रह्मविमुखानां तद्विषयकविचारचर्चाविरहितानाञ्च मानवानामियमेव गतिर्जायते विवेकविचारविवर्जितानाम् ।

अतः संसारमहासागरं ततुं कामः साधको यतिरविवेकजन्यभेदं भेददृष्टिं वा तिरोदधानः परमानन्दसाक्षात्काररूपेण स्वप्रकाशचिदात्मकब्रह्मस्वरूपरसमवाप्नुवन् विद्वान् शतकोटिकल्पार्जितं सर्वमपि पापं क्षणेनैव विध्वंसयति, बालुकाकणवदपारपापार्णवञ्च सहजत एव सन्तरति । तथा चोक्तम्—

'नैनं पाप्मा तरति सर्वं पाप्मानं तरति'

—गीता, शङ्करानन्दी, श्लो० ३७—अ० ४

एतत् संसारसागरसन्तरणे नौकावद् रसस्वरूपब्रह्मज्ञानं पापनिवर्हणे नाधिकं कालमपेक्षते । 'नौका' इति चास्ति व्यतिरेकिदृष्टान्तः । अर्थात् नौका समुद्रसन्तरणे बहुकालमपेक्षते, न तथाविधमधिकं कालं ज्ञानमपीति भावः ।

अपि चाऽऽत्मरसाऽमृततृप्तस्य ब्रह्मरसाऽमृततृप्तस्य वा साधकस्य ब्रह्मविद्यतेरानन्दैकरसेनाऽऽत्मना सर्वथा पूर्णतां गतेन सर्वतो भावेन तृप्तो भवति तस्य नान्यत्किञ्चिदपेक्षितमवशिष्यते । 'आत्मलाभान्न परं विद्यते' इति स्मृतेः ।

—तत्रैव, श्लो० १७

एवञ्चात्मतृप्तस्य यतेः प्राप्तव्यान्तराऽभावादात्मतृप्तेः परं न किञ्चिदप्यपेक्षितं भवति । यथा चक्षुः स्वाभिलषितं रूपं रूपवद्वा द्रव्यं प्राप्य ततोऽतिरिक्तं नान्यत्किञ्चिदपेक्षते । तथैव साधको यतिरपि अखण्डरसात्मकब्रह्माकाराकारिताया अन्तःकरणवृत्तेर्विषयभूतं चिदानन्दैकरसात्मकं मायातत्कार्यलेशसम्बन्धशून्यं चिद्घनम्, आनन्दघनम्, ब्रह्म समवाप्य पूर्णतया सन्तुष्टिं शान्तिञ्चापन्नो भवति । यतः स जन्मानेकसहस्रकृतपुण्यकर्मपुञ्जपरिपाकेनाऽप्राकृतरसब्रह्मप्रसादेन सर्वदृश्यभूतस्य जगतस्तदन्तर्गतसमस्तपदार्थानाञ्च मिथ्यात्वनिश्चयपूर्वकं रसब्रह्मैवाऽहमस्मीति ब्रह्मात्मैकत्वविज्ञानं यदाऽप्रतिबद्धम् अप्रतिरुद्धञ्च समुत्पन्नं भवेत्तदैव गृहस्थोऽपि याज्ञवल्क्यादिवत् एषणादिभ्यो व्युत्थास्यति, नत्वहं ममेतिभावनाभावितान्तःकरणविरहितः सन् पुनर्दृष्टिगोचरतां गच्छति, अहं ममेतिदोषदूषितद्वैतभेदभावनायाः कारणस्याऽभावात् ।

आत्मभिन्ने शरीरादौ 'अहं गौरः' 'अहं स्थूलः' इत्यादिप्रतीतिसिद्धस्य 'अहम्भावस्य' 'ममेयं पत्नी' 'ममाऽयं पुत्रः' इत्यादिप्रतीतिसिद्धस्य च ममभावस्य, एतद्द्वयस्यैव जगत्कारणत्वेनाऽङ्गीकृतत्वात् ।

तस्मादेतद् भावद्वयं यस्य साधकस्य यतेःरसब्रह्मात्मैकत्वविज्ञानेन सर्वथा समुन्मीलितं जातं स साधको यतिर्न पुनः संसाराय कल्पते । तथा चोक्तम्—

एकं ब्रह्मास्त्रमादाय नान्यं गणयतः क्वचित् ।
आस्ते न धीरवीरस्य भङ्गः सङ्गरकेलिषु ॥ २५ ॥

खण्डनखण्डखाद्ये, प्रथमपरि० प्रत्यक्ष वा० का० १५

अर्थात् एकमप्राकृतरसात्मकब्रह्मरूपमस्त्रमादाय नान्यं कमपि गणयतो धीरवीरस्य क्वचित् सङ्गरकेलिषु भङ्गो नैव भवतीति सुनिश्चितमभेदाऽद्वैतबोधकश्रुतिवाक्यैः।

अपि च पुनरिदमेव स्वीयं कथनं पुनर्दृढीक्रियते। तथाहि।

अद्वैतागमनासीरे साधु सा धुन्वती परान्।
सेवामेवार्जयत्यर्था पत्तिपत्तिपरम्परा॥

—तत्रैव कारिका २१

इत्थञ्च मिथ्यासंसाराऽऽवेदकभेदद्वैतप्रतिपादकान् परान् विरोधिनः प्रमाणाभासान् निराकुर्वन्ती अद्वैताऽभेदबोधकश्रुतिस्मृतिप्रमाणसंवलिताऽद्वैतागमस्य पुरतः पुनः सेवामेवाऽर्जयति अर्थापत्तिपरम्परा। येन मिथ्याभूतमविद्याविद्यामानमिदं जगज्जातं सर्वथा निवर्तते।

"अहं ब्रह्मैवास्मि" "श्यामोऽहम्" "स्थूलोऽहम्" "ब्राह्मणोऽहम्" इत्यादिज्ञानञ्च तेजस्तिमिरयोरिव परस्परं सर्वथाऽतीव विरुद्धमतो नहि कदाप्येकत्र स्थातुं वसितुं वा प्रभवति, इत्यतः सुनिश्चितमेतद् यद् अप्राकृतरसात्मकब्रह्मतत्त्वविज्ञानखड्गखण्डितहृदयग्रन्थिराशेः साधकस्य यतेः न पुनः संसारो जायते नापि च कल्पते इति।

अतो गृहस्थोऽपि यदि विद्वान् उपर्युक्तनिर्दिष्टाऽप्राकृतरसब्रह्मविज्ञानखङ्गखण्डितहृदयग्रन्थिराशिर्भवेत्तदा सोऽपि रसब्रह्मनौकयाऽसारभूतमविद्याऽस्तित्वसम्पन्नमिमं संसारमवश्यमेव समुत्तर्तुं प्रभवत्येव नहि, अपि तु अवश्यमेव समुत्तरति, अर्थात् संसारादस्माद्ध्रुवमेव पारं गच्छतीत्यत्र नास्ति लेशतोऽपि कथमपि विपर्ययो वा संशयो वेति शास्त्रं पौनः पुन्येन व्याहरति। उक्तञ्च—

"अतः संसाराद् व्युत्तिष्ठत्येव गृह्यपि विद्वान्।
यदि न व्युत्तिष्ठेत्तदभ्युत्थानमेव ज्ञापयति अज्ञानतत्कार्यनिगृहीतत्वं विदुषः"।

—गीतायां शङ्करानन्दी द्रष्टव्या, श्लो० १७ अध्याय ३

"अहं[1] ब्रह्मैवाऽस्मी"ति ब्रह्मस्वरूपेण ब्रह्मणि सन्तिष्ठमानो विद्वान् ब्राह्मणस्य चाण्डालमिव शरीरस्पर्शं नैव विद्यते, नापि च शरीरं स्प्रष्टुं स्वयमपि कामयते। शरीराद्यभेदं विना "अहं भाव" "ममभाव" विषयकश्च व्यवहारो नहि केनापि ब्रह्मविदा विदुषा विधातुं शक्यते।

ब्रह्मविद्विदुषां शरीरादितादात्म्यं महदेव दुःखकरं भवति, ततश्च शास्त्रोक्तं विधिनिषेधात्मकं व्यावहारिकं वा कर्मविधानं ततोऽप्यतीव दुःखकरं प्रतिभाति। इत्थञ्चैवंविधं सर्वमपि कर्मकलापं दुःखदं दुःखकरं च विज्ञाय गृहस्थोऽपि विद्वान् सर्वमेव संन्यस्यति। न च स्वस्य कृते नापि च परस्य कृते तस्य विदुषः कर्मविधानं समीचीनं रुचिकरं वा प्रतिभाति।

अपि च अप्राकृतरसात्मकब्रह्मनिष्ठारूपसंन्यासयोगेन रागद्वेषादिदोषैः सर्वथा निःशेषवियुक्तो विशुद्धात्मा, तेनैव च तादृशब्रह्मनिष्ठारूपसंन्यासयोगेन सर्वतोभावेन निर्मूलितात्मवासनो गृहस्थोऽपि विद्वान् तादृशरसस्वरूपब्रह्मनिष्ठयैव च सर्वेषामेव ब्रह्मा-

---

१, श्रीमद्भगवद्गीता, शङ्करानन्दी टीका, अ० ३, श्लो० १७—

दिस्तम्बान्तानां प्राणिनां स्वरूपभूतः प्रत्यगलक्षणः सर्वभूतात्मभूतात्मा सर्वेषां भूतानां स्वरूपेण प्रतिभासते। उक्तञ्च—

"प्राणो ह्येष सर्वभूतैर्विभाति"

—तत्रैव, अ० ५, श्लो०७

"अहमेवेदं सर्वम्"— —इत्यपि तत्रैव

इत्यादिश्रुत्यर्थानुभूत्या स्वानुभूत्या च गृहस्थोऽपि विद्वान् प्रागुक्तरूपतामापन्नः ब्रह्मवित् साधकयतिवत् सर्वात्मतां गतः शरीरयात्रार्थं यत्किञ्चिद् वैधानिकम् अवैधानिकं वा नित्यमनित्यं वा विहितमविहितं वा कर्म समाचरन्नपि तेन तेन तथाविधेन कर्मणा पुण्येन पापेन वा न कदाचित् कुतश्चित् कथञ्चिल्लिप्यते[1]। नापि च स कर्मणि[2] अकर्मत्वदर्शनरूपकारणवशात् कर्म संसर्गानवच्छिन्नत्वेन कर्मभिरेव स बध्यते।

यतः स फलकामनां विहायाऽप्राकृतरसात्मके परे ब्रह्मणि[3] कर्तृत्व, भोक्तृत्व, कारयितृत्व, भोजयितृत्वस्वरूपाणि सर्वाण्येव कर्माण्याधाय तादृशब्रह्मार्पणबुद्ध्या श्रद्धया भक्त्या च नित्यमनित्यं वा वैदिकमवैदिकं वा कर्म समाचरन् सोऽपि भगवद्भक्तः गृहस्थो विद्वान् जन्मादिबन्धनकारणीभूतेन पुण्येन पापेन वा कर्मणा पद्मपत्रमिवाऽम्भसा कदापि न लिप्तो भवति। यत् किमपि स पश्यति तत् सर्वं ब्रह्मैव पश्यति। होमकर्ताऽपि ब्रह्मैव, हविरपि खलु ब्रह्मैव, होमाग्निरपि ब्रह्मैव, यजमानमपि स्वं ब्रह्मविद् ब्रह्मैव पश्यति!

इत्थञ्च ब्रह्मकर्मसमाधिना सर्वस्यैव चराचरात्मकस्य जगतो ब्रह्ममात्रत्वदर्शनं यत्तदेव 'ब्रह्मकर्म' कथयन्ति ब्रह्मविदो गृहस्था विद्वांसः, अन्येपि च शास्त्रविदो वदन्ति तथा च तस्मिन् ब्रह्मकर्मणि यः समाधिः चित्तस्य स्थापनं भवति तेन ब्रह्मकर्म समाधिरूपेणाऽनिर्वचनीयेन कर्मणा सर्वं ब्रह्मैवाऽस्तीति पश्यतो ब्रह्मज्ञानिनः कृते सर्वमेव ब्रह्मस्वरूपं प्रतिभासमानं भवति। श्रुतिरपि तदेवाह—

"सर्वं खल्विदं ब्रह्म"

एवं यो गृहस्थो विद्वान् आत्मनैव स्वात्मरूपेण आत्मामृतं पीत्वा सर्वथा तृप्तो भवति, तृप्तो वा सन्तिष्ठते, तथा यो हि गृहस्थो विद्वान् स्वयमेव स्वकोयेन नित्यनिर्विकारानन्दात्मकेन निष्कल, निष्क्रिय, शुद्ध, बुद्ध, निरन्तरानन्दैकरसाऽद्वितीयब्रह्मात्मना सह क्रीडति, विनोदञ्च विधत्ते, तथा यो हि सर्वात्मदृष्ट्या सर्वात्मना सर्वात्मा भूत्वा नित्यत्व, शुद्धत्व, सूक्ष्मत्व, आन्तरत्व, कूटस्थत्व, असङ्गत्व, चिद्रूपत्व, सत्यत्व, सर्वज्ञत्व, सर्वप्रकाशकत्व, सर्वसाक्षित्व, आनन्दैकरसत्वादिधर्मैः सर्वथा विलक्षणे आवरणराहित्यावच्छिन्नत्वेन सर्वदा प्रकाशमाने निर्विशेषे प्रत्यग्रूपे ब्रह्मणि नित्यं निरन्तरञ्च आसक्तिमापन्नः सन् सन्तिष्ठते स स्वात्मन्येव तूष्णीं सुखमास्ते, न कदापि किंचिद्विकरोति।

तच्चेत्थम्भूतं सर्वदा प्रकाशमानं निर्विशेषात्मब्रह्मैवाऽप्राकृतरसस्वरूपं विज्ञेयम्। उक्तंच—

---

१. गीता, ५ अ०, श्लोक ७

२. गीता- अ० ५, श्लोक १०,

२. तत्रैव शङ्करानन्दो,

"आत्मनाऽऽत्मनि सन्तृप्तः"—अन्नोपनि. ४।२ ।
"ब्रह्मामृतरसे तृप्तः"—तेजोविन्दूपनि. ४।५४ ।
"रसो वै सः"—तैत्तिरीयोपनि. २।७ ।
"ब्रह्मामृतरसासक्तः"—तेजोविन्दूप. ४।५७ ।
"ब्रह्मामृतरसे मग्नः"—तेजोविन्दूप. ४।५७

इत्यादिश्रुतिप्रसिद्धि प्राप्तं निरस्ताशेषविशेषं सत्यस्वरूपं, ज्ञानस्वरूपं सच्चिदानन्दघनं रसात्मकं ब्रह्मैवाऽप्राकृतं रसब्रह्मेति गीयते ।

"रसामृतेन तृप्तस्य कृतकृत्यस्य योगिनः ।
नचास्ति किञ्चित् कर्तव्यम्" ॥ जाबालिकोपनि० १।२३

अत्रापि रसामृतपदेन अप्राकृतरसात्मकं ब्रह्मैव वेदितव्यम् । यल्लब्ध्वा तृप्तस्य कृतकृत्यस्य योगिनः त्रिषु लोकेषु नहि किमपि कर्तव्यमवशिष्टं वर्तते इति ।

शान्तरसस्य उपसंहृतरसस्य च विवेचनम्

सामान्यतो रसस्वरूपविषये इयं जिज्ञासा जायते यत् सोऽयं रसः किं स्वरूपः, कदा कथञ्चाऽस्य लाभो भवतीति शिष्यो गुरुं पृष्टवान् ? तमेव प्रश्नं सोत्तरमाह महर्षिकल्पः श्री मधुसूदनसरस्वती महोदयः—

ननु कोऽयं रसो नाम किं निष्ठो वा भवेदसौ ।
अस्य प्रत्यायकः को वा प्रतीतिरपि कीदृशी ॥१॥
विभावै रनुभावैश्च व्यभिचारिभिरप्युत ।
स्थायीभावः सुखत्वेन व्यज्यमानो रसः स्मृतः ॥

भक्तिरसायने तृतीयोल्लासः, श्लोक १-२ ।

स च व्यज्यमानो रसः "ब्रह्मैव" । तथाचोक्तम्—

"रसं ह्येवाऽयं लब्ध्वाऽऽनन्दीभवति" तत्रैव

अपि च "यत्र नान्यत्पश्यति नान्यच्छृणोति नान्यद्विजानाति स भूमा"

छान्दोग्योप० ७।२४।१ ।

इत्यनेन पूर्णतया ब्रह्मण एव निर्गुण, निर्विशेषरसस्वरूपता प्रतिपादिता भवति, यतो ब्रह्मैव पूर्णतां गतत्वेनाऽनुभूयते । विरहे पूर्णता कुतः ? नैव कुतोऽपि । पूर्णस्तु स एव ब्रह्मरूपो रसः । अयमेव खलु पूर्णादपि पूर्णः, अत्यन्तपूर्णः, पूर्णतमः । यतस्तस्मिन्नेव भगवद्भक्तिः रसात्मकेऽप्राकृतरसे परिपूर्णतमस्य प्रियतमस्य ब्रह्मणोऽस्ति निवासः ।

"ब्रह्मणोऽस्ति निवासः" इत्यनेन भगवद्भक्तिरसात्मक, अप्राकृतरसब्रह्मणोश्चाऽऽधाराधेयभावोऽपि नाङ्गीकार्यः, नाप्याशङ्कनीयः । यथा घटाभाववद्भूतलम् सामान्यतो, दृष्ट्या विचार्यमाणे घटाभावस्याऽऽधेयत्वं, भूतलस्य च तदाधारत्वं प्रतिभाति, घटवद्भूतलम्' इतिवत् ।

परन्तु तात्त्विकदृष्ट्या विचार्यमाणे नाऽयं विचारचमत्कारश्चतुरचेतसां चेतसि समीचीनः प्रतीयते, यतो घटाभावभूतलयोरनतिरिक्तत्वात् । घटाभावस्य तत्र भूतलस्वरूपत्वात् । इत्थञ्च विशेषणतायाः प्रत्यासत्तित्वाऽकल्पनप्रयुक्तं लाघवमपि स्यादिति ।

संयोगादिना तत्राऽभावग्रहणसंभवादित्यतोऽधिकरणातिरिक्तो नास्ति कश्चन अभावः। तथाचोक्तम्—

न ते तत्रालिकान्तोऽस्ति तदभावोऽपि किं सखि।
न सोऽस्ति पृथगेणाक्षि कुञ्जमात्रं विलोक्यते॥

मुक्ताविलासिनीटीका, अभावनिरूपणं, ज्वालाप्रसादकृता—

तथैव प्रकृते "तस्मिन्नेव भगवद्भक्तिरसात्मके ऽप्राकृतरसे परिपूर्णतमस्य प्रियतमस्य ब्रह्मणोऽस्ति निवासः" इत्यत्रापि ब्रह्म, अप्राकृतरसयोर्नास्ति कथमपि भेदः, अपि तु सर्वथा ऽभेद एवास्तीति "रसो वै सः" इत्यादिश्रुतीनां प्रामाण्यं सर्वथा संगच्छते।

एवञ्च रसब्रह्मणोरभेदस्य, अथवा रसस्य ब्रह्मरूपतायाः, ब्रह्मणो रसरूपतायाश्च दर्शनशास्त्रप्रतिपाद्यत्वेन सुतरां दर्शनशास्त्रनिरूपिताया उपयोगिताया काव्य, महाकाव्य-निष्ठत्वेन काव्येषु महाकाव्येषु च दर्शनशास्त्रोपयोगिता समीचीनतया स्फुटं निर्वहति।

ब्रह्मणो रसस्वरूपताविवेचनम्

भगवत्याः श्रीसरस्वत्या एव परमानुग्रहेण राजसभायामनादिकालत एव कवीनां गौरवस्य महत्त्वस्य च जायमानत्वेन वेदास्तादृशगुणगणविशिष्टमीश्वरं कविशब्देन व्यवहरन्ति स्म। तत्र वेदमूलकत्वेन गीतां पठन्ति—

'कविं पुराणमनुशाशितारम्' गीता अ०

तत्रापि कालिदासस्य महाकवित्वेन सर्वत्रोल्लिख्यमानत्वेन तदीयवाक्यस्य वेद-वाक्यवत् सर्वथा प्रामाण्यमिति महाकविकालिदासः स्वयं ब्रूते—

'जगद्योनिरयोनिस्त्वम्'

—कु० सं० श्लो० ६

इत्यनेन महाकाव्यकुमारसंभवघटकीभूतेन पद्येन स्वोयकृतिस्वरूपेण पूर्वं चर्चा-विषयीभूतस्य तस्य निर्गुणस्य ब्रह्मणः स्वरूपं दर्शितवान्। इदानीन्तस्यैव सर्वस्वरूपत्वेन रसस्वरूपतामपि दर्शयति—'रसो वै सः' तै० उ० २।७।

अर्थात् स आत्मा = ब्रह्म, रसः = रसस्वरूपः। वै = निश्चयेन। तदेव स्पष्टी-क्रियते।

विदितमेवास्ति प्रेक्षावतां सर्वेषामेव विदुषां यत् काव्य-महाकाव्यघटकीभूतेषु तत्त्वेषु रसस्यापि प्राधान्यदर्शनान् सर्वोऽपि सहृदयसमाजो रसमेव कामयमानः सर्वतो-भावेन च रसाऽऽसत्तये खलु यतमानः प्रवर्तते लोकः दार्शनिकतत्त्वोपयोगिताऽऽलोकाऽ-वलोकः।

यतमाना अपि बहवो लोकास्तत्र साफल्यं नैव लभन्ते। यतः केचन भारतीयमुनि महामुनि, ऋषि-महर्षिप्रणीतानां ग्रन्थानामनध्ययनेन, कतिपये च खलु कुलपरम्पराऽ-नुवर्तमानाचारपरिवर्जनेन, अपरे चाऽऽङ्गलतथाबौद्धप्रभृतीनामज्ञानान्धकारसमाविष्टानां विद्याभासानामभ्यासेन कियन्तश्चाऽऽङ्गलखोष्टभाषाभाषिभिः सह संवादेन तादृशरूपा-वच्छिन्ना = अविच्छिन्नाः सन्तः पुण्यमय्यामस्यां भारतभूमौ जननमात्रेण स्वात्मनि भारतीयत्वमभिमन्यमानाः परानुकृतिमेव सभ्यतां समुन्नतिसाधनञ्च प्रमात्वेन निश्चिन्वा-नास्ते वराका लोकाः रसस्य वास्तविकं स्वरूपमपरिकलयन्तः परकीयशिक्षणमेव

सच्छिक्षणं मन्यन्ते इति तान् प्रति नैव ममैषः रसस्वरूपविवेचनात्मकः समुद्योगः प्रयासो वा।

महोदयाः ! महानेव जटिलोऽयं विषयोऽनेकप्रश्नजन्मभूमिस्तथापि अस्यैकं ब्रह्मस्वरूपरसात्मकमंशं स्वीकृत्यैव प्रेक्षावत्प्रवृत्तिगोचरतया वयमत्र विचारयितुं कामयामहे।

तत्र बहुकालपर्यन्तं श्रीमच्छङ्करमध्व रामानुज वल्लभाचार्यप्रभृतिभिः प्राचीनाऽऽचार्यचरणैः प्रदर्शितमार्गानुयायिनां तादृशमार्गसेविनाञ्चाऽन्तःकरणे रसस्य कीदृशं स्वरूपमिति जिज्ञासा यावत् समुदीयमाना भवति, तावदेव खलु ते श्रोत्रियं ब्रह्मनिष्ठं गुरुमुपसृत्य—

'रसो वै सः'—तैत्तिरीमोपनि० २।७।

'रसो वै मधुः'—श्रुतिः

'सर्वगन्धः सर्वरसः'—छान्दाग्योपनि० ३।१४।२।

'सुखात् सुखम्'—तेजोविन्दूपनि० ६।४५।

'स सारः सर्वसाराणाम्'—अन्नोपनि० ४।७०।

आनन्दं ब्रह्मणो विद्वान्'—

'आनन्दाद्ध्येवेमानि भूतानि जायन्ते'—

इत्येतादृशप्रचुररसभावनाभाविताऽन्तःकरणास्ते भवन्ति। ब्रह्मस्वरूप एव रसस्तत्र सर्वत्र तेषां हृदि परिस्फुरति। यथाऽखण्डब्रह्माकाराकारितान्तःकरणवृत्त्युदये सति 'सर्वं खल्विदं' ब्रह्म' इत्यादिश्रुतिबोधितं ब्रह्मैव सर्वत्र सर्वेषां भासते तथैव प्रकृतेऽपि रसब्रह्मवादिनां नयेऽपि विज्ञेयम्।

तथाचैवंभूतैरेकवाक्यतापन्नैः श्रुतिवाक्यैरात्मभूतस्य चेतनतत्त्वस्य ब्रह्मण एव रसस्वरूपतां निश्चिनोति प्रमिणोति च। तत्रापि चाऽऽत्मपदेन ब्रह्मपरमात्माद्यपरपर्यायो भगवानेव निश्चीयते, परिलक्ष्यते च स्वरूप-तटस्थलक्षणाभ्यां स एव नित्यनिरतिशयसच्चिदानन्द आत्मा रस इति तस्यैव सर्वथा रसत्वं वक्तुं युक्तम्।

एवञ्च तस्यैवाऽऽत्मभूतस्य ब्रह्मणः सच्चिदानन्दरूपस्य रसस्वरूपता, मधुरूपता, समस्तरसानां रसरूपता, सकलमाधुर्याणां माधुर्यरूपता, किमधिकं वयं ब्रूमहे सर्वसाराणां साररूपता अर्थात्तत्त्वरूपताप्यस्यैव रसस्वरूपस्य आत्मभूतस्य ब्रह्मण एव वक्तुं युज्यते इति रसदार्शनिकानां राद्धान्तः।

यद्यपि उपक्रमोपसंहारादिभिस्तात्पर्यविषयतया चाऽऽत्मपदेन ब्रह्म-परमात्मादिवाच्यतां गतो भगवानेव गृह्यते। तथापि 'ममैवांशो जीवलोके' 'यथाऽग्नेर्विस्फुलिङ्गाः' 'अंशो नानात्वव्यपदेशात्' इत्यादिस्मृतिश्रुतिब्रह्मसूत्रस्वरूपैः प्रमाणैर्जीवानामपि भगवदंशतया सच्चिदानन्दात्मस्वरूपत्वं रसरूपत्वञ्च वक्तुं शक्यते, यतो जीवस्यापि तत्त्वदृशा सच्चिदानन्दात्मत्वं सुस्पष्टमेव 'जीवो ब्रह्मैव नापरः' इत्यादिना श्रुतिवाक्येन।

परन्तु एतावांस्तु विशेषः—यथा सिन्धुघटकीभूतजलबिन्दोः सागरात् पृथक्त्वेऽपि तात्त्विकदृष्ट्या सिन्धोरभिन्नोऽपि सन् तादृशजलबिन्दुर्यथा सिन्धोः पोतधारणादिकार्यसंपादने सर्वथाऽक्षम, भवति, तथैव जीवोऽपि परमेश्वरतः पृथग्भूतो वस्तुतस्तदभिन्नोऽपि परमेश्वर इव समस्तसंसाराल्हादनकार्यसम्पादने सामर्थ्यसम्पन्नो न भवति।

अत एव जीवो रसस्वरूपोऽपि सन् व्यावहारिकदृष्ट्या रसस्यैककणात्मक एवाऽनुभूयते । अर्थात् सिन्धोर्बिन्दुरिव तदीयकणकल्पो जीवः संसाररचनादिकार्यापादनसामर्थ्यसम्पन्नो नहि भवितुमर्हतीति भेदः सुस्पष्ट एवेति । अत एवाऽयं जीवस्तदीयतटस्थशक्तिमापन्नत्वेन शास्त्रीयव्यवहारयोग्यतां बिभर्ति ।

अत एव सच्चिदानन्दस्वरूपलक्षणलक्षितस्य भगवतः परमेश्वरस्य स्वरूप-तटस्थ बहिरङ्गभेदावच्छिन्नाः सन्ति खलु वैष्णवशास्त्रेषु प्रमितास्तिस्रः शक्तयः ।

तत्र च स्वरूपाख्याया अपि शक्तेः सन्ति संधिनी-संविद्—ह्लादिनीनामानस्त्रयो भेदाः किलाऽनुभवगोचरतां गता इति । तथा च वस्तुतो भगवत्स्वरूपसजातीयः सर्वथा परमेश्वरविजातीयबहिरङ्गशक्तितोऽपि भिन्नो जीवस्तटस्थशक्त्यात्मकत्वेन गीयते ।

परमेश्वरस्य पूर्णकृपादृष्टिमन्तरा पूर्णरसात्मकतत्स्वरूपानन्दविषयकानुभवस्य सर्वथाऽसंभवात् सांसारिकाणां सर्वेषामेव जीवानां शुद्धरसास्वादो नैव भवितुमर्हतीत्यनुभूय रसाऽऽस्वादनविरहातुरा जीवाः स्वयमवस्थातुमेव न प्रभवन्ति, अतस्तेषां जीवानां वास्तविकीं परिस्थितिं विचार्य रसप्राप्तये आचार्यभरतमुनिना तेषामेव जीवानामुपकारं कर्तुमिच्छता नाट्यशास्त्रं न्यबन्धि । एवं चोक्तस्वरूपो जीवो रसपदाभिधेयतां न गन्तुं प्रभवतीति नहि कालत्रयेऽपि शङ्कनीयम् ।

एवञ्च "असत्ये वर्त्मनि स्थित्वा ततः सत्यं समीहते" इति न्यायेन जीवानां यानि सन्ति दुष्करप्रवृत्त्यास्पदीभूतानि श्रवण-मननादि साधनानि तानि सर्वथाऽव्यापारीकृत्य, सकलानर्थकारणीभूताऽनादिकालीनाऽऽज्ञानग्रन्थिमनुन्मूल्य श्रोत्रियब्रह्मनिष्ठसद्गुरुसम्पत्तिमसम्पाद्यैव चिरसंचितकर्मकलापमदग्ध्वैव जनैर्यथा येन यथा प्रकारेण वा रसास्वादस्तभिव्यक्तिर्वा जायेत, अन्ते च भगवदीयसम्मुखीनतासम्पत्तिपूर्वकं रसस्य समीचीना शुद्धिरपि सुकरा सुलभा च भवेत्, स एव पन्थाः प्रकारो वाऽयम् आचार्यभरतेन दिव्यज्ञानमन्दरेण निगमपयोधीन् सम्यक् प्रमथ्य नाट्याम्नायात्मकः प्राकाश्यं नीतः ।

प्राकृताऽप्राकृतरसविचारः

जानन्त्येव तत्र भवन्तो भवन्तः यत् नरदेहावच्छिन्नजीवात्मनां भवति अधिकांशतो रसास्वादनप्रेमास्पदत्वम् । जात्यन्तरावच्छिन्नेष्वपि अश्वादिषु विलोक्यते इदत्वावच्छिन्ना व्यवस्था ।

तत्र सामान्यतो रसो द्विविधः, प्राकृतोऽप्राकृतश्च । अर्थात् एकः प्राकृतरसः, अपरश्चाऽप्राकृतरस इति ।

तत्र सांसारिका जीवाः प्राकृतमेव रसं रसत्वेनाऽनुभवन्तस्तमेव च केवलं रसं मन्यमाना नवनवकौतूहलावलोकनकुतूहलित्वं रसजन्यं स्वात्मनि सम्पादयन्तस्तत्रैव स्वोन्नतिपदवाच्यताञ्च परिसमापयन्तोऽनारतमनिशं फलेग्रहियत्नाश्च विशेषतोऽधिकांशतश्च जायमाना भवन्ति, दृष्टिगोचरताञ्च गच्छन्ति ।

अतः सांसारिकाणां जीवानां स एव प्राकृतरसपरिचयो यथास्ति सुसाध्यत्वात् सुगमो न तथाऽप्राकृतो रसोऽप्यस्ति सुकरस्तस्य दुःसाध्यत्वेनाऽगम्यत्वात् ।

अत एव जागतिकानामधिकारेण प्रवृत्तं प्राकृतरसाभिव्यक्तिकारणीभूतं खलु नाट्यशास्त्रमन्ततो गत्वा भगवत्स्वरूपपरिचयप्रदानकर्तृत्वेनाऽऽत्मदर्शनसाधकम् । अत

एवेदं नाट्यशास्त्रमपि दर्शनशास्त्रमध्ये परिगणितं भवति, यतो विशेषतोऽर्थगाम्भीर्यविचारदिशा प्राग्दर्शितदिशा चेदमपि प्रवृत्तं नाट्यशास्त्रं दर्शनशास्त्रमेवेति नान्यत्तदिति नाट्यशास्त्रस्य दर्शनमध्ये प्रतीयमानं परिगणनं युक्तियुक्तमेवेति विभाव्यताम् ।

यद्यपि भरतमुनिपादैः प्राकृतस्यैवाऽस्य रसस्य प्रबन्धो निबन्धेनाऽन्वबन्धि नापरस्य । यतः प्राकृतरसेतररसानामेतद्रसापेक्षयाऽगण्यकोटिनिक्षिप्तत्वेन तुच्छत्वात् । अस्य च प्राकृतरसस्य लौकिकत्वमपि नाऽऽशङ्कनीयं यतोऽस्य प्राकृतरसस्य प्रधानत्वेनाऽध्यात्मविद्याप्रतिपादकत्वेनाऽलौकिकत्वमेव प्रमीयताम् । लौकिकरसस्य तदभावान्न तथात्वमिति ।

तथाप्येतावता प्रबन्धेनेत्यपि मा व्यज्ञायि यत् अप्राकृतरसो नास्त्येव अर्थात् अप्राकृतरसस्य सर्वथा अत्यन्ताभाव एव वर्तते इति । आहोस्वित्तत्कर्तॄणां भरतमुनिप्रभृतीनां नाट्यशास्त्रस्याऽऽचार्यभूतानां कृतेऽप्राकृतोरसो नानुमत इत्यपि न वक्तुं शक्यते । कथमन्यथा तैर्महर्षिपादैः स्वदर्शनस्यास्य नाट्यशास्त्रस्य धर्मं, अर्थं काम, मोक्षेत्याख्यस्य चतुर्वर्गात्मकस्य पुरुषार्थस्य समवाप्तिसाधनत्वं साधनतावच्छेदकत्वं वा पौनः पुन्येनाऽसकृत् समुद्घोषितम् ।

कथञ्चास्योपक्रमे एव प्रागुक्तचतुर्वर्गसमवाप्तिप्रयोजकत्वं प्रति श्रुतिरपि साफल्यमेष्यतीति । पुनश्च कुतो जीवस्वरूपघटकीभूतस्याऽऽनन्दस्यापि रसस्वरूपता संगच्छेत, कथं वा व्यस्तप्रदूषणाशङ्का भगवती श्रुतिरपि उपक्रमोपसंहारादिक्रमेण स्वेच्छाविषयीभूतं स्वेष्टं वा समवाप्तुं प्रभविष्यतीति सर्वं विचारणीयमस्ति ।

इदमत्रावधेयम्—ये सन्ति रसशास्त्रस्याऽऽआचार्या भरतादयस्ते देवादिविषयां रतिं, अथ च व्यञ्जनाद्वाराप्रकाशितं व्यभिचारिपदाभिधेयञ्च निर्वेदादिस्वरूपं भावं कथितवन्तः । 'रति' आदिषु नास्ति रसत्वमिति रसकोविदा भरतादिमुनयः स्वयं समुद्घोषितवन्तः । तथा चोक्तम्—

रतिर्देवादिविषया व्यभिचारी तथोर्जितः ।
भावः प्रोक्तो रसो नेति यदुक्तं रसकोविदैः ॥

भक्तिरसायने, २ उल्लासः, श्लो० ७४

अपि च— देवान्तरेषु जीवत्वात् परानन्दाप्रकाशनात् ।
तद्योज्यं परमानन्दरूपे न परमात्मनि ॥

इत्यपि तत्रैव श्लो० ७५

रसज्ञाऽऽचार्यपादैर्भरतमुनिप्रभृतिभिर्यदुक्तं 'रति' आदिषु नास्ति रसत्वम् अपि तु भावत्वमेवाऽस्ति इति तेषां यदिदं कथनं वर्तते तत् कथनं जीवस्वरूपत्वात् पूर्णाऽऽनन्दाऽप्रकाशकत्वाच्च देवान्तरेष्वेव खलु संगच्छते तत् कथनं परमानन्दस्वरूपे परमात्मनि नहि योजनीयम् ।

अत एवाऽस्मिन् विषये "भक्तेः रसत्वम्" कथमित्यपि शंका जायते, यतः सा भक्तिरपि पूर्णकलासम्पन्नं सच्चिदानन्दमानन्दकन्दं नन्दकपाणिं नन्दनन्दनं भगवन्तं श्रीकृष्णचन्द्रं विषयीकुर्वाणा रतिरेवास्तीति ?

तत्रेदमेव समाहितवन्तोऽस्माकं प्राचीनाचार्यचरणाः यद् देवान्तरेषु सा रतिर्भाव-भूता भवति, यतस्ते देवान्तरपदाभिधेया देवा अविद्याकार्यस्वरूपत्वान्मलिनसत्त्वप्रधान-भूतजीवस्वरूपाः सन्तः पूर्णानन्दप्रकाशका नहि भवितुमर्हन्ति, किन्तु भगवान् कृष्णस्तु स्वयं सच्चिदानन्दस्वरूपलक्षणलक्षितः परमानन्दस्वरूपः साक्षादस्ति परमपिता परमेश्वरः स्वप्रकाशचिदात्मा परमात्मा परमपिता परमेश्वरः स्वप्रकाशरूपत्वे सति प्रकाशकश्चेति तत्राऽयं प्रागुक्तः "रति" आदिषु नास्ति रसत्वम् अपि तु भावत्वमेव "इत्येवंरूपो नियमो नैव संगच्छते नापि शोभते। उक्तञ्च—

अन्ये चांशकलाः पुंसः कृष्णस्तु भगवान् स्वयम्।

तत्रैव टीकायां द्रष्टव्यम्—

अपि च भागवतेऽपि—

वदन्ति तत्तत्त्वविदस्तत्त्वं यज्ज्ञानमद्वयम्।
ब्रह्मेति परमात्मेति भगवानिति शब्दयते॥

भाग० प्र० स्क०

तथा चैतेनेदमेवाऽऽयातं यत् सामान्यरत्यपेक्षया भगवद्विषयिणी रतिरस्त्येका विलक्षणैव रतिः सर्वातिशायिनी सा च न भावभूताऽपि तु रसस्वरूपा सेति वक्तव्यम्। सा च भगवद्रतिः परिपूर्णरसा खद्योतेभ्य आदित्यप्रभेव सर्वथाऽस्ति बलवत्तरेति च विज्ञेयम्। उक्तञ्च—

कान्तादिविषया वा ये रसाद्यास्तत्र नेदृशम्।
रसत्वं पुष्यते पूर्णसुखास्पर्शित्वकारणात्॥ ७६॥
परिपूर्णरसा क्षुद्ररसेभ्यो भगवद्रतिः।
खद्योत इवादित्यप्रभेव बलवत्तरा॥ ७७॥

तत्रैव भगवद्भक्तिरसायने, २ उल्लासः,

यद्यपि रसप्रतिपादनपरा आगमाः परमानन्दस्वरूपस्याऽऽत्मन एव रसत्वं व्याहृतवन्तः। अर्थात् परमानन्दस्वरूप आत्मैव रस इति। "रसोवै स रसं ह्येवाऽयं लब्ध्वाऽऽनन्दीभवति"

तैत्तिरीयोपनिषत्—

इत्यादय आगमाः "रस एव आत्मा" "आत्मैव वा रसः" इत्यादिकं बहुधा निरूपयन्ति, भरतमुनिप्रणीतञ्च सूत्रं लौकिकरसप्रतिपादकत्वेन समुपस्थापयन्ति।

तथापि तेनापि सूत्रेण परमात्मन एव रसस्वरूपता प्रतिपादिता भवति। स च परमात्मरूपतां ब्रह्मरूपतां वा गतो रसो लौकिको भवतु, अलौकिको वेति, प्राकृतो भवेत् अप्राकृतो वेति स नाऽस्माभिरत्र विशेषतो विचार्यते, लेखविस्तरभयात् ग्रन्थ-गौरवाच्चेति।

प्राकृतरसस्वरूपविचारः

किन्तु पुनरपि किञ्चिद् दिग्दर्शनमात्रं विधीयते।

तत्र प्राकृतो रसः खलु द्रौपदी, दमयन्ती, शकुन्तला प्रभृतिविषयकरति–शोकादि-स्थायिभावानां परिपुष्टिस्वरूपत्वे सति शृङ्गारहास्यकरुणरौद्रादिरूपः प्रागुक्तोऽष्टविधः।

अस्मिश्च खलु प्राकृतरसे विषयावच्छिन्नस्यैव चिदानन्दांशस्य स्फुरणं भवतीत्यत्राऽऽनन्दस्य तादृशमत्यन्ताधिक्यं नास्ति यादृशमानन्दाधिक्यं विषयानवच्छिन्नचिदानन्दसन्दोहस्य भगवतः परमेश्वरस्य स्फुरणात् अप्राकृतरसे समनुभूयतेऽतः प्राकृतरसेऽप्राकृतरसापेक्षया-ऽवश्यमानन्दांशे काचिन्न्यूनता वर्तते इति रसानन्दविदो वदन्ति, विदन्ति च स्वानुभूते-र्दर्शनात्तथा स्वानुभवमपि प्रमाणयन्ति च—

स्थायिभावगिराऽसौ वस्त्वाकारोऽभिधीयते।
व्यक्तश्च रसतामेति परानन्दतया पुनः॥ ९॥

भगवद्भक्तिरसायने प्रथमोल्लासः—

अपि च—कान्तादिविषयेऽप्यस्ति कारणं सुखचिद्घनम्।
कार्याकारतयाऽभानेऽप्यावृतं मायया स्वतः॥ ११॥

तत्रैव दृष्टव्यम्—

तथा विभावानुभावव्यभिचारिसंयोगेनाऽभिव्यक्तिमापन्नः स्थायिभाव एव सभ्याभिनेययोर्भेदनिराकरणपरायणः सन् परमानन्दसाक्षात्काररूपेण रसतां प्राप्नोतीति रसविदां स्वानुभवः। तत्र रत्यादयो हि भावाः प्रथममेकैकशः प्रतीतिविषयीभूता भवन्तः सर्वेऽप्येकीभूताः स्फुरन्तः एव रसतामापद्यन्ते। उक्तञ्च—

विभावा अनुभावाश्च सात्त्विका व्यभिचारिणः।
प्रतीयमानाः प्रथमं खण्डशो यान्त्यखण्डताम्॥

सा० द० तृ० परि० लक्ष्मीटीका, पृ० ९४

अर्थात् विभावाः, अनुभावाः, सात्त्विका, व्यभिचारिणश्च भावा प्रतिस्विकरूपेण प्रतीयमानाः सन्तो व्यञ्जनावृत्तिजन्यैकज्ञानविषयत्वेन खल्वेकात्मतां लभन्ते इत्यर्थः।

अस्य रसस्य वेदान्तादिदर्शनेषु यथा "चिदान्दोऽयं पुरुषः" इत्यनेन चिदानन्द-योरेकब्रह्मस्वरूपत्वमुपपादितं भवति तथा नाट्यदर्शनादिप्रारम्भकाले विभावादिप्रभेदेन सखण्डत्वप्रतीतावपि क्रमशो रसोऽपि तात्त्विकदृष्ट्या व्यञ्जनावृत्तिजन्यैकज्ञानकालेऽखण्ड-रूपतां याति, इत्थञ्च चिदानन्दचमत्काराणामेकरूपतापि सूपपद्यते। अत्र संगृहीतकारिका अप्युल्लिख्यन्ते—

विभावत्वानुभावत्वसञ्चारित्वाद्युपागतैः। उपनायकमाहात्म्यात्कारणत्वादिवर्जितैः॥
केवलं स्थाय्यभिव्यक्तौ हेतुत्वेनैव सम्मतैः। वासनावशतः सत्त्वसमुद्रेकान्निराविले॥
वासनात्मतया पूर्वं सामाजिकहृदि स्थितः। साधारणतया भातैः कारणादिभिरेव यः॥
रत्यादिर्व्यज्यते स्थायी रसः सोऽस्मन्मते मतः। वासनोद्बोधकं चात्र काव्यनाट्यानुभावनम्।
सोऽयं रसः स्वप्रकाशसुखात्मकधिया यया। गृह्यते चर्वणा सैव कार्या सैव च सम्मता॥
विभावा अनुभावाश्च संचारिस्थायिनौ तथा। गुणप्रधानभावेन चर्व्यमाणा रसात्मताम्॥
यान्ति पानकवत्तेन प्रमाणमिह सा मता। विरुद्धरूपसंभेदादैकरूप्यं परानुदत्॥
अलौकिकः परब्रह्मसंवेदनसहोदरः। रसाऽयमिह संवित्तेरन्यन्मानमपार्थकम्॥
वस्तुतस्तु न ख्यादि रसत्वं कारणादि च। विभावत्वादितामेति किन्तु तन्मयभावतः॥
सामाजिकानां जायन्ते ये यदाकारसुन्दराः। चित्तवृत्तिविशेषास्ते विभावत्वाद्यलौकिकम्॥

रूपं भजन्ते तदनु सकलाकारसुन्दराः । एका विलक्षणा चित्तवृत्तिर्या जायते सताम् ।।
रसानात्मा रसः सैव शङ्काशूकनिवारिता । इति ब्रूमो वयन्त्वत्र तदिदं मत्सरं विना ।।
विचारणीयं रसिकैरिति सर्वं समञ्जसम् ।।"

तत्रैव लक्ष्मीटीकायां द्रष्टव्यम्—पृ० ९५

कैश्चित् खलु रसशास्त्रविद्भिः विद्वद्भिः प्राकृताऽप्राकृतौ रसौ क्रमेण लौकिकाऽलौकिकौ व्यपदिश्येते । तन्न समीचीनम्—यतो द्वयोरपि रसयोः प्राकृताऽप्राकृतयोरलौकित्वात्, इत्यतो नाऽयं लौकिको रसोऽध्यात्मविद्यानां प्रतिपाद्यो भवितुं कदापि प्रभवति ।

अपि च—

"रसान्तराण्येकरसं यथा दिव्यं पयोऽश्नुते ।
देशे देशे गुणेष्वेवमवस्थास्त्वमविक्रियः ।।

अत्र "अविक्रिय" इत्यनेन निर्विकारं, निराकारं, निर्गुणं, निष्कलं ब्रह्म परिलक्ष्यते ।

शान्तरसस्य ब्रह्मरूपताविचारः

"शान्तोऽपि नवमो रसः" इत्यादिना शान्तोऽपि नवमो रसः केषाञ्चिद् विदुषां नित्यनिरन्तरनिर्विकल्पकसमाधिनिष्ठानां क्रियान्तराभावेनाऽनवकाशशालिनां स्वयमनुभवकर्तॄणां साहित्यशास्त्रवेतॄणां नयेऽङ्गीकृतोऽस्तीत्यत्र नास्ति कोऽपि विवादः ।

अभिनवगुप्ताचार्येणाऽप्यस्य शान्तरसस्य युक्तियुक्तेन सद्विचारेण प्रमाणपूर्वकं संस्थापनं व्यधायीत्यत्र नास्ति लेशमात्रमपि विवादः ।

काव्यप्रकाशकृता खलु सर्वतः प्रागष्टौ भावान् समुल्लिख्य तदनन्तरं निर्वेदप्रधानो नवमो रसः शान्तरसः स्वीकृतः । तथाचोक्तम्—

"निर्वेदः स्थायिभावाख्यः शान्तोऽपि नवमो रसः" काव्यप्र० ४।३१ ।

आनन्दवर्धनानुसारेणापि महाभारतस्य मूलरसः शान्त एव रसो वर्णितो महाभारते । तत्र नास्ति केषामपि विदुषां वैमत्यम् । उक्तञ्च—

"शममपि केचित् प्राहु रसम्" दशरूपकम् ४।३५ ।

इत्यादिना शान्तरसस्याऽस्तित्वं सुस्पष्टमेव प्रतीयमानं प्रतिभाति ।

साहित्यदर्पणकारेण श्रीविश्वनाथेनाप्युक्तम्
"शमो निरीहावस्थायां स्वात्मविश्रामजं सुखम्"

सा० द० तृ० परिच्छेद :—

इत्यनया रसप्रतिपादनपद्धत्या शमात्मको नवमो रसः स्वीकृतोऽस्ति ।

मुनिवर श्रीभरतेन नाऽङ्गीकृतोऽयं रसः । शान्तरसस्य सर्वकार्यविरामरूपत्वेन नाटके प्रयोजनाभावान्न स भरतेन स्वीकृतः । अयमस्त्याशयः श्रीभरतमुनेः यद् बहोः कालात् अर्थात् अनादिकालात् समागतानां कर्मनिबन्धनरागद्वेषादीनां खल्वैकान्तिकाऽऽत्यन्तिकरूपेण विनाशाऽसम्भवात् कथं शान्तरसः सत्तावान् भवितुं प्रभवतीत्यतस्तदभाव एव सर्वथाऽङ्गीकार्य इति ।

तथा च प्रकृते काव्येषु महाकाव्येषु च रसस्य परिगणितेषु परिगण्यमानेषु च तत्त्वेषु सर्वतोभावेन प्राधान्यदर्शनात्तस्यैव च रसस्य चाऽस्माकं दर्शनेषु ब्रह्मरूपताप्रतिपादनाद् ब्रह्मणो रसस्वरूपता निश्चीयते प्रमीयते च । तथाहि—

"रसो वै सः"—तैत्तिरीयोप० २।७ ।

"रसो वै मधुः"—श्रुतिः—

"सर्वगन्धः सर्वरसः"—छान्दोग्योप० ३।१४।२।

"सुखात् सुखम्"—तेजोबिन्दूपनि ६।४५।

स सारः सर्वसाराणाम्,—अन्नोपनि० ४।७०।

इत्यादिरूपेणाऽन्योन्यमेकवाक्यतापन्नैः श्रुतिवाक्यैरात्मभूतस्य चेतनतत्त्वस्य ब्रह्मण एव रसस्वरूपता सिद्धयति ।

एवं तस्यैव च चेतनतत्त्वस्य ब्रह्मणो मधुरूपता समस्तरसानां रसरूपता, सकलमाधुर्याणां माधुर्यरूपता । किमधिकं वयं ब्रूमहे—सर्वसाराणामपि साररूपता, अर्थात्तत्त्वरूपताप्यस्यैव रसस्वरूपस्य आत्मभूतस्य ब्रह्मण एव सिद्धयतीति बोध्यम् ।

स च रसस्वरूपतां गतो ब्रह्मस्वरूपश्चेतनतत्त्व आत्मा "रसो वै सः" इत्यादिप्रागुक्तश्रुत्यनुसारं सुखस्वरूपेण नित्यमभिव्यक्तो भवतीत्यतस्तस्यैव स्वयं प्रकाशस्य रसस्य निर्विकल्पात्मिकाऽऽनन्दस्वरूपा प्रतीतिर्जायते उक्तञ्च—

"नित्यं सुखमभिव्यक्तं रसो वै स इति श्रुतेः—
प्रतीतिः स्वप्रकाशस्य निर्विकल्पसुखात्मिका ॥२२॥
वृत्तिः कार्याऽपरोक्षास्य शब्दस्य सुखगर्भिणी ।
दशमस्त्वमसीत्यादिवाक्योत्थमतिवृत्तिवत् ॥२३॥

—भक्तिरसायने तृयीयोल्लासः

इत्थञ्च यथा "दशमस्त्वमसि" इत्यादिशब्दसमूहात्मक-वाक्यजन्यबुद्धिविषयीभूतो दशमः कतिपयकालोत्तरकालावच्छेदेन जायते, तथैव शब्दस्यापि सुखगर्भिणी अपरोक्षा वृत्तिर्जायते, यस्याञ्च वृत्तौ खलु रसात्मकं ब्रह्माऽभिव्यज्यते इति तु परमार्थः ।

अयमेव च रसस्वरूपः स्वयं प्रकाशोऽविकल्प आनन्दलक्षणलक्षितो ब्रह्मभूत आत्माऽखण्डतां याति । उक्तञ्च—

'परमार्थतस्तु अखण्ड एवाऽयं वेदान्तप्रसिद्धब्रह्मतत्त्ववद् वेदितव्यः'

सा० द० तृ० प० लक्ष्मीटीकायां पृष्ठ ९५

यद्यपि रसानां महत्त्वं स्वरूपञ्च बहुविधं समुपवर्णितं समुपलभ्यते इति सर्वेऽपि रसवेत्तारो विदन्ति वर्णयन्ति च । तथाहि—

शृङ्गारहास्यकरुणरौद्रवीरभयानकाः ।
बीभत्सोऽद्भुत इत्यष्टौ रसाः शान्तस्तथा मतः ॥

सा० द० तृ० प० श्लोक १८२

अपि च तत्र पूर्वमुक्तम् "अष्टौ नाट्ये रसाः स्मृताः"

तत्रैव सा० द० तृ० प०

इत्युपक्रम्य "शान्तोऽपि नवमो रसः" इत्यपि तत्रैव प्रोट्टङ्कितवान् । मुनिनापि स्वयमेवोक्तम्—

शृङ्गारहास्यकरुणरौद्रवीरभयानकाः ।
बीभत्साद्भुतशान्ताश्च काव्ये नव रसाः स्मृताः ॥

तत्रैव टीकायां द्रष्टव्यम्—

तत्रापि गोस्वामिपादाः षोडशप्रकारा रसाः सन्तीति वदन्ति, दशप्रकाराश्च रसा भरतरभसौ, तथा नवप्रकारा रसा रत्नकोषादयः, चत्वारश्चाऽभियुक्ता इति प्रतिपादयन्ति । किन्तूक्तदिशा भरतमुनेरतिप्राचीनतया महाप्रामाणिकत्वाच्च तत्सम्मतः शान्तो रसः, वत्सलश्चापि रसतया कथञ्चिदङ्गीक्रियते, न पुनः कथमपि गोस्वामिपादानामित्यभिप्रायः कारिकया सुस्पष्टं सूचितः । तथाहि—

स्फुटं चमत्कारितया वत्सलं च रसं विदुः ।
स्थायी वत्सलतास्नेहः पुत्राद्यालम्बनं मतम् ॥

सा० द० तृ० प० श्लो० २५१, पृ० २२३—

अपि च— रसः सःशान्तः कथितो मुनीन्द्रैः ।
सर्वेषु भावेषु समप्रमाणः ॥

तत्रैव पृ० २२०, लक्ष्मीटीका—

एतेन शान्तरस, वत्सलरसयोरस्तित्वे श्रीभरतमुनिसम्मतं कथञ्चित्त्वं दर्शितम् । तत्र मुनीन्द्रकथनेनैव गोस्वामिपादानां व्यावृत्तिर्विधीयते नेतरस्य ।

तथापि प्रकृते 'शान्तो रसः' समादरणीयतां धत्ते । शान्तरसावच्छिन्नो हि जीवः नित्यनिरन्तरश्रवणमननादिसंस्कारैः सुसंस्कृतः सन् नित्य-शुद्ध-बुद्ध-मुक्तस्वस्वरूपताञ्चापन्नः सर्वतोभावेन संसाराऽऽसक्तिमत्त्वं विहाय ब्रह्मरूपतां प्राप्नोति । शान्तरसतां शान्तं वा रसं स्वात्मनि समनुभवन्नयं खलु जीवः स्वयं शमप्रधानशान्तरसस्वरूपोऽयं भवतीत्यत्र नास्ति लेशतोऽपि विचारचर्चावकाशः । शान्तरसस्यदंस्वरूपं वर्णितवान् खलु साहित्यदर्पणे श्रीविश्वनाथकविराजः—

न यत्र दुःखं न सुखं न चिन्ता-
न रागद्वेषौ न च काचिदिच्छा ।
रसः सः शान्तः कथितो मुनीन्द्रैः
सर्वेषु भावेषु समप्रमाणैः ॥

—सा० द० तृ० प० श्लो० २४९

अर्थात् यत्र रसे स्थायिभावाश्रयस्य शमिनो न दुःखं यतस्तस्य दुःखस्याऽऽत्मनः प्रतिकूलतया वेदनीयत्वात् । न सुखं तस्याऽप्यात्मनोऽनुकूलतया वेदनीयत्वात् ! नापि च चिन्तैव तत्र प्रसरति, तदानीं चिन्ताया अपि कारणसामग्र्यभावात् । नापि च रागद्वेषयोस्तत्र कदाचित् कुतश्चित् कथञ्चित् संभवोऽस्ति शान्तिरसावच्छिन्ने तादृशरसस्वरूपे वाऽऽत्मनि चेतनतत्त्वे । न च वैषयिकसुखविषयिणीच्छा तदुपायेच्छा वा तत्र भवितुमर्हति, तस्य शान्तरसस्येच्छामात्रविरोधित्वेन तादृशसुखविषयिणीच्छायास्तदुपाये-

च्छायाश्चापि विरोधित्वादेव अनुदयादिति भावः। सर्वथा निरीहत्वात्, तृष्णाक्षया त्वाच्छिन्नत्वात्, ब्रह्मरूपत्वाच्च।

अपि च—यद्वै=यदेव तत्प्रकृतं ब्रह्म, सुकृतं=सुष्ठु कर्तृ, स एव ब्रह्मरसः। मधुरादिरसवत् सुखहेतुत्वाद् ब्रह्मानन्दोऽपि गौण्या वृत्त्या रसपदेनोच्यते सः।

"रसो वै रसः"—तैत्तिरीयोप०

तस्यैव रसस्वरूपस्य ब्रह्मणः सुखहेतुत्वमपि सप्तमोऽनुवाकः, मं० २—ब्रूते—

"रस ँ॰ ह्येवायं लब्ध्वाऽऽनन्दीभवति"

तत्रैव द्रष्टव्यम्—

अर्थात् हि=यस्मात्, अयं=लोकः, रसं लब्ध्वा सत्त्वगुणप्रधानाऽन्तःकरणेऽभिव्यक्तं ब्रह्मानन्दं प्राप्य आनन्दीभवति, अत एव खलु विद्वांसो जना निरुपाधिकेन ब्रह्मानन्देन सानन्दा भवन्ति। सोपाधिकेन चेतरे जनाः सानन्दाः जायन्ते, तथा च ब्रह्मण आनन्दकरत्वात् आनन्दस्वरूपत्वाद्वाऽऽनन्दरूपं ब्रह्मास्तीति भावः।

"नित्यं विज्ञानमानन्दं ब्रह्म" छां० उ०

इत्यादिश्रुतिश्च तस्यैव रसस्वरूपस्य ब्रह्मण आनन्दरूपतामपि प्रमाणयति। अयञ्च खलु रसस्वरूपतामापन्नश्चेतनतत्त्व आत्मा नित्यतृप्तिमापन्नो निराश्रयः सन् स्वयं सर्वेषामाधारभूतः पुण्येन पापेन तदितरेण च कर्मणा न कथमपि लिप्यते। नापि च कदाचित् कथञ्चित् रञ्जनमायाति। तथाचोक्तम्—

सर्वकर्मपरित्यागी नित्यतृप्तो निराश्रयः।
न पुण्येन न पापेन नेतरेण च लिप्यते॥
स्फटिकः प्रतिबिम्बेन यथा नायाति रञ्जनम्।
तज्ज्ञः कर्मफलेनान्तस्तथा नायाति रञ्जनम्॥

अन्नोपनि० ५।९७-९८।

तस्मिंश्च रसे स्थायिभावाश्रयस्य शमिनो न "रागद्वेषौ" अपि वर्तेते। अत एव रागद्वेषादिदोषैर्निःशेषविषवियुक्तः स विशुद्धात्मा चेतनतत्त्वः स्वप्रकाशचिदात्मतां भजते—

अयमेव चाऽऽनन्दजनकत्वेन मधुरादिसादृश्यावच्छिन्नो ब्रह्मरूपो रसः कदापि कथमपि ज्ञानाऽज्ञानाभ्यां कालेनाऽन्येन वा न क्षरति=न नश्यतीत्यक्षरमुच्यते। आहोस्वित् अव्याकृतं तत्कार्यञ्च सर्वं बहिरन्तश्चाऽग्निरयःपिण्डमिवाऽश्नुते=व्याप्नोतीत्यक्षरं सत्यज्ञानादिस्वरूपलक्षणकं परं ब्रह्म तदेव लक्ष्यते। "एतद्वै तदक्षरं गार्गि" इति श्रुतेः।

तथा चाऽनयापि श्रुत्या परस्य रसस्वरूपस्य ब्रह्मण एवाऽक्षरत्वं श्रूयते। अस्यैव च रसस्वरूपस्य ब्रह्मणो नित्यत्व, निर्गुणत्व, निर्विकारत्व, निरवयवत्व, निःसङ्गत्व, नित्यशुद्धबुद्धत्व, निष्क्रियत्व, निरतिशयत्व, सर्वव्यापकत्व, सर्वप्रकाशकत्व, सद्घनत्व, चिद्घनत्व, आनन्दघनत्व, अतिसूक्ष्मत्व, सर्वाधारत्वादिधर्मैः सर्वोत्तमत्वं, सर्वोत्तमत्वापादकत्वञ्च व्यपदिश्यते।

यथा घटादिषु विद्यमान आकाशो महाकाशस्वरूप एवेति न ततो व्यतिरिक्तोऽस्ति। तथैव ब्रह्मादिस्तम्बान्तेषु शरीरेष्वप्यहमर्थत्वेन भासमानं चैतन्यं रसचैतन्यपदाभिधेयं ब्रह्मचैतन्यमेव।

अत एव "तत्त्वमसि" इत्यादिमहावाक्यानां तयोर्जीवब्रह्मणोरेकत्वप्रतिपादने प्रवृत्तिरपि भवति। यतो जीवः सर्वात्मना परं ब्रह्म ध्यायन् ब्रह्मरूपतामपन्नो ब्रह्मैव भवति। "ब्रह्मवेद ब्रह्मैव भवति" इति श्रुत्याप्ययमेवार्थो निर्धार्यते। ततश्च ब्रह्मवित् साधको जीवः सर्वदा ब्रह्मानुसन्धानमेव विदधानः स्वं ब्रह्मैव भावयन् ब्रह्मैव भवतीति रसब्रह्मवादिनां भवति हार्दिको भावः।

अत्रालङ्कारिकाःखल्वित्थं वदन्ति यन्मनोवृत्तिकेवलसत्त्वस्य नाट्य-काव्यदर्शन-श्रवणवशेनाऽऽविर्भावात् सजातीय-विजातीय स्वगतभेदत्रयशून्योऽखण्डः, विभावादिसमूहालम्बनात्मत्वादेक एव स्वप्रकाशः स्वेन = आत्मना प्रकाशमानो रसोऽभिव्यज्यते, न तु गम्यते, ज्ञानान्तरेण इति स ब्रह्मरूपो रसः स्वं स्वयमेव प्रकाशयतीति तस्य स्वप्रकाशत्वं सुस्पष्टमेवेति बोध्यम्।

यथा घटज्ञानं स्वविषयीभूतं घटं प्रकाशयति, सः ज्ञानजन्यस्वप्रकाशतायां ज्ञानान्तरस्वरूपं प्रकाशान्तरं नापेक्षते। एवं यथा वा प्रदीपः स्वजन्यायां स्वप्रकाशतायां प्रदीपान्तरं नापेक्षते तथैव प्रकृतेऽपीदृश्येव गतिश्चिन्तनीया।

अयञ्च रसस्वरूप आत्मा चिन्मयः, अर्थात् आनन्दसंवलितज्ञानरूपः। अन्यज्ञेयपदार्थस्य स्पर्शेन तत्कालस्पर्शेन च सर्वथा शून्यः, यतो रसास्वादकाले ज्ञानान्तरस्याऽसत्त्वात्।

आनन्दरूपत्वादेव चायं ब्रह्मास्वादसहोदरः = ब्रह्मसाक्षात्कार सदृशः। ब्रह्मास्वादे केवलं ब्रह्मैव प्रतिभासते प्रकाशते च, अर्थात् स्वशरीरवदेकत्वेन अनुभूयते चेति भावः। यथा चेतनतत्त्वाऽऽत्मनः सर्वथा भेदावच्छिन्नोऽपि देहः "अहं गौरः" "अहं स्थूलः" इत्यत्राऽहन्त्वावच्छिन्नगौरत्वावच्छिन्नयोः, एवम् अहन्त्वावच्छिन्नस्थूलत्वावच्छियोरभेदावगाहिन्यां प्रतीतौ भेदोल्लेखाभावेन ज्ञायते। तथा प्रकृतेऽपि ब्रह्मास्वादसहोदरभूतोऽयं रसो द्वैतानवच्छिन्नत्वेन भेदानवच्छिन्नत्वेन च ज्ञातृज्ञानभेदोल्लेखाऽभावेनाऽनुभूयते।

घट-पटादिज्ञाने जायमाने जानामि-ज्ञानवान् इत्यत्र च यथा ज्ञातृज्ञानयोर्भेदः सुस्पष्टतयाऽवभासते ऽनुभूयते च। तथा प्रकृते भेदः कथमपि नाऽनुभूयते इति। तथा चोक्तम्—

सत्त्वोद्रेकादखण्डस्वप्रकाशानन्दचिन्मयः।
वेद्यान्तरस्पर्शशून्यो ब्रह्मास्वादसहोदरः ॥ २ ॥
लोकोत्तरचमत्कारप्राणः कैश्चित् प्रमातृभिः।
स्वाकारवदभिन्नत्वेनायमास्वाद्यते रसः ॥ ३ ॥

तत्रैव, सा० द० ३ परिच्छेदः, रसनिरूपणम्—

आलङ्कारिकैर्ज्ञानज्ञेयभूतपदार्थयोर्भेदाऽनङ्गीकारात् । इत्थञ्चाऽऽनन्दचमत्कार-स्वरूपत्वे सति विभावादिसमूहालम्बनज्ञानत्वं रसस्य लक्षणमिदं फलीभूतं भवतीति भावः ।

एवञ्च "रसो वै सः" इत्यादिश्रुतिवाक्येषु सर्वत्रैव रसपदेन ब्रह्मपरमात्माद्यपर-पर्यायो भगवानेव गृह्यते । तस्यैव च रसस्वरूपस्याऽऽत्मनो ब्रह्मणो नित्यः निरतिशय सच्चिदानन्दरूपत्वेन रसत्वं वक्तुं युज्यते ।

अस्यैव च रसस्वरूपस्य ब्रह्मणश्चेतनतत्त्वस्याऽऽत्मभूतस्य सर्वत्र वेदान्तप्रभृति-दर्शनेषु प्राधान्यं निश्चीयते, यतस्तस्य ब्रह्मणो नित्यनिर्दोषत्वात् नित्यनिरतिशयसच्चिदा-नन्दरूपत्वाच्च ।

प्रकारत्वानवच्छिन्नविशेष्यतावत्वेन च मुख्यत्वमपि, 'सत्यं ज्ञानमनन्तं ब्रह्म' इत्यादिना तस्यैव ब्रह्मणः सत्यत्वञ्चापि प्रमीयते ।

पाश्चात्यमनोविज्ञानाऽनुकूल्येन नहि कदाचित् कथञ्चित् रससिद्धान्तस्य सर्वतो-भावेन व्याख्यानं कर्तुं तादृशं रससिद्धान्तं वा स्वीकर्तुं कश्चित् विपश्चित् प्रभवति । पुण्यभूमिभूतस्यास्य भारतवर्षस्यैव खल्वयं रससिद्धान्तो वर्तते स्वीकृतो निधिभूत इति सर्वेऽपि विदाङ्कुर्वन्ति ।

अस्य रससिद्धान्तस्य दार्शनिकविचारैः सर्वथा समन्वितत्वेनाऽनुगतत्वेन च संस्कृतमहाकाव्येषु दार्शनिकी दृष्टिः साध्वी संगच्छते ।

रसश्चायं खल्वात्मतत्त्वभूतब्रह्मस्वरूप आनन्दस्वरूपः, चिद्रूपः, भेदत्रयशून्यत्वेन चाऽखण्डः, सर्वथा शान्तिभावमापन्नः, अत एव शान्तरसोऽपि गीयते ।

'अखण्डस्वप्रकाशानन्दचिन्मय'—तत्रैव—सा० द० तृ० प०

इत्यनेन श्रीविश्वनाथस्तथैव प्रतिपादितवान् । अपि च तत्रैव

'अतोऽस्य स्वप्रकाशत्वमखण्डत्वञ्च सिद्ध्यति'

तत्रैव श्लो० २८—

अन्यच्च नित्यत्व, शुद्धत्व, बुद्धत्व, सूक्ष्मत्व, कूटस्थत्व, असङ्गत्व, शान्तैकरसत्व, आनन्दैकरसत्व, सर्वप्रकाशकत्वादिधर्मैर्धर्मधर्मिभावमापन्नोऽपि सर्वथा निर्धर्मकोऽयं ब्रह्मरूपो रसः शान्तरसः ।

अयञ्च ब्रह्मरूपः शान्तोरसः सर्वोपाधिविनिर्मुक्तः सर्वथा परिपूर्णोऽनपेक्षितश्च सन् नहि सर्वेषामनुभूतिविषयीभूतो भवति, नापि भवितुमर्हति ।

अथश्च रसः सदसद्विवेकवैराग्यसंन्यासशमदमादिसम्पत्त्या, तीव्रमोक्षेच्छया, सद्गुरूपसम्पत्त्या प्राप्तुमर्हति नान्यथा ।

अयमपि च रसः ज्ञातृज्ञानभेदोल्लेखाभावेनाऽनुभूयते, अर्थात् यथा घटादिज्ञाने जाते 'जानामि' इत्येवंरीत्या ज्ञातृज्ञानभेदोऽवभासते तथा प्रकृते नैवमिति भावः ।

डॉ. राजेन्द्र प्रताप त्रिपाठी 'रजोला जी'

जन्म : ३०/०४/१९४८ ई.

माता : गोलोकवासी प्रातःस्मरणीया ँ शिवकली त्रिपाठी

पिता : गोलोकवासी पूज्यपाद ँ पण्डित भैयालाल त्रिपाठी
ग्राम + पोस्ट—गोहरारी, जिला-फतेहपुर (उ.प्र.)

परिवार परिचय : ज्येष्ठभ्राता पं. श्री रामकृष्ण त्रिपाठी, मध्यम भ्राता पं. श्री छोटेलाल त्रिपाठी, तृतीय-स्वयम्, सर्वमङ्गला पत्नी श्रीमती सुषमा त्रिपाठी, चतुर्थ भ्राता पं.श्री सुधरलाल त्रिपाठी, पञ्चम भ्राता पं. श्री शिवप्रसाद त्रिपाठी। सर्वज्जयेष्ठाभगिनी-तुलसी देवी।

प्रारम्भिक शिक्षा : प्रारम्भिक शिक्षा के गुरू पुण्यश्लोक गोलोकवासी ँ पं. सिताराम त्रिवेदी जी के चरणों में रखकर विद्याध्ययन।

शिक्षा : साहित्याचार्य, एम. ए. ग्रन्थालय विज्ञानशास्त्री

उपाध्यय : विद्यावारिधि (पी.एच.डी.) विद्यावाचस्पति (डि.लिट्.)

शिक्षास्थान : वाराणसेय संस्कृत विश्वविद्यालय, सम्प्रति-सम्पूर्णानन्द संस्कृतविश्वविद्यालय, वाराणसी पिन. २२१००२

सेवारत : प्रभारी विस्तार भवन, सरस्वती भवन पुस्तकालय, वाराणसी

व्यक्तित्व एवं कृतित्व : विगत ३५ वर्षों से नित्यप्रति प्रातः ३ से ५ बजे की वेला में दशाश्वमेधघट्टे पतितपावनी माँ गङ्गा की गोद में अवगाहन एवं निमज्जन तत्पश्चात् शिखरिणी छन्द से स्तोत्र पाठ करते हुए आराध्य विश्वेश्वर एवं माँ अन्नपूर्णा-दर्शन पूजन एवं पाठ।

छात्रावस्था से ही अद्यावधि विश्वविद्यालयीय समस्त कार्यक्रमों में माङ्गलिक श्लोकों द्वारा मङ्गलाचरण से कार्यक्रमों का शुभारम्भ कराना।

सम्पूर्णानन्दसंस्कृतविश्वविद्यालय द्वारा तीनवार अभिनन्दित किया गया है।

हिन्दी एवं संस्कृत में कविता की रचना एवं विविध कार्यक्रमों में पाठ करना सुमधुर कण्ठ से जनमानस को आह्लादित करना श्री त्रिपाठी 'रजोला जी' का नैसर्गिक गुण है। ग्रन्थ के मुद्रण एवं प्रकाशन तथा काव्यरचना में **'गङ्गाज्ञानमहोदधि'** सम्पादनकर्ता आचार्य **रमापद चक्रवर्ती** सहायक पुस्तकाध्यक्ष स.भ.पु. तथा सुश्री श्रीमधुश्रीवास्तव सुश्री श्री अनुपमा श्रीवास्तव एवं श्री विक्रमा पाण्डेय स.भ.पु. विस्तार भवन का अमूल्य सहयोग प्राप्त हुआ है।